ISSN 2250-1711

॥ सत्यं ज्ञानमनन्तम् ॥

# JOURNAL OF VEDA SAMSKRITA ACADEMY

# जर्नल् आफ् वेद संस्कृत अकाडेमि

Recognised in the UGC-CARE List

A NATIONAL PEER-REVIEWED RESEARCH JOURNAL

विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**VOLUME: XIX**

**January to June - 2022**

Editor in Chief

**DR. GOPALKRISHNA HEGDE**

[Jyotishashastra-Dharmashastra Vidwan]

**VEDA SAMSKRITA ACADEMY (Regd.)**

Formerly : Veda Samskrita Prasarinee Sabha (R.)

Regd. No. : DR : SOR : 108 : 2003-04, Dated : 30-10-2003

Registered under Societies Registration Act, of Karnataka-1960

**Registered office address :**

# 1347, Kalkod Road, **HEGDE-581330**, Kumta, Uttarakannada, Karnataka, India

E-mail ID : **vedasmkac@gmail.com**

Website : **www.vedasamskritaacademy.org**

| | | |
|---|---|---|
| Title of the Journal | : | **Journal of Veda Samskrita Academy**<br>Recognised in the UGC-CARE List<br>A National Peer-Reviewed Research Journal<br>**जर्नल् आफ् वेद् संस्कृत अकाडेमि**<br>विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता<br>मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका |
| **ISSN** | : | **2250-1711** |
| Editor & Publisher | : | **Dr. Gopalkrishna Hegde**<br>gopalkrishnh9@gmail.com<br>9741847399<br>Director,<br>Veda Samskrita Academy (Regd.)<br>Kalkod Road, HEGDE- 581330<br>Kumta, Uttara Kannada, Karnataka |
| web site | : | www.vedasamskritaacademy.org |
| E-mail | : | vedasmkac@gmail.com |


All rights are Reserved with the Publisher

" All opinion / views expressed in the research papers are of the authors only, no way they are ascribed to the Academy"


| | | |
|---|---|---|
| Languages | : | Samskrita, Kannada, English, Hindi |
| Imprint | : | Volume XIX, January to June – 2022 |
| Paper | : | 70gsm (B2B) and Art paper – 300gsm |
| Size of the Journal | : | A4 |
| Number of Pages | : | 259 + 12 + 4 (colour page) |
| Number of Copies | : | 200 |
| D. T. P. | : | Pavan Graphics, Hegde |
| Art works | : | Girish R. Bhat, Digital World |
| Printing & Binding | : | Shri Krishna Mudranalaya, Hegde |
| Price | : | **Rs. 500/-** |

# CONTENTS

## विषयसूची


| | | |
|---|---|---|
| | सम्पादकीयम् | VI |
| | PROLOGUE | VII |
| | ಮೊದಲಮಾತು | VIII |
| | EDITORIAL ADVISORY BOARD | IX |
| | वेद संस्कृत अकाडेमी का संक्षिप्त परिचय | X |
| | ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯ ಸಂಕ್ಷಿಪ್ತ ಪರಿಚಯ | XI |
| 1. | साहित्यशास्त्रसिद्धान्तानामवबोधने लौकिकदृष्टान्तानामुपयोगिता<br>Dr. M. Sudarshan Chiplunkar, Ernakulam, Kerala- 9692920245 | 1-4 |
| 2. | भारतीयाध्यात्ममार्गेषु मनःस्वरूपसमीक्षणम्<br>Dr. Amrita Ghosh, West Bengal- 9434188766 | 5-9 |
| 3. | वेदाङ्गछन्दसि तत्त्वार्थदर्शनम्<br>Venkata Subbaiah Bathula, Bengaluru, Karnataka- 9945125002 | 10-14 |
| 4. | अक्षरपुरुषोत्तमदर्शनालोके गीतोक्तायाः ब्रह्मस्थितेः तात्पर्यम्<br>Sadhu Gnannayandas, Gujarat - 9998995647 | 15-18 |
| 5. | देवप्रश्नस्य परिचयः<br>B. Nagarajan, Churu, Rajasthan - 6379254164 | 19-22 |
| 6. | आधुनिकसंस्कृतनाटकस्य स्वरूपनिर्धारणम्<br>Santanu Pradhan, Puducherry- 7384948850 | 23-24 |
| 7. | संस्कृतशब्दानां छात्राणां मस्तिष्के प्रभावः<br>Dr. Muralishm H., Thripunithura, Kerala- 7907181923 | 25-29 |
| 8. | ब्रह्म ह वै ब्राह्मणः – एका समीक्षा<br>Dr. Kamal Prasad Gautam, Guwahati, Assam- 8133813967 | 30-34 |
| 9. | सन्देशकाव्ये मेघदूतानुकरणेन शुकसन्देशः<br>Prabir Sarkar, Jadavpur, Kolkata, West Bengal- 8373030418 | 35-38 |
| 10. | स्वप्नवासवदत्तम् – राजात्वं च असीमप्रेमादर्शस्य एकं प्रामाणिकपत्रम्<br>Dr. Somnath Das, Kolkota, West Bengal- 6295679971 | 39-41 |
| 11. | महाभारतादिग्रन्थेषु गार्हस्थ्ये नारीणां महत्त्वम्<br>Dr. R. Shivkumaraswamy, Swarnavalli, Karnataka- 7353096127 | 42-44 |
| 12. | शारीरकमीमांसायाम् आतिवाहिकाधिकरणस्य विमर्शः<br>Karthik Sharma K, Ernakulam, Kerala- 8848480197 | 45-48 |
| 13. | पञ्चतन्त्रान्तर्गते अपरीक्षितकारके वैद्येभ्यः प्रस्तुताः नीतयः<br>Dr. Prashant Gaonkar, Belagavi, Karnataka- 9449623988 | 49-52 |
| 14. | रथघोषाधिकरणम्<br>Jagadisha S. M., Shivamogga, Karnataka- 9964455184 | 53-54 |
| 15. | गृहप्रेशमुहूर्तविचारः<br>Viveksheel Pathak, Jaipur, Rajasthan- 8988049665 | 55-58 |
| 16. | तात्पर्यार्थविमर्शः<br>Dr. Manmon Tivari, prayagaraj, Uttarapradesh - 8805095519 | 59-61 |
| 17. | नैषधचरितालोके वैदिकदेवस्य स्वरूपम्<br>Tumpa Jana, West Bengal- 9933482016 | 62-65 |
| 18. | शिक्षा सामाजिकविकासश्च<br>Dr. Venkatramana Bhat, Shringeri, Karnataka- 9483288784 | 66-68 |
| 19. | अभिनयदर्पणे तद्धितप्रयोगाः<br>Y. Shanmuga Priya Dharshini, Chennai, Tamil Nadu- 9566182534 | 69-70 |

| | | |
|---|---|---|
| 20. | वेदोक्तदिशा समाजे सौहार्दतायाः पालनम्<br>Mr. Ganesh Bhat, Hariyana- 9008691205 | 71-75 |
| 21. | अद्वैतामोददिशा अविद्यायाः सप्तविधानुपपत्तिनिरसनम् उपपत्तिसमर्थनञ्च<br>Mrudula V.V., Kerala- 7012753462 | 76-79 |
| 22. | मीमांसादर्शने कर्मसिद्धान्तः – एकम् अध्ययनम्<br>Loopamudra Goswami, Assam- 7896748106 | 80-84 |
| 23. | वैष्णवदर्शनेषु अचिन्त्यभेदाभेददर्शनस्य स्थानम्<br>Saibal Acharya, Belur Math, West Bengal- 9875366501 | 85-89 |
| 24. | शब्दशास्त्राभिमतलडर्थस्वरूपम्<br>Sankha Subhra Gachchhit, West Bengal- 9123020789 | 90-95 |
| 25. | भारतीयतायाः सन्मूलं हि परिवारपद्धतिः<br>Dr. R. Suresha, Mysuru, Karnataka- 9980833466 | 96-98 |
| 26. | नवराष्ट्रियशिक्षानीतिः संस्कृतक्षेत्रानुकूलता च<br>Dr. Ganesh T. Pandit, Jaipur, Rajasthan- 9449103568 | 99-101 |
| 27. | काश्मीरशैवाचार्यरामकण्ठकृतसर्वतोभद्रविवरणाख्ये गीताव्याख्याने योगस्वरूपविमर्शः<br>Arupam Sanyal, Belur Math, West Bengal- 9434139084 | 102-105 |
| 28. | शब्दस्य सामर्थ्यद्वयनिरूपणम्<br>Dr. P. R. Archana Karanth , Bengaluru, Karnataka- 9481904228 | 106-109 |
| 29. | योगदर्शनमतरीत्या मनः<br>Dr. Bhaskar Bhatt Joshi, KSU, Bengaluru, Karnataka- 9742269403 | 110-114 |
| 30. | महाभारतकालीननारी<br>Dr. Neema Joshi, Uttarakhand- 7533985307 | 115-118 |
| 31. | मीमांसकमते देवता<br>Dr. Manjunatha Bhat, Bengaluru, Karnataka- 9483824050 | 119-122 |
| 32. | वेदाध्ययनपद्धतिः<br>L. Jayasimha, Bengaluru, Karnataka- 9448568642 | 123-125 |
| 33. | श्रीकृष्णप्रसाद् शर्मा कृत 'श्रीकृष्णचरितामृतम् महाकाव्य' में कृष्ण जन्मोत्सव<br>Dr. Priyankkumar Raval, Gujarath- 7984896914 | 126-130 |
| 34. | पुराणो में श्रीमद् भागवत का स्थान और महत्त्व<br>Pramar Vinod Kumar, Uttarakhanda- 9510109868 | 131-135 |
| 35. | Kaiyadeva Nighantu : An unexplored Ayurveda treatise on medicinal drugs, food and lifestyle advice<br>Dr. Amal S. Chaandran, Belagavi, Karnataka- 7907113985 | 136-140 |
| 36. | Practice of 'Svadhyaya' from vedic educational philosophy and metacognition<br>Pratisha Padmasri Deka, Assam- 9859801454 | 141-143 |
| 37. | Concet of karana in Indian philosophy with special reference to Ramakrishna Bhatta's Tarkchandrika<br>Kushal Kumar Khajanchi , Tripura- 9062145168 | 144-148 |
| 38. | Indian Model of Communication: Towards Lokasangraha (Welfare of the society)<br>Dr. Ashima Shrawan, Haridwar, Uttarakhand- 9719393463 | 149-152 |
| 39. | Characteristics of mystical experience with special reference to ACHARYA NĀGĀRJUNA<br>Ashokan V M., Kerala- 8129192708 | 153-157 |
| 40. | Mahatma Gandhi's Freedom Struggle for India as Reflects in Raja Rao's Kanthapura: A Indian Phenomenon Novel<br>J. Ambika, Tamil Nadu- 7305624865 | 158-160 |

| | | |
|---|---|---|
| 41. | The problem of purusa-prakrti interaction in samkhya and its inevitability<br>Dr. Rajeevan E, Kerala- 9495811886 | 161-165 |
| 42. | Indian Cultural Heritage and its Transnational Transaction : A Philosophical Investigation<br>Dr. Nasiruddin Mondal, West Bengal- 9434229410 | 166-170 |
| 43. | Book review on Kakachandeeswara Kalpa Tantram<br>Dr. Gopikrishnan. P. T., Kerala- 8301927520 | 171-174 |
| 44. | Mapping the Arena of Divine and Toxic Love: A Mythical Re-interpretation of Madhav & Tulsi in K R Meera's *The Poison of Love*<br>Seba Susan John, Thanjavur, Tamil Nadu- 9497187902 | 175-177 |
| 45. | Importance of Appaya's Commentary: In the light of Śāktopaniṣad<br>Dr. Deepashree Mondal, West Bengal- 9614136506 | 178-181 |
| 46. | Transcending gender and moralities of equality : A critical study of Deshpande's roots and shadow<br>T.Vijaya M. A., Tamil Nadu- 9865680337 | 182-184 |
| 47. | Panchatantra & Ukraine War [ A comparative study ]<br>Dr. Geetha R., Bengaluru, Karnataka- 9886540824 | 185-187 |
| 48. | Cultural Imbroglio, Ecological Downfall, and Conflict of Social System in the Select Novels of Amitav Ghosh's Fiction<br>K. Divya, Tamil Nadu- 9994742670 | 188-191 |
| 48. | Ayurveda Darsana- A Unique Independent School of Thought- A Conceptual Review<br>Dr. Devi M, Kerala- 8921292326 | 192-196 |
| 49. | A Book Review on Anjana Nidanam<br>Dr. Keerthi P. Kerala- 9538728637 | 197-200 |
| 50. | Mapping Urali Culture: A Socio-Historical Pursuit<br>Veena R. Nair, Kerala- 8086879090 | 201-204 |
| 51. | Role of Kala as a Vyadhihetu in Shiftworkers<br>Dr. Lekshmy M L, Amritapuri, Kerala- 9496370181 | 205-210 |
| 52. | Depict the environmentala aesthetics and negotiation of mankind in the selective modern nigerian poetry<br>Keerthana K, Kerala- 9442805945 | 211-214 |
| 53. | Socio-Cultural Discernment of Visual Clues in *Munthirivallikal Thalirkkumbol*<br>T. P. Remadevi, Tamil Madu- 9497061237 | 215-218 |
| 54. | *Saṁbhūya-Samutthāna* : Hindu Law of Partnership<br>Dr. Anagha Joshi, Pune, Maharashtra- 9850642768 | 219-221 |
| 55. | Significance of Utsargapavada Nyaya in Understanding the Ayurvedic Concepts of Charaka Samhita in Context to Ayurveda Deepika commentary of Chakrapani<br>Samar Kumar Parhi, Ph. D. Scholar, University of Hyderabad, 7735365383 | 222-225 |
| 56. | ಶಿವತತ್ವ ರತ್ನಾಕರ ಒಂದು ಕೋಶಗ್ರಂಥ<br>Nagesh S. Dongare, M.A., K.E.S., Shivamogga, Karnataka- 9448775992 | 226-230 |
| 57. | ಋಗ್ವೇದದಲ್ಲಿ ವಿದ್ಯೆಯ ಮಹತ್ವ<br>Dr. Ishwar Prasad A., Hasan, Karnataka - 9900766285 | 231-235 |
| 58. | ಕಾಳಿದಾಸನ ಕಾವ್ಯಗಳಲ್ಲಿ ಸೂಕ್ತಿಗಳು<br>Vidushi Savitri Pujari, Bengaluru, Karnataka- 9972835365 | 236-239 |
| 59. | ಭಗವದ್ಗೀತೋಪದೇಶದ ಉದ್ದೇಶ ಮತ್ತು ಮಹತ್ವ<br>Vidwan R. Jagannatha Pujar, Bengaluru, Karnataka- 9036143822 | 240-243 |
| 60. | ಧರ್ಮಶಾಸ್ತ್ರದಲ್ಲಿ ಸ್ತ್ರೀ ಸ್ವಾತಂತ್ರ್ಯ – ಒಂದು ವಿವೇಚನೆ<br>Vidwan Ganapati Bhat, Mysuru, Karnataka- 9449979609 | 244-247 |
| 61. | ಲಿಪಿಯ ಪ್ರಾಚೀನತೆ<br>Dr. Ramakrishna Bhat K, Bengaluru, Karnataka- 9844741855 | 248-250 |
| 62. | चान्द्रयोगानां निरूपणं तेषां वैशिष्ट्यञ्च<br>Prof. Ishwar Bhat, Jaipur, Rajasthan, 7976639119 | 251-259 |


**********

# सम्पादकीयम्

इदमत्र सामोदं निवेद्यते यत्- **'वेद संस्कृत अकाडेमी'** द्वारा गतेषु नवसु वर्षेषु अष्टादश संशोधनपत्रिकाः लोकाय समर्पिताः ; यत्र च संस्कृत-आङ्ग्ल-हिन्दी-कन्नडभाषासु चतसृषु विविधशास्त्र-कलादि सम्बद्धानि संशोधनलेखनानि उपनिबद्धानि बभूवुः ।

इदमपि परं प्रमोदस्य निदानं यत्- २०२२ मार्च मासि शिवमोग्गनगरस्थे कुवेम्पु विश्वविद्यालयस्य स्नातकोत्तरसंस्कृताध्ययन-संशोधनविभागेन सह्याद्रिकालेज् परिसरे **डा. एम्. ए. श्रुतिकीर्ति** महोदयानां नेतृत्वे दिनद्वयात्मिका राष्ट्रियसङ्गोष्ठी सुसम्पन्नाः यानि च संशोधनलेखनानि अकाडेमि द्वारा विशेषपत्रिकारूपेण प्रकटितानि अद्यापि उपलभ्यते ।

इदमपरं निवेदनीयमस्ति यत्- मैसूरुनगरस्थेन **'माता अमृतानन्दमयी'** शिक्षणसंस्थायां अध्यापकेन सता **डा. विघ्नेश्वर भट्टाख्येन** विदुषा, एवमेव **डा. श्रीकान्त परिदा** विदुषा च **M. C. A.** विभागद्वारा **E-Journal** प्रकटिता विशेषसञ्चिका (पत्रिका) वेद संस्कृत अकाडेमि **'Web-site'** मध्ये उपलभ्यते इति सन्तोषमनुभवामः ।

सा चेयं विशेषपत्रिका पत्रिकायाः प्रधानसम्पादकस्य **डा ॥ गोपालकृष्ण हेगडे** महोदयस्य तीर्थरूपाणां, ज्योतिष-धर्मशास्त्रादिशास्त्रेषु अकुण्ठमतीनां दिवङ्गतानां **"गणपति कुप्पय्य हेगडे"** महाभागानां **"जन्मशताब्दि"** निमित्ता **'वेद संस्कृत अकाडेमि'** **E-Journal** नाम्ना **'Web-site'** मध्ये उपलभ्यते ।

अस्मिन् एकोनविंशतितमे (१९) सम्पुटे आहत्य **द्विषष्टि (62)** लेखनानि प्रकाशितानि इति सामोदं प्रकटयामः ।

यथापूर्वं ससन्तोषं लेखनपरिशीलनपुरस्सरं पत्रिकायाः प्रकटनयोग्यतामापादितवतां **१) प्रो. एन्. लक्ष्मीनारायण भट्टाः** (उडुपि), **२) प्रो. रामचन्द्र भट्टाः** (शिरसि), **३) प्रो. शङ्कर भट्टाः** (स्वर्णवल्ली), **४) प्रो. नारायण आचार्याः** (तिरुपति), **५) डा. जि. एल्. हेगडे** (कुमटा), **६) डा. यु. जि. शास्त्री** (हेगडे), **७) डा. नागराज भट्टाः** (होलनगद्दे) इत्येतेषां कृते हार्दान्यभिवन्दनानि नितरां समर्प्यन्ते ।

डि.टि.पि. कार्यं सकाले विदधतः पवन कुमार हेगडे महोदयस्य, मुखपुटविन्यासकस्य श्री गिरीश आर्. भट्टानां, श्रीकृष्ण मुद्रणालयस्य श्री शङ्कर हेगडे महोदयस्य, पवन ग्राफिक्स् समेषां धन्यवादाः नूनं समर्प्यन्ते ।

हेगडे

१५-०८-२०२२

(स्वातन्त्र्यस्य अमृतमहोत्सवकालः)

**सम्पादकः**

[सम्पादकसमितिपरतया]

*******

# PROLOGUE

Our research journal of Veda Samskrita Academy has already completed its early childhood days successfilly. Naturally in early childhood teething problem is common. Similarly, we too have been able to over-come all such problems or difficulties by the grace of almighty Pashupati and Gurus, elders and well-wishers. Already we have published eighteen volumes and ninteenth volume is being placed in the hands of learned readers. For all this achivement co-operation, help and the guidance of the Advisory Board and Editorial Board is quite praiseworthy. I am very much grateful to all the members of both these Boards.

Department of Studies and Research in Samskrita of Kuvempu University, Shivamogga, Headed by **Dr. M.A.Shrutikeerti** conducted Two days National Seminer on **"संस्कृतसाहित्ये स्वास्थ्यरक्षणम्; तस्य प्रस्तुतता च"** topic, in the month of March, 2022. Selected papers presented in the Seminar are published in Academy's Special Volume. Copies are available in the Academy.

Academy decided to bring a special volume during the birth centenary year of its founder Late, RigVeda, Jyotishashastra and Dharmashastra Vidwan Shri **Ganapati Kuppayya Hegde**. Infact, he is the father of our chief editor **Dr. Gopalkrishna Hegde**. Editorial Board decided to bring this Volume in soft-form. This Special Volume is our first **E-journal**. This **E-journal** is the out-come of the efforts of samskrita professors **Dr. Vighneshwar Bhat** and **Dr. Shrikant Parida** and the initiative taken by the **Students of M.C.A.** Department of esteemed institution Matha Amrutananda mayi, Mysore Campus. This **E-journal** is available in Academy's Web-site. Interesred readers and researhers may go through it.

In this 19th volume, selected **sixty two** (62) articles are published. Majority articles are related to art, artitecture, human values and our culture and tradition. Most of the articles are in Samskrita and English; a few articles are in Hindi and regional language Kannada. Interested readers are requested to go through these articles and may give their sincere opinion/feedback.

Honourable members of editorial board especially 1) **Prof. N. Laxminarayana Bhat** (Udupi), 2. **Prof. Ramachandra Bhat**, (Sirsi), 3) **Prof. Shankara Nagesha Bhat,** Baligadde, (Swarnavalli Math), 4) **Dr. U. G. Shastri** (Hegde) 5) **Dr. G. L. Hegde** (Kumta), 6) **Prof. Narayan Acharya** (Tirupati), 7) **Dr. Nagaraja G. Bhat** (Holanagadde, Kumta), have rendered their valuable service in editing these articles. We are greatful to all these dignitaries for their co-operation and service.

We are greatful to **Pavan Hegde** for his timely DTP work. Similarly our heartly gratitude to **Girish R. Bhat**, who has designed the cover-page beautifully and our thanks to Pavan Graphics and Shree Krishna Mudranalaya, Hegde.

Hegde

15th Aug. 2022
(Azadi ka Amrutmahotsava)

**Editor in Chief**

[On Behalf of Editorial Board]

********

# ಮೊದಲಮಾತು

ನಮ್ಮ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆ ಬಾಲ್ಯಾವಸ್ಥೆಯನ್ನು ಮುಗಿಸಿ ಕೌಮಾರಾವಸ್ಥೆಗೆ ಪಾದಾರ್ಪಣೆ ಮಾಡಿದೆ ಎಂದೆನ್ನಬಹುದು. 18 ಎಂಬ ಸಂಖ್ಯೆಯನ್ನು ದಾಟಿ 19 ನೇ ಸಂಖ್ಯೆಯ ಸಂಪುಟವನ್ನು ಸಾರಸ್ವತ ಸಮಾಜಕ್ಕೆ ನೀಡುತ್ತಾ ಇದ್ದೇವೆ. ನಮ್ಮ ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯಲ್ಲಿ 18 ಸಂಖ್ಯೆಗೆ ಎಷ್ಟು ಮಹತ್ವ ಇದೆ ಎನ್ನುವುದನ್ನು ಸಾಮಾನ್ಯ ಜನರೂ ತಿಳಿದೇ ಇದ್ದಾರೆ.

ಸಾಮಾನ್ಯವಾಗಿ 8 ವರ್ಷ ಕಳೆದ ಮೇಲೆ ಮಗು ಕೌಮಾರಾವಸ್ಥೆಯನ್ನು ಹೊಂದುತ್ತಾ ಇದೆ ಎಂದು ತಿಳಿಯುತ್ತಾರೆ. ಮಕ್ಕಳಿಗೆ ಬಾಲಗ್ರಹಾದಿ ದೋಷಗಳು ಬಾಧಿಸುವುದು ಸಾಮಾನ್ಯವಾಗಿ 8 ವರ್ಷದೊಳಗೆ. ಪಶುಪತಿಯ ಅನುಗ್ರಹ ಮತ್ತು ಗುರುಗಳ ಆಶೀರ್ವಾದಗಳಿಂದ ಸಮರ್ಥವಾಗಿ 9 ವರ್ಷಗಳನ್ನು ಪೂರೈಸಿದೆ ಮತ್ತು 18 ಸಂಪುಟಗಳನ್ನು ಲೋಕಾರ್ಪಣೆ ಗೊಳಿಸಿದೆ ಎನ್ನುವುದು ಅತಿಶಯೋಕ್ತಿ ಮಾತಲ್ಲ ಎನ್ನುವುದು ನನ್ನ ಅಭಿಮತವಾಗಿದೆ. ಇದಕ್ಕೆಲ್ಲಾ ಹೆಗಲಿಗೆ ಹೆಗಲು ಕೊಟ್ಟು ಕೈಜೋಡಿಸಿದ ಎಡ್ವೈಸರಿ ಬೋರ್ಡಿನ ಸದಸ್ಯರೆಲ್ಲರೂ ಅಭಿನಂದನಾರ್ಹರಾಗಿದ್ದಾರೆ.

2022 ಮಾರ್ಚ ತಿಂಗಳಿನಲ್ಲಿ ಶಿವಮೊಗ್ಗದ ಕುವೆಂಪು ವಿಶ್ವವಿದ್ಯಾಲಯದ ಸ್ನಾತಕೋತ್ತರ ಸಂಸ್ಕೃತ ಅಧ್ಯಯನ ಮತ್ತು ಸಂಶೋಧನಾ ವಿಭಾಗ, ಶಿವಮೊಗ್ಗದ ಸಹ್ಯಾದ್ರಿ ಕಾಲೇಜಿನ ಪರಿಸರದಲ್ಲಿ **ಡಾ. ಎಮ್. ಎ. ಶ್ರುತಿಕೀರ್ತಿ**ಯವರ ಮುಂದಾಳತ್ವದಲ್ಲಿ ಎರಡು ದಿನದ ರಾಷ್ಟ್ರಮಟ್ಟದ ಸಂಗೋಷ್ಠಿಯನ್ನು ಏರ್ಪಡಿಸಿತ್ತು. ಅಲ್ಲಿ ಪ್ರಸ್ತಾಪಿದವಾದ ಸಂಶೋಧನ ಲೇಖನಗಳನ್ನು ವಿಶೇಷ ಸಂಪುಟದಲ್ಲಿ ನಮ್ಮ ಅಕಾಡೆಮಿಯ ಸಹಯೋಗದೊಂದಿಗೆ ಪ್ರಕಟಿಸಲ್ಪಟ್ಟಿದೆ. ಪತ್ರಿಕೆ ಅಕಾಡೆಮಿಯಲ್ಲಿ ಲಭ್ಯವಿದೆ.

ನಮ್ಮ ಪತಿಕೆಯ ಪ್ರಧಾನ ಸಂಪಾದಕರಾದ **ಡಾ. ಗೋಪಾಲಕೃಷ್ಣ ಹೆಗಡೆ**ಯವರ ತೀರ್ಥರೂಪರಾದ ಋಗ್ವೇದ ಮತ್ತು ಜ್ಯೋತಿಷಶಾಸ್ತ್ರ ಹಾಗೂ ಧರ್ಮಶಾಸ್ತ್ರ ವಿದ್ವಾಂಸರಾದ **ದಿ. ಗಣಪತಿ ಕುಪ್ಪಯ್ಯ ಹೆಗಡೆ**ಯವರ ಜನ್ಮ ಶತಾಬ್ದಿಯ ನಿಮಿತ್ತ ಒಂದು ವಿಶೇಷ ಸಂಪುಟವನ್ನು ಲೋಕಾರ್ಪಣೆ ಮಾಡಬೇಕೆಂದು ನಮ್ಮ ಸಂಸ್ಥೆ ನಿಶ್ಚಯಿಸಿತು. ಇದು ಸಂಪೂರ್ಣ ಸಾಫ್ಟ್ ರೂಪದಲ್ಲಿ ಇರಬೇಕೆಂದು ತೀರ್ಮಾನಿಸಿತು. ಈ ಸಂಪುಟವು ಜರ್ನಲ್ ಆಫ್ ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯ **E-Journal** ಆಗಿರುತ್ತದೆ.

ಈ **E-Journal** ಮೈಸೂರಿನ ಮಾತಾ ಅಮೃತಾನಂದಮಯಿ ಶೈಕ್ಷಣಿಕ ಸಂಸ್ಥೆಯ ಸಂಸ್ಕೃತ ಅಧ್ಯಾಪಕರಾದ **ಡಾ. ವಿಘ್ನೇಶ್ವರ ಭಟ್ಟ** ಹಾಗೂ **ಡಾ. ಶ್ರೀಕಾಂತ ಪರಿದಾ** ಮತ್ತು **M.C.A.** ವಿಭಾಗದಲ್ಲಿ ವ್ಯಾಸಂಗ ಮಾಡುತ್ತಿರುವ ವಿದ್ಯಾರ್ಥಿಗಳ ಸಹಕಾರದಿಂದ ಪ್ರಕಟಣೆಗೊಂಡಿದೆ ಎಂಬ ವಿಚಾರವನ್ನು ತಮ್ಮ ಮುಂದೆ ಪ್ರಸ್ತಾಪಿಸಲು ತುಂಬಾ ಹೆಮ್ಮೆ ಎನಿಸುತ್ತಿದೆ. ಈ **E-Journal** ನಮ್ಮ ಅಕಾಡೆಮಿಯ ವೆಬ್ ಸೈಟಿನಲ್ಲಿ ಉಪಲಬ್ಧವಿದೆ. ಆಸಕ್ತರು ನೋಡಬಹುದು.

ಪ್ರಕೃತ ಲೋಕಾರ್ಪಣೆಗೊಳ್ಳುತ್ತಿರುವ 19 ನೇ ಸಂಪುಟದಲ್ಲಿ **62** ಲೇಖನಗಳು ಪ್ರಕಟವಾಗುತ್ತಿವೆ ಎಂದರೆ ನಮ್ಮ ಪತ್ರಿಕೆಯ ಮಹತ್ವವನ್ನು ಈ ಮೂಲಕವೇ ತಾವು ಊಹಿಸಬಹುದಾಗಿದೆ. ಸಂಸ್ಕೃತ, ಹಿಂದಿ, ಇಂಗ್ಲೀಷ, ಕನ್ನಡ ಈ ನಾಲ್ಕೂ ಭಾಷೆಗಳಲ್ಲಿನ ಲೇಖನವನ್ನು ಪ್ರಕಟಿಸುತ್ತಿದ್ದೇವೆ. ಬಹುತೇಕವಾಗಿ ಕಲೆ ಮತ್ತು ಮಾನವೀಯ ಮೌಲ್ಯಗಳನ್ನು ಎತ್ತಿ ಹಿಡಿಯುವ ಲೇಖನಗಳಾಗಿವೆ. 70 ಕ್ಕೂ ಹೆಚ್ಚಿನ ಲೇಖನಗಳು ಬಂದಿತ್ತಾದರೂ ಸಂಪಾದಕ ಮಂಡಳಿಯಲ್ಲಿ ಚರ್ಚಿಸಿ, **62** ಲೇಖನಗಳನ್ನು ಮಾತ್ರ ಪ್ರಕಾಶಿಸುತ್ತಿದ್ದೇವೆ.

ಲೇಖನಗಳನ್ನು ಪರಿಶೀಲಿಸಲು ಉಡುಪಿಯ ನಿವೃತ್ತ ಪ್ರಾಂಶುಪಾಲರಾದ **ಪ್ರೊ. ಎನ್. ಲಕ್ಷ್ಮೀನಾರಾಯಣ ಭಟ್ಟರು,** ಉಮ್ಮಚಗಿಯ ನಿವೃತ್ತ ಪ್ರಾಂಶುಪಾಲರಾದ **ಪ್ರೊ. ರಾಮಚಂದ್ರ ಭಟ್ಟರು,** ಸ್ವರ್ಣವಳ್ಳಿಯ ಅದ್ವೈತ ವೇದಾಂತ ಪ್ರಾಧ್ಯಾಪಕರಾದ **ಪ್ರೊ. ಶಂಕರ ನಾಗೇಶ ಭಟ್ಟ,** ಬಾಲಿಗದ್ದೆಯವರು, ತಿರುಪತಿಯ ದ್ವೈತ ವೇದಾಂತ ವಿಭಾಗದ ಪ್ರಾಧ್ಯಾಪಕರಾದ **ಪ್ರೊ. ನಾರಾಯಣ ಆಚಾರ್ಯರು,** ಕುಮಟಾದ ನಿವೃತ್ತ ಕನ್ನಡ ಪ್ರಾಧ್ಯಾಪಕರಾದ ಮತ್ತು ಕರ್ನಾಟಕ ಯಕ್ಷಗಾನ ಅಕಾಡೆಮಿಯ ಅಧ್ಯಕ್ಷರಾಗಿರುವ **ಪ್ರೊ. ಜಿ. ಎಲ್. ಹೆಗಡೆಯವರು,** ಹೆಗಡೆಯ .ನಿವೃತ್ತ ಪ್ರಾಂಶುಪಾಲರಾಗಿರುವ **ಪ್ರೊ. ಯು. ಜಿ. ಶಾಸ್ತ್ರಿಯವರು,** ಹೊಲನಗದ್ದೆಯ ಖ್ಯಾತ ಆಯುರ್ವೇದ ವೈದ್ಯರಾಗಿರುವ **ಡಾ. ನಾಗರಾಜ ಭಟ್ಟರು** ಸಹಕರಿಸಿರುತ್ತಾರೆ. ಅವರೆಲ್ಲರೂ ಅಭಿನಂದನಾರ್ಹರು. ಅವರ ಸೇವೆಯನ್ನು ಮುಕ್ತಕಂಠದಿಂದ ಶ್ಲಾಘಿಸುವುದಲ್ಲದೇ, ಹೃತ್ಪೂರ್ವಕವಾಗಿ ಧನ್ಯವಾದಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಸಕಾಲದಲ್ಲಿ ಡಿ.ಟಿ.ಪಿ. ಮಾಡಿಕೊಟ್ಟ ಕುಮಾರ ಪವನ ಹೆಗಡೆಯವರಿಗೂ, ಮುಖಪುಟದ ವರ್ಣವಿನ್ಯಾಸ ಮಾಡಿಕೊಟ್ಟ ಶ್ರೀಗಿರೀಶ ಆರ್. ಭಟ್ಟರಿಗೂ, ಅಂದವಾಗಿ ಮುದ್ರಿಸಿಕೊಟ್ಟ ಪವನ್ ಗ್ರಾಫಿಕ್ಸ್ ಮತ್ತು ಪುಸ್ತಕವನ್ನು ಅಂದವಾಗಿ ಜೋಡಿಸಿ, ಸಿದ್ಧಗೊಳಿಸಿ ಕೊಟ್ಟ ಶ್ರೀಕೃಷ್ಣ ಮುದ್ರಣಾಲಯದ ಶ್ರೀಶಂಕರ ಹೆಗಡೆಯವರಿಗೂ ಹೃತ್ಪೂರ್ವಕ ಧನ್ಯವಾದಗಳು.

ಸ್ಥಳ : ಹೆಗಡೆ
ದಿನಾಂಕ : **15-08-2022 (ಆಜಾದಿ ಕಾ ಅಮೃತಮಹೋತ್ಸವ)**

**ಸಂಪಾದಕರು**

[ಸಂಪಾದಕ ಮಂಡಳಿಯ ಪರವಾಗಿ]

*******

## EDITORIAL ADVISORY BOARD


| | |
|---|---|
| **Dr. Gopakrishna Hegde, Hegde**<br>JyotishaShastra & Dharma Shastra Vidwan<br>Mobile : 9741847399<br>E-mail : gopalkrishnh9@gmail.com | **Editor in Chief**<br>Director, Veda Samskrita Academy (Regd.)<br># 1347, Kalkod Road, HEGDE-581330<br>Kumta, Uttarakannada, Karnataka |


## BOARD OF EXPERTS AND REFEREES


| | |
|---|---|
| **Prof. Viroopaksha V. Jaddipal, Ujjain**<br>Mobile : 9440002813<br>E-mail : vvjaddipal@gmail.com | **Secretary,**<br>Maharshi Sandipani Rashtriya Vedavidya Pratishthan<br>Vedavidya Marg, Chintaman Ganesh,<br>P.O. : Jawasiya-456006, Ujjain, Madhyapradesha |
| **Prof. A. Sripad Bhat, Tirupati**<br>Mobile : 6304245946<br>E-mail : jyo_sripada@yahoo.com | **Professor,** Department of Jyotisha,<br>National Sanskrit University, Tirupati-517507,<br>Andhrapradesha |
| **Prof. N. Laxminarayana Bhatta, Udupi**<br>Mobile : 9481750414<br>E-mail : nlbhat.narasipura@gmail.com | **Rtd. Principal,**<br>S.M.S.P. Samskrita College,<br>Udupi-576101, Karnataka |
| **Prof. Ramachandra Bhat, Sirsi**<br>Mobile : 9480019152<br>E-mail : rnbsurabhi@gmail.com | **Rtd. Principal** 'SURABHI' # : 6, Ist cross, Mahalaxmi Layout, P.O. : N.M.Yard- 581402, Hubli Road, Sirsi Uttarakannada, Karnataka |
| **Prof. Shankar Nagesha Bhat, Baligadde**<br>Mobile : 9480954301<br>E-mail : sbaligadde62@gmail.com | **Professor,** Dept. Of Advaita Vedanta Shastra<br>Samskrita College, Swarnavalli Matha, P.O. : Mathadevala-581336, Sirsi, Uttarakannada, Karnataka |
| **Prof. Venkataramana Hegde, Mysuru**<br>Mobile : 9480476144<br>E-mail : vhegde1968@gmail.com | **Professor,** Dept. Of Dharma Shastra,<br>Govt. Maharaja Samskrita College,<br>New Sayyajirao Road, Mysuru-570024, Karnataka |
| **Dr. U. G. Shastri, Hegde**<br>Mobile : 9449992160<br>E-mail : ugshastri260391@gmail.com | **Rtd. Principal**<br>'Manasa' Pancharabena, P.O. : HEGDE-581330<br>Kumta, Uttarakannada, Karnataka |
| **Dr. G. L. Hegde, Kumta**<br>Mobile : 9448441190<br>E-mail : glhegde@gmail.com | **Rtd. Professor,**<br>President, Govt. of Karnataka Yakshagana Academy<br>Research Guide, Kannada Vishwa Vidyalaya, Hampi<br>'Amrutavarshini' Manaki, Kumta-581343,<br>Uttarakannada, Karnataka |
| **Dr. Narayan Pujar, Tirupati**<br>Mobile : 9490077161<br>E-mail : nspm12@gmail.com | **Professor,** Dept. Of Dvaita Vedanta Shastra<br>National Sanskrit University, Tirupati-517507,<br>Andhrapradesha |
| **Dr. Nagaraja G. Bhat, Holanagadde**<br>Mobile : 9535668177<br>E-mail : nagarajayu@gmail.com | **'Shreenaga Ayurdhama'**<br>Holanagadde-581351,<br>Kumta, Uttarakannada, Karnataka |
| **Dr. Bhaskar Bhat, Joshi, Bengaluru**<br>Mobile : 9742269403<br>E-mail : joshi.bhat@gmail.com | **Professor,** H.O.D. of Nyaya Vaisheshika<br>Karnataka Samskrita University, Chamaraja Pete-560018,<br>Bengaluru, Karnataka |
| **Dr. Vighneshwar Bhat, Mysuru**<br>Mobile : 9449677863<br>E-mail : vigneshwarbhat@ymail.com | **Assistant Professor,** International Centre for Spiritual Studies & Dept. of Languages, Amrita Vishwa Vidyapeetham**,** Mysuru Campus, # 114, 7th cross, Ring Road, Bogadi 2nd stage,Mysuru - 570026, Karnataka |

# वेद् संस्कृत अकाडेमि का संक्षिप्त परिचय

* वेद् संस्कृत अकाडेमि (पं) 2003 में **Karnataka Sociaties Registration Act-1960** के तहत पंजीकृत एक गैर सरकारी संघटन **(NGO)** है ।
* 2003 में **"वेद् संस्कृत प्रसारिणी सभा"** के नाम से पंजीकृत इस संस्था को 2011 में **"वेद् संस्कृत अकाडेमि"** नाम से अधिकृत रूप से परिवर्तित किया है ।
* इस अकाडेमि ने नई दिल्ली के **NISCAER** नामक सरकारी प्राधिकरण से अधिकृत रूप से **ISSN** संख्या को 2011 में पाया है और वह संख्या **ISSN 2250-1711** है ।
* अकाडेमि ने सन् 2013 से शुरु करके अभीतक सालाना **2** बार **(Bi-annual) "Journal of Veda SamskritaAcademy"** के नाम से राष्ट्रिय संशोधना पत्रिका प्रकाशित करते आरहे है ।
* यह राष्ट्रिय संशोधना पत्रिका **National Peer-Reviewed Research Journal** है ।
* अकाडेमि में समर्थ एवं विषयतज्ञों की सलहकार बोर्ड है ।
* अकाडेमि को वेद्, वेदांग, पुराण, इतिहास, आयुर्वेद्, योग, शिक्षणशास्त्र **(Education), Arts & Humanities** इत्यादि विषयों से संबंधित लेखनों को प्रकाशित करने की अनुमति प्राप्त है ।
* इस पत्रिका में प्रकाशन हेतु संस्कृत/कन्नड/हिन्दी/अंग्रेजी भाषाओं में अपना लेख दे सकते हैं ।
* अकाडेमि द्वारा अभी तक **18** संपुट लोकार्पण हुआ है जिन में अलग-अलग विषयों से संबंधित **375** से भी ज्यादा लेखन प्रकाशित हैं ।
* गौरवपूर्वक एवं गर्व से हम प्रकट कर रहे हैं कि वेद संस्कृत अकाडेमि द्वारा प्रकाशित होनेवाला **"Journal of Veda Samskrita Academy"** नामक संशोधनात्मक पत्रिका का नाम 2021 अक्टोबर से जारी में आने को **UGC-CARE List** में जुडा है ।
* हमारे कर्नाटक में संस्कृत विषय से संबंधित, **ISSN** संख्या और **UGC-CARE List** में जुडे पत्रिका बहुत विरल है ।

# पत्रिका में अपना लेखन देने चाहनेवालों से कुछ सूचना

* पत्रिका प्रकाशन की अवधि : जनवरी से जून, जुलाई से डिसेंबर, इस तरह साल में दो बार पत्रिका प्रकाशित होगी ।
* सामान्यतः फरवरी या मार्च, अगस्त या सितंबर मास में पत्रिका प्रकाशित होगी ।
* अकाडेमी की वेबसाईट **(Web site)** में पत्रिका प्रकाशन से **2** महीने पहले पत्रिका प्रकाशन उद्घोषित करेंगे ।
* लेखनों के प्रकाशन इच्छुक अकाडेमि की **E-mail** द्वारा अपना लेखन **word file** & **PDF file** में ही भेजें ।
* प्रधान संपादक आप का लेखन स्वीकार कर के सलाह समिति का विषय तज्ञों को परिशीलन केलिये भेजेंगे ।
* समिति की अभिप्रायानुसार प्रधान संपादक लेखन की प्रकाशन के बारे में अन्तिम निर्णय लेंगे ।
* लेखन प्रकाशन योग्य होने पर लेखनदाताओं को E-mail फोन या पत्र द्वारा जानकारी देंगे ।
* आप को सूचित किया जाने पर ही अकाडेमि का बैंक खाता में निर्धारित धन जमा करना है । लेखन भेजते ही **Processing** चार्ज खाता में जमा नहीं करना है ।
* साधारणतः लेखन **A4** साईज में **4-5** पृष्ठों में होगी । **Font 11** या **12** में रहना है । लेखन ज्यादा लंबा हो तो प्रकाशन की अन्तिम निर्णय प्रधान संपादक लेलेंगे ।
* हिन्दी या संस्कृत भाषा संबंधित लेखन **Unicode** में होगा ।
* अंग्रेजीवाला **Times Now Roman** में हो तो अच्छा है ।

* कन्नड लेखन नुडि (Nudi) तंत्रांश में होना अच्छा है ।
* केवल टाईप किया गया लेखन स्वीकार्य है, अन्यथा हस्तप्रति की टाईपिंग चार्ज लेखनदाता द्वारा वहन होगा ।
* लेखन दाता अपना पता, मोबैल नं., ई-मेल संकेत इत्यादि लेखन के अंत में जरूर लिखना है । यदि वृत्ति में हो तो वृत्तिस्थान का नमूदन करें ।
* संशोधना रत विद्यार्थी अपना मार्गदर्शक, उन के पद, तथा जिस विश्वविद्यालय से संशोधना अनुमति प्राप्त है इत्यादि विवरण अवश्य लिखें ।

## लेखन दाताओं का अकाडेमी द्वारा सोलभ्य विवरण

* पत्रिका प्रकाशन के बाद **एक प्रति (one copy)** रजिष्टर पोष्ट द्वारा भेजे जायेंगे ।
* ज्यादा प्रति चाहिये हो तो प्रत्येक धन भेजने पर व्यवस्था किया जायेगा ।
* साथ में पत्रिका में लेखन प्रकाशित होने का प्रमाण पत्र अकाडेमि द्वारा दिया जायेगा ।
* जर्नल प्रोसेस्सिंग चार्ज NEFT / RTGS के द्वारा ही देय होगा ।
* Veda Samskrita Academy (Regd.), Hegde, Canara Bank, Hegde Branch
  S. B. Ac/ No. : 03182200030380, IFSC : CNRB0010318

********

## ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯ ಸಂಕ್ಷಿಪ್ತ ಪರಿಚಯ

* ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿ (ರಿ.) ಯು 2003 ರಲ್ಲಿ **ಕರ್ನಾಟಕ ಸೊಸೈಟಿ ರಜಿಷ್ಟ್ರೇಶನ್ ಎಕ್ಟ –1960** ರ ಅಡಿಯಲ್ಲಿ ನೋಂದಾಯಿತ –ವಾದ ಒಂದು ನಾನ್ ಗವರ್ನಮೆಂಟ್ ಒರ್ಗನೈಜೇಸನ್ **(NGO)** ಆಗಿರುತ್ತದೆ.
* 2003 ರಲ್ಲಿ **"ವೇದ ಸಂಸ್ಕೃತ ಪ್ರಸಾರಿಣೀ ಸಭಾ"** ಎಂಬ ಹೆಸರಿನಿಂದ ನೋಂದಾಯಿತವಾದ ಈ ಸಂಸ್ಥೆಯ ಹೆಸರನ್ನು 2011 ರಲ್ಲಿ **"ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿ"** ಎಂದು ಅಧಿಕೃತವಾಗಿ ಬದಲಾಯಿಸಲಾಗಿದೆ.
* ಅಕಾಡೆಮಿಯು ನ್ಯೂ ದಿಲ್ಲಿಯಲ್ಲಿರುವ **NISCAER** ಎನ್ನುವ ಸರಕಾರಿ ಪ್ರಾಧಿಕಾರದಿಂದ ಅಧಿಕೃತವಾಗಿ **ISSN** ಸಂಖ್ಯೆಯನ್ನು 2011 ರಲ್ಲಿ ಪಡೆದಿರುತ್ತದೆ ಮತ್ತು ಅದರ ಸಂಖ್ಯೆ **ISSN 2250–1711** ಆಗಿರುತ್ತದೆ.
* ಅಕಾಡೆಮಿಯು 2013 ರಲ್ಲಿ ಪ್ರಾರಂಭಿಸಿ, ಇಲ್ಲಿಯ ವರೆಗೂ ವರ್ಷಕ್ಕೆರಡು ಬಾರಿಯಂತೆ **(Bi-annual) "Journal of Veda Samskrita Academy"** ಎನ್ನುವ ಹೆಸರಿನಿಂದ ರಾಷ್ಟ್ರಿಯ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯನ್ನು ಪ್ರಕಟಿಸುತ್ತಾ ಇದೆ.
* ಈ ರಾಷ್ಟ್ರಿಯ ಸಂಶೋಧನಾ ಪತ್ರಿಕೆಯು **National Peer-Reviewed Research Journal** ಪತ್ರಿಕೆ ಆಗಿರುತ್ತದೆ.
* ಅಕಾಡೆಮಿಯು ಸಮರ್ಥವಾದ ಮತ್ತು ವಿಷಯ ತಜ್ಞರ ಎಡ್ವೈಸರಿ ಬೋರ್ಡನ್ನು ಹೊಂದಿರುತ್ತದೆ.
* ಅಕಾಡೆಮಿಯು ವೇದ, ವೇದಾಂಗ, ಪುರಾಣ, ಇತಿಹಾಸ, ಆಯುರ್ವೇದ, ಯೋಗ, ಶಿಕ್ಷಣಶಾಸ್ತ್ರ, Arts & Humanities ಇತ್ಯಾದಿ ವಿಷಯಗಳಿಗೆ ಸಂಬಂಧಪಟ್ಟಂತಹ ಲೇಖನಗಳನ್ನು ಪ್ರಕಟಿಸಲು ಅನುಮತಿಯನ್ನು ಪಡೆದಿರುತ್ತದೆ.
* ಈ ಪತ್ರಿಕೆಯಲ್ಲಿ ಪ್ರಕಟಿಸಲು ಸಂಸ್ಕೃತ / ಕನ್ನಡ / ಹಿಂದಿ / ಇಂಗ್ಲೀಷ ಭಾಷೆಗಳಲ್ಲಿ ತಮ್ಮ ಲೇಖನಗಳನ್ನು ನೀಡಬಹುದಾಗಿದೆ.
* ಅಕಾಡೆಮಿಯು ಇಲ್ಲಿಯ ವರೆಗೆ **18** ಸಂಪುಟಗಳನ್ನು ಲೋಕಾರ್ಪಣೆ ಗೊಳಿಸಿದೆ. ಅವುಗಳಲ್ಲಿ ಬೇರೆ ಬೇರೆ ವಿಷಯಗಳಿಗೆ ಸಂಬಂಧ –ಪಟ್ಟಂತೆ ಒಟ್ಟೂ **375** ಕ್ಕೂ ಹೆಚ್ಚು ಲೇಖನಗಳು ಇಲ್ಲಿಯ ವರೆಗೆ ಪ್ರಕಾಶನಗೊಂಡಿವೆ.
* ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿಯು ಪ್ರಕಾಶಿಸುವ **"Journal of Veda Samskrita Academy"** ಎನ್ನುವ ಸಂಶೊಧನಾ ಪತ್ರಿಕೆಯ ಹೆಸರು **2021 ಅಕ್ಟೋಬರದಿಂದ** ಜಾರಿಯಲ್ಲಿ ಬರುವಂತೆ **UGC-CARE List** ನಲ್ಲಿ ಸೇರ್ಪಡೆ ಆಗಿದೆ ಎಂದು ಗೌರವ ಪೂರ್ವಕವಾಗಿ ಮತ್ತು ಹೆಮ್ಮೆಯಿಂದ ಪ್ರಕಟಿಸುತ್ತಾ ಇದ್ದೇವೆ.
* ನಮ್ಮ ಕರ್ನಾಟಕದಲ್ಲಿ ಸಂಸ್ಕೃತ ವಿಷಯಕ್ಕೆ ಸಂಬಂಧಪಟ್ಟಂತಹ **ISSN** ಸಂಖ್ಯೆಯನ್ನು ಮತ್ತು **UGC-CARE List** ನಲ್ಲಿ ಸೇರ್ಪಡೆಯಾದ ಪತ್ರಿಕೆಗಳು ತುಂಬಾ ವಿರಳ.

## ಪತ್ರಿಕೆಯಲ್ಲಿ ಲೇಖನಗಳನ್ನು ಪ್ರಕಟಿಸಲು ಇಚ್ಛಿಸುವವರ ಗಮನಕ್ಕೆ ಕೆಲವು ವಿಷಯಗಳು :

* ಪತ್ರಿಕಾ ಪ್ರಕಟಣೆಯ ಅವಧಿ : ಜನವರಿಯಿಂದ ಜೂನ್, ಜುಲೈದಿಂದ ಡಿಸೆಂಬರ. ಹೀಗೆ ವರ್ಷಕ್ಕೆರಡು ಬಾರಿ ಪತ್ರಿಕೆಯನ್ನು ಪ್ರಕಟಿಸಲಾಗುವುದು. ಸಾಮಾನ್ಯವಾಗಿ **ಅಗಷ್ಟ** ಮತ್ತು **ಫೆಬ್ರವರಿ** ತಿಂಗಳಲ್ಲಿ ಪತ್ರಿಕೆಯನ್ನು ಲೋಕಾರ್ಪಣೆ ಗೊಳಿಸಲಾಗುವುದು.
* ಅಕಾಡೆಮಿಯ **(Web site)** ನಲ್ಲಿ ಪತ್ರಿಕಾ ಪ್ರಕಟಣೆಯ ಅವಧಿಗಿಂತ **2** ತಿಂಗಳ ಮುಂಚಿತವಾಗಿ ಪತ್ರಿಕಾ ಪ್ರಕಟಣೆಯನ್ನು ಉದ್ಘೋಷಿಸಲಾಗುವುದು.
* ಲೇಖನಗಳನ್ನು ಪ್ರಕಾಶಿಸ ಬಯಸುವವರು ಅಕಾಡೆಮಿಯ **E-mail** ಮೂಲಕವಾಗಿಯೇ ತಮ್ಮ ಲೇಖನಗಳನ್ನು **word file & PDF file** ಗಳಲ್ಲಿ ಕಳುಹಿಸತಕ್ಕದ್ದು.
* ಪ್ರಧಾನ ಸಂಪಾದಕರು ನಿಮ್ಮ ಲೇಖನಗಳನ್ನು ಸ್ವೀಕರಿಸಿ, ಅದನ್ನು ಎಡ್ವೈಸರಿ ಬೋರ್ಡಿನ ವಿಷಯ ತಜ್ಞರಿಗೆ ಪರಿಶೀಲನೆಗಾಗಿ ಕಳು-ಹಿಸುತ್ತಾರೆ.
* ಅವರ ಅಭಿಪ್ರಾಯಗಳನ್ನು ತೆಗೆದುಕೊಂಡು ಪ್ರಧಾನ ಸಂಪಾದಕರು ಲೇಖನವು ಪ್ರಕಟಣಾರ್ಹತೆಯನ್ನು ಹೊಂದಿದೆಯೋ ಯಾ ಇಲ್ಲವೋ ಎನ್ನುವ ತೀರ್ಮಾನವನ್ನು ತೆಗೆದುಕೊಳ್ಳುತ್ತಾರೆ.
* ಲೇಖನವು ಪ್ರಕಟಣಾರ್ಹತೆಯನ್ನು ಹೊಂದಿದ್ದರೆ ಪ್ರಧಾನ ಸಂಪಾದಕರು ಲೇಖನವನ್ನು ಕೊಟ್ಟವರಿಗೆ **E-mail** ಅಥವಾ ಫೋನ್ ಅಥವಾ ಪತ್ರದ ಮೂಲಕ ಮಾಹಿತಿಯನ್ನು ನೀಡುತ್ತಾರೆ.
* ಹಾಗೆ ತಿಳಿಸಿದ ನಂತರವೇ ಅಕಾಡೆಮಿಯ ಬ್ಯಾಂಕ್ ಎಕೌಂಟಿಗೆ ನಿಗದಿಸಿದ ಹಣವನ್ನು ಪಾವತಿಸತಕ್ಕದ್ದು. ಲೇಖನವನ್ನು ಕಳುಹಿಸಿದ ತಕ್ಷಣ ಜರ್ನಲ್ ಪ್ರೊಸೆಸಿಂಗ್ ಶುಲ್ಕವನ್ನು ಅಕಾಡೆಮಿಯ ಎಕೌಂಟಿಗೆ ಜಮಾ ಮಾಡತಕ್ಕದ್ದಲ್ಲ.
* ಸಾಮಾನ್ಯವಾಗಿ ಲೇಖನ ಎ**4** ಸೈಜಿನಲ್ಲಿ **4** ರಿಂದ **5**ಪುಟ ಇರತಕ್ಕದ್ದು. **Font 11** ಅಥವಾ **12** ರಲ್ಲಿ ಇರಬೇಕು. ತುಂಬಾ ದೀರ್ಘವಾದ ಲೇಖನವಿದ್ದರೆ ಅದನ್ನು ಪ್ರಕಟಿಸುವ ತೀರ್ಮಾನವನ್ನು ಪ್ರಧಾನಸಂಪಾದಕರು ತೆಗೆದುಕೊಳ್ಳುತ್ತಾರೆ. ಹೆಚ್ಚಿನ ಪಕ್ಷ ಲೇಖನವನ್ನು ಪ್ರಕಟಿಸದೇ ಇರುವ ತೀರ್ಮಾನವನ್ನು ತೆಗೆದುಕೊಳ್ಳುತ್ತಾರೆ.
* ಹಿಂದಿ ಅಥವಾ ಸಂಸ್ಕೃತ ಭಾಷೆಗೆ ಸಂಬಂಧಿಸಿದ ಲೇಖನ **Unicode** ನಲ್ಲಿ ಇರಬೇಕು.
* ಇಂಗ್ಲೀಷ್ ಭಾಷೆಯದ್ದು **Times Now Roman** ನಲ್ಲಿ ಇದ್ದರೆ ಉತ್ತಮ.
* ಕನ್ನಡ ಲೇಖನ ನುಡಿ ತಂತ್ರಾಂಶದಲ್ಲಿ ಇದ್ದರೆ ಉತ್ತಮ.
* ಕೇವಲ ಟೈಪ್ ಆದ ಲೇಖನವನ್ನು ಮಾತ್ರ ಸ್ವೀಕರಿಸಲಾಗುವುದು. ಟೈಪ್ ಆಗದೇ ಕೈ ಬರಹದಲ್ಲೇ ಇದ್ದರೆ ಟೈಪಿಂಗ್ ಶುಲ್ಕವನ್ನು ಸಂಬಂಧಿಸಿದ ಲೇಖನದಾತರು ಪ್ರತ್ಯೇಕವಾಗಿ ಪಾವತಿಸ ಬೇಕಾಗುತ್ತದೆ.
* ಲೇಖನದಾತರು ತಮ್ಮ ಪೋಷ್ಟಲ್ ವಿಳಾಸವನ್ನು, ಮೊಬೈಲ್ ನಂ.ನ್ನು, ಈ-ಮೇಲ್‌ಸಂಕೇತವನ್ನು ಲೇಖನದ ಅಂತ್ಯದಲ್ಲಿ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿಯೇ ನಮೂದಿಸಬೇಕು.
* ಉದ್ಯೋಗದಲ್ಲಿ ಇರುವವರು ತಮ್ಮ ಉದ್ಯೋಗಸ್ಥಾನದ ವಿಳಾಸವನ್ನು ಇಂಗ್ಲೀಷ್ ಭಾಷೆಯಲ್ಲಿಯೇ ನಮೂದಿಸಬೇಕು.
* ಸಂಶೋಧನಾವಿದ್ಯಾರ್ಥಿಗಳು ತಮ್ಮ ಮಾರ್ಗದರ್ಶಕರ ಹೆಸರು, ಅವರ ಹುದ್ದೆ ಮತ್ತು ಅವರು ಯಾವ ಸಂಸ್ಥೆಯಲ್ಲಿ (ಯುನಿವರ್ಸಿಟಿ-ಯಲ್ಲಿ) ಉದ್ಯೋಗಸ್ಥರಾಗಿದ್ದಾರೆ, ಯಾವ ಯುನಿವರ್ಸಿಟಿಯಲ್ಲಿ ಸಂಶೋಧನೆ ಮಾಡುತ್ತಿದ್ದೀರಿ ಆ ಯುನಿವರ್ಸಿಟಿಯ ಹೆಸರು, ವಿದ್ಯಾರ್ಥಿಯ ಸಂಶೋಧನೆಗೆ ಮಂಜೂರಾದ ವಿಷಯವನ್ನು ಸ್ಪಷ್ಟವಾಗಿ ನಮೂದಿಸಲೇ ಬೇಕು.

## ಲೇಖನವನ್ನು ಕೊಟ್ಟವರಿಗೆ ಅಕಾಡೆಮಿಯು ನೀಡುವ ಸೌಲಭ್ಯಗಳು :

* ಪತ್ರಿಕೆ ಪ್ರಕಟಣೆ ಆದ ನಂತರ ಲೇಖನವನ್ನು ನೀಡಿದವರಿಗೆ **ಒಂದು ಪ್ರತಿ (one copy)** ಯನ್ನು ರಜಿಷ್ಟರ್ ಪೋಷ್ಟ ಮೂಲಕ ಕಳು-ಹಿಸಿ ಕೊಡಲಾಗುವುದು.
* ಇದರೊಟ್ಟಿಗೆ ಅಕಾಡೆಮಿಯಿಂದ ಅಧಿಕೃತವಾದ ಪ್ರಮಾಣ ಪತ್ರವನ್ನು ನೀಡಲಾಗುವುದು.
* ಜರ್ನಲ್ ಪ್ರೊಸೆಸಿಂಗ್ ಶುಲ್ಕವನ್ನು **NEFT / RTGS** ಮೂಲಕವೇ ಕಳುಹಿಸತಕ್ಕದ್ದು.

* Veda Samskrita Academy (Regd.), Hegde, Canara Bank, Hegde Branch
S. B. Ac/ No. : 03182200030380, IFSC : CNRB0010318

********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# साहित्यशास्त्रसिद्धान्तानामवबोधने लौकिकदृष्टान्तानामुपयोगिता

**Dr. M. Sudarshan Chiplunkar**
Assistant Professor
School of Linguistics and Literary Studies
Chinmaya Vishwa Vidyapeeth
Chinmaya Eswar Gurukula Campus
Adi Sankara Marg, Veliyanad
Ernakulam, Kerala-682313
Contact No. : 9692920245
E-mail : chiplunkarsudarshan@gmail.com

संस्कृतशास्त्रजगति सन्ति हि नाना शास्त्राणि यानि च विश्वविद्यालयेषु, महाविद्यालयेषु, गुरुकुलेषु, पाठशालासु च बोध्यन्ते । तेषु शास्त्रेषु साहित्यशास्त्रम् अन्यतमं शास्त्रम् । अलङ्कारशास्त्रम्, काव्यशास्त्रम् इत्यादिभिः नामभिः अपि शास्त्रमिदं व्यवह्रियते । शास्त्रेऽस्मिन् साहित्यदर्पण-काव्यप्रकाश-ध्वन्यालोक-रसगङ्गाधरप्रभृतयः लक्षणग्रन्थाः प्रधानतया पाठ्यन्ते ।

काव्यस्वरूपं, काव्यभेदाः, काव्यगुणाः, काव्यदोषाः, अलङ्काराः, रसः, ध्वनिः, शब्दव्यापाराः इत्यादीनि तत्त्वानि समीचीनतया ज्ञात्वा तेषां काव्येषु अनुशीलनमेव वस्तुतः साहित्यशास्त्रस्य प्रधानं लक्ष्यम्, येन च छात्रः गुणदोषविवेकवान् भवति काव्यास्वादसंस्कारं च प्राप्नोति । किन्तु शास्त्राणां बोधनवेलायां तत्तच्छास्त्रमर्यादया यदा तत् शास्त्रं पाठ्यते तदा नैकानि नूतनानि पारिभाषिकपदानि युक्तयश्च पौनःपुन्येन समायान्ति । तानि पारिभाषिकपादानि युक्तयश्च शास्त्रात् शास्त्रं प्रति भिद्यन्ते । सन्दर्भेऽस्मिन् यदि केचन लौकिकाः दृष्टान्ताः उदाहरणानि वा शास्त्रबोधनवेलायां प्रयुज्यन्ते तर्हि प्रायः झटित्येव तेषां शास्त्रतत्त्वानाम् अवगमनं भवति काव्येषु च अनुशीलनं कर्तुं प्रभवन्ति छात्राः । तेषु कानिचन साहित्यशास्त्रगतानि तत्त्वानि अत्र चर्च्यन्ते ।

**अभिधाव्यापारः**

साहित्यशास्त्रस्य आदिमे स्तरे एव शब्दव्यापाराः बोध्यन्ते । ते च अभिधा, लक्षणा, व्यञ्जना[1] इत्याख्याः । अत्र वस्तुतः **"व्यापारः"** इत्येतस्य पदस्य अर्थबोधकरणे एव केषुचित् स्तरेषु काठिन्यमनुभूयते । यतः मातृभाषासु, अन्यासु प्रान्तभाषासु च इदं **"व्यापारः"** इति पदं **"वाणिज्यम्"** इत्यर्थे प्रयुज्यते । अतः कोऽयं व्यापारः? इति भ्रममनुभवन्ति छात्राः । अत्र च व्यापारो नाम काचित् **क्रिया** अथवा **कर्म** इति वक्तुं शक्यते । अत्र **"ततः प्रविशति यथोक्तव्यापारा शकुन्तला"**[2] इत्यादीनि काव्यवाक्यानि अथवा "गणेशः पठनव्यापारं करोति" इत्यादीनि लौकिकवाक्यानि उदाहर्तुं शक्यानि । वस्तुतः क्रियाः अपि नानाविधाः भवन्ति । एवं चेत् पुनः शब्दव्यापारः इत्यत्र व्यापारशब्देन का क्रिया ग्राह्या इति सन्देहस्तु जायत एव । अत्र तावत् शब्दस्य वाक्यस्य वा श्रवणात् प्रभृति अर्थबोधं यावत् या क्रिया प्रवर्तते सा क्रिया अत्र व्यापारशब्देन ग्राह्या । अस्याः क्रियायाः शब्दाश्रयत्वात् शब्दव्यापारः इति व्यवह्रियते । सोऽयं व्यापारः शक्तिः इत्यपि नाम्ना प्रयुक्तोऽस्ति आलङ्कारिकैः । तद्यथा –**"तिस्रः शब्दस्य शक्तयः**[3] **"** इत्यादिः । अत्र पुनः प्राचीनेषु तदनन्तरवर्तिषु च शक्तिपदप्रयोगे अन्तरम् अवलोक्यते । प्राचीनैः आलङ्कारिकैः अन्यशास्त्रकारैश्च तावत् इदं शक्तिपदं अभिधाख्ये शब्दव्यापारविशेषे प्रयुक्तं विद्यते[4]।

---

1. स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा । वाच्यादयस्तदर्थाः स्युः तात्पर्यार्थोऽपि केषुचित् ॥ काव्यप्रकाशः, २-६ ॥
2. अभिज्ञानशाकुन्तलम् ॥
3. वाच्योऽर्थोभिधया बोध्यो लक्ष्यो लक्षणया मतः । व्यङ्ग्यो व्यञ्जनया ताः स्युर्तिस्रः शब्दस्य शक्तयः ॥ साहित्यदर्पणः, २-३ ॥
4. शक्त्या प्रतिपादकत्वमभिधा । सा त्रिधा रूढिर्योगो योगरूढिश्च ॥ वृत्तिवार्तिकम् ॥

किन्तु अनन्तरवर्तिषु आलङ्कारिकेषु इदं शक्तिपदं शब्दव्यापारसामान्ये अर्थे प्रयुक्तम् अवलोक्यते[5] । अत्रायं भेदः छात्राणां कृते कारयिष्यते चेत् ग्रन्थान्तरपठनवेलायां भ्रमस्य अवसरः न भवति । पुनश्चात्र शक्तिपदस्य पुराणेषु, केषुचित् अन्येषु शास्त्रेषु, लोके च अन्य एव अर्थः प्रसिद्धो विद्यते[6] । अयम् अर्थव्यत्यासोऽपि छात्रेभ्यः बोधनीयः । अनन्तरं च कोऽयम् अभिधाव्यापारः ? इत्यत्र येन व्यापारेण सङ्केतितार्थः बोध्यते सः व्यापारः एव अभिधाव्यापारः[7]।

कस्यचित् शब्दस्य श्रवणानुपदमेव विनावरोधं यः अर्थः बुद्धिगोचरः भवति स एव सङ्केतः[8]। **अस्माच्छब्दादयमर्थो बोद्धव्यः** इति नैयायिकमतम्[9]। सन्दर्भेऽस्मिन् लेखनीं दूरवाणीं वा छात्रेभ्यः प्रदर्श्य अस्य दर्शनेन कः अर्थः बुद्धौ आगच्छति इति प्रष्टुं शक्यते । अनन्तरं गौः, महिषी इत्यादीन् शब्दान् उच्चार्य कः अर्थबोधः भवतीति च प्रष्टव्यम् । तदनु तस्याः लेखन्याः दूरवाण्याः, गौः इति शब्दस्य, महिषी इति शब्दस्य वा तथात्वेन एव किमर्थं बोधः भवतीति सङ्केतग्रहस्य लौकिकी प्रक्रिया सङ्क्षेपेण बोधयितुं शक्यात्र । एवं क्रमेण बोधनेन अभिधा इत्याख्यः व्यापारः नैजः, सर्वदापि अस्माकं संवहने अन्तर्भूत एव विद्यते, अभिधां विना यत्किञ्चित् शाब्दं संवहनमेव न भवति इति अवगमनं छात्राः प्राप्नुवन्ति ।

**लक्षणाव्यापारः**

संस्कृतविश्वविद्यालयेषु, संस्कृतमहाविद्यालयेषु, गुरुकुलेषु च साहित्यशास्त्रविषयाः ये पाठ्यन्ते तेषु लक्षणाव्यापारः इत्याख्यः अत्यन्तं मुख्यः विषयः। वाक्यस्य शाब्दबोधवेलायां वाच्यार्थस्तरे यदा अन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा भवति तदा लक्षणायाः प्रवृत्तिः । काव्यप्रकाशकारेण मम्मटाचार्येण च अस्याः लक्षणायाः लक्षणं प्रोक्तमस्ति यत् –

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया**[10]॥ इति ।

वाच्यार्थस्तरे अन्वयः यदा न घटते तदा मुख्यार्थबाधस्य बीजमाश्रित्य मुख्यार्थयोगं स्वीकृत्य रूढ्या अथवा प्रयोजनेन अर्थान्तरस्य आरोपः यत्र क्रियते सः लक्षणाव्यापारः । तत्र पुनः शुद्धा गौणी इति द्वैविध्यम् । शुद्धायां पुनः उपादानलक्षणा, लक्षणलक्षणा, सारोपा, साध्यवसाना इति चत्वारो भेदाः । गौण्यां च सारोपा, साध्यवसाना इति द्वौ भेदौ । एवं तत्र लक्षणायां षड् भेदाः[11] । प्रकरणेऽस्मिन् तावत् बहूनि उदाहरणानि प्रदर्शितानि शास्त्रेषु । कुन्ताः प्रविशन्ति, गङ्गायां घोषः, आयुर्घृतम्, आयुरेवेदम्, गौर्वाहीकः, गौरयम् इत्यादीनि बहूनि उदाहरणानि शास्त्रग्रन्थेषु प्रयुक्तानि अवलोक्यन्ते । किन्तु इमानि उदाहरणानि कालानुरोधेन सामयिकानि न भवन्तीत्यतः क्वचित् छात्राः अवगमने काठिन्यमनुभवन्ति । तेषु स्थानेषु यदि वयं छात्रजीवनस्य निकटतमानि उदाहरणानि आश्रित्य बोधयामः तर्हि शास्त्रीयानाम् उदाहरणानाम् अवगतिः सुलभतया भवितुमर्हति ।

---

5. साहित्यदर्पणः ॥
6. शाक्तमतानुसारेण देवी एव शक्तिशंज्ञया कथ्यते । मतेऽस्मिन् कालिका, चण्डी, महालक्ष्मी इत्येवं नानाप्रकारैः शक्त्याः आराधनं क्रियते ।
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा । अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिश्यते ॥ विष्णुपुराणम् ७-६१ ॥
सा केवलं काव्ये हेतुः इति प्रतिभारूपे अर्थे शक्तिपदं राजशेखरः प्रयुक्तवान् ॥ काव्यमीमांसा, अध्यायः- ४ ॥
7. साक्षात् सङ्केतितं योऽर्थम् अभिधत्ते स वाचकः । काव्यप्रकाशः- २-७ ।
समुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥ काव्यप्रकाशः- २-८ ।
8. इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः । काव्यप्रकाशः-२-७ ॥
9. शक्तिवादः ॥
10. काव्यप्रकाशः-२-९ ॥
11. लक्षणा तेन षड् विधा । काव्यप्रकाशः, २-१२ ॥

कुन्ताः प्रविशन्ति इति उपादानलक्षणायाः[12] अत्यन्तं प्रसिद्धम् उदाहरणम् । अत्र तु कुन्तनामकः आयुधविशेषः । कुन्तानाम् अचेतनत्वात् प्रवेशक्रियायोग्यता तेषु नास्तीत्यतः मुख्यार्थबाधेन लक्षणायाः प्रवृत्तिः । कुन्तधारिणः पुरुषाः प्रविशन्ति इति लक्ष्यार्थः । एतस्य स्थाने लौकिकानि उदाहराणानि स्वीकृत्य बोधयामः चेत् एतस्य सुलभतया अवगमनं भवितुमर्हति । यथा – प्रायः शालासु समवस्त्रं भवति । कक्ष्याप्रकोष्ठस्य एव दृष्टान्तमाश्रित्य अत्र वयं **श्वेतवस्त्राणि प्रविशन्ति नीलवस्त्राणि गच्छन्ति** इति वा उदाहरणं वक्तुं शक्नुमः । अत्र तु वस्त्राणां प्रवेशसामर्थ्यं गमनसामर्थ्यं वा नास्ति, अतः अत्र तत्तद्वर्णयुतवस्त्रधारिणः बालकाः बालिकाः वा प्रविशन्ति अथवा गच्छन्ति इत्ययमेव अभीष्टः अर्थः इति सुलभतया छात्राः शाब्दबोधं प्राप्नुवन्ति । **गङ्गायां घोषः** इतीदं लक्षणलक्षणायाः प्रसिद्धं शास्त्रीयम् उदाहरणम् । गङ्गाप्रवाहे घोषः इत्ययं वाच्यार्थः । किन्त्वत्र प्रवाहे घोषाभावसम्भवात् मुख्यार्थबाधद्वारा गङ्गारूपं मुख्यार्थस्य योगं शीतत्वपावनत्वातिरूपं प्रयोजनं च आश्रित्य गङ्गातीरे घोषः इति अत्र लक्ष्यार्थः । सन्दर्भेऽस्मिन् छात्राः प्रायः प्रयोजनरूपस्य अर्थस्य अवगमने काठिन्यमनुभवन्ति । अयं च प्रयोजनरूपरूपः अर्थः व्यञ्जनागम्यः अर्थः।

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते । फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया [13]॥ इति आचार्यः मम्मटः ।

अत्र तावत् व्यञ्जनागम्यस्य प्रयोजनरूपस्य अर्थस्य सिद्ध्यर्थं लक्षणायाः प्रवृत्तिः इति शास्त्रनिष्कर्षः । अत्र तावत् लौकिकैः दृष्टान्तैः अयं विचारः सुलभतया अवगमयितुं शक्यः । यथा – छात्रावासे विद्यमानः कश्चित् छात्रः बुभुक्षापीडितः सन् यत्किञ्चित् भोक्तुकामः निकटे एव विद्यमानं भोजनगृहं प्रति गन्तुं स्वस्य प्रवृत्तिं करोति ।

अत्र अस्यां प्रक्रियायां घटकद्वयं विद्यते, भोजनगृहे विद्यमानः आहारविशेषः स्वस्य प्रवृत्तिः इति च । वस्तुतः अत्र भोजनगृहे विद्यमानस्य खाद्यविशेषस्य स्वामी तस्य भोजनगृहस्य यजमानः । किन्तु तं खाद्यविशेषं प्राप्तुकामः छात्रः गमनप्रवृत्तः जातः । अत्र तस्य खाद्यविशेषस्य प्राप्तिरेव प्रयोजनम् ।

एवं च खाद्यविशेषस्य प्राप्तिरूपं प्रयोजनं मनसि निधाय स्वात्मनः प्रवृत्तिं कृत्वा अन्ते विशिष्टस्य आनन्दस्य प्राप्तिरूपं अर्थं साधयति ।अत्र यद्यपि खाद्यविशेषस्य स्वामी अन्यः कश्चन विद्यते तथापि तं खाद्यविशेषं प्रयोजनरूपेण विधाय छात्रः यथा प्रवृत्तः तथा व्यञ्जनागम्यं प्रयोजनविशेषं लक्ष्यीकृत्य लक्षणायाः प्रवृत्तिः भवति । लक्ष्यार्थस्य समन्वयकरणे छात्रैः तथा काठिन्यं नानुभूयते, यतः लक्षणायाम् आरोपितः अर्थः भवति इति छात्रैः पूर्वम् अधिगतं भवति इत्यस्मात्।

सारोपासाध्यवसाना इत्येतौ शुद्धायाः लक्षणायाः अन्यौ द्वौ भेदौ । सारोपायाः लक्षणं उक्तञ्च काव्यप्रकाशे–

**सारोपान्यातुयत्रोक्तौविषयीविषयस्तथा** [14] इति।

इत्युक्तौ आरोप्यमाणः आरोपविषयश्च यत्र अनपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा । **विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका** [15] इतीदं साध्यवसानायाः लक्षणायाः स्वरूपम् । विषयिणि विषयस्य निगरणं यत्र भवति सा साध्यवसाना लक्षणा । इत्युक्तौ साध्यवसानायां विषयिमात्रं निर्दिश्यते न तु विषयः । एतौ सारोपा साध्यवसाना इति भेदौ कार्यकारणभावादि सम्बन्धम् आश्रित्य शुद्धायां लक्षणायां भवतः । गौण्याञ्च पुनः सादृश्यसम्बन्धमाश्रित्य भवतः । आयुर्घृतम्[16] इतीदम्

---

12. स्वसिद्धये पराक्षेपः परार्थस्वसमर्पणम् । उपादानं लक्षणं चेत्युक्त्वा शुद्धैव सा द्विधा ॥ काव्यप्रकाशः, २-१० ।
13. काव्यप्रकाशः, २, १४-१५ ॥
14. काव्यप्रकाशः, २, ११ ॥
15. तत्रैव ।
16. आयुर्घृतं यशस्त्यागो भयं चोरः सुखं प्रिया । वैरं द्यूतं गुरुर्ज्ञानं श्रेय-स्तीर्थनिषेवणात् ॥ काव्यप्रकाशः । माणिक्यचन्द्रकृत सङ्केतव्याख्या ॥

शुद्धायाः सारोपायाः प्रसिद्धम् उदाहरणम्। दीर्घकालजीवनमत्र आयुः शब्दस्य तात्पर्यम् । तादृशस्य आयुषः घृतं जनकम्, आयुः जन्यम् । एवञ्चात्र जन्यजनकभावसम्बन्धः । तयोः लक्षणया अभेदः । तेन आयुरभिन्नं घृतम् इति बोधः भवति । **आयुरेवेदम्** इति शुद्धायाः साध्यवसानायाः उदाहरणम् । अत्रापि पूर्ववदेव जन्यजनकभावसम्बन्धः । अत्र वस्तुतः इदम् इत्यनेन घृतं बोध्यते । अत्र विषयवाचकं घृतपदं आयुषि विषयिणि निगीर्णमिति हेतोः अत्र साध्यवसाना लक्षणा । अत्र तावत् छात्रबोधदृष्ट्या शास्त्रग्रन्थातिरिक्तानि जन्यजनकभावसम्बन्ध युतानि कार्यकारणभावसम्बन्धयुतानि वा लौकिकानि उदाहरणानि अपि स्वीकर्तुं शक्यानि । यथा – शुद्धायाः सारोपायाः उदाहरणत्वेन गुरुर्ज्ञानम् इति **यशस्त्यागः** इति वा उदाहरणं स्वीकर्तुं शक्यम् । अत्र गुरुर्ज्ञानमित्यत्र गुरुः कारणं ज्ञानं कार्यम् । लक्षणया तयोः अभेदेन बोधः । पुनश्च साध्यवसानायां **ज्ञानमेवासौ** इति उदाहरणं स्वीकर्तुं शक्यम् । अत्र असौ इत्यनेन गुरुः बोध्यते । किन्तु विषयिणि ज्ञाने विषयवाचकं गुरुपदं निगीर्णम् इत्यस्मात् अत्र साध्यवसाना लक्षणा । एतादृशानि उदाहरणानि छात्रदशायां शीघ्रबोधप्रदानि भवन्ति । गौण्यां लक्षणायां सादृश्यसम्बन्धद्वारा एतौ द्वौ भेदौ भवतः । **गौर्वाहीकः** इति गौणीसारोपायाः **गौरयम्** इति गौणीसाध्यवसानायाः उदाहरणम् । गौर्वाहीकः इत्यत्र गौः जाड्य मान्द्यादिगुणयुक्ता भवति इति तात्पर्यम् । वाहीकः इति देशविशेषः, तत्रस्थः पुरुषः अपि वाहीकशब्देन व्यवह्रियते । एवञ्चात्र गावः वाहीकस्य च सादृश्यसम्बन्धेन लक्षणया अभेदः । पुनश्चात्र गावः वाहीकस्य च पृथक् निर्देशात् सारोपा लक्षणा । गौरयम् इत्यत्र अयम् इत्यनेन वाहीकः बोध्यः । किन्तु विषयवाचकं वाहीकपदं विषयिणि गवि निगीर्णम् इति हेतोः साध्यवसाना लक्षणा। अत्र तावत् सादृश्यसम्बन्धयुतानि **चन्द्रो मुखम्, बृहस्पतिः पण्डितः, चन्द्रः इदम्, बृहस्पतिरसौ** इत्यादीनि लौकिकान्युदाहरणानि स्वीकर्तुं शक्यानि येन सुलभतया छात्राः अवगतिं प्राप्नुयुः ।

इत्थमत्र विस्तरभयात् स्थालीपुलाकन्यायेन केचन एव विचाराः चर्चिताः । इयमेव प्रणाली ध्वनिभेदाः, अलङ्काराः इत्यादिषु विषयेष्वपि आश्रयितुं शक्या येन शास्त्रस्थान् सिद्धान्तान् छात्राः सुलभतया अवगन्तुं शक्नुयुः शास्त्राणाम् अध्ययने च रुचिं प्रकटयेयुः इत्युक्त्वा विरम्यते विस्तरात् ।

*******

**आकरग्रन्थाः**

१. साहित्यदर्पणः, (लक्ष्मीव्याख्यासहितः) Chaukhamba Sanskrit Series Office, Varanasi

२. काव्यप्रकाशः, (बालबोधिनीव्याख्यासहितः) Bhandarkar Oriental Research Institute, Poona

३. काव्यप्रकाशः, (with 16 Commentaries) Nag Prakashak, Delhi

४. वृत्तिवार्तिकम्, Indu Prakashan, Delhi

५. विष्णुपुराणम्, Geeta Press, Gorakhpur

६. काव्यमीमांसा, Oriental Institute, Baroda

७. अभिज्ञानशाकुन्तलम्, Krishnadas Academy, Varanasi

८. शक्तिवादः, Khemraj Publishers

**********

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# भारतीयाध्यात्ममार्गेषु मनःस्वरूपसमीक्षणम्

**Dr. Amrita Ghosh**
Assistant Professor
Acharya Brojendra Nath Seal College
Cooch Behar- 736101, West Bengal
Contant No. : 9434188766
E-mail : amrita.sanskrit2001@gmail.com

**भूमिका-**

'ज्योतिषां ज्योतिः' अस्ति अपूर्वं किञ्चित् प्राणिनां देहाधारेषु यद् जविष्ठं दूरङ्गममपि अन्तः विद्यते इति सुप्राचीनानाम् ऋषीणाम् उपलब्धिः। किमस्ति तद्, किं नामधेयं वा इति प्रश्ने जाते शुक्लयजुर्वेदीयैः मन्त्रद्रष्टृभिः ऋषिभिः अन्तरामृतरूपेण सम्यगनुभूतं तदेव मनः - 'यज्ज्योतिरन्तरममृतं प्रजासु' इति। कल्याणसारथिवत् हृत्प्रतिष्ठं वर्तते तद्, 'यस्मान्न ऋते किंचन कर्म क्रियते' इति। चतुर्वर्गपुरुषार्थसाधनं तज्जन्यं, तदेव च कारणं सुखदुःखानां हर्षविषादानां पापपुण्यानां अभ्युदय-निःश्रेयससाधनानामिति मनसः गुरुत्वं प्राधान्यञ्च ऋषिभिः दृष्टम् , दार्शनिकैः युक्तिभिः प्रमाणितम् , लोकैः अनुभूतञ्च। अतः अध्यात्मभावनायाः साधनायाश्च बीजं निहितमस्ति मनसि इत्यत्र नास्ति संशयावसरः। 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः'[1] इति श्रुतितात्पर्यात् इह जगति अभ्युदयसाधनानां यागादिकर्मणां निःश्रेयससाधनानां च श्रवणमनननिदिध्यासनपुरःसरब्रह्मसाक्षात्काराणां मनोजन्यत्वात् तत्प्रतिपादकशास्त्रेषु अपि मनःशब्दाभिधेयान्तः-करणस्य प्राधान्यमविसंवादितया सिद्धम्। अतिनिगूढमाध्यात्मिकज्ञानसाधनं मनः संयमाद्युपायसापेक्षम्। परन्तु तस्य स्वभावलौल्यात्, विक्षिप्तस्वभावत्वात् संयमनमतिदुष्करम् इति सर्वैः स्वीक्रियते। स्मर्यतेऽत्र मनसः चाञ्चल्यविषये अर्जुनस्योक्तिः गीतायाम्-

'चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥'[2]

वस्तुतस्तु अज्ञबुद्ध्या दुर्जयं मनो विवेकविचाराद् स्थिरत्वं निःस्वरूपतां वा एति। अतः तत्त्वजिज्ञासुभिः परमपुरुषार्थप्रेप्सुभिः मनोमलदूरीकरणेन मनःसंयमादिसाधनपूर्वकम् आत्मज्ञानं साधनीयमित्यतः मनस्तत्त्वविद्या सर्वैः सविशेषं पर्यालोचिता। अस्मिन् निबन्धे अध्यात्मप्रस्थानेषु मनःस्वरूपं समासतः विमर्शनीयम् । अत्र आलोचनापरिसरे मनोबुद्धिचित्ताहंकारादिपर्यायशब्देन देहेन्द्रियात्मव्य-तिरिक्तमन्तःकरणमेव बोध्यम्। मनः कथमन्तःकरणत्वेन गृह्यते इति केनोपनिषदि शाङ्करभाष्ये व्याख्यातम्- 'मनुते अनेन इति मनः, सर्वकरणसाधारणं सर्वविषयव्यापकत्वात्।'[3]

**श्रुतिषु मनसः स्वरूपम्** -

सुप्राचीनायां अध्यात्मपरम्परायां श्रुतिषु मनसः माहात्म्यं अनुभूय स्वरूप-गुण-धर्मादिकं बहुधा कीर्तितम्। ऋग्वेदे मनसः जविष्ठत्वं ज्योतीरूपेण हृदयाहितत्त्वं समाम्नातम् ।[4] ऋग्वेदे पुरुषसूक्ते च परमात्मनः सकाशात् समुत्पन्नस्य ब्रह्माण्डरूपविराड्पुरुषस्य मनसः चन्द्रमाः जातः इत्युल्लिखितः।[5] शुक्लयजुर्मन्त्रेषु शिवसंकल्पसूक्तेषु च हृत्प्रतिष्ठस्य मनसः दूरङ्गमत्वं सर्वकर्मनिर्वर्तकत्वं प्रज्ञानधृत्यादिधर्मवत्त्वं भूतवर्तमानभविष्यत्ग्राहित्वं प्रतिपादितम्।[6]

---

1. ब्रह्मबिन्दूपनिषत्, १.२ ।
2. श्रीमद् भगवद्गीता, ६-३४ ।
3. केनोपनिषत्, १-४ ।
4. 'मनो जविष्ठं' ज्योतिर्हृदयमाहितं यत्, ऋ. सं., ६-९-५,६ ।
5. ऋ. सं. १०-९०-१३ ।
6. शिवसंकल्पसूत्रम्, ३४/३-४-५ ।

मनसः तात्पर्यं गुरुत्वं च सम्यग् विज्ञाय कठ-केन-प्रश्न-छान्दोग्य- बृहदारण्यकादिषु प्राचीनोपनिषत्सु बहुत्र तस्य उल्लेखः विद्यते। तत्स्वरूप-स्वभाव-धर्मादीनां निरूपणं च दृश्यते एतासु उपनिषत्सु। केनोपनिषदि यथा आत्मभिन्नत्वेन मनसः उपस्थापनं सुस्पष्टम् 'केनेषितं पतति प्रेषितं मनः' इत्यादिना । 'श्रोत्रस्य श्रोत्रं मनसो मनो यत्'[7] इत्यादिश्रुतिसामर्थ्याद् न खलु मनः स्वतन्त्रं प्रवृत्तिनिवृत्तिविषयकं यतः मनः अन्तःकरणं वा सर्वान्तरतमकूटस्थनित्यचैतन्यज्योतिषा भासितं सत् स्वविषयसंकल्पविकल्पादि-मननसामर्थ्यं लभते। 'इह बुद्धिमनसी एकीकृत्य निर्देशो मनस इति' स्पष्टीकृतं भाष्यकारशङ्कराचार्यवर्येण।[8]

वस्तुतः बुद्धेर्मनसः च एकत्वाभिप्रायेण अन्तःकरणत्वं स्वीकृतमुपनिषत्सु। वृत्तिभेदेन क्रियाभेदेन वा तस्यान्तःकरणस्य नामान्तराणि स्वीकृतानि उपनिषत्सु । यद्यपि गुण-क्रियादिधर्मरहितस्य आत्मनः कर्तृत्व-भोक्तृत्वादिकं वर्णितमुपनिषदि तथापि तत् सर्वमन्तःकरणोपाधियोगेन सम्भवति।

कठोपनिषदि रथरूपकेन वर्णितं शुद्धचैतन्यस्य बुद्ध्याद्युपाधिकृतं सुखदुःखादीनां भोक्तृत्वं, 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहु र्मनीषिणः' [9] इति। तत्र आत्मनः रथिनः शरीररथस्य अध्यवसायलक्षणा बुद्धिः सारथिः, संकल्पविकल्पात्मकमनस्तु रथस्य प्रग्रहः इति अन्तःकरणस्य वृत्तिद्वैविध्यं कल्पितम्- "आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥"[10]

अतोऽत्र अवधानयोग्यं यत्, बुद्धेः स्वच्छत्वात् शुद्धचैतन्यस्य तत्र प्रतिबिम्बनं भवति। एवमेव जडस्य अन्तःकरणस्यापि चैतन्यज्योतिषा अवभासितत्वात् कर्तृत्वादिकं सुखदुःखादिकञ्च सिध्यति। बृहदारण्यकोपनिषदि उक्तं यथा, 'मनसा ह्येव पश्यति मनसा शृणोति' इति। ऐतरेयोपनिषदि प्रज्ञानरूपस्य शुद्धचैतन्यस्यैव विविधवृत्तिरूपाः एकादश मनोव्यापाराः पृथक्त्वेन निर्दिष्टाः यदेतद्धृदयं मनश्चैतत्- संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येतानि प्रज्ञानस्य नामधेयानि भवति।[11] एताः मनोवृत्तयः शांकरभाष्ये व्याख्याताः, यथा, संज्ञानं संज्ञप्तिश्चेतनभावः। आज्ञानमाज्ञप्तिः ईश्वरभावः। विज्ञानं कलादिपरिज्ञानम्। प्रज्ञानं प्रज्ञप्तिः प्रज्ञता (बोधिः, तत्कालिकप्रतिभा वा)। मेधा ग्रन्थधारणसामर्थ्यम्। दृष्टिः इन्द्रियद्वारा सर्वविषयो-पलब्धिः।' इत्यादिव्याख्यावाक्यानि उपलभ्यन्ते। न ते मनोव्यापाराः अन्तःकरणवृत्तयः वा स्वतन्त्राः अपि तु शुद्धचैतन्यस्य एतानि औपाधिकनामानि। कठोपनिषदि 'मनसस्तु परा बुद्धिः' इति निर्देशेन मनसः बुद्धिनिकृष्टत्वे सिद्धेऽपि बुद्धेर्मनसः च ऐक्यं बहुत्र उल्लिखितम्, तयोः अन्तःकरणत्वं च स्वीकृतमुपनिषत्सु। बुद्धिमनसोः एकत्वाभिप्रायेन बृहदारण्यकोपनिषदि स्पष्टं विविधमनोवृत्तयः समुल्लिखिताः- 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव।'[12] तस्य अन्तःकरणस्य वृत्तिभेदेन विभागचतुष्टयं यथा दर्शितमत्र उत्तरकालिनाद्वैतवेदान्तप्रस्थाने तथैवानुसृतम्। 'मनश्च मन्तव्यं च, बुद्धिश्च बोद्धव्यं च, अहङ्कारश्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च 'इत्युपदर्शितं प्रश्नोपनिषदि।[13] अत्र बुद्धिमनसोः व्यापारभेदेनैव विभागः उपपादितः। अतः मनो नामान्तःकरणमिति कार्यं भूतसूक्ष्मं सुखदुःखाद्युपलब्धिसाधनं बाह्येन्द्रियभिन्नमिति। छान्दोग्ये च भूतसूक्ष्मं सुखदुःखाद्युपलब्धिसाधनं बाह्येन्द्रियभिन्नमिति।

छान्दोग्ये च त्रिवृत्करणेन अन्नमयमनसः उत्पत्तिः तस्य विकारित्वं विनाशित्वञ्च प्रतिपादितम्। भक्षितान्नस्य सूक्ष्मतमपरिणामः एव मनः इत्युपदिष्टम्-

---

7. केनोपनिषत्, १/२ ।
8. केनोपनिषत्, शा. भा., १/२ ।
9. कठोपनिषत्, १/३/४ ।
10. कठोपनिषत्, १/३/३ ।
11. ऐतरेयोपनिषत्, ३/२ ।
12. बृहदारण्यकोपनिषत्, १/४/३ ।
13. प्रश्नोपनिषत्, ४/८ ।

'अन्नमयं हि सोम्य मन' इति।[14] बाह्येन्द्रियातिरिक्तमनसः अस्तित्वसिद्धौ किं मानमिति सुष्ठु विमृष्टं बृहदारण्यके । बाह्यविषयेन्द्रियात्मसंयोगेऽपि कदाचित् कस्यापि विषयं गोचरीभूतं न भवति। तत्कारणरूपेण उक्तमत्र- 'अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति'[15] अर्थात् मनसः सन्निधौ एव इन्द्रियादेः स्वस्वविषयसम्बन्धेन ज्ञानं भवतीति सिद्धम्। अन्तःकरणस्यास्य आत्मसाक्षात्कारे हेतुत्वं स्पष्टतया अभिहितमुपनिषत्सु- 'मनसैवानुद्रष्टव्यम्'(वृ.उ.४/४/१९), 'मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन' (क.उ.२/१ /११), 'दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया' (क.उ.१/३/१२) इत्यादौ। पुनः 'यन्मनसा न मनुते' (के.उ.१/५) इत्यत्र आत्मसाक्षात्कारे मनसः असामर्थ्यमिति उपलभ्यते। ननु विरुद्धमिदमुच्यते, तन्न, असंस्कृतेन कामादिवृत्तिमन्मनसा 'एष सर्वभूतेषु गूढात्मा' न प्रकाश्यते। सूक्ष्मदर्शिभिः धीरैः योगयुक्त्या एकाग्रतया बुद्ध्या एष सम्प्राप्यते। यः मलिनान्तःकरणसम्पन्नः अविवेकी, सः न आत्मतत्त्वं प्राप्तुं शक्नोति, जनन-मरणादिरूपं संसारं चाधिगच्छति। श्रुतिषु दर्शितं, शान्तसमाहितमनसैव एव आत्मप्राप्तिः, नान्यतया- 'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥'[16] अतः मनसः विक्षिप्तभावोपशमः साधनीयः महता यत्नेन इति आत्मज्ञानसाधनमार्गः निर्देशितः श्रुतौ, स्पष्टीकृतं च कठोपनिषद्भाष्ये शंकरभगवता, 'प्रागेकत्वविज्ञानात् आचार्यागमसंस्कृतेन मनसैव इदं ब्रह्म एकरसमाप्तव्यम्' [17] इति।

**भारतीयशास्त्रेषु मनसः स्वरूपम् -**

भारतीयदर्शनप्रस्थानेषु शास्त्रान्तरेषु वा मन आत्मवादिनां चार्वाकानां च मतं विहाय प्रायशः सर्वे एव वादिनः मनोबुद्ध्यादिनामभिः अभिहितस्य अन्तःकरणस्य स्वरूपं वैविध्यं तद्धर्मपरिणामादीन् च निरूपयन्ति। तस्य स्वरूपविषये बहुशः विप्रतिपत्तौ अपि नास्ति तस्य अस्तित्वविषये कश्चित् संशयः। मन्यते अनेन इति करणार्थे निष्पन्नं मनः न्यायनये नित्यद्रव्यमिन्द्रियं 'निस्पर्शमणु।'[18] नैयायिकाः मनसः सुखाद्यान्तरपदार्थोपलब्धिसाधनत्वेन अन्तरिन्द्रियत्वं अणुपरिमाणपरिमितत्वं च स्वीकुर्वन्ति- 'सर्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्वविषयमन्तःकरणं मनः'[19] इति वात्स्यायनः।

न्याय-वैशेषिकमते, संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापत्व-संस्काराः अष्टौ गुणाः मनसि वर्तन्ते। एतेषां गुणानामधिकरणत्वात् मनसः द्रव्यत्वं सिद्धम्। मनः सुखादीनां आन्तरपदार्थानां प्रत्यक्षे करणम्। करणत्वाच्च कर्तुः आत्मनः ज्ञानसुखादिसाधकं भवति। मनसः अणुत्वेन अतीन्द्रियत्वात् मनःसद्भावे प्रमाणमनुमानम्। 'युगपद्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्' इति न्यायसूत्रात् प्रतीयते मनसः अस्तित्वसिद्धिः। प्रतिशरीरमेकमनेकं वा मन इति च विचारे न्यायसिद्धान्तः प्रतिशरीरमेकं मनः ज्ञानायौगपद्यात्। बाह्यपदार्थानां प्रत्यक्षे चाक्षुषादिज्ञानानां एककालोत्पत्तिः न भवतीति इति लोकेऽपि अनुभवसिद्धम्। एतस्मिन् प्रसङ्गे न्यायसमानतन्त्रे वैशेषिकदर्शनेऽपि सूत्रितं कणादमहर्षिणा-'आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्'[20] इति। मनसः द्रव्यत्वमणुत्वं नित्यत्वमिन्द्रियत्वञ्च न्यायनयवत् वैशेषिकेऽपि। मीमांसाप्रस्थाने प्राभाकरमीमांसकैः अपि स्वीक्रियते मनसः अणुत्वमतिरिक्तद्रव्यत्वम् सुखदुःखादीनां प्रत्यक्षे करणत्वम्। 'तस्य च विभुत्वमयुक्तम्, संयोगाभावप्रसङ्गात्' इति युक्तिश्च प्राभाकरविजये नन्दीश्वरेण मनसः अणुत्वे। भाट्टमीमांसकास्तु सुखदुःखादीनां साक्षात्कारे अन्तरिन्द्रियरूपेण मनः स्वीकृत्य तस्य विभुत्वं प्रतिपादयन्ति।

---

14. छान्दोग्योपनिषत्, ६/५/४ ।
15. बृहदारण्यकोपत्, १/४/३ ।
16. कठोपनिषत्, १/२/२४ ।
17. कठोपनिषत्, २/१/२११ ।
18. न्यायमञ्जरी, १/१४ ।
19. वात्सायन-भाष्यम्, न्यायसूत्रम्, १/१/९ ।
20. वैशेषिकसूत्रम्, ३/२/१ ।

सांख्यास्तु मनोबुद्ध्यहंकाराणां अन्तःकरणत्वे स्वीकृते बुद्धिस्वरूपात् मनसः भिन्नत्वमाहुः। अस्मिन् मते तु मूलकारणात् अव्यक्तात् बुद्धिर्महत्तत्त्वं, बुद्धेः अहंकारः, सात्त्विकादहंकारादुत्पन्नमेकादशकमन्तरिन्द्रियं मनः। तर्हि, शरीरमध्यस्थानां सुखादीनां करणमन्तःकरणं त्रिविधं मनोबुद्ध्यहंकारभेदात्। अन्तःकरणस्य त्रैविध्ये प्रतिपादितेऽपि तदेकमेव इति सांख्यानामभिप्रायः। तत्र 'मयेदं कर्तव्यम्' 'एवमेव' इति वा निश्चयः अध्यवसायः बुद्धेर्वृत्तिः। अचेतनायाः बुद्धेः जडत्वेऽपि सिद्धे चैतन्यस्वरूपस्य पुरुषस्य बुद्धिरूपान्तःकरणवर्तित्वाद् बुद्धिरपि चैतन्यमापद्यते यथा सन्निहितजपाकुसुमं लौहित्यमापद्यते। बुद्धेः परिणामः अहंकारः अभिमानात्मिकः- 'अभिमानोऽहंकारः'[21] सात्त्विकाहंकारात् पुनः जायन्ते एकादशेन्द्रियाणि, तत्र एकादशकमान्तरमिन्द्रियं मनः संकल्पमात्रवृत्तिः। अन्तःकरणस्य त्रैविध्ये प्रतिपादितेऽपि तदेकमेव इति सांख्याः 'बीजांकुरमहावृक्षादिवदवस्थात्रयमात्रभेदात्'। बुद्धिमनसोः मध्यमपरिमाणवत्त्वं निर्धारितं सांख्यैः, योगमते तु बुद्धेः विभुपरिमाणवत्त्वं स्वीकृतम्- 'वृत्तिरेवास्य विभुनः चित्तस्य संकोचविकासिनीत्याचार्यः'[22] सांख्यसमानतन्त्रे योगदर्शने च बुद्धिमनसोः सदृशभावः प्रायशः दृश्यते।

अद्वैतवेदान्तदर्शने पुनः वृत्तिभेदेन मनोबुद्ध्यहंकारचित्ताख्यान्तःकरणं सुखदुःखबन्धमोक्षादिसर्वव्यवहारकारणमनित्यं परिच्छिन्नं भौतिकञ्च। तथा हि सत्त्वप्रधानमन्तःकरणम् अपञ्चीकृतपञ्चभूतसात्त्विकांशेभ्यः मिलितेभ्यश्च जायते - "एते पुनः आकाशादि-गतसात्त्विकांशेभ्यः मिलितेभ्य: उत्पद्यन्ते" ।[23] सूक्ष्मभौतिकं सत्त्वप्रधानं संकोचविकाशशीलम् अन्तःकरणं अद्वैतवेदान्तमते मध्यमपरिमाणं विषयप्रत्यक्षकाले विषयरूपेण परिणमते। सः विषयाकारपरिणामः वृत्तिरिति। एवं मनसः असन्निधौ तु रूपादि-बाह्यविषयाणां ज्ञानं न सम्भवति इति बृहदारण्यकोपदिष्टदर्शनानुसृत्य ब्रह्मसूत्रशारीरकभाष्ये आचार्यशङ्करचरणैः मनसः अस्तित्वमुपस्थापितम्- 'यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः।'[24] तस्य जन्यत्वेऽपि सिद्धमामोक्षस्थायित्वं परमुक्तौ च कारणेन सह आत्यन्तिकनाशः। अद्वैतवेदान्ततत्त्वप्रतिपादकत्वेऽपि अस्ति वासिष्ठदर्शनस्य स्वीयराद्धान्तः विषयेऽस्मिन्। वसिष्ठाचार्येण प्रतिपादितस्य दार्शनिकतत्त्वस्यापि केन्द्रीभूतं तत्त्वं मनस्तत्त्वम्। वसिष्ठ-रामसंवादमुखेनोपस्थापितमस्मिन् ग्रन्थे उपस्थापितं परमपुरुषा-र्थसाधनमनस्तत्त्वज्ञानसापेक्षम्। आत्मतत्त्वपिपासुना रामेण च सम्यगनुभूतम्- "चित्तं कारणमर्थानां तस्मिन् सति जगत्त्रयम्। तस्मिन् क्षीणे जगत् क्षीणं तत्चिकित्स्यं प्रयत्नतः॥"[25]

मनःस्वरूपाद्युपस्थापनावसरे इदमत्रावधेयं यत् -निराकारचैतन्यस्य योऽर्थाकाराध्यासः तन्मनः। अर्थात् मनो नाम किञ्चिदपि परमार्थतः न विद्यते। अविद्यावशात् मनसः समुद्भूतं दृश्यं जगत् मृगतृष्णाम्बुसन्निभं मिथ्येति। यदिदं किञ्चिल्लुयते दृश्यजातं तत् सर्वमेव वस्तुतः अजरामरमव्ययं परं ब्रह्मैव। अतः कथं प्रपञ्चितमिदं विश्वं मनसा इत्यतः उच्यते, संकल्पवशात्-

**अनन्तस्यात्मतत्त्वस्य सर्वशक्तेर्महात्मनः। संकल्पशक्तिरचितं यद्रूपं तन्मनो विदुः॥**[26]

संकल्पनं च बाह्योपकरणरहितकल्पनामात्रम्। योगवासिष्ठे मनोमिथ्यात्वे प्रतिष्ठिते तदधिष्ठानतत्त्वं तदारोपप्रकारं तस्य मिथ्यात्वे च कारणं प्रतिपादितम्। वासिष्ठमते, सर्गादौ अक्षयमद्वयं चिद्रूपं परं ब्रह्म एव अविद्याहेतुना आकाशादिक्रमोद्भूतलिङ्गसमष्ट्यात्मा तदनुप्रवेशात् तदभिमानेन तदन्तर्गतप्राणधारणोपाधिना जीवभावं परिगृह्णातीव। जीवसमष्टिरूपः भूतात्मा एषः एव स्वयम्भूः विज्ञानात्मा ब्रह्मा संकल्पविकल्पमननात् जाड्येन मन्थरीभवन् मनो भवति। अतः संकल्पात्मकमनोरूपपरिग्रहात् -

---

21. साङ्ख्यसूत्रम्, २/१६ ।
22. योगसूत्रम्, ४/१० ।
23. वेदान्तसारः, पृ.-१०६ ।
24. ब्रह्मसूत्रम्, शाङ्करभाष्यम्, २/३/१२ ।
25. योगवासिष्ठरामायणम्, १/१६/२५ ।
26. योगवासिष्ठरामायणम्, ३/९६/३ ।

"संकल्पमात्रमेवैतन्मनो ब्रह्मेति कथ्यते। संकल्पाकाशपुरुषो नास्य पृथ्व्यादि विद्यते॥"[27]

अतः इदं मनः ब्रह्मभिन्नं नातिरिक्तं किंञ्चिदिति प्रतिपादितमत्र। तयोः यः भेदः खलु कल्प्यते, स च देशकालकलामात्रभेदः, न खलु वास्तवः-'भेदो दृश्यत एवायं व्यवहारान्न वास्तवः' कल्पितभेदभावस्वीकरणेन प्रयोजनवद्व्यवहारसिद्धिः एव तात्पर्यम्। यथा नटः नानाविधबेषभूषादीन् धारणेन विविधचरित्रचित्रणं करोति तथैव मनः अपि कल्पनाशतैः विचित्रकर्मवशात् अहंकारमनोबुद्ध्यादिनामभेदान् धत्ते। उच्यते च-

'यथा गच्छति शैलूषो रूपाण्यलं तथैव हि। मनो नामान्यनेकानि धत्ते कर्मान्तरं व्रजत्॥'[28]

अतः योगवासिष्ठे मनोबुद्ध्यहंकार-कर्मकल्पनास्मृतिवासनाविद्यामलप्रकृति-मायाक्रियादिनामवैचित्र्यं समुपलभ्यते कर्मभेदवशात्। शाक्ततन्त्रे जडशक्तिप्रधाना आत्मस्वरूपभूता चला चितिरेव मनः। त्रिपुरारहस्ये व्याकृतं-'...मनो नान्यदात्मैव मन उच्यते। चला चितिर्मनो नाम्नी निश्चलात्मस्वरूपिणी॥' काश्मीरीयशैवदर्शनेऽपि प्रायशः तुल्यविचारः मनःस्वरूपविषये- 'चितिरेव चेतनपदादवरूढा चेत्यसंकोचिनीचित्तम्।'[29]

**उपसंहृतिः-**

अस्माभिः उपलभ्यते यत्, श्रुतिपरम्परायाम्, अध्यात्मविद्यामार्गेषु, भारतीयश्रुतिनिर्भरदर्शनधाराप्रवाहेषु च मनःस्वरूपं समीक्षितं विमृष्टं वा मुख्यतया आत्मतत्त्वं प्रापणार्थम्। मनस्तत्त्वावबोधनेन विना आत्मतत्त्वाधिगमः न खलु फलवान् भवितुमर्हति। आत्मतत्त्वाधिगमेन विना च आत्मविश्रान्तिः न कदापि सम्भवति। मुख्यतया उपनिषत्सु आत्मतत्त्वानुसन्धानावसरे मनःस्वरूपस्य च अन्वेषणं समारब्धम्, उत्तरकालीनशास्त्रधारायां भिन्नभिन्नदृष्टिक्रमेण च तस्य विकसनं लक्ष्यते। यद्यपि अध्यात्मवादिनां मतानुसारेण नित्यत्वात् चेतनत्वात् आत्मनः एव परं प्राधान्यम् अङ्गीकृतम्, तथापि आत्मानं विहाय व्यक्तिनामधेये देहेन्द्रियादिसंघाते अन्तःकरणस्य मनसः वा सर्वव्यवहारहेतुत्वात् प्राधान्यं सर्ववादिसम्मतम्। मनःस्वरूपपर्यालोचनप्रसङ्गे विविधदार्शनिकप्रस्थानेषु दृश्यते च विप्रतिपत्तिः। तथापि आत्मज्ञानैकमात्रलक्ष्यत्वात् तत्साक्षात्कारे च मनसः अवश्योपयोगित्वात् भारतीयदार्शनिकमण्डले सर्वैरपि महता यत्नेन मनस्तत्त्वप्रसङ्गः समीक्षितः इति निश्चप्रचम् वक्तुं शक्यते इति शम्।

*******

---

27. योगवासिष्ठरामायणम्, ३/२/५४ ।
28. योगवासिष्ठरामायणम्, ३/९६/४३ ।
29. प्रत्यभिज्ञाहृदयम्, ५ ।

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# वेदाङ्गछन्दसि तत्त्वार्थदर्शनम्

**Venkata Subbaiah Bathula,**
Ph. D. Scholar - Yoga & Spirituality Department,
Swami Vivekananda Yoga AnusandhanaSamsthana,
(Deemed to be University) 19, Eknath Bhavan, Gavipuram Circle,
K.G. Nagar, Bangalore, India - 560 019
Mobile: +91 9945125002, Email: bvsubbaiah@gmail.com.

**Prof. Melukote K. Sridhar,**
Registrar, S-VYASA,
Swami Vivekananda Yoga AnusandhanaSamsthana,
(Deemed to be University) 19, Eknath Bhavan, Gavipuram Circle,
K.G. Nagar, Bangalore, India - 560 019.
Mobile: +91 9480467836, Email: drmksridhar@gmail.com

**उपोद्घातः**

भारतीयवाङ्मये वेदानां प्रमुखस्थानं वर्तते । विदन्त्यनेन धर्माधर्मौ इति वेदः । विद्ज्ञाने इति धात्वर्थः । वेदानां भाषा भावश्च दुरूहौ । अतः वेदार्थानवबोधाय वेदाङ्गानाम् अपेक्षा भवति । पतञ्जलिना अपि उक्तम् – "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्" (महाभाष्ये पस्पशाह्निके ३.१.३) । अङ्ग्यते ज्ञायते अनेन इत्यङ्गम् । अर्थात् यस्मात्स्वरूपज्ञानम् अवगम्यते तदङ्गमिति । किमस्ति स्वरूपज्ञानम् ? – तदा द्रष्टुः स्वरूपेऽवस्थानम् (इति योगसूत्रम् १.१) । यदा चित्तवृत्तीनां निरोधः भवति तदा स्वरूपस्थानं भवति । स्वरूपवर्णनं यथा- स्थूल-सूक्ष्म-कारणशरीराद्यतिरिक्तः पञ्चकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानन्दस्वरूपः सन्यस्तिष्ठति स आत्मा (तत्त्वबोधः २.२) । अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः इति तैत्तिरीयोपनिषदि अस्य पुरुषस्य पञ्चकोशाः व्याख्याताः । अत्र मनोमयकोशस्य वर्णनं यथा- यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । (तैत्तिरीयोपनिषत् -आनन्दवल्ली -तृतीयानुवाकः) ॥ एवं वेदवाङ्मयमेव पुरुषस्य मनोमयकोशं सूचयति । तस्य वेदाध्ययनस्य अधिकारप्राप्त्यै अध्येतव्यांशा एव वेदाङ्गानि । वेदाङ्गैः सह वेदपुरुषज्ञानमेव कैवल्यसाधकं भवति । यथा चोक्तं श्वेताश्वेतरोपनिषदि वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ इति ३.८ ॥

**षडङ्गसहितः वेदपुरुषः-**

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।। ४१ ।।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्साङ्गमधीत्येव ब्रह्मलोके महीयते ।। ४२ ।। इति पाणिनीयशिक्षा ।

अत्र उच्चारण-गति-गानादिविधिना वेदवाङ्मयस्य शब्दरक्षणार्थं शिक्षा-छन्दश्शास्त्रयोः विनियोगः । पुनः वेदवाङ्मयस्य अर्थावबोधने व्याकरण-निरुक्तशास्त्रयोः विनियोगः । ततः पुनः वेदवाङ्मयस्य अनुष्ठानादिपूर्वकज्ञानार्जने ज्योतिष-कल्पशास्त्रयोः विनियोगः । तथा वेदाङ्गानाम् अध्ययने सति शब्द-अर्थज्ञानानां समापत्तिर्भवति । तदेव पतञ्जलिना सवितर्कासमापत्तिः इति व्याख्यातम् । तत्र शब्द-अर्थ-ज्ञान-विकल्पैः सङ्कीर्णा सवितर्का समापत्तिः । इतियोगसूत्रम् १.४२ ॥ पुनः, स्मृति-परिशुद्धौ स्वरूप-शून्य-इव अर्थमात्रनिर्भासा निर्वितर्का । इतियोगसूत्रम् १.४३ ॥ अतः षडङ्ग-सहित-वेदाध्ययनस्यान्ते अर्थमात्रनिर्भासत्वेन असंप्रज्ञातो योगः भवति ।

**छन्दः पादौ तु वेदस्य-**

चदि आह्लादे दीप्तौ च । छन्दयति असुन् । छन्दयति = अह्लादयति इति छन्दः । छन्द्यते अनेन वा इति छन्दः । छन्दयति = पृणाति रुच्यते इति छन्दः । छन्दयति मन्त्रप्रतिपादितयज्ञादीन् इति छन्दः । मनोमयकोशे सन्छन्दः प्राणमयकोशं छन्दयति इति वा प्राणमयकोशः छन्द्यते मनोमयात्मकेन छन्दसा वा इति । प्रज्ञानं ब्रह्मेति ऐतरेयोपनिषत् (३.३) । आनन्दो ब्रह्मेति तैत्तिरीयोपनिषत् (३.६) । तथा आह्लादकरश्च प्रदीपकश्च छन्दः आत्मसाक्षात्कारयोजकः वेदाङ्गेषु प्रधानः । आध्यात्मिकाह्लादः पद्यते अनेन इति पादः । पद्गतौ । अत एव छन्दः पादौ तु वेदस्य इति उच्यते । अस्मिन्नर्थे गरुड एव छन्द इत्यभिप्रायः भागवतपुराणे दृश्यते, यथा—

* छन्दोमयेन गरुडेन समूह्यमानः चक्रायुधोऽभ्यगमदाशुयतो गजेन्द्रः । भागवतपुराणम् ८.३.३१ ।

* गरुडो भगवान् स्तोत्रस्तोभः छन्दोमयः प्रभुः । भागवतपुराणम् ६.८.२९ ।

पुनः गायत्र्यादि सप्तछन्दांसि सूर्यस्य सप्तरश्मय इत्यपि व्याख्यातं यथा—

* छन्दांसि वै व्रजो गोस्थानः । इति तैत्तिरीयब्राह्मणम् ३.२.९.३ ॥

* हयाश्च सप्त छन्दांसि गायत्र्यादीनि सुव्रत । अग्निपुराणम् १२०.०२६॥

**छन्दोभिः व्याहृत्युपासनम्-**

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः, इति तैत्तिरीयोपनिषदि शीक्षावल्ली – पञ्चमानुवाकः । तथा छन्दोभिः व्याहृत्युपासनं यथा—

- पृथिवी गायत्री । अन्तरिक्षं त्रिष्टुभम् । द्यौर्जगती ।
- अग्निर्गायत्री । इन्द्रस्त्रैष्टुभः । विश्वेदेवा जागताः ।
- तेजो वै ब्रह्मवर्चसं गायत्रम् । ओजो वा इन्द्रियं वीर्यं त्रिष्टुप् । पशवो जागताः ।
- ब्रह्मगायत्रम् । क्षत्रं त्रैष्टुभम् । विड्जागतम् ।
- ब्राह्मणो गायत्रः । क्षत्रियस्त्रैष्टुभः । वैश्यो जागतः ।
- चतुर्विंशत्यक्षरा वाग्गायत्री । चतुश्चत्वारिंशदक्षरा वाक्त्रिष्टुभी । अष्टचत्वारिंशदक्षरा वाग्जागती ।

इत्येवम् अनेकधा लक्षण्याः श्रूयन्ते । (छन्दसूत्रस्य छन्दो निरुक्तिव्याख्यानम्, मधुसूदनः) ॥ अर्थात्, गायत्र्या छन्दसा ब्राह्मणम्, त्रिष्टुभा राजन्यम्, जगत्या वैश्यम् असृजत् । तथैव गायत्र्या पृथिवीं च, त्रिष्टुभा अन्तरिक्षं च, जगत्याद्यौश्च असृजत् । पुनः गायत्र्या अग्निं च, त्रिष्टुभा वायुं च, जगत्या सूर्यं च असृजत् । तथैव ऋग्वेदे पुरुषसूक्तेऽपि सृष्टिक्रमवर्णनं यथा—

- ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः। पद्भ्यां शूद्रो अजायत॥
- चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्च अग्निश्च । प्राणाद्वायुरजायत ॥
- नाभ्या आसीदन्तरिक्षम् । शीर्षो द्यौ समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकां अकल्पयन् ॥ (ऋक् १०.९०.-१२...१४)

**अक्षरेण मिमते सप्तवाणीः-**

अक्षरेण मिमते सप्तवाणीः । इति ऋक् १.१६४.२४ ॥ छन्दो हीनो न शब्दोऽस्ति न छन्दश्शब्दवर्जितम् इति नाट्यशास्त्रम् १४.४७॥ चत्वारि वावशतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि (४,३२,०००), इत्येवम् अक्षरसङ्ख्यानं स्मर्यते । (छन्दसूत्रस्य छन्दो निरुक्तिव्याख्यानम्, मधुसूदनः) ॥ तथा यदक्षरपरिमाणं तच्छन्दः । मात्राक्षरसङ्ख्या नियतावाक्छन्दः । अत्र आपस्तम्बश्रौतसूत्रेषु, छन्दोभिः अनुष्ठानविधानमपि सूचितं यथा—

i. मा छन्दः, तत्पृथिवी, अग्निर्देवता ।

ii. प्रमा छन्दः तदन्तरिक्षं, वातो देवता ।

iii. प्रतिमा छन्दः तद्यौः, सूर्यो देवता ।

iv. अस्रीविः छन्दः, तद्दिशः, सोमो देवता ।

v. विराट् छन्दः, तद्वाग्, वरुणो देवता ।

vi. गायत्री छन्दः, तद् अजा, बृहस्पतिर्देवता ।

vii. त्रिष्टुप् छन्दः, तद्धिरण्यम्, इन्द्रो देवता ।

viii. जगती छन्दः, तद्यौः प्रजापतिर्देवता ।

ix. अनुष्टुप् छन्दः, तद् वायुः, मित्रो देवता ।

x. उष्णिहा छन्दः, तत् चक्षुः, पूषा देवता ।

xi. पङ्क्तिः छन्दः, तत्कृषिः, पर्जन्यो देवता ।

xii. बृहती छन्दः, तद् अश्वः, परमेष्ठी देवता । (इति आपस्तम्बश्रौतसूत्रम् १६.२८.१) ॥

तथा कैवल्यसाधने छन्दोभिः व्याहृत्युपासनप्राशस्त्यं दर्शितम् अस्मिन् ऋग्वेदमन्त्रेऽपि—

यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत ।

यद् वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः ॥ ऋक् १.१६४.२३॥

**पिङ्गलस्य छन्दस्सूत्रम्-**

अस्मिन्छन्दश्शास्त्रे अक्षर-लघु-गुरु-मात्रा-गण-वृत्तादयः पारिभाषिकाः स्मर्यन्ते । तेषां विषये तत्त्वार्थदर्शनम् निरुपितम् अत्र—

**अक्षरः / वर्णः –**

न क्षरति इति, ग्राह्यम् अनेन तं गृह्यते इति अक्षरः । क्षरसञ्चलने । आध्यात्मिकस्थितये वर्ण्यते, आध्यात्मिकस्थितं वर्णयतीति च वर्णम् । वर्णस्तुतौ । त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ इति पाणिनीयशिक्षा ३ ॥

**मात्रा –**

आध्यात्मिकाह्लादः मीयते अनेन इति मात्रा । चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः । शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ इति पाणिनीयशिक्षा ४९॥

**लघु एवं गुरु**

- आध्यात्मिकः अनेन लङ्घ्यते इति लघुः । आध्यात्मिकं प्रति लङ्घति च इति लघुः । लघि गतौ ।
- सर्वार्थान् गृणाति इति गुरुः । गृ शब्दे ।

**गणाः**

गण्यते आध्यात्मिकाह्लादः अनेन इति गणः । गणसङ्ख्याने । यथा गुणत्रयी प्रकृतिः, तथा वर्णत्रयी गणः । अत्र म-य-र-स-त-ज-भ-न इत्यष्टगणाः अष्टप्रकृतीः सूचयन्ति, यथा—

मयरसतजभनसञ्ज्ञाश्छन्दस्याष्टौ गणास्त्रिवर्णाः स्युः । भूम्यम्बुवह्निवायुव्योमार्कसुधांशुनाकदेवास्ते ॥ (छन्दःकौस्तुभम्)

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ भगवद्गीता ७.४ ॥

पुनस्तत्रैतेषां प्रकृतीनां ग्रहाधिपत्यं यथा ज्योतिषशास्त्रे पराशरेणोक्तम्—

सर्वात्मा च दिवा नाथो मनः कुमुदबान्धवः ॥ बृहत्पराशरहोराशास्त्रम् ३.१२॥

अग्निर्भूमिनभस्तोयवायवः क्रमतो द्विज । भौमादीनां ग्रहाणां च तत्वानीति यथाक्रमम् ॥ बृहत्पराशरहोराशास्त्रम् ३.२०॥

**वृत्तम् । सममर्धसमं विषमं च-** इति पिङ्गलसूत्रम् ५.२ ॥ वर्तते इति वृत्तम् । छन्दोमयं ब्रह्म इतिभागवतपुराणम् १०.८०.४५॥ तस्य चत्वारि पादाः वर्णितं यथा, सोऽयमात्मा चतुष्पात् । इतिमाण्डूक्योपनिषद् २॥

- सहमान्तिवर्तन्ते इति समः । माङ्माने वर्तने च । चत्वारिपादेषु अभेदभावेन वर्तते सति समवृत्तम्,

यथा—अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत । इति माण्डूक्योपनिषद् १२ ॥

- अर्थति भेदं गच्छतीति अर्थः । अर्थगतौ । जागरितस्थानो वैश्वानरोऽकारः । स्वप्नस्थानस्तैजस उकारः ।
  सुषुप्तस्थानः प्राज्ञो मकारः । इति माण्डूक्योपनिषद् ९, १०, ११) ।
  तदा जागरित-स्वप्न-सुषुप्त-स्थानयोः भेदभावेन गच्छति सति अर्थसमवृत्तम् ।
- वेवेष्टिप्रकृतिभावेन इति विषम् । विष्लृव्याप्तौ । तस्य प्रेरणं विषमम् । यथा मोहावरणेन प्रकृतिभावेन गच्छति सति विषमवृत्तम् ।
  वृत्तिसारूप्यमितरत्र इति योगसूत्रम् १.४॥

**सप्ताऽस्यासन्परिधयः-**

छन्दसाम् आविर्भावः कथम्? पुरुषसूक्ते ब्रह्मयज्ञात्छन्दसाम् आविर्भावमुच्यते यथा- तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे । छन्दाँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत । ऋक्१०.९०.९॥ भागवतपुराणे पुरुषस्य सप्तधातुभ्यः छन्दसाम् उत्पत्तिः वर्णितं यथा, छन्दसां सप्तधातवः २.६.१॥ छन्दांसि साक्षात् तत्र सप्त धातवः । ८.७.२८॥ इति

पुनः भागवतपुराणे, छन्दांसि अनन्तस्य शिरो गृणन्ति (२.१.३१), इत्येवं हठयोगविषये मूलाधारादि सप्तचक्रा अपि वर्णिताः । अत्र गायत्र्यादि सप्तछन्दसां तत्त्वार्थदर्शनं च, पतञ्जलिनोक्तानां सप्त-योग-भूमिकानां च (तस्य सप्तधा प्रान्तभूमिः प्रज्ञा । इति योगसूत्रम् २.२७) । सारूप्यं यथा—

१. गायन्तं त्रायते इति सा गायत्री। त्रैङ्पालने।

२. ओषति अकार्यम् (अविद्यादि क्लेशान्) इति उष्णाः । उष दाहे । उष्णत्वात् उष्णिक्।

३. आध्यात्मिकमनुसृत्य विषयात्मकं (व्याध्यादि विक्षेपसहितं चित्तम्)

४. स्तोभते इति अनुष्टुप् । ष्टुब् स्तम्भे।

५. आध्यात्मिकाह्लादः बृहति इति बृहती । बृह वृद्धौ।

६. आध्यात्मिकाह्लादः पञ्चते इति पङ्क्तिः। पचि विस्तारे। स्थूलसूक्ष्मकारणरूपाणि इति त्रीणि शरीराणि स्तोभते इति त्रिष्टुप् । ष्टुम्स्तम्भे।

७. अनात्मा जायते इति जः । तथाऽपि सः तस्य आध्यात्मिकस्य उपमानतया गच्छति इति जगती । जनी प्रादुर्भावे । गमॢ गतौ।

**गायत्र्यादीनां देवतादितत्त्वविशेषाः**

* अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवताः । छन्दस्सूत्रम्३.६३ ।

* स्वराः षड्ज ऋषभ गान्धार मध्यम पञ्चम धैवत निषादाः । छन्दस्सूत्रम् ३.६४ ।

* सित सारङ्ग पिशङ्ग कृष्ण नील लोहित गौरा वर्णाः । छन्दस्सूत्रम्३.६५ ।

* आग्निवेश्य काश्यप गौतमांगिरस भार्गव कौशिक वासिष्ठानि गोत्राणि । छन्दस्सूत्रम् ३.६६

**उपसंहारः-**

माया मनः सृजति कर्ममयं बलीयःकालेन चोदितगुणानुमतेन पुंसः।

छन्दोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥ भागवतपुराणम् ७.९.२१॥

अस्य दुस्तरस्य छन्दोमयस्य संसारचक्रस्य षोडशाराः प्रश्नोपनिषदि वर्णिताः यथा-

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः ।

अन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च ॥ प्रश्नोपनिषद् ६.४ ॥

अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः ।

तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥ प्रश्नोपनिषद् ६.६ ॥

तथा छन्दोमयस्य पुरुषस्य षोडशकलान्ज्ञात्वा, चित्तवृत्तीनां निरोधे सति असंप्रज्ञातसमाधिः सिद्ध्यते । मार्गन्ति यत्ते मुखपद्मनीडैः छन्दः सुपर्णैः ऋषयो विविक्ते (३.५.४०), इत्यपि छन्दोभिः आत्मसाक्षात्कारमार्गं सूच्यते भागवतपुराणे ।

**सहायकग्रन्थाः**


१. अग्निपुराणम् - https://sa.wikisource.org/wiki/अग्निपुराणम्

२. आर्. सन्तानम्, बृहत्पराशरहोराशास्त्रम् आङ्ग्लानुवादसहितम्, रञ्जन प्रकाशन, नया दिल्ली, २०००.

३. ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बा विद्याभवन, वारणासी, २०१०.

४. ऋग्वेदसंहिता https://vedicheritage.gov.in/samhitas/rigveda/shakala-samhita/

५. करि रामानुजाचार्युलु, पातञ्जल महाभाष्य विवर्त नवाह्निकम्, तेलुगु अकाडमी, हैदराबाद, १९८३.

६. जि.यु.तिटे, आपस्तम्बश्रौतसूत्राणि, आङ्ग्लानुवादसहितम्, मोतीलाल बनारसीदास प्रकाशन, नयादिल्ली, २०१३.

७. तत्वार्थसहितं वेदाङ्गछन्दः, श्रीकृष्णानन्दमठम्, हैदराबाद, २००६.

८. पाणिनीय शिक्षा, श्रीकृष्णानन्दमठम्, हैदराबाद.

९. पातञ्जलसूत्राणि, व्यासभाष्यवाचस्पत्यसहितानि, प्रथमावृत्तिः, निर्णयसागराख्या मुद्रणालयः, मुम्बै, १८९२.

१०. पुल्लेल श्रीरामचन्द्रः, भरतमुनिप्रणीतं नाट्यशास्त्रम् बालानन्दिनी आन्ध्रव्याख्यासहितम्, पि.येस्.शास्त्रि प्रकाशकाः, हैदराबाद, २०१४,

११. शब्दकल्पद्रुमः, चौखम्बा संस्कृत सिरीज आफीस, वारणासी, १९६७.

१२. श्रीपिङ्गलनाग-विरचितं छन्दःशास्त्रम्, श्रीहलायुधभट्ट-विरचित-मृतसञ्जीवनी वृत्तिसमेतम्, श्रीमधुसूदन-विरचित-छन्दोनिरुक्ति सहितम्, निर्णयसागराख्या मुद्रणालयः, मुम्बै, १९३८.

१३. श्रीविद्याप्रकाशानन्दगिरिस्वामिकृतं गीतामकरन्दम् (तेलुगु), श्रीशुकब्रह्माश्रमम्, श्रीकालहस्ति, २०११.

१४. श्रीवेदव्यासमहर्षिप्रणीतम्, श्रीमद्भागवतमहापुराणम्, गीताप्रेस् गोरखपूर, २०१६.

१५. स्वामि तेजोमयानन्द, श्रीआदिशङ्कराचार्यस्य तत्त्वबोधः आङ्ग्ल- व्याख्यानसहितम्, चिन्मयप्रकाशन, मुम्बै, २०१३.


********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# अक्षरपुरुषोत्तमदर्शनालोके गीतोक्तायाः ब्रह्मस्थितेः तात्पर्यम्

**Sadhu Gnannayandas**
Research Scholar
S P University, Vallabh Vidyanagar,
Gujarat 388120
Email : gn0801.ssmv@baps.edu.in,
Mobile : 999 899 5647

Keywords– ब्राह्मीस्थितिः, ब्रह्मरूप, स्वामिनारायणभाष्य, श्रीमद्भगवद्गीता, अक्षरपुरुषोत्तमदर्शन, ब्रह्मविद्या

## भूमिका

**एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति । स्थित्वा स्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥**

निरूपिता ब्राह्मीस्थितिः भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाः एतस्मिन् श्लोके। निरूपितश्च एतादृश्या ब्रह्मस्थितेर्लाभोऽपि – नैनां प्राप्य विमुह्यति इति। एतस्मिन् शोधपत्रे वेदान्तदर्शनेषु नूत्नतमस्य अक्षरपुरुषोत्तमदर्शनस्य आलोके ब्रह्मस्थितेः तात्पर्यं पर्यालोचितम्।

## अक्षरपुरुषोत्तमदर्शनम्

वेदान्तदर्शनेषु एकतमम् अक्षरपुरुषोत्तमदर्शनं परब्रह्मस्वामिनारायणप्रबोधितं नूतनं दर्शनमस्ति। २००७तमे खिस्ताब्दे महामहोपाध्याय-स्वामिभद्रेशदासा एतद्दर्शनस्य शास्त्रीयरीत्या प्रतिपादनं कुर्वन्तः प्रस्थानत्रय्युपरि भाष्यं व्यरचन्। तद्भाष्यम् 'स्वामिनारायणभाष्यम्' इति नाम्ना प्रसिद्धम्। भाष्यानन्तरं भाष्यकारैः 'स्वामिनारायणसिद्धान्तसुधा' इति वादग्रन्थोऽपि रचितः। संस्कृतवाङ्मये तेषामेतादृशं युगकार्यं १०७ विश्वविद्यालयैः सादरं सम्मानितम्। दर्शनेऽस्मिन् पञ्च अनादितत्त्वानि स्वीकृतानि – जीवाः, ईश्वराः, माया, अक्षरब्रह्म, परब्रह्म च। एतेषु अक्षरब्रह्म परब्रह्म चैते द्वे तत्त्वे नित्यमुक्ते। एतयोः द्वयोः ब्रह्मणोः तत्त्वतः विज्ञानमेव ब्रह्मविद्या। स्वामिनारायणभाष्यानुसारं 'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्।' इति श्रुतौ ब्रह्मविद्यायाः व्याख्या कृता यद् यया अक्षरब्रह्म परब्रह्म चेति ब्रह्मद्वयस्य यथावद् विज्ञानं भवेत् सा ब्रह्मविद्या। अक्षरपुरुषोत्तमदर्शनानुसारं **'एषा ब्राह्मी स्थितिः'** इति गीतोक्तौ प्रगुम्फितो ब्रह्मशब्दो अक्षरब्रह्मवाचकः, न तु परब्रह्मवाचकः। स्पष्टप्रतिपत्यर्थं प्रथमं तु अक्षरब्रह्म-परब्रह्मणोः भेदः परिचयश्चात्र निरूप्येते।

## अक्षरब्रह्मणः परब्रह्मणश्च संक्षिप्तपरिचयः

### १. परब्रह्म -

परब्रह्मविषये लिखितं स्वामिनारायणभाष्यकारैः भद्रेशदासस्वामिभिः यद्, 'अक्षराधिपतिः परब्रह्म पुरुषोत्तमो नारायणो नित्यः, सर्वोपरि, सदा दिव्यः, सदा साकारो, निर्दोषो, मायापरः, एकोऽद्वितीयश्चेतनश्च।... सस्वेच्छया सर्वेषां जीवानां तथेश्वराणां कर्मफलप्रदाता तेषां च क्रियाशक्तेर्ज्ञानशक्तेरिच्छा शक्तेश्च प्रेरकः।

### २. अक्षरब्रह्म –

अक्षरब्रह्मविषये लिखितं स्वामिनारायणभाष्यकारैर्यद्, 'अक्षरं ब्रह्म परब्रह्मणो भिन्नं परब्रह्मण इव नित्यमेकं त्रिगुणातीतं चेतनं च तत्त्वम्। तत् सदा दिव्यमनन्तकल्याणमयगुणैर्युक्तं मायिकगुणैश्च रहितं सदा निर्दोषम्। अस्य चाऽक्षरब्रह्मणः स्वरूपगुणैश्वर्यादिकमेकमात्रपरब्रह्माऽधीनमेव। परब्रह्मणश्च नित्येच्छया तज्जडचिदात्मकसकलसृष्टेः कारणमाधारं व्यापकं नियामकं शरीरि च। एतदक्षरं ब्रह्म तत्त्वत एकमेव सदपि चतुर्भी रूपैर्विभिन्नसेवारूपं करोति कार्यम्।

१. अक्षरब्रह्म चिदाकाशरूपेणाऽनन्तकोटिब्रह्माण्डानाम् अन्तर्बहिश्च व्याप्याऽवतिष्ठते धरति च तानिति।

२. अक्षरब्रह्म धामरूपेण परब्रह्मणस्तत्सेवायामवस्थितस्य मूर्तिमतोऽक्षरब्रह्मणस्तथाऽनन्तकोट्यक्षरमुक्तानां दिव्यं निवासस्थानम्। एतदक्षरधामैकमेव, नित्यं सदा त्रिगुणातीतं च। अक्षरब्रह्मसाधर्म्यमाप्ता मुक्ता एवं शक्नुवन्ति तस्मिन् प्रवेष्टुमिति।

३. अक्षरं ब्रह्म सेवकरूपेण तस्मिन्नेवाऽक्षरधाम्नि परब्रह्मेवैव दिव्यद्विभुजादिसर्वाङ्गसम्पूर्णपुरुषाकारेण सदैव परब्रह्मणः सेवायामक्षर-मुक्तानामादर्शरूपेण रममाणमवतिष्ठत इति।

४. पुनस्तदेवाऽक्षरं संसारे बद्धान् जीवानीश्वरांश्च स्वदिव्यप्रसङ्गेन ब्रह्मरूपान् कृत्वा परब्रह्मोत्तमनिर्विकल्पनिश्चयं कारयितुं, तदात्यन्तिक-कल्याणाय, कारयितुं च सदैव परमात्मप्राकट्याऽनुभूतिं, परब्रह्मणः सम्यगखण्डं च धारकेण गुरुरूपेण तत्तद्ब्रह्माण्डेषु परमात्मना साकं मनुष्यरूपं धृत्वाऽवतरति, रक्षति सम्प्रदायपरम्पराम्, अनुभावयति च सर्वान् परमसुखम्।'

**श्रीमद्भगवद्गीताप्रयुक्तः 'ब्रह्मशब्दः' अक्षरब्रह्मवाचकः**

अक्षरपुरुषोत्तमदर्शनानुसारं श्रीमद्भगवद्गीतायां 'ब्रह्म' इति शब्दोक्षरब्रह्मणः वाचकोऽस्ति न तु परमात्मनः। अष्टमेऽध्याये आरम्भ एव अर्जुनस्य प्रश्नः 'किं तद् ब्रह्म' इति। अत्र तच्छब्देन ज्ञातं भवति यद् ब्रह्मविषये पूर्वम् उपदिष्टमेव। यथा द्वितीये 'एषा ब्राह्मी स्थितिः' इत्यत्र प्रप्रथमवारं ब्रह्मशब्दप्रयोगः। तत्पश्चात् चतुर्थे 'ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्', 'ब्रह्माग्नावापरे', 'यान्ति ब्रह्म सनातनम्' इत्यादिस्थानेषु, पञ्चमे 'ब्रह्म नचिरेणाधिगच्छति', 'ब्रह्मण्याधाय कर्माणि', 'निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः', 'ब्रह्मविद् ब्रह्मणि स्थितः', 'स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते', 'स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति', 'लभन्ते ब्रह्मनिर्वाणम्', 'अभितो ब्रह्मनिर्वाणम्' इत्यादिस्थानेषु, षष्ठे 'उपैति शान्तरजस ब्रह्मभूतमकल्मषम्', 'सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते' इत्यादिस्थानेषु, सप्तमे 'ते ब्रह्म तद् विदुः' इत्यादिनैकस्थानेषु ब्रह्मनिरूपणं कृतं भगवता श्रीकृष्णेन। सप्ताध्यायपर्यन्तं श्रीकृष्णमुखेन पुनः पुनः ब्रह्ममाहात्म्यं श्रुत्वा ब्रह्मजिज्ञासुः पार्थः अष्टमेऽध्याये प्रश्नं करोति 'किं तद् ब्रह्म' इति। उत्तरति भगवान् 'अक्षरं ब्रह्म परमम्' अर्थात् मायापरं यदक्षरं तदेव ब्रह्म। एवं गीतोक्तब्रह्मशब्दः अक्षरब्रह्मवाचकः इति स्पष्टं भवति। एतद्वाक्येन एवमपि ज्ञायते यद् ब्रह्म चाक्षरं चैतद्वौ पर्यायवाचिनौ शब्दौ, तयोश्च मेलनेन निर्मितोऽक्षरब्रह्मशब्दोऽपि ब्रह्मणः पर्यायवाची। अन्यच्च 'अव्यक्तोऽक्षर इत्युक्तः' इत्यादिवचनैः अव्यक्तशब्दोऽपि अक्षरब्रह्मवाचकः। 'यदक्षरं वेदविदो वदन्ति।' इति वचनेन ज्ञायते यद् वेदेष्वपि अक्षरब्रह्मणः कीर्तिः भूरिशः गीता। एतस्मिन्नेव श्लोके वदति श्रीकृष्णः 'तद्धाम परमं मम'। अत्र धामरूपस्य अक्षरब्रह्मणः निर्देशस्तु वर्तत एव, तेन सह अक्षरब्रह्मशब्दो नास्ति परमात्मवाचक इत्यपि भवति स्पष्टम्।

**श्रीमद्भगवद्गीतायां 'ब्राह्मी स्थितिः' इत्यस्य तात्पर्यम्**

द्वितीयेऽध्याये स्थितप्रज्ञस्य लक्षणानाम् उपसंहार एकस्मिन् शब्दे कृतः 'एषा ब्राह्मी स्थितिः' इति। स्वामिनारायणभाष्यानुसारं 'ब्राह्मी स्थितिः' इत्यस्य गीताभाष्ये लिखितम् – हे **पार्थ!** एषा त्वया जिज्ञासिता मया च सप्रपञ्चमुपदिष्टैषा **ब्राह्मी** ब्रह्मण इयमिति ब्राह्मी साक्षादक्षरब्रह्मसम्बन्धिनीति यावद् तदक्षरब्रह्मस्वरूपगुरुमननप्रकर्षलभ्या स्वात्मनस्तदक्षरब्रह्मगुणसाधर्म्यलक्षणतद्भावरूपा परमात्मो-पासनपरमानुकूला **स्थितिः** परिशुद्धात्मनो ब्रह्मविभावनसंस्कृता दिव्यदशोच्यते। **एनां** ब्राह्मीं स्थितिं कल्याणौपयिकब्रह्मगुणानिति यावत् **प्राप्य** स्वात्मन्यपि सम्पाद्य **न विमुह्यति** धृतमानुषवपुषि नारायणस्वरूपे भूरिमानुषभावदर्शनेऽपि तस्मिन् प्राकृतदोषकल्पनलक्षणं परमापवर्गप्रत्यनीकं मोहं न गच्छति। प्रकृतिपुरुषसंसर्गोद्भवे सकलप्रपञ्चे च क्वापि मोहं तदासक्तिलक्षणं च नाप्नोतीत्यर्थः। अनेन 'पृच्छामि त्वां धर्मसंमूढचेताः। यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे' (गी.२/७) इत्युक्तवते मूढचेतसे ब्रह्मरूपः सन् परब्रह्मस्वरूपैकनिष्ठो भवेति निश्चितश्रेयोवचनमुक्तम्। स्पष्टतया निर्दिष्टमत्र यद् ब्राह्मी स्थितिः अर्थात् अक्षरब्रह्मणः स्थितिः।

मुमुक्षुभिः एतादृशी स्थितिः प्रापणीया, तस्योपायोऽपि निर्दिष्ट 'अक्षरब्रह्मस्वरूपगुरुमननप्रकर्षलभ्या' इति विशेषणेन।

अतः ब्रह्मस्वरूपगुरोः आवश्यकता वर्तते एतादृशीं स्थितिं प्राप्तुम् इत्यपि स्पष्टीभवति। स्थितिः इत्यस्य विशेषणद्वयमत्र दृश्यते 'स्वात्मनस्तदक्षरब्रह्मगुणसाधर्म्यलक्षणतद्भावरूपा''परमात्मोपासनपरमानुकूला' च। अक्षरपुरुषोत्तमदर्शनानुसारम् अक्षरब्रह्म-परब्रह्मण उत्तमो भक्तः। अतः परमात्मोपासनपरमानुकूला स्थितिः वर्तते तस्याक्षरब्रह्मणः। अन्यच्च इयं स्थितिः अक्षरब्रह्मगुणसाधर्म्यरूपा अक्षरब्रह्मभावरूपा च। स्पष्टीकृतं गुणसाधर्म्यम् 'एनां' इति शब्दस्य भाष्ये यथा - कल्याणौपयिकब्रह्मगुणानिति यावत्। अक्षरब्रह्मणि तु नैकै गुणाः सन्ति, तत्तु चिदाकाशरूपेण अनन्तानां ब्रह्माण्डानामाधारः धामरूपेण च परब्रह्मसेवकरूपाक्षरब्रह्म अनन्तमुक्तान् च धारकम् अपि परन्तु तेभ्यः गुणेभ्यः मुमुक्षौ कल्याणोपयिकब्रह्मगुणानामेव आगमनं भवति।

**'स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते॥'** अत्र 'ब्रह्मभूयाय कल्पते' इत्यस्य भाष्ये लिखितम् – अक्षरब्रह्मसाधर्म्याय कल्पते परमात्मभक्त्यौपयिकब्रह्माऽक्षरगुणवैभवसमृद्धो भवतीत्यर्थ:। अनेन परब्रह्मभक्तिं सर्वथा परित्यज्य केवलमक्षरब्रह्मैकाऽनुसन्धानेनैव स्वात्मनो ब्रह्मरूपत्वमाकाङ्क्षमाणस्य सर्वथा वृथैव प्रयत्न इति ब्रह्मरूपत्वमपि परमात्मकृपाऽधीनमिति गम्यते। ब्रह्मभावायेत्यनुक्त्वा ब्रह्मभूयायेति भूयस्त्ववचनं न ह्यशेषेण सर्वेऽक्षरब्रह्मगुणास्तन्मननादिभि: परमात्मोपासकात्मनि सम्पाद्या अपि तु परमनि:श्रेयसाऽनुकूला एवेति सूचयितुम्। दिव्यदेशरूपेण परमात्मतदुपासकाऽनन्तकोटिमुक्ताधारत्वं चिदाकाशरूपेण सर्वत्र व्यापित्वमित्यादीनां प्रत्यगात्मनि सम्पादनाऽसम्भवात्। एवमिह 'एषा ब्राह्मी स्थिति: पार्थ'(गी.२/७२) इति द्वितीयोक्ता ब्रह्मस्थिति: पुनर्दृढायिता।

**ब्रह्मस्थिति-संपादन-प्रक्रिया**

स्वामिनारायणभाष्यनिरूपिता ब्रह्मस्थितिसम्पादनप्रक्रिया संक्षेपेणात्र निरूप्यते। श्रीकृष्णेन गीतायां चतुर्थेऽध्याये गदितं यद् 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' अर्थात् 'ज्ञानी तत्त्वदर्शी ब्रह्मस्वरूपो गुरुः ते ब्रह्मज्ञानोपदेशं दास्यति।' पञ्चमेऽध्याये श्रीकृष्णः वदति, 'स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते' अर्थात् 'गुरुरूपाक्षरब्रह्मप्रसंगात् परमात्मनः शाश्वतं सुखं प्राप्यते।' उपनिषत्स्वपि ब्रह्मस्वरूपगुरोरनिवार्यता दर्शिता यथा, 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्म निष्ठम्' स्वामिनारायणभाष्यानुसारं अत्रापि ब्रह्मशब्देन गुरुरूपाक्षरब्रह्म निर्दिष्टम्। अतः एतादृशस्य ब्रह्मस्वरूपगुरोः प्रसङ्गं लब्ध्वा तदक्षरब्रह्मगुरोः मननसदाज्ञानुवृत्यादिपालनादिभिः तदक्षरब्रह्मणः यथावज्ज्ञानं प्रापणीयम्। अक्षरब्रह्मणः ज्ञानेन फलद्वयं प्राप्यते -

१. 'ब्रह्मविद् ब्रह्मैव भवति' अर्थात् यो मुमुक्षुः ब्रह्मस्वरूपगुरो दृढप्रसङ्गादिभिः अक्षरब्रह्म यथावद् जानाति सः ब्रह्मरूपो भवति।

२. 'ब्रह्मविदाप्नोति परम्' – अक्षरब्रह्मज्ञाता ब्रह्मरूपो भक्तः परब्रह्म परमात्मानं प्राप्नोति। गीतायामपि द्वादशेऽध्याये निरूपित एषः सिद्धान्तः यथा- **ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।... ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥** निर्दिष्टमेतस्य भाष्ये यद् – 'ये जनाः परमात्मोपासनाधिकारसम्पादनौपयिकतत्प्रधानाङ्गभूतस्वात्मब्रह्मरूपत्वसंसिद्ध्यर्थं प्रकर्षेण तद् ध्यानमननादिलक्षणोपासनमनुतिष्ठन्ति **त एव**। अन्ययोगव्यवच्छेदार्थम् एवकार:। **मां** परमात्मानं **प्राप्नुवन्ति** लभन्ते नान्य इत्यर्थ:। एवमत्र ब्रह्मस्थितेः सम्पादनाय परब्रह्मणश्च प्राप्तये ब्रह्मस्वरूपगुरुद्वारा अक्षरब्रह्मापि ज्ञातव्यतया निर्दिष्टम्।

**उपसंहारः**

अक्षरपुरुषोत्तमदर्शने अनादितः नित्यमुक्ते द्वे ब्रह्मतत्त्वे स्वीकृते - अक्षरब्रह्म परब्रह्म च। तयोः अक्षरब्रह्म उत्तमो भक्तः परब्रह्म च अक्षरब्रह्मणोऽपि उपास्यः परात्परः परमात्मा। गीताप्रयुक्तः ब्रह्मशब्दः अक्षरब्रह्मवाचकः न तु परब्रह्मवाचकः। 'ब्राह्मी स्थितिः' इत्यस्य तात्पर्यं एवं- 'साक्षादक्षरब्रह्मस्वरूपगुरोर्दृढतमं प्रसङ्गं लब्ध्वा तन्मननसदाज्ञानुवृत्यादिपालनादिभिः तदक्षरब्रह्मसाधर्म्यलक्षणां देहाऽवस्था-गुणत्रयसमतिक्रमणलभ्यां ब्रह्मरूपतां प्राप्तस्य भक्तस्य स्थितिः।' ब्रह्मस्थितिप्राप्ते भक्तेऽपि अक्षरब्रह्मणः ये कल्याणौपयिकाः गुणाः सन्ति तेषां गुणानामेव प्राप्तिः, न तु धामरूपत्वचिदाकाशरूपत्वेद्यादिसर्वेषाम् इति।

## सन्दर्भग्रन्थसूची

१. साधुभद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, प्रकाशक - स्वामिनारायण अक्षरपीठ, जनवरी २०१२

२. साधुभद्रेशदासः, उपनिषत्स्वामिनारायणभाष्यम्, प्रकाशकः स्वामिनारायण अक्षरपीठ, दिसम्बर २००९

३. महामहोपाध्यायः साधुभद्रेशदासः, स्वामिनारायणसिद्धान्तसुधा, प्रकाशकः स्वामिनारायण अक्षरपीठ, जून २०१७

४. www.baps.org

************

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# देवप्रश्नस्य परिचयः

**B. NAGARAJAN**
Assistant Professor
P G & Research Department of Sanskrit
Dr. Yadhav (Research Guide)
OPJS University, Churu, Rajasthan
Ph - 63792-54164
E-Mail : nagarajansanskrit@gmail.com

**उपोद्घातः**

जगति जन्तवः सर्वे सुखमेव समीहन्ते । तस्मादेव स्वस्वाहारविहारसाधनविधौ प्रवर्तन्ते प्रवर्धन्ते च । आहारविहारादयो यद्यपि जनिभृत्सु समानाः सन्ति तथापि विवेकादेव जन्तुभ्यो भिन्नाः भौतिकपदार्थेषु मिथ्यात्वं मन्वानाः मानवाः निरतिशयं सुखमेव सर्वथा समीहन्ते । समीहे यं सुखं मे भूयात्दुःखं माकचिदिति इच्छा परपर्यायैव । इयं च स्वाभाविकि । तदर्थमेव सर्वाः प्रवृत्तयो विजायन्ते, पुनः सर्वे प्रवर्तन्ते इति सार्वजनीनोऽयं विचारः ।

पुनस्तन्निरतिशयं च सुखं कथङ्कारं सिध्यतीति समुदितायां जिज्ञासायां सत्यां वेदार्थज्ञानानुष्ठानादेवेति समाधानं प्रसिध्यति । वेदो हि नोधनम् । वेदो नाम 'अपौरुषेयं वाक्यम्' "इष्टप्राप्त्यानिष्टपरिहारयो- रलौकिकमुपायं यो वेदयते सः" इति लक्षणं भाष्यकारैर्नि-रटङ्कि । "विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादि पुरुषार्थाः" इति व्युत्पत्या वेदज्ञानमन्तराधर्मादयो न सिध्यन्ति, धर्मार्थकामानां सिध्यभावे चतुर्थस्य निरतिशयसुखरूपस्य मोक्षस्यापि सुतरां सिध्यभावः इति तु निश्चप्रचम् । तस्मादेव धर्मार्थकामाः समनुष्ठेयाः निरतिशय-सुखैकप्रेप्सुभिरिति साम्प्रतम् । अतैव प्रश्नमार्गस्य आवश्यकता अस्ति तादृशप्रश्नमार्गस्य परिचयः विस्तीर्यते ।

**प्रश्नमार्गस्य परिचयः**

प्रश्नस्य मार्गः एव प्रश्नमार्गमिति । अत्र पृच्छकस्य प्रश्नः, तस्य फलनिर्णयमेव अस्य ग्रन्थस्य उपयोगः । आचार्यः गुरुप्रसादः अस्य रचयितास्सन्ति । आचार्येण मङ्गलश्लोके बुद्धेः शुद्धिः, वाक्सिद्धिः, वृद्धिश्च प्रार्थ्यते यथा । ग्रन्थेऽस्मिन्द्वात्रिंशदध्याः सन्ति । प्रश्नस्यैव प्रामुख्यं भवति अस्मिन्ग्रन्थे।

प्रश्ननमार्गे प्रश्नस्य विधिः, श्वासप्रश्नः, शकुनप्रश्नः, आरूडप्रश्नः, अष्ट- मङ्गलक्रिया, शत्रागमनप्रशनः, रोगप्रश्नः, गर्भप्रश्नः, देवप्रश्नः, दीपलक्षणं, ताम्बूलप्रश्नः, विवाहप्रश्नः, गृहनिर्माणप्रश्नः, युद्धपिरश्नः, रिपोरागमनप्रश्नः, द्यूतप्रश्नः, वृष्टिप्रश्नः, कूपखननप्रश्नः, बीजपवनप्रश्नः, शस्यप्रशनः, नष्ट- वस्तुप्रश्नः, नष्टद्रव्यदिक्कालप्रश्नः, राज्यसंबन्धीप्रश्नः, जयप्रश्नः, एवं सामान्यप्रश्नः इति प्रश्नविभागाः सन्ति । देवसंबन्धीप्रश्नः एवदेव प्रश्नः इति । प्रश्नमार्गस्य वैशिष्ट्यं तावत्प्रश्नस्य समाधानं तस्य परिहारमपि तत्रैव तस्मिन्नेव अध्याये उक्तमस्ति । ग्रन्थे यत्र यत्र देवसंबन्धीप्रश्नः दृश्यते तस्य संकलनमेव अत्र प्रकटीक्रियते । उदाहरणतया ताम्बूलप्रश्ने देवप्रश्नस्य आवश्यकतातस्य प्रक्रिया इत्यादिविचाराः विलीयन्ते ।

**देवप्रश्न परिचयः**

नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा ।।
तस्याः शिखायामध्ये परमात्मा व्यवस्थितः । सब्रह्म सशिव सहरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ।।
ऋतगं सत्यं परं ब्रह्मपुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ।। - इतिनारायणसूक्ते

अक्षरनित्यं परमात्मा । परमात्मा चैतन्यं सर्वत्र चराचरेषु विद्यन्ते । एकं सद्विप्राः बहुधा वदन्ति । कर्मप्रपञ्चे मनुष्याणां स्थितिः

सूक्तेऽपि एकः परमात्मा सृष्ट्यर्थं ब्रह्मा सृष्टेः विद्यायाः आवश्यकता अस्ति । तस्मात्ब्रह्मपत्नीसरस्वति एवं स्थितिदेवताहरिःपत्नीमहालक्ष्मी । स्थित्यर्थं संपदः आवश्यकता अस्ति एव । एवं संहारप्रक्रियायां छेदभेदादिसंहारः ।

तत्र वस्त्रनिर्माणार्थं तन्तोः योजनं तद्वत् अन्ननिर्माणार्थं व्रीहेः ताडनम्, एवं अत्र उपकरणादिनिर्माणार्थं अयसः ताडनम् । सर्वत्र संहारप्रक्रियां विना सृष्टिः न संभवति । तदर्थं शक्तेः आवश्यकता अस्ति । तदुक्तं भवति सौन्दर्यलहर्याम् । संहारदेवतापरनेश्वरः । परमेश्वरस्य पत्नी शक्तिः । कुशलः अपि स्पन्दितुं न शक्यते, तस्मादेव शक्तियुक्तशिवस्य अत्र लोके विशेषः प्रोच्यते । तेन कारणेनैव देवप्रश्नस्य पूजाकाले शिवः प्रधानदेवता, परिहाररूपेण राशयः, ग्रहाः देवताश्च । तस्मात्प्रपञ्चे सृष्टि - स्थिति – संहार प्रक्रियाः तदर्थं देवताः अत्र पत्नीरूपेण विराजिताः देवताः, एवं तत्पुत्ररूपेण देवताः तत्संबन्धरबपेण विराजिताः देवताः यत्र यत्र आवश्यकता अस्ति तत्र तत्र देवतासंकल्पः तस्मात्कारणात्देवता संकल्परूपेण अर्थात्गणपति - सुब्रह्मण्यः – रामकृष्णादि देवताः सर्वे अत्र स्कल्परूपेण प्रतिमायां आरोपणं कुर्वन्ति ।

तादृशप्रतिमादेव प्रतिमा, अवतारपुरुषाः देवत्वं प्राप्य तेषान् अपि प्रतिष्ठाः । तत्राऽपि प्रकृतिसंबन्धिनी देवताः, अत्र गजाः देवताः एवं वानराः आञ्जनेयरूपं स्वीकृतवन्तः एवं अश्वत्थादिवृक्षाः अत्र दूर्वादितृणविशेषाः सर्वत्र देवतारूपेण विराजन्ते । तादृशदेवतानं आराधनं तत्स्थूलरूपेण वा अथवा बिम्बरूपेण वा अथवा दर्पणरूपेण वा इति निर्णयं कृत्वा देवस्थाने अत्र गर्भगृहे परिपालनीयन् । तत्र स्थूल, सूक्ष्मविशेषाः क्षेत्रान्तर्गतचैतन्यं बिम्बे आवाहनं कृत्वाराधनं करोति, बिम्बस्याराधनं न कुर्वन्ति बिम्बस्थचैतन्यस्य एव आराधनं कुर्वन्ति । गणपतिर्वा सुब्रह्मण्यो वा परमेश्वरो वा विष्णुर्वा तत्र अवयवरूपदेवस्थावयवस्य यथा शरीरस्य मलादिकं सम्भवति तद्वत्क्षेत्रस्यापि दोषः समभवति ।

अत्र क्षेत्रप्रदेशे वा बिम्बस्य वा अथवा गर्भगृहस्य वा परिवारदेवताविशेषस्य वा देवस्थानसंबन्धवृक्षाणां वा दोषादयः संभवन्ति । तत्र चैतन्यस्य दोषं न संभवति मनुष्यकृतचैतन्याधारस्य दोषत्वं संभवति । तादृशदोषाणां निवारणार्थं देवप्रश्नः । तत्र प्रश्नस्य विहितः कालः प्रतः एव । तदेव उक्तम् - "ज्योतिर्विधं प्रातरुपेत्यपृच्छेत्" इति ।

तत्र प्रश्ने प्रतमतः दूतदैवज्ञसमागमः । "दैवज्ञं दैववत्पश्यते" इति । एतत् आत्मान्तर्गतविचाराः । आत्मसम्बन्धिनिविचाराः दैवज्ञस्य यद्वत्वर्तते तद्वदेव प्रश्नस्य गतिः । अत्र देवस्थानप्रतिनिधिरूपेण ताम्बूलफलादिकं स्वीकृत्य दूतदैवज्ञसमागमस्य "पृच्छा" इति कथ्यते।

तदनन्तरं दूतः दैवज्ञेन सः मन्दिरपर्यन्तं गत्वा मार्गमध्ये शकुनादि निरूपणं करणीयम् । तादृशशकुनादिकमपि प्रश्ने विषयः । तत्र प्रश्नारम्भे प्रथमा – नीतिः । गणपत्यादिदेवपूजा, तदर्थं ताम्बूलं - दीपं - तण्डुलं – फलं एवं बहूनि वस्तूनि आवश्यकानि सन्ति । तत्र देवप्रश्नस्य आवश्यकवस्तुषु प्रथमानीतं एकं वस्तुमारभ्य प्रश्नक्रियाम् । तदनन्तरं चक्रलेखनम् । राशिचक्रं विलिख्य मध्ये परमेश्वरं संस्थाप्य आवाहनं कृत्वा तत्रैव परिवाररूपेण मेषादि द्वादशराशीनां पूजा करणीया । यत्र ग्रहाः सन्ति तत्र सूर्याय नमः, चन्द्राय नमः कुजाय नमः, बुधाय नमः इतिक्रमेण पूजा करणीया । तदनन्तरं पञ्चभूतपूजा ।

**पञ्चभूतानि-** तण्डुलम्, जलम्, पुष्पम्, सुवर्णम्, चन्दनम् ।

एतत्मिश्रणं कृत्वा तत्रस्थ कन्यका वा कुमारो वा तस्य हस्ते दत्वा द्वादशराशिषु मध्ये यत्र कुत्रापि संस्थापयत्वित्यादेशः । तस्मिन्समये एव श्वासपरीक्षा । तदनन्तरमेव तत्र सुवर्णन्याससमयः । सुवर्णं नाम जीवः, अतः जीव एव हि काञ्चनम् । सुवर्णस्थापनराशिः सुवर्णारूढा, अनन्तरं तच्छमयः उदयलग्नमारूढोदययोः छत्रलग्नं छत्रेण वर्तमानम्, आरूढेन भूतम्, उदयेन भावि, एवं क्रमेण भूत,वर्तमान,भावि इति विधिः।

भूतवर्तमानभविष्यच्चिन्तनम्- छत्रेण- वर्तमनम्, आरूडेन- भूतम्, उदयेन-भावि अनन्तरं चन्द्रस्य राशिः एवं पृच्छकाधिष्ठि-तराशिः तत्र स्पृष्टाङ्गराशिः तावत्पृच्छकः यत्र स्पृशति तेनाधारेणऽपि फलनिर्णयः । स्पृष्टाङ्गराशिमधिकृत्य बृहज्जातके उक्तमाचार्येण यथा- मेषः-शिरः, वृषभः- मुखम्, मिथुनम्- बाहुद्वयम्, कर्कटः-हृदयम्, सिंहः-उदरम्, कन्या-कटिः, तुला-बस्ति, वृश्चिकः-गुह्यम्, धनुः-ऊरुयुगलम्, मकरः-जानुयुगलम्, कुम्भः-जंघे, मीनः-पादयुगलम् । एवं क्रमेण सर्वत्र लग्नादिकं सर्वं संस्थाप्य तल्लग्नात्भूत, वर्तमन, भावि कार्याणि चिन्तनीया ।

प्रश्नो नामचर्चा,"वादे वादे जायते तत्वबोधः" इति सूक्त्यानुसारं पृच्छकाः एवं दैवज्ञाः च सर्वे मिलित्वा एतादृशलग्नमाधारीकृत्य द्वादशभावचिन्तनम् । तदनन्तरं सूत्रनिरूपणमाश्रित्य पृथ्वी, जल, अग्नि, वायु, आकाशादि सूत्रपञ्चकं वर्तते । पञ्चभूता-धिष्ठितचिन्ताप्रश्नमार्गे संभवति । एवमेव पञ्चस्फुटमपि संभवति मनुष्यशरिरे चैतन्यं वर्तते पञ्चभूतात्मकं शरीरं तद्वत्देवस्थाने देवचैतन्यं वर्तते पञ्चभूतात्मकं बिम्बं,

क्षेत्रप्रदेशं च । तदनन्तरं त्रिस्फुटं तत्र आत्मकारकः, मनःकारकश्च । अत्र सूर्य-चन्द्र-मान्दियोगेन त्रिस्फुटम् । अनन्तरं राहुयोगेन चतुष्फुटम् एवं क्रमेण पञ्चस्फुटमिति स्फुटादयोऽपि प्रश्ने सन्ति । तस्मिन्नेव समये अष्टमङ्गलक्रिया कर्तव्या । एवं क्रमेण वराटिकाफलनिर्णयः ततः श्वासपरीक्षाविधिः । तत्र क्रमः वर्तते- अष्टमङ्गलक्रिया, आरूड्निर्णयः, श्वासपरीक्षा, गणनक्रिया, सूत्रम्, त्रिस्फुटम्, चतुष्फुटम्, पञ्चस्फुटम्, अष्टमङ्गलम्, आरूडम् इति । केचिन्नवीनग्रन्थाः देवप्रश्नमुक्तवलि, प्रश्नावलि इत्यादयः सन्ति । एतेषु ग्रन्थेष्वपि बहवो विषयाः प्रदिपादिताः सन्ति।

**उपसंहारः**

नेत्रेनैव द्रष्टुं शक्यते । ज्योतिषशास्त्रेण इह - पूर्वभावि जन्मनः ज्ञानमपि प्राप्तुं शक्यते । अत एवास्य शास्त्रस्य प्रशंसा एवं भवति तमसिद्रव्याणि दीप इव इति । वेदाङ्गानिषट् । तानि सन्ति ज्योतिषं - कल्पं - शिक्षा - निरुक्तं – व्याकरणं एवं छन्दश्च । अत्र ज्योतिषशास्त्रस्य वैशिष्ट्यं तावत्वेद्पुरुषस्य नेत्ररूपेण उक्तमस्ति तेन कालत्रयचिन्तनमपि अनेन शास्त्रेण कर्तुं शक्यते । स्कन्धत्रयात्मकं भवत्ययं शास्त्रम् । सिद्धान्त, संहिता, होरेति । सिद्धन्तस्कन्धेऽस्मिन् आकाशस्थग्रहनक्षत्रादीनां स्थितिः, ग्रहाणां गतिविशेषः, ग्रहकक्षाः अहर्गणानयनक्रमः, ग्रस्पष्टीकरणप्रकारः, सूर्यचन्द्रयोर्ग्रहणम् इत्यादिविचाराः उपवर्ण्यन्ते । एवमेव दिग्देशकालनिर्णयः सौरसावनादि-नवमानभेदाः, ज्यासाधनम्, चर – देशान्तरसंस्कराः इत्यादि विषयाः अपि स्कन्धस्यास्य विचाराः।

संहितास्कन्धेऽस्मिन्राष्ट्रविषयकशुभाशुभफलं निर्णीयते, न तु व्यक्ति- विषयकम् । सूर्यादिग्रहाणां नक्षत्रमण्डले भ्रमणेन जगति शुभाशुभफलं ग्रहश्रृङ्गटकं, पर्जन्यगर्भलक्षणं, गर्भधारण - वर्षण - सद्योवर्षणं, कुसुम- फललक्षणं इत्यादि अनेकविचाराः विमृश्यन्ते स्कन्धऽस्मिन् ।

तृतीया भवति होरा । अस्य होराशास्त्रस्य फलितज्योतिषमिति संज्ञा वर्तते । अहोरात्रं इतिपदस्य पूर्वपरवर्णयोः विकल्पेन होरा इति पदं सञ्जातम् । अहश्च रात्रिश्च अहोरात्रम् इति । होराशास्त्रे प्रश्नस्याऽपि उपयोगः दृश्यते । प्रश्ननार्गे प्रश्नस्य विधिः, श्वासप्रश्नः, शकुनप्रश्नः, आरूडप्रश्नः, अष्टमङ्गलक्रिया, शत्रागमनप्रश्नः, रोगप्रश्नः, गर्भप्रश्नः, देवप्रश्नः, दीपलक्षणं, ताम्बूलप्रश्नः, विवाहप्रश्नः, गृहनिर्माणप्रश्नः, युद्धप्रश्नः, रिपोरागमवप्रश्नः, नष्टद्रव्यद्ककालप्रश्नः, राज्यसंबन्धीप्रश्नः, जयप्रश्नः, एवं सामान्यप्रश्नः इति प्रश्नविभागाः सन्ति ।

देवसंबन्धीप्रश्नः एव देवप्रश्नः इति । प्रश्ननमार्गस्य वैशिष्ट्यं तावत्प्रश्नस्य समाधानं तस्य परिहारमपि तत्रैव तस्मिन्नेव अध्याये उक्तमस्ति । ग्रन्थे यत्र यत्र देवसंबन्धीप्रश्नः दृश्यते तस्य संकलनमेव अत्र प्रकटीक्रियते । उदाहरणतया ताम्बूलप्रश्ने देवप्रश्नस्य आवश्यकता तस्य प्रक्रिया इत्यादि विचाराः विलीयन्ते । परमात्मनः चैतन्यं सर्वत्र विद्यते । मनुष्यशरीरे आत्मवत्देवस्थाने देवचैतन्यम् ।

मनुष्याणां शरीरवत्बिम्बः । तत्र देवस्थाने, क्षेत्रे, जनपदे, राज्ये, वा दुर्निमित्तलक्षणं अथवा अपशकुनलक्षणानि सम्भवन्ति । यत्र दुर्लक्षणं दृश्यते तत्र प्रश्नालोकस्य आवश्यकता अस्ति । देवसन्निधौ पूजा, उत्सवादिकालेऽपि वैकल्यानि सम्भवन्ति ।

शुद्धयादीनां कारणनिरूपणं निवृत्तिमार्गस्य च तत्र विचारः । अत्र प्रथमाध्याये ज्योतिषशास्त्रस्य परिचयः कृतः प्रथमाध्यायस्य संग्रहः अत्र उक्तमस्ति । यथा देवप्रश्नः मुख्यो भवति तथा परिहारोऽपि मुख्य एव । देवप्रश्नस्यान्तिमदिने चिन्तनीयदोषाणां पृथक्पृथक्परिहाराः द्रष्टव्याः । यतो हि परिहारेण देवहितमस्ति वा इति एकेनारूडेन परिशोधनीयं भवति । जनानां साहाय्येन परिहारः कर्तव्यः तत्तु देवस्थानस्योत्तराभिवृद्धिसूचकः आध्यात्मिकाभिवृद्धिश्च भवति तद्वारा लोकक्षेमः भवति । इत्थमस्मिन्प्रबन्धे प्रश्नमार्गस्य देवप्रश्नविषये कथं निर्णयः करणीयः कथं फलं वक्तव्यमिति चर्चितमस्ति । पूर्वस्मिन्काले अस्माकं महर्षिभिर्दत्तमिदं कल्याणशास्त्रमनुसृत्य सर्वे लाभदायकाः भवेयुरित्यंशाः ।

**सन्दर्भसूचिका**

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् । कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ।।

आकृष्टिशक्तिश्च महीतया यत्खस्थं गुरुस्वाभिमुखं ।आकृष्यते तत्पततीव भाति समे समन्तात्क्वपतत्वियं खे ।।

मध्याटव्यधिपं दुग्धसिन्धुकन्याधवं धिया। ध्ययामि साध्वसं बुद्धेः शुध्यै वृध्यै च सिद्धये ।।

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलःस्पन्दितुमपि ।

अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ।।

कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासोभृतो व्वस्तिर्व्यञ्जनमूरुजानुयुगले जङ्गे ततोऽङ्घ्रिद्वयम् ।

मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयो राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसम्प्रत्ययाः ।।

******

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आधुनिकसंस्कृतनाटकस्य स्वरूपनिर्धारणम्

**Santanu Pradhan**
Ph. D. Research Scholar,
Department of Sanskrit,
Pondicherry University,Kalapet, Puducherry-605014
Mob- 7384948850
E-mail- amisantanu92@gmail.com

संस्कृतसाहित्ये 'आधुनिक' इति शब्दः अस्तित्वहीनः तथा असम्भवविषयः इति सर्वे मन्यन्ते। कारणं हि संस्कृतसाहित्यपदेन वेद–उपनिषद्–रामायण–महाभारत–दर्शनादि शास्त्राणि बोध्यन्ते । एतानि शास्त्राणि पुरातनानि। एवञ्च संस्कृतकविः इत्युक्ते अश्वघोष–भास–कालिदास–श्रीहर्ष–भारवि-माघादीनां बोधः जायते । किन्तु कैश्चन उनविंश–विंशशताब्द्यां समसामयिक- विषयमवलम्ब्य नाटकं रचितम् । तन्मध्ये पञ्चाननतर्करत्नः, विश्वेश्वर- विद्याभूषणः, हरिदाससिद्धान्तवागीशः, रमा-चौधुरी, कालीपदतर्काचार्यः, अम्विकादत्तः व्यासः, यतीन्द्रविमलचौधुरी इत्येते उल्लेखार्हाः । एषः कालः खलु संस्कृतसाहित्यस्य क्षयिष्णुकालरूपेण परिगण्यते । आङ्गलशिक्षां प्रति आकर्षणं, दुर्बोध इति मत्वा संस्कृतसाहित्यं प्रति वितरागत्वं, नूतनं विषयं प्रति अनुरागः इत्यादिकारणवशात् अस्मिन् समये संस्कृतसाहित्यं दुर्दशां भजते । सर्वे जनाः संस्कृतसाहित्यापेक्षया पाश्चात्यशिक्षां प्रति समधिकरूपेण आकृष्टा भवन्ति । अधुना सामाजिक–पारिवारिक–राजनैतिकक्षेत्रेषु नवचिन्ता आगता यस्य प्रतिफलनं संस्कृतसाहित्ये परिलक्ष्यते। अतः ऊनविंशतिशताब्दीतः विंशशताब्दीपर्यन्तं कालः संस्कृतसाहित्यस्य अवक्षययुगरूपेण परिगणितः । अस्मिन् समये नाट्यकाराः उद्वास्तुसमस्या, राजनैतिक- जनानां दुर्नीतिः, बिधवाविवाहः, साम्प्रदायिकता, पाठ्यक्रमात् संस्कृतसाहित्यस्य विताडनं, राष्ट्रियभावना इत्येतान् विषयान् अवलम्ब्य नाटकानि विरचितवन्तः। १९४७ खीस्टाब्दे यो विषय आधुनिक आसीत् एकविंशशताब्द्यां स विषयो नाधुनिकः । कारणं कालविशेषे विषयोऽपि भिन्नो भवति । ऊनविंशशतकस्य प्रथमभागादधुनापर्यन्तं यानि खलु नाटकानि रचितानि तानि आधुनिकसंस्कृतनाटकानि इति अभिधीयते । अधुनेतिशब्दाद् आधुनिकशब्दस्योत्पत्तिः । अधुना भव इति आधुनिकः । अधुना इति शब्दातठञ्प्रत्यये आधुनिकः शब्दो निष्पन्नो भवति । वर्तमानकाले अधुना इत्यस्य शब्दस्य व्यवहारः साम्प्रतम्, अद्यतनम्, अर्वाचीन- मेत्येतेषु अर्थेषु भवति । आङ्गलभाषायां आधुनिकार्थे 'Modernism', 'Modernization', 'Modernity', 'Modern' १ इति शब्दानां प्रयोगः क्रियते। आधुनिक शब्दस्यार्थविषये पण्डितानां मध्ये मतभेदोऽस्ति । वुल्फ वर्जिनिया महाभागेन भणितं १९१० संव्तसरस्य डिसेम्वरमासात् मानवप्रकृतिः परिवर्तिता । डी.एच.लोरेन्समहाभागेन भणितं १९१५ संव्तसरे प्राचीनविश्वमस्तङ्गतम् । रिचर्ड एलमान–चार्ल सफाइदलनौ स्वीकुरुतः १९०० संव्तसरात् आधुनिकसाहित्यस्य आरम्भः जातः।

१. श्रीरामजि उपाध्यायस्य मतानुसारेण जगन्नाथोत्तरं सर्वसाहित्यमाधुनिकसाहित्यम् २।

२. विश्वनाथभट्टाचार्येण उक्तम् – तात्कालिकसमाजप्रभावेण लिखितं सर्वम् आधुनिकमेव ३।

३. प्रो. राजेन्द्रमिश्रः १७८४ इशवीयसंव्तसरात् परवर्तिनं कालम् अर्वाचीनं स्वीकरोति । सः आधुनिककालस्य भेदत्रयम् उक्तम्-
पुनर्जागरणकालः- १७८४-१८८४, स्थापनाकालः– १८८४-१९५०, समृद्धिकालः-१९५०- अद्यावधिः ४।

४. प्रो. अजितठाकोरमते १८५०-१९५० यावन् नवजागरणस्य पूर्वकालः । १९५० खीष्टाब्दतः अद्यावधिः तदुत्तरकालेति ५।

५. श्रीचन्द्रकिशोरगोस्वामिनो मते आधुनिकयुगः तु द्विविधः – स्वतन्त्रतापूर्वयुगः, स्वातन्त्र्योत्तरयुग इति ६।

संस्कृतकाव्यनाटकादीनि यद्यपि अलङ्कारशास्त्रसरणिमनुसृत्य रचितानि दृश्यन्ते तथापि आधुनिकसाहित्ये अस्माभिः किञ्चित् परिवर्तनं

परिलक्ष्यते । ते तु चतुर्विधाः ।यथा-

१) विषयवस्तुदिशा । २) आङ्गिकदिशा । ३) भाषादृष्ट्या । ४) सङ्गीतसंयोजनदृष्ट्या ।

आधुनिकसंस्कृतसाहित्ये विषयवस्तु तु व्यापकम् । कविकल्पितविषयः, देशात्मबोधविषयः, मनीषीणां चरित्रं स्वतन्त्रतान्दोलन सम्वन्धिवृत्तचरित्रादिविषयः इत्येतान् विषयानाधारीकृत्य संस्कृतवाङ्मयेऽधुना नाटकानि विरच्यन्ते। आङ्गिकदृष्ट्या अभिनवत्वं संस्कृतदृश्यकाव्यस्य गुरूत्वपूर्णविषयरूपेण परिगण्यते । कारणं प्राचीनकालात् संस्कृतनाटकं नाट्यशास्त्रानुसारं रचितम् । उनविंशतिशताब्दीतः विंशशताब्दीपर्यन्तविस्तृते काले विरचितानि नाटकानि बहुलतया आङ्गलसाहित्येन प्रभावितानि। अतः आङ्गलप्रभावेन स्वाभाविकरूपेण सनातनशास्त्रम् अतिक्रम्य संस्कृतनाटकं नवरूपेण रचितम् । केचन नाट्यकाराः सन्ति, ये खलु नान्दीं तथा भरतवाक्यं विनापि नाटकानि विरचितवन्तः, यथा सिद्धेश्वरचट्टोपाध्यायेन रचिते'ननावितढनमिति' नाटके नान्दी न दृश्यते ।

तेन विरचिते' अथ किमिति' नाटके पात्रपरिचयं परित्यज्य चरित्राणा- मुल्लेखः क, ख, ग- रूपेण क्रियते। नाट्यशास्त्रानुसारं नाट्यङ्गानां (अर्थप्रकृतिः, अर्थोपक्षेपकः, सन्धिः) व्यवहारः नाटके न दृश्यते । नाटके विदूषकस्य अभावोऽपि परिलक्ष्यते । नाटके अङ्कविभाजनं परित्यज्य दृश्यविभाजनम् अनेकत्र कृतमिति दृश्यते । आङ्गिकस्य अभिनवत्वम्, तथा विषयस्य स्वच्छन्दता नाटके नवमार्गम् उन्मोचयति ।

आधुनिकनाट्यकाराः नवदिशम् उन्मोचयन्ति । प्राचीने नाटके प्राकृतभाषा पात्रभेदेन व्यवह्रियते । किन्तु आधुनिकसंस्कृतनाटके सा खलु पाठकैर्नावबुध्यते इति हेतोः सम्पूर्णरूपेण वर्जिता । साम्प्रतिकविषयमवलम्व्य रचिते आधुनिकनाटके सनातनीभाषा सर्वथा न सुप्रयुज्यते, तेषां कृते साम्प्रतिकी भाषा सम्यक्युज्यते । अतः आधुनिकसंस्कृतनाटके प्रचलित प्रादेशिकभाषासम्वन्धिशब्दानां संस्कृतायनं परिदृश्यते; तद्यथा–पञ्चाननतर्करत्नेन विरचिते अमरमङ्गलमिति नाटके 'चटचटाध्वानः', 'गुडगुडयति' चेत्यादयः वङ्गभाषासम्वन्धिशब्दाः परिलक्ष्यन्ते। चतुर्थ कारणं तु सङ्गीतस्य संयोजनम्। प्राचीने नाटके सङ्गीतस्य संयोजनम् अधिकं नासीत् किन्तु आधुनिकसाहित्ये नाट्यकारेण सङ्गीतस्य प्रयोगः क्रियते । विश्वेश्वरविद्याभूषणेन चाणक्यविजयमिति नाटकस्य प्राक्कथने उक्तम्– 'अत्र नाटके सुरसौकर्यसाधनार्थमुद्गायनसौष्ठवार्थं च छन्दोवद्धस्लोकरीतिं परिहाय स्वभावगीतिच्छन्दः प्रवर्तितम्' । आधुनिकसंस्कृतनाटकेषु प्रयोजनानुसारतः अनेकेषु स्थानेषु नाट्यचरित्राणां मनोभावं व्यक्तीकर्त्तुं नाट्यवृत्ते वैचित्र्यं सम्पादयितुञ्च सङ्गीतप्रयोगः परिलक्ष्यते।

**सहायकग्रन्थपञ्जी -**

१. आधुनिक संस्कृत साहित्य, सम्पा. ऋता चट्टोपाध्याय, प्रग्रेसिभ पावलिशार्स, कोलकाता,२०१२ ( प्रथमप्रकाशः )

२. आधुनिक संस्कृत नाटक, रामजी उपाध्याय,चौखाम्वा संस्कृत प्रतिष्ठान,वाराणसी, १९६६ (द्वितीय संस्करणम्)।

३. संस्कृत वाङ्मय मे समाज एवं राष्ट्र, सम्पा.मनोहरलाल शास्त्री,राजस्थान संस्कृत अकादेमी,२०१३

४. संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्,सम्पा.नारायण दाशः,कथाभारती,कोलकाता, २०१३ (प्रथमसंस्करणम्), रासपूर्णिमा।

५. संस्कृत काव्यचर्चाय वाङाली,सम्पा.अञ्जलिका मुख्योपाध्याय,संस्कृत पुस्तक भाण्डारः,कलिकाता २०१३ (प्रथमसंस्करणम्)।

********

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# संस्कृतशब्दानां छात्राणां मस्तिष्के प्रभावः

**Dr. Muralishm H.**
Assistant Professor
Department of Jyotisha
Government Sanskrit College, Thripunithura-682301
Erunakulam Dist., Kerala
Contact No. : **7907181923**
E-mail : muralipathra@gmail.com

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु इति ऋषीणाम् प्रार्थनानि सन्ति। किं वास्तविकतया संस्कृताध्यनेन स्मृतिर्वर्धते वा? इति जिज्ञासायां,"**वर्धते**" इति जेम्स हर्टजेलकथयति। गायत्रीमन्त्रेण अपि स्मृतिशक्तिः वर्धते इति AIIMS देहली संस्थायां संशोधिता च। तस्मिन् विचारमधिकृत्य अत्र प्रस्तूयते। यदि भवान्,संस्कृतस्य शब्दानां प्रभावः इति विचारे आसक्तः तर्हि अयं लेखः भवते रुचिकरः स्यात्।

डाँ Hartzell, बहूनि वर्षाणि संस्कृतात् आङ्ग्लं प्रति भाषान्तरणम् अकरोत्। तस्मात् सः संस्कृतभाषायाः विचारे आकर्षितः अभवत्। मनसि एवं स्मृतौ संस्कृतभाषायाः प्रभावः विषये आकर्षितो अभवत्। भारतीयानां पारम्परिकपद्धतिः शिक्षणे उत्तमः स्तरः विद्यते। यथा प्राचीनाविद्यापारङ्गताः ये च यथावत् वाक्यान् स्मरन्ति तेषां चिन्तने स्मरणे वृद्धिः डाँ Hartzell, महोदयः अवलोकितः। संस्कृतभाषान्तरं कुर्वन् स्वस्य स्मृते शक्तिवर्धनम् अपि तेन अवलोकितः। सः इतरवाक्यान् यथावत् स्मरणशक्तेः वर्धनम् अपि अवलोकितः। तदानीं सः संस्कृतस्य प्रभावः इति विचारं प्रकाशितः। सः 2011 तमे संवत्सरे इटलीदेशस्थ University of Trento (Italy) विश्वविद्यालये अध्ययनाय प्रविष्टः तदानीं संस्कृतस्य प्रभावः इत्यस्मिन् समस्यायाः समाधानाय प्रयतत। भारतस्य संस्कृतविद्वांसाः श्रवण-मौखिक-शिक्षणद्वारा 3 सहस्रतमपुरातनवेदानां स्मरणव्यासङ्गः अवलोकितः। तस्मात् सः विद्वांसानां मस्तिष्कस्य भौतिकविकासविचारे ज्ञातुम् इष्टवान्। India Trento Partnership for Advanced Research द्वारा व्यवसायिक विद्वांसानां प्रयोगाय स्वीकृतम्। तदानीं SstructuralMagnetic Resonance Imaging (MRI) नाम्ना परीक्षणेन India's National Brain Research Centreमध्ये मस्तिष्कस्य समत्वं दृष्टम्। डा तन्मयनाथः डा नन्दिनी चटर्जी चहरियाणस्थ National Brain Research Centre मानेसर संस्थाने कार्यं कुरुतः अस्मिन् शोधाय साहायम् आचरितवन्तौ। 21 जनान् यजुर्वेदपण्डितान् युर्वेदसंहिता पठनम् प्रयोगाय डाँ Hartzell, द्वारा नियन्त्रित समूहः स्वीकृतः। एकविंशति जनाः 40,000 शब्दानां सम्पूर्णयजुर्वेदसंहिताम् अधीताः। तेषाम् 10,000 घंटात्मकम् अध्ययनम् अभवत्।[1]

मस्तिष्कस्य विशेषतया विभिन्नभागाः वर्धिताः , Cerebral hemispheres मध्ये 10 प्रतिशतं धूसरवर्णेन दृष्टः अपि च मस्तिष्कस्य स्थूलता अपि पर्याप्ततया वर्धिता अवलोकिता। hippocampus इत्यस्य अधिक धूसरवर्णेन दृष्टः । मस्तिष्के hippocampus इति स्मरणशक्तेः विभागः वर्तते। पण्डितानाम् hippocampusतु अधिकाधिकं धूसरवर्णेन यन्त्रे दृष्टः। मानवमस्तिष्के द्वे Hippocampi इति नाम्ना विभागौ वर्तेते। उभयमपि स्मरणशक्तौ प्रधान्यम् आवहति। दक्षिण Hippocampi एवं वाम Hippocampi इति द्वौ वर्तेते। स्मृतिः एतौ द्वावपि प्रदीयतः। दक्षिण Hippocampi संरचना, शब्दः, मुखस्य संरचना, चित्राणि

---

1. https://www.sbs.com.au/language/english/could-chanting-ancient-sanskrit-mantras-increase-the-size-of-vour-brain

धूसरवर्णः अधिकं जायते। पण्डितानां दक्षिण Hippocampi मध्ये शब्दानां संज्ञानां एवं शब्दानां विभागः धूसरवर्णेन दृश्यते।







| | |
|---|---|
| चित्राणाम् मूलम् -**NeuroImage, Dr James Hartzell/ Center for Mind/Brain Sciences (CIMeC) Italy/National Brain Research Centre, (NBRC) India** | चित्राणाम् मूलम् –**NeuroImage, Dr James Hartzell/ Center for Mind/Brain Sciences (CIMeC) Italy/National Brain Research Centre, (NBRC) India** |

डा Hurtzell महोदयेन संस्कृतस्य प्रभावः इत्यस्मिन् विषये संशोधनम् कृतम् अस्ति। संस्कृते मेधाशक्तिवर्धनाय एव कानिचनमन्त्राणि सन्ति। तेषाम् प्रभावः इत्यस्मिन् विचारे अध्ययनम् करणीयम्। अपि च

1. गणितविज्ञानयोः अध्ययने संस्कृतस्य प्रभावः ।
2. शिक्षणेषु संस्कृतस्य मन्त्राणां प्रभावः।
3. भारतीयभाषानां शिक्षणे संस्कृतस्य प्रभावः।
4. गणितविज्ञानयोः अध्ययने संस्कृतस्य प्रभावः ।
5. शिक्षणेषु संस्कृतस्य मन्त्राणां प्रभावः।
6. भारतीयभाषानां शिक्षणे संस्कृतस्य प्रभावः।
7. संस्कृतमाध्यमेन अध्ययनम् एवं अङ्ग्लमाध्यमेन अध्ययनम्।
8. संस्कृताध्यनेन बालानां विचारशीलता।

इत्यादिषु विषयेषु अग्रे करणीयानि । संस्कृते मेधाशक्ति वर्धनाय विद्यमानानि मन्त्राणि अग्रे प्रदीयन्ते।।




चित्राणाम् मूलम् -NeuroImage, Dr James Hartzell/ Center for Mind/Brain Sciences (CIMeC) Italy/National Brain Research Centre, (NBRC) India.

**अथर्ववेदे मेधाशक्ति वर्धनाय कानिचन मन्त्राणि दृश्यन्ते। तानि -**

**।।मेधाजननसूक्तम्।।**[2]

अथर्वा देवता। छन्दः –अनुष्टुप्। चतुष्पदा विराट् ।उरो बृहती।

ये त्रिषप्ताः परियन्ति विष्टारूपाणि बिभ्रतः। वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे।।1।।

पुनरेहि वचस्पते देवेन मनसा सह । वसोष्पते निरमय मय्येवास्तु मयि श्रुतम् ।।2

इहैवाभि वि तनूभे आर्त्नी इव ज्यया । वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम्।।3

उपहूतो वाचस्पतिरुपास्मान् वाचस्पतिर्ह्वयताम्। संश्रुतेन गमेमहि मा श्रुतेन वि राधिषि।।4।।

चतुऋचस्यास्य सूक्तस्य ब्रह्मा ऋषिः। बृहस्पतिर्विश्वे देवा वा देवताः। प्रथमर्चः परानुष्टुप्त्रिष्टुप्। द्वितीयायाः पुरः ककुम्मत्युपरिष्टाद्बृहती। तृतीयाया बृहतीगर्भानुष्टुप् । चतुर्थ्याश्च त्रिपदार्षी गायत्री छन्दांसि।यन्मे छिद्रं मनसो यच्च वाचः सरस्वती मन्युमन्त जगाम।विश्वेस्तद्देवैः सह संविदानः सं दधातु बृहस्पति।

मा न आपो मेधां मा ब्रह्म प्र मथिष्टनशुष्यदा यूयं स्यन्दध्वमुपहूतोऽयं सुमेधा वर्चस्वीमा नो मेधा मा नो दीक्षां मा नो हिंसिष्टं यत्तपःशिवा नः शं सन्त्वायुषे शिवा भवन्तु मातरःमा नः पीपरदश्विना ज्योतिष्मतीतमस्तिरःतामस्मे रासतामिषम्।पञ्चर्चस्यास्य सूक्तस्य शौनकऋषिः। सूक्तस्य शौनकऋषिः। प्रथमादि तृचस्य पञ्चम्या ऋचश्च मेधा। चतुर्थ्यश्चाग्निरदेवते।त्वं नो मेधे प्रथमा गोभिरश्वेभिरा गहि।त्वं सूर्यस्य रश्मिभिस्त्वं नो असि यज्ञियामेधामहे प्रथमा ब्रह्मणवतीब्रह्मजूतामृषिष्टुताम्।प्रपीता ब्रह्मचारिभिर्देवानामवसे हवे।। यां मेधामृभवो विदुर्या मेधामसुरा।ऋषयो भद्रां मेधां यां विदुस्तां मय्या वेसयामसि।यामृषयो भूतकृतो मेधां मेधाविनो विदुःतया मामद्य मेधावग्ने मेधाविनं कृणुमेधां सायं मेधां प्रातः मेधां माध्यन्दिनं परिमेधां सूर्यस्य रश्मिभिर्वचसा वेशयामहि।

**ऋषि-वामदेव देवता-सरस्वती छन्द-जगती**

**।।सरस्वती सूक्तम्।।**[3]

यदाशसा वदतो मे विचुक्षुभे यद् याचमानस्य चरतो जना अनु । यदात्मनि तन्वो मे विरिष्टं सरस्वती तदा पृणद् घृतेन ।

सप्त क्षरन्ति शिशिवे मरुत्वते पित्रे पुत्रासो अप्यवीवृतन्नृतानि । उभे इदस्योभे अस्य राजत उभे यतेते उभे अस्य पुष्पतः।

**।।सरस्वती सूक्तम्।।**[4]

शिवा नः शन्तमा भव सुमृडीका सरस्वति। मा ते युयोम संदृशः।।9।।

**॥ मेधा सूक्त (क) ॥**[5]

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषं स्वाहा ॥ १ ॥

यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ॥ २ ॥

मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ ३ ॥

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् । मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥ ४ ॥

"मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥"

---

२. अथर्ववेदः । प्रथमसूक्तः ।

3. सरस्वती सूक्तम्, ५९ ।

4. सरस्वतीसूक्तम्, ६९ ।

5. यजुर्वेदः, ३२/१३ ।

"मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥"

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् । मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥ ४ ॥

"मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥"

## ॥ मेधा सूक्तम् (ख) ॥[6]

मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्य माना । त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ॥ १ ॥

त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥ २॥

मेधां म इन्द्रो दधातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा ॥ ३ ॥

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः । दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा ॥ ४ ॥

आ मां मेधा सुरभिर्विश्वरुपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥ ५ ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ ६ ॥

## ।।सरस्वती सूक्त।।[7]

जुष्टो वाचो भूयासम्जुष्टो वाचो भूयासम् जुष्टो वाचस्पतेर्देवी वाक् । यत् ते वाचो मधुमत्तमम् तस्मिन् नो अद्य धाः स्वाहा सरस्वत्या इति पुरस्तात् स्वाहा कारेण जुहोति । वाचम् तद् उत्सृजते । तस्माद् वाग् अत ऊर्ध्वं उत्सृष्टा यज्ञम् वहति । मनसा उत्तराम् । मनहा हि मनः प्रीतम् मनः प्रीतम् ।

## ।।प्रज्ञा सूक्त।।

ॐ स्वयमेव प्रकटति ।। १।। प्रकटनमेव जीवस्य कारणं भवति ।।२।। जीव देहे तिष्ठति ।।३।। देहात काल ज्ञानं भवति ।।४।।
देहमेव देशोच्चयते ।।५।। देशकालस्य सम्यक् ज्ञानाभावं अज्ञानस्य कारणं भवति ।।६।।अज्ञानात् भ्रमोत्पादनं भवति ।।७।।
भ्रमात् विभ्रमं जायते ।।८।। विभ्रमात् पतनं भवति ।।९।। पतनमेव प्रवृत्तिरुच्चयते ।।१०।। प्रवृत्ति: भौतिकी सुखं ददाति ।।११।।
भौतिकी सुखं दु:खोत्पादयति ।।१२।। सुखदु:खाभात् निवृत्ति: प्रकटति ।। १३ ।।निवृत्ति: मार्गमेव संन्यासरुच्चयते ।।१४।।
संन्यासमेव ऊँकारस्य पथम् अस्ति ।। १५।। संन्यासी आत्मज्ञ: भवति ।। १६।।आत्मज्ञ: ब्रह्मविद् भवति ।।१७।।
जीव ब्रह्म योग समाधिरुच्चयते ॥१८।

## प्रज्ञा विवर्धन स्तोत्रम्

अस्य श्री प्रज्ञा विवर्धन स्तोत्र मन्त्रस्य सनत्कुमार ऋषि: स्वामी कार्तिकेयो देवता अनुष्टुप छन्द : मम सकल विद्या सिध्यर्थे , प्रज्ञा वृध्यर्थे प्रज्ञा विवर्धन स्तोत्र पारायणे विनियोग: ॥

स्कन्द उवाच ॥

योगिश्वरो महासेन: कार्तिकेयोग्निनंदन: । स्कन्द: कुमार सेनानी: स्वामी शंकर सम्भव: ॥

गाँगेयस्ताम्र चूडश्च ब्रम्हचारी शिखिध्वज: । तारकारी उमापुत्र क्रौंचारिश्च षडानन: ॥

शब्दब्रम्ह समुद्रश्च सिद्ध सारस्वतों गुह: । सनत्कुमारो भगवान भोगमोक्ष फलप्रद: ॥

शरजन्मा गणाधीश पूर्वजो मुक्ति मार्ग कृत । सर्वागम प्रणेताच वांच्छितार्थ प्रदर्शन : ॥

---

6. तैत्तिरीय-अरण्यक-दशम-अध्यायः, प्रपाठकः ।

7. कौषीतकी ब्राह्मणम्, अध्यायः-१० ।

अष्टाविंशति नामानि मदीयानीति य: पठेत । प्रत्यूषं श्रद्धया युक्तो मूको वाचस्पति: भवेत् ॥

महामंत्र मयानीति मम नामानु कीर्तनम् । महाप्रज्ञा मवाप्नोति नात्रकार्या विचारणा ॥

॥ इति श्री रुद्रयामले प्रज्ञा विवर्धन स्तोत्रं सम्पूर्णम् ॥

सामान्यतया कस्यापि शोधसमबद्ध पूर्वध्ययनम् अत्यन्तं प्रधान्यं भवति। अस्मिन् सन्दर्भे कृतानि पूर्वाध्ययनानि अग्रे लिख्यन्ते।

1. आसक्तदायकं विचारं यत् फ्रेंच वैज्ञानिकः क्रैस्तसन्तानां ग्रेगोरियन् मन्त्राणाम् स्मरणेन तेषाम् स्मृतिः विशेषता अवलोकिता।

2. Dr Eleanor Muguire एतेषां सहकर्मिणःलंडन् नगरे कार्यानचालकानां स्मृतिशक्तिविषये “The Knowledge“ नाम कश्चित् ईदृशम् अध्ययनम् अकरोत् इति ज्ञायते। तत्रापि स्मृतिवर्धनम् अभवत् इति ज्ञातः।

https://theprint.in/features/the-effects-of-sanskrit-on-the-human-brain-have-been-greatly-exaggerated/164784/

3. प्रो रमाजयसुन्दर All India Institute of Medical Sciences Delhi मध्ये अन्विष्टवती यत् गायत्रीमन्त्राणाम् पठनेन 10प्रतिशतं यावत् धूसरवर्णः वृद्धिः Cerebral Hemisphere मध्ये वृद्धिर्जायते। इति।सा गायन्त्री मन्त्र एवं न्यूरोकेमिकल्स मध्ये प्रभावः इति विचारे ज्ञातवती।(Gayatri Mantra and its effect on brain neurochemicals.)

4. विद्यालयीय छात्रेषु संज्ञानात्मकक्रियासु गायत्रीमन्त्रस्य प्रभावः।(Effect of Gayatrimantra chanting on cognitive functions in school children)

5. RadhaSundararajan, director of chanting, Krishnamacharya Yoga Mandiram एतैः अपि संस्कृतमन्त्राणाम् जपः इत्यस्मिन् विषये शोधः कृतः।

6. जपस्य प्रभावः इत्यस्मिन् विषये BrahmvarchasShodhSansthan, Research Centre for Integration of Science and Spirituality हरिद्वारःद्वारा शोधः कृतः।

7. Viniyoga Healing Foundation (VHF) एते अपि संस्कृतम् मन्त्राणाम् विचारे शोधं कुर्वन्ति।.

8. Psycholinguistic effect (PLE) इत्यस्मिन् विषये Professor Dr. T. Temple Tutlerद्वारा Cleveland विश्वविद्यालये अमेरिका देशे प्रकाशितं यत् मस्तिष्केNLE PLE च रसायनिकानाम् उत्पादनम् एवं प्रसरणम् तस्मात् शरीरे शान्तता एवं स्वस्थाता प्रभावः जायते।

9. Effect of mantras इत्यस्मिन् विषये C R Karnick द्वारा शोधपत्रः लिखितः। अयं लेखः-Regional Result Center-द्वारा प्रकाशितः।अयं शोधकेन्द्रः झाँसी नगरे उत्तरप्रदेशे अस्ति।

10. https://www.sbs.com.au/language/english/could-chanting-ancient-sanskrit-mantras-increase-the-size-of-your-brainThe magic of mantras - The Hindu

संस्कृतभाषामाध्यमेनपठनेन मस्तिष्कस्य विकासः अवश्यम् भवति।वैदिकमन्त्राणां जपः छात्राणाम् अधिगमे गुणात्मक प्रभावः जनयति। यतः तस्य मधुरता स्पष्टता इत्यादि बालकानाम् मनसि हिंसां नजनयतेअपि च आनन्दं जनयति। संस्कृतमन्त्राणाम् विधिवत् पठनम् , मन्त्रजपः अपि न केवलं मस्तिष्कस्य विकासाय अपि सर्वोन्नतिः कारकः भविता। तस्मात् सर्वदा संस्कृतमाध्यमेन अध्ययनम् भवतु ।

जयतु संस्कृतम् जयतु भारतम्।

***************

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# ब्रह्म ह वै ब्राह्मणः - एका समीक्षा

**Dr. Kamal Prasad Gautam**
Assistant Professor.
Sanskrit Department, Arya Vidyapeeth College,
Guwahati-16, Assam
Contact No. : 8133813967
E-mail : kamalprasadgautam57@gmail.com

**सारांशः**

वेदानां तादृशो भागः, यत्र वैदिकयज्ञेभ्यो वेदमन्त्राणां विस्तृतेन व्याख्यानम् कृतम् अस्ति, स एव भागो ब्राह्मणपदेन निगद्यते, एतं ब्राह्मणशब्दं निरुपयन् आह पूर्वमीमांसाकारो भगवान् जैमिनिः "**शेषे ब्राह्मणशब्दः**" इति, शेषोऽवशिष्टांशः, मन्त्रांशम् परित्यज्य वेदानां योऽवशिष्टांशः, स एव ब्राह्मणशब्देन सम्बोध्यते, वैदिकसंहितायाः शेषः "**अतिरिक्तांशः**" एव ब्राह्मणपदवाच्यो भवतीति यावत् । वैदिकवाङ्मये यद्यपि वेदशब्देनैवाभिहिताः ब्राह्मणग्रन्थाः, तथापि वस्तुतः एते वैदिक मन्त्राणां व्याख्यानभूताः वर्तन्ते ।

**"यज्ञो वै श्रेष्ठतमं कर्म"** इति रीत्या ब्राह्मणघटकीभूतेन ब्रह्मशब्देन यज्ञो बोध्यते । एतादृशानां ब्राह्मणग्रन्थानां प्रणयनं त्रिसहस्रवर्षं ईसापूर्वतः द्विसहस्रवर्षं ईसापूर्वं यावद् अभवद् इति सामान्यतः सर्वे स्वीकुर्वन्ति । एतेषां ब्राह्मणग्रन्थानां प्रमुखः प्रतिपाद्यः" यज्ञानां सम्पूर्णभावेन मीमांसा वर्तते । एतदर्थं तत्र शाबरभाष्ये भगवता शबरेण ब्राह्मणग्रन्थस्य प्रतिपाद्यत्वेन दशविषयाणामुल्लेखः कृतः । तत्र दशसु विषयेषु विधिः प्रमुखं भजते । यतो हि अन्ये सर्वे विषयाः विधीनां व्याख्यानभूताः वर्तन्ते । तत्र विषयविवेचनदृष्ट्या तान् दशविषयान् सप्तधा विभज्यते ।

**तत्र प्रथमो विधिः** - यज्ञः कदा करणीयः, कुत्र करणीयः, कैः करणीयः, केन प्रकारेण करणीयः इत्यादीनां सर्वेषां यज्ञसम्बद्धप्रश्नानामुत्तरमस्माभि -र्विधौ प्राप्यते ।

**विनियोगः** - कस्य मन्त्रस्य प्रयोगः कस्योद्देश्यस्य परिपूर्तये कर्तव्यः कृतो वा, एतस्योल्लेखः विनियोगेति पदेन निगद्यते ।

**अर्थवादः** - अर्थवादवाक्यैर्यागकर्मणि प्रशंसितानां निन्दितानाञ्च वस्तूनां ज्ञानं भवति । यागोपयोगिनः प्रशंसा भवति, यागानुपयोगिनो निन्दा भवति, अत एव प्रोच्यते "यत् स्तूयते तद् विधीयते, यन्निन्द्यते तन्न विधीयते" इति ।

**हेतुः** - ब्राह्मणग्रन्थेषु विहिताः विधयः सहेतुकाः भवन्ति, एतेषु ग्रन्थेषु प्रतिपादितानि एतानि हेतुवचनानि यागविधिषु श्रद्धामुत्पादयन्ति ।

**निरुक्तिः** - ब्राह्मणग्रन्थेषु पदे पदे शब्दानां निर्वचनम् प्रदर्शितमस्ति । एतैर्यागेषु प्रयोज्यपदार्थानां सार्थक्यं निरूप्यते । निरुक्तमाध्यमेन ब्राह्मणेषु निर्दिष्टानि निर्वाचनानि भाषाविज्ञानदृष्ट्या अत्यन्तानि महत्त्वभूतानि विद्यन्ते ।

**आख्यानम्** - सारल्येन विधेः स्वरूपः हृदयङ्गमः स्यादित्येतदर्थं विषयः विषयः सरसः स्यादित्येतदर्थञ्चाख्यानानामुपयोगिता वर्तते । संक्षेपेण एषः एव ब्राह्मणग्रन्थप्रतिपाद्यानां सारांशभूतः विषयः इत्यलम् ।

**विश्लेषणम्**

वेदाः भारतीयपरम्परायां प्राचीनतमाः पवित्रतमाश्च ग्रन्थराशयः इति सर्वेषां मतम् । मान्यतायामस्यां भारतीयायां संसारस्य यानि ज्ञानविज्ञानानि धर्मशास्त्राणि स्मृतिशास्त्राणि दर्शनानि च सन्ति, तेषां सर्वेषामेवोद्भवस्थानं तु वेदा एव इत्यत्र नास्ति सन्देहावसरः । ईदृशीं श्रुतिमुद्दिश्य ब्रवीति भगवान् मनुः –

**अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते । धर्मं जिज्ञासमानानां प्रमाणं परम श्रुतिः ॥ इति** 1,

ये पुरुषाः अर्थकामादिषु न रमन्ते, ते एव पुरुषाः सम्यक्तया धर्मं ज्ञातुं प्रभवन्ति, ये जिज्ञासवः सन्ति, ते श्रुतिमाध्यमेन धर्मस्य निश्चयं

कुर्युः, वेदं विहाय धर्माधर्मयोर्निश्चयः भवितुं न शक्नोति । अर्थात् मनुष्याणां अन्तर्मनसि धर्मविषयिणी या काऽपि जिज्ञासा उदेति, तासां सर्वासां जिज्ञासानां समाधानाय परमं प्रमाणं श्रुतिरेवेति । पुनराह मनुः –

**वेदोऽखिलो धर्ममूलम् स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च ॥** 2

अर्थात् धर्माणां मूलभूताः समस्तज्ञानविज्ञानैर्युक्ताः, चतुर्णां वर्णानां, चतुर्णामाश्रमाणां, त्रयाणां लोकानां, वर्तमानातीतभविष्यत्कालानाम् च परिज्ञानं वेदेभ्यः एव भवतीति निश्चप्रचम् । एतद् रूपात्मकस्य वेदशब्दस्य निष्पत्तिः ज्ञानार्थकविद्धातोः '**करणाधिकरणयोश्च**' 3 इति सूत्रेण बाहुलकाद् घञि च सति भवति । अस्य वेदशब्दस्य व्युत्पत्तिर्वर्तते - विदन्ति जानन्ति विद्यन्ते भवन्ति विदन्ते सर्वाः सत्यविद्याः यैर्येत्र वा स वेदः इति । अर्थात् यत्र सर्वासां सत्यविद्यानां ज्ञानम् प्राप्यते स एव वेदशब्देनाभिहितो भवति ।

वेदशब्दार्थं निष्कृष्टतया परिभाषया आह महर्षिर्दयानन्दः -

**इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः** 4 इति ।

अपि च आह महर्षिर्याज्ञवल्क्यः-

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते । एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥** 5 **इति**

अत एव ब्रवीति कात्यायनः आपस्तम्बे - **मन्त्रब्राह्मणयोर्वेदनामधेयमिति,** 6

तादृशानां वेदानाम् काऽपि परिणीता संख्या नास्ति, उक्तं च - अनन्ता वै वेदाः इति, तथापि लोकप्रचलितानां वेदानां संख्याः चत्वारः एवेति । एतेषां वेदानां यो मन्त्रात्मको भागः, सः संहिता इति पदेन निगद्यते । वैदिकसाहित्येषु संहितायारनन्तरं द्वितीयो विशालः साहित्यो ब्राह्मणग्रन्थाः सन्ति । बहुभिः टीकाकारैः ग्रन्थकारैः, भाष्यकारैश्च ब्राह्मणशब्दस्य बहुधा व्याख्यानम् कृतम् । आचार्यसायणानुसारं वेदानां ये अमन्त्रात्मकाः भागास्ते एव 'ब्राह्मण' इति पदेन संसूच्यन्ते ।

"**ब्रह्म वै मन्त्रः** " 7 इति शतपथब्राह्मणेन इदं स्पष्टीभवति यद् ये ग्रन्थाः वैदिकमन्त्राणां व्याख्यानाय समुपस्थिताः सन्ति, ते एव ग्रन्थाः "ब्राह्मण" इति पदेन निगद्यन्ते । ब्रह्मशब्दस्य अपरोऽर्थः यज्ञोऽपि भवति, अतः वेदानां यो यज्ञात्मकः अंशः, तमधिकृत्य कृतो ग्रन्थः ब्रह्मणेति नामधेयः । मूलतः 'ब्रह्मन्' इति शब्दाद् ब्राह्मणेति शब्दस्य सिद्धिर्दरीदृश्यते । ब्रह्मशब्दः लोके पौरोहित्यकर्मसु निरतेभ्यो ब्राह्मणेभ्योऽपि प्रयुक्तोऽस्ति, अत एव ब्रवीति महर्षिर्दयानन्दः स्वकीये वेदभाष्ये "**ब्रह्मेति ब्राह्मणानां नामास्ति,** 8 अत्र प्रमाणत्वेनोपन्यस्तः शतपथब्राह्मणस्येयमुक्तिः "**ब्रह्म ह वै ब्राह्मणः**" 9 इति । अत एव पौरोहित्यकर्मसु निरतानां ब्राह्मणानां क्रियाकाण्डसम्बद्धयाग- सम्बन्धिनः उक्तिसमूहाः यस्मिन् शास्त्रे लिपिबद्धाः सन्ति, तस्यैव ग्रन्थस्य नाम ब्राह्मण इति । इत्यत्र महाभाष्यकारो भगवान् पतञ्जलिर्ब्रवीति "**समानार्थावेतौ ब्रह्मन् शब्दो ब्राह्मणशब्दश्चेति**" 10 "**यद्यपि मन्त्रब्राह्मणा- त्मको वेदः, तथापि अस्य मन्त्रव्याख्यानस्वरूपत्वाद् मन्त्रा एवादौ** 11 समाम्नातः'' । पुनर्ब्रवीति ऋग्वेदभाष्यभूमिकायां भगवान् सायणः "अवशिष्टो वेदभागो ब्राह्मणमिति" 12 अत्र विषये आपस्तम्बकाराः निगदन्ति "**कर्मचोदना ब्राह्मणानि इति**" 13 अर्थात् यागक्रियासम्बन्धिनः कर्मणः प्रेरको ग्रन्थो ब्राह्मण इति । **ब्राह्मणशब्दार्थनिरूपणम्** - ब्राह्मणशब्दो सामान्यतः जातिविशेषे ग्रन्थविशेषे च प्राप्यते, तथैव पुन्नपुंसकयोरयं शब्दोऽभिहितो वर्तते । वैदिकवाङ्मयानां परिप्रेक्ष्येऽयं ब्राह्मणशब्दः ग्रन्थविशेषार्थस्य प्रतिपादकस्तथा केवले क्लीवे एवाऽयम् प्रयुक्तः - यथाह मेदिनीकोशः "**ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम्**" 14 इति । ग्रन्थार्थे ब्राह्मणशब्दस्य प्रयोगः पुरातनतमः, तैत्तिरीय संहितायां समुपलभ्यते "**एतद् ब्राह्मणान्येव पञ्चहवींषि**" 15 माधवसायणौ नपुंसकीयं ब्राह्मणशब्दं ग्रन्थविशेषार्थे स्वीकुरुतः । उक्तञ्च "**मन्त्रश्च ब्राह्मणश्चेति द्वौ भागौ, तेन मन्त्रतोऽन्यद् ब्राह्मण- मित्येतद् भवेद् ब्राह्मणलक्षणम् इति**' 16 ब्रह्मेति प्रातिपदिकादण् प्रत्यये कृते ब्राह्मणशब्दस्य निष्पत्तिर्जायते । एवम्भूतो ब्राह्मणशब्दो मन्त्रयज्ञेत्यर्थद्वयस्य वाचकः, एतद्दृष्ट्या वा उपर्युक्तव्याख्यानेनायमर्थो निष्पन्नो भवति यद् यस्मिन् ग्रन्थे यज्ञार्थं मन्त्राणां विनियोगनिर्देशपूर्वकं व्याख्या विद्यते स एव ग्रन्थः ब्राह्मणनामाभिधेयः ।

तैत्तिरीयसंहितायाः स्वकीयभाष्ये भगवान् भट्टभास्करो ब्रूते **"ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यान- ग्रन्थः"**17 । अत एवाह सायणः तथापि ब्राह्मण- **ब्राह्मणग्रन्थानां कालः**– ब्राह्मण- ग्रन्थेषूपलब्धमानानां भौगोलिकपरिदृश्यानामध्ययनेन इदं स्पष्टीयते यदस्य ग्रन्थस्याविर्भावः कुरुपाञ्चालप्रान्ते सरस्वतिनद्याः अन्तर्वर्तिनी प्रदेशे च अभवदिति ।

ताण्ड्यमहाब्राह्मणे सारस्वतप्रदेशानां वैशद्येन विवेचनं विद्यते , तदनुसारं सरस्वती नदी यत्र विद्दप्ता जाता तं स्थानं "विनशनम्" यत्र पुनरूद्गमा अभूत् तं स्थानं "लक्षप्रास्त्रवणम्" च उच्यते । यमुना- सरस्वत्योर्दृषद्वत्यश्च मध्यवर्तिनः प्रदेशास्य, तासां नदीनां सङ्गमादीनामपि ताण्ड्यब्राह्मणे बाहुल्येन निर्देशः प्राप्यते । एतेषु प्रमुखं कुरुक्षेत्रनामकं स्थानम् प्रजापतेर्वेदिरूपेण स्वीक्रियते । उक्तञ्च **"एतावती वाव प्रजापतेर्वेदिर्यावत् कुरुक्षेत्रमिति"** 18 अनेनेदं सिद्ध्यति यद् ब्राह्मणग्रन्थानां संकलनं यागादीनां च सम्पूर्णा प्रतिष्ठा अस्मिन्नेव प्रान्ते सञ्जाता इति । मनुस्मृत्यनुसारमपि अयमेव देवनिर्मितः प्रदेशः "ब्रह्मावर्त" इति नाम्ना सुविख्यातः, एषस्तदेव प्रदेशः, यत्र ब्राह्मणानां यज्ञप्रक्रियायाः विकासयात्राया सम्पन्ना जाता । अनेनैव ब्राह्मणानां प्रणयनकालस्य निर्धारणे ब्राह्मणेषु प्राचीनतमो ब्राह्मणः शतपथब्राह्मणः, तस्य प्रमाणत्वेनोल्लेखः कर्तव्यः । तस्मिन् ब्राह्मणे एकस्याः ज्योतिषीयायाः घटनायाः विवरणमस्ति, तदनुसारं कृत्तिका नक्षत्रम् पूर्वदिशायामुदिता भवति, कदापि ततः प्रच्युता न जायते । प्रसिद्धज्यौतिषशास्त्रविदां शङ्करबालकृष्णदीक्षितमहोदयानां गणनानुसार- मस्याः घटनायाः कालो विक्रमतः त्रिसहस्त्रवर्षपूर्वं निश्चितव्यम् इति । एतेषामनुसृत्य ब्रह्माणानामाविर्भावः कालः ईसापूर्व त्रिसहस्त्रवर्षतः ईसापूर्व- द्विसहस्त्रवर्षं यावन् निर्धार्यते ।

**प्रतिपाद्यः** - ब्राह्मणग्रन्थस्य प्रधानविषयः आधिदैविकतत्वानां वर्णनम् विद्यते । एतेषाम् आधिदैविकतत्वानां विवेचनोपक्रमे बहूनि आध्यात्मिक -तत्वान्यपि प्रकाशे समागतानि । ब्राह्मणानाम् मुख्यः प्रतिपाद्यः **"यज्ञानां सर्वाङ्गपूर्णा मीमांसा"** 19 । ब्राह्मणग्रन्थानां यद्यपि मुख्यः प्रतिपाद्यो विधिस्तथापि तेषां प्रतिपाद्यानां विषये विस्तृतेन ब्रूते स्वकीयशाबरभाष्ये शबरस्वामी-

**हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पो व्यवधारण कल्पना । उपमानं दशैते तु विधयो ब्राह्मणस्य हि** ॥ 20

अत्र भगवान् शबरो ब्राह्मणानाम् प्रतिपाद्यत्वेन दशविषयाणामुल्लेखम् करोति, परन्त्वेतेषु विषयेषु विधिः, विनियोगः, अर्थवादः, निरुक्तिः, आख्यानं च प्राधान्यत्वेन आवहन्ति । इदानीमेतेषां षड्प्रतिपाद्यानां क्रमशो व्याख्यानम् विधीयते ।

**विधिः** - विधेरभिप्रायः - यज्ञानामनुष्ठानविधीनाञ्च साङ्गोपाङ्गतया विस्तृतेनोपदेशः, अर्थाद् यज्ञानुष्ठानम् कदा करणीयम्, कुत्र करणीयम्, केन प्रकारेण करणीयम्, कैः पुरोहितैः करणीयम्, एतानि सर्वाणि कर्मकाण्डसम्बद्धविधानानि विधिभागेन सम्बद्धानि वर्तन्ते । एतेषां सर्वाणामुपदेशः ब्राह्मणग्रन्थे कृतं विद्यते । **उदाहरणम्** - ताण्ड्यब्राह्मणे अनेकाः विधयः समुपलभ्यन्ते, तत्र बहिष्पवमानयज्ञार्थमध्वर्युना सहितोद्गातादीनां पञ्चसंख्यकानां ऋत्विजां प्रसर्पणस्य विधानम् कृतमस्ति । अस्मै प्रसर्पणाय तत्र त्रयः नियमाः उल्लिखिताः वर्तन्ते, येषां पालनमावस्यकं भवति । तेषु **प्रथमः** - प्रसर्पणसमये ऋत्विजां शनैः पदविन्यासः । **द्वितीयः** - मौने स्थितिः । **तृतीयः** – प्रसर्पण- समये ऋत्विजां केनचिदेकेन विशेषक्रमेण पङ्क्तिबद्धो भूत्वा सञ्चरणम् । अन्यथा पङ्क्तिखण्डने हानेर्वानर्थस्य सम्भावना भवति । शतपथब्राह्मणस्य आरम्भिकायां कण्डिकायामेव सहेतुकविधीनां निर्देशः प्राप्यते । यथा पौर्णमासेष्टिम् दीक्षितः पुरुषः आहवनीयगार्हपत्ययोर्द्वयोरग्न्ययोर्मध्ये पूर्वस्यान्दिशायां स्थितो भूत्वा जलस्पर्शं करोति । किमर्थं जलस्पर्शं करोति इति चेदुच्यते - जलं मेध्यो भवति तस्य स्पर्शनेन पापनाशो जायते, अपापी मनुष्य एव यज्ञाय अर्हो भवति, जलं मेध्यत्वाद् यज्ञे उपयोगी भवति इति ।

**विनियोगः** - कस्य मन्त्रस्य प्रयोगः कस्योद्देष्यस्य परिपूर्तये कर्तव्यः, कृतो वा, एतस्योल्लेख एव विनियोगेति शब्देन निगद्यते, विनियोगस्य प्रथमनिदर्शनं ब्राह्मणग्रन्थे एव दृश्यते । ताण्ड्यमहाब्राह्मणे यथा '**स नः पवस्य शं गवे** '21 अस्याः ऋचः प्रयोगः पशूनां रोगनिवृत्त्यर्थं क्रियते इति ।

**"आ नो मित्रा- वरुणा"** 22 मन्त्रस्यास्य प्रयोगो दीर्घरोगिणो रोगनाशार्थमभिधीयते अस्य विनियोगस्य युक्तत्वविषये ब्राह्मणाः कथयन्ति यद् मित्रावरुणयोर्देवतयो- स्सम्बन्धः प्राणेन अपानेन च सह वर्तते । अह्नः देवत्वाद् मित्रदेवः प्राणस्य प्रतिनिधिभूतो विद्यते, तथा रात्रेः देवत्वाद् वरुणोऽपानस्य प्रतीकः । अतः दीर्घरोगिणां काये मित्रावरुणयोर्निवासं नाम - प्रकारान्तरेण प्राणापानयोः स्थितिः । इति ॥

**अर्थवादः** - अर्थवादवाक्येषु स्तुतेः निन्दायाश्च द्वयोरेव निवेशो भवति, एतमर्थवादं स्पष्टीकुर्वन् ब्रूते भगवान् भट्टोजिदीक्षितः **"कृत्यैरधिकार्थवचने"** 23 इत्यस्मिन् सूत्रे ' स्तुतिनिन्दाफलकं यद्वाक्यन्तदेवार्थवादवचनमिति शब्देन प्रोच्यत इति । उदाहरणम् - वातच्छेद्यं तृणम्, वातेन छेद्यमिति विग्रहः, छेत्तुं योग्यं छेद्यमित्यर्थः । अत्र तृणानां कोमलत्वेन स्तुतिः, दुर्वलत्वेन निन्दा वेति । अन्यदुदाहरणम् "काकपेया नदी "अत्र पूर्णाम्भिस्त्वेन स्तुतिः, अल्पाम्भस्त्वेन निन्दा वेति । यज्ञे यागनिन्दितानां वस्तूनां निन्दा भवति, यागोपयोगिनो वस्तुनः प्रशंसा क्रियते, यज्ञीयमुदारणम् - यज्ञे माषस्य प्रयोगो निषिध्यते, उक्तञ्च **"अमेध्या वै माषा इति"** 24 अतः यज्ञे अप्रयुक्तत्वाद् माषस्य निन्दा अस्ति । बहिष्पवमानस्तोत्रस्य यज्ञे उपादेयत्वात्तस्य स्तुतिः क्रियते । अत्र निन्दायास्तात्पर्यम् विरोधिमतानां समालोचनपूर्वकखण्डनेन तेषां परिहारमिति भावः ।

**हेतुः** - हेतोरभिप्रायः कार्मकाण्डेषूपयुक्तानां विधीनामुपयोगाय यो हेतुर्वा कारणम्भवति, तस्यैव निर्देशो ज्ञातव्यः, सर्वे विधयः सयुक्तिकाः भवन्ति, न क कपोलकल्पिताः, तादृशानां विधिनाङ्करणाय कारणनिर्देशो हेतुः । उदाहरणम् - बहिष्पवमानयज्ञे पञ्चसंख्यकाः ऋत्विजो हस्ते दर्भमुष्टिं गृहीत्वा यज्ञशालायाः परिभ्रमणङ्कुर्वन्ति, तत्रायं हेतुर्यद् यज्ञाद् धावन्तं यज्ञदेवं दर्भमुष्टिं प्रदर्श्य पुनरानेतुमेषा क्रिया ऋत्विग्भिः क्रियते ।

**निरुक्तिः** - निर्वचनम् - निरुक्तिः - ब्राह्मणग्रन्थेषु शब्दानां निर्वचनस्य व्युत्पत्तेश्चापि स्थले स्थले निर्देशो विद्यते । एभिर्निर्वचनैर्यागे प्रयोज्यानाम् पदार्थानां सार्थक्यं निरूप्यते । यथा - "बृहत्साम" इति पदार्थस्य सार्थक्यन्ताण्ड्यब्राह्मणे स्पष्टीयते **"ततो बृहदनु प्राजायत । बृहन् मया इदं स ज्योगन्तरभूदिति तद् बृहतो बृहत्वम्"** 25 इति । अस्य साम्नः 'बृहत्साम' इति संज्ञायाः अन्वर्थतां प्रदर्शयन् ब्रूते यदनेन साम्ना बृहत्कालं यावत् प्रजापतेर्मनसि निवासः कृतः, अत एव अस्य साम्नः बृहत्साम इति नामकरणं जातम् । निरुक्तमाध्यमेन ब्राह्मणग्रन्थेषु निर्दिष्टानि निर्वचनानि भाषाविज्ञानदृष्ट्या अत्यन्तानि महत्वभूतानि विद्यन्ते ।

**आख्यानम् ( पुराकल्पम् )** अतिप्राचीनकालेऽर्थात् प्रागैतिहासिकयुगे यावन्तो यज्ञाः सम्पादिताः अभूवन्, तेषामाख्यानमेव पुराकल्पम् वा आख्यानमिति शब्देन प्रोच्यते । प्रजापतिः सृष्ट्याः सङ्क्रमणकाले आरम्भे वा यज्ञं कृतवान् आसीत्, तस्माद् यज्ञाद् विराड्पुरुषः, चतुर्वेदाः, चत्वारो वर्णाः, सूर्यः, चन्द्रमा, पञ्चमहाभूतादयो जाताः आसन्, अत एवोक्तम्

-**"तस्माद् यज्ञात् सर्वहुतम् ऋचः सामानि जज्ञिरे"** 26 ॥

**निष्कर्षः-**

यज्ञात्मकस्य ब्रह्मणः स्वरूपं येभ्यो विज्ञायते, ते एव ग्रन्थाः ब्राह्मणाभिधायिनः । एतेषु ग्रन्थेषु वैदिकमन्त्राणां विनियोगात्मिका व्याख्या वर्तते । अतः ब्राह्मणग्रन्थाः यज्ञसंस्थानामुद्भवविकासयो- र्बोधनायोपयोगिनो वर्तन्ते । वैदिकसंहितायान्तादृषमन्त्राणां संकलन- मस्ति, येषां यज्ञानुष्ठानादिषु विनियोगो भवति । कस्मिन् यज्ञविशेषे कस्य मन्त्रस्य केन प्रकारेण वा उपयोगो विधेयः, एतादृशानां प्रश्नानामुत्तरं ब्राह्मणग्रन्थेषु प्राप्यते । शतपथब्राह्मणे उल्लिखितेन "यज्ञो वै श्रेष्ठतमं कर्म" इति वचनेन इदम् परिज्ञायते यद् यज्ञः श्रेष्ठतमत्वेन ब्राह्मणानाम् प्रतिपाद्यः । ब्राह्मणग्रन्थानुसारं मनुष्यो यज्ञमाध्यमेन सर्वस्मात् पापाद् विमुक्तो भवति, उक्तञ्च शतपथब्राह्मणे "सर्वस्मात् पापात्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोतीति"। ब्राह्मणा- नुसारम् यज्ञानां किञ्चन विशिष्टं फलं विद्यते लोककल्याणमिति, यतो हि यज्ञे प्रदीयमानं हविः अन्तरिक्षे व्याप्तो भूत्वा सूर्यं यावद् गच्छति, पुनश्च मेघैः सह मिश्रितो भूत्वा वृष्टिरूपेण पृथिवीमभिसिञ्चति । प्रजाः धनेन धान्येन च पूर्णं करोति ।

अत एव उक्तम् – शतपथब्राह्मणे "अग्निर्वै धूमो जायते धूमाद् अभ्रमाद् वृष्टिः । ब्राह्मण -ग्रन्थेषु वर्णव्यवस्थायाः आश्रमव्यवस्थायाश्च कर्तव्यकर्माणामकर्मणाश्च निर्देशो विद्यते इति । इत्यलं विस्तरेण ।

**टिप्पण्यः**

1. मनुस्मृतिः - 2.13 ।
2. मनुस्मृतिः - 2.6 ।
3. सिद्धान्तकौमुद्याः, चतुर्थो भागः सूत्रसंख्या 3293 ।
4. ऋग्वेदभाष्यभूमिकायामाचार्यसायणः ।
5. मनु स्मृतिः -12.97 ।
6. आपस्तम्बश्रौतसूत्रस्य यज्ञपरिभाषासूत्रम् , सूत्रसंख्या -31 ।
7. शतपथब्राह्मणम् - 7.1.15 ।
8. ऋग्वेदभाष्यभूमिकायां वेदसंज्ञाविचारे महर्षिर्दयानन्दः सरस्वती ।
9 .केनोपनिषदः चतुर्थखण्डे, श्लोकसंख्यायाम्- 1 ।
10. महाभाष्ये ' ब्राह्मणेभ्यो हितम् ' इत्यस्मिन् सूत्रे , सूत्रसंख्या 5.1.7. ।
11. तैत्तिरीयसंहितायाः प्रस्तावनायां आचार्यः सायणः ।
12. चौखम्भातः प्रकाशितायां ऋग्वेदभाष्यभूमिकायामाचार्यसायणः ।
13. आपस्तम्ब श्रौतसूत्रे , सूत्रसंख्या – 37 ।
14. ब्राह्मणशब्दार्थनिरुपण- प्रसङ्गे मेदिनीकोशे ।
15. तैत्तिरीयसंहितायाम् . 3.7.1.1. ।
16. जैमिनीय- न्यायमालाविस्तरे-2.1.8. ।
17. तैत्तिरीयसंहितायाः भट्टभाष्करभाष्ये-1.5.1
18. ताण्ड्यमहाब्राह्मणम् - 25.13.3 ।
19. शाबरभाष्यम् - 2.1.8 ।
20. शाबरभाष्यम् - 2.1.8 ।
21. ऋग्वेदः , 9.11.3 ।
22. ऋग्वेदः - 3.62.16 ।
23. सिद्धान्तकौमुद्याः द्वितीयभागे , तत्पुरुषसमासप्रकरणे , सूत्रसंख्या - 695
24. चौखम्भातः प्रकाशिते जैमिनीयन्यायमालाविस्तरस्य प्रथमपादस्य पञ्चमाधिकरणे, पृष्ठसंख्या – 64 ।
25. ताण्ड्यमहाब्राह्मणम् - 7.6.5
26. ऋग्वेदः - 10.90.9

*********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# सन्देशकाव्ये मेघदूतानुकरणेन शुकसन्देशः

**Prabir Sarkar**
Ex-student of Jadavpur university
Department of Sanskrit
Jadavpur, Kolkata 700032
Contact No. : 83730-30418
Email Id. prabirsarkar.ju@gmail.com

कवेः कर्म काव्यं तच्च मूलतो दृश्यश्रव्यभेदात् द्विविधम्। दृश्यं तत्राभिधेयं श्रव्यं तु पाठ्यमेव। गद्यपद्यमिश्रभेदादयं त्रिविधम्। तत्रापि मुक्तक-कुल-कोष-संघातादि भेदात्पद्यकाव्यमनेकविधम्। तन्मध्ये सन्देश- काव्यं 'संघा" इति काव्यविभागऽन्तर्भवतीति। महाकाव्यं खण्डकाव्यमिति पद्यशाख्यायाः भेदेऽपि प्रसिद्धमेव। एवं च सन्देशकाव्यं खण्डकाव्यमेव इति च वक्तुं शक्यते। अर्थात् महाकव्यस्यैकदेशानुवर्ति खण्डकाव्यं भवति। विभिन्नानाम् इतिहासग्रन्थानां अन्वेषणेन इदं ज्ञायते यत् अखण्ड उत्तरभारतः बङ्गलपर्यन्तक्षेत्रेषु इदं काव्यं दूतकाव्यं तथा दक्षिणभारते यत् सन्देशकाव्यमित्युच्यते। संस्कृत साहित्याकाशे कालिदाशविरचितं अन्यतमं सन्देशकाव्यमस्ति मेघदूतम्। कालिदाशोत्तरयुगे मेघदूतम् इति सन्देशकाव्यानुसारेण विभिन्नानि काव्यानि रचितम् अभवत्। तादृशं एकं सन्देशकाव्यं शुकसन्देशः अस्ति। अस्य काव्यस्य विषयस्य गम्भीरता तस्य अलङ्कारविषयादि च मेघदूतरूपकेन रचिता अस्ति। यथा मेघदूतस्य द्वौ विभागौ तथा शुकसन्देशः। मेघदूतस्य प्रथमखण्डे यक्षवियोगदुःखं वर्णितम् अस्ति,उत्तरखण्डे दत्तस्य भौगोलिकवर्णनस्य अतिरिक्तं स्तोत्रं रचितम् अस्ति। शुकसन्देशकाव्यं पठनम् अनन्तरम् एतत् मन्यते यत्, यदि कालिदाशः मेघदूतम् इति सन्देशकाव्यं न विरचितं, तर्हि शुकसन्देशः इति सन्देशकाव्यं रचितं न भवति। लक्ष्मीदासः मेघदूतानुकरणेन शुकसन्देशः नाम्ना एतादृशं सन्देशकाव्यं लिखितुं समर्थमभवत्। सन्देशकाव्यस्य विषयसारः प्रायेण विरहिणा नायकेननायिकया समाधा- सनार्थं द्रुतमुखेन सन्देश प्रेष्यते। प्रथमतया विरहावस्था वर्ण्यते। तत्र हेतुश्च प्रतिपादितो दृश्यते। यदृच्छया नायकाय नायिकाप्रात्यर्थं मार्गनिर्देशः तेन क्रियते। पश्चात् सन्देशरूपस्य कथनं च।

शुकसन्देशेऽस्मिन् वियुक्तो नायको लक्ष्मीदास एव। सोऽयं विधिवैपरीत्यात कञ्चनकाल रामश्वरमधिवसन् केरलेष गुणकापुरवर्त्तिनीं प्रेयसीमुद्दिश्य शुकमुखेन दूतसंप्रेषणं करोति। तत् कारणात् ग्रन्थस्य नामोऽयं 'शुकसन्देशः' भवति। अस्य काव्यस्य एकः व्याख्याग्रन्थः धर्मगुप्तविरचितः 'शुकसन्देशव्याख्या' नाम्ना प्रसिद्धा। अष्टत्रिंशततमश्लोकः द्वयोः प्रकरणयोः परिच्छेदयोः वा अन्तर्भुक्तं भवति। ते नामौ 'वज्याङ्गदेशनाविवरणनाम' तृतीयपरिच्छेदः एवं च 'प्रमेयपरिष्ठापनविवरणन्नाम" त्रयोदशः परिच्छेदः। परन्तु धर्मगुप्तविरचितः शुकसन्देशस्य व्याख्या त्रयोदशपरिच्छेदेषु विभक्ता जाता। तत् कारणात् अस्मिन् अप्रकाशितः "शुकसन्देशव्याख्याः" असम्पूर्णग्रन्थ इत्यहम् मन्ये अस्मिन् ग्रन्थे अष्टात्रिंशतश्लोकानां अलंकारविवचनं, व्याकरणविषयस्य च निर्धारणम् एवं कतिपय- श्लोकमाध्यमेन श्रृङ्गारमेव अङ्गारसरूपेण स्वीक्रियते।

दृ प्तप्रायस्य संस्कृतवाङ्मयस्य पुनर्जीवनाय सम्पादनात्मकः शोधः आवश्यकः।सम्पादनात्मकः शोधः यद्यपि नवीनतां न सृजति तथापि मौलिकतां न भवति। प्राचीनकाव्येषु अनेकानि सन्देशकाव्यानि सन्ति, यथा-मेघदूतम्, पवनदूतम्, हंसदूतम्, कोकिलसंदेशामि। एतेषु ग्रन्थेषु शुकसन्देशः अन्यतमम्। साहित्यदृष्ट्या लक्ष्मीदासकवेः शुकसन्देशः केरलीयसंस्कृतसन्देशकाव्येषु प्रथमगणनामर्हति। लक्ष्मीदासेन लिखितः शुकसन्देशः केरलप्रदेशस्य प्रारम्भिक प्रचलितः रचना वर्तते। द्वादशीसवीयोपरान्न कुलशेखरसाम्राज्यस्य प्रारम्भे काले सन्देशकाव्येषु अन्यतमः स्थानः प्राप्तः।

सन्देशकाव्याः संस्कृतभाषासु मलयालं भाषासु वा सामाजिक-सांस्कृतिक-राजनीतिकेतिहासस्य महती स्रोतः विद्यते।

सन्देशकाव्याः खद्द कालिदासस्य मेघदूतस्य अनुकरणं सर्वत्रैव परिलक्ष्यते। कालिदासप्रणीतः 'मेघदूतम्' इति काव्यानुकरणेन शुकसन्देशकाव्यम् इति लक्ष्मिदासविरचितम्। संस्कृतसाहित्ये यथा 'मेघदूतम्' इति सन्देशकाव्यं नाम्ना प्रसिद्धमस्ति, तादृशं शुकसन्देशः इति सन्देशकाव्यम्। पूर्व- मेघोत्तोर्मेघभेदेण मेघदूतकाव्यं खण्डद्वयम् तथैवशुकानाशकाव्ये अपि पूर्वभागौत्तोरभागोश्च परिलक्ष्यते।

मेघदूतस्य पूर्वमेघे यथा शापितयक्षेण गेघयात्रामार्गवर्णना च उत्तरमेघे अलकावर्णना, यक्षपत्नीकरुणावस्थयाः विवृतम्, अपि च मेघसन्देशप्रदानायः विवृतम् अस्ति। शुकसन्देशकाव्ये अपि वयं पश्यामः यत् प्रथमभागे मार्गदर्शनस्य विवृतम् अस्ति, उत्तरभागे नायिकाविरहवर्णितं परिलक्ष्यते। एतादृशं मेघदूतकाव्येण सह शुकसन्देशकाव्यमध्ये अधिकः विषयसादृश्यं वर्णितम् अस्ति। पूर्ण-मेघदूतकाव्य यथा मन्दाक्रान्ता छन्देण विरचितम् तथा शुकनाशकाव्यमपि रचितं भवति। श्रृङ्गाररसानुकुलप्रसादगुनयुक्तं ललितभाषया शुकसंदेश- काव्यं विरचितं भवति, तादृशं मेघदूतकाव्यस्य रचनाशैली अपि। मेघदूतकाव्ये विरहयक्षः यथा तस्य पत्नीं प्रति सन्देशप्रेरणार्थं मेघं दूतरुपेण गृहीतम्। अतः मेघदूतकाव्ये उल्लिखितम् अस्ति-

प्रत्यासन्ने नभसि दयिताजी बितालम्बवनाथ जीमुतेन स्वकुशलमयी हारविष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्थाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागत व्याजहार।। (मेघदूतम्- पू. मे. ४)
शुकसन्देशकाव्ये एतादृशं तुलनात्मविषयोल्लिखितम् उदाहरणं यथा ---
सौजन्यान्ये ! भवतु भवते स्वागत वेगतोगा मांगाः सम्प्रत्यमरतरुणीनन्दनान्नन्दनान्नु।
उत्सङ्गाद्वा करपरिलसद्वल्लकीकोणवेल्लन्नीलक्षौमाञ्च लपटलिकामुद्रितादद्रिजाताः।। (शुकसन्देशः- पू. भा. ३)
मेघदूतकाव्ये विरहयक्षः वर्तावाहकमेघगुणविषये वर्णितमस्ति

जातं वंशे भुवनविदिते पुष्करावर्तकानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः
तेनार्थित्वं त्वयि विधिवशात्दूरबन्धुर्गतोहं याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा।।(मेघदूतम्-पू.मे. ६)

शुकसन्देशकाव्ये शुकगुणमपि एतादृशं वर्णितम्-

आस्था लोके विपुलमनसामन्यसामान्यमभ्ये-त्यार्थानर्थोपगमविगमेष्वर्थितामातुराणाम्।
न्यक्षेत्रेणैषा निजगुरुतया नेक्षते तद्विशेषं सान्द्रा तस्मिन्नपि च सहजं द्वन्द्वमेतद् द्वयेषु

(शुकसन्देशः- पू. भा. ६)

न केवलं मेघदूतपूर्वमेधेन सह शुकसन्देशपूर्वभागस्य तुलनात्मकालोचनमस्ति अपि च उत्तरभागविषयालोचनामध्ये बहुलांशे सादृशम् अस्ति खद्द ।

लक्ष्मीदासविरचितं शुकसन्देशकाव्यं मेघदूतवत् द्विधा विभज्यते पूर्वभागः उत्तरभागश्च। तत्र पूर्वभागे द्विसप्तति-संख्यकाः श्लोकाः सन्ति। उत्तरभागे नवतिश्लोकाः। विषयेऽपि मेघदूतकाव्यवत् सादृश्य परिलक्ष्यते यथा- शुकसन्देशेऽस्मिन् वियुक्तो नायको लक्ष्मीदासकविरेव। सोऽयं विधिवैपरीत्यात् कञ्चन कालं रामेश्वरमधिवशन् केरलेषु गुणकापुरवर्त्तिनी प्रेयसीमुद्दिश्य शुकमुखेन दूतसम्प्रेषणं करोति। कविः मार्गमध्येषु केरलान्तर्गतनगर-क्षेत्र-नदी-पर्वतानां वर्णनमत्र उपस्थापयति। नायकस्य प्रेयसी च रङ्गलक्ष्मीरिति प्रथित काचन नर्तकी सूचिता। काव्येऽस्मिन् दूतभूतस्य शुकस्योपदिष्ट इति चित एवायम् आदृतो वर्णना प्रकारः। समग्रदक्षिणभारतस्य भौगलिकवर्णनमुपस्थापितम् अस्मिन् काव्ये।

एकदा लक्ष्मीदासः यत् किञ्चित् दिवास्वप्नं पश्यति तस्य वर्णन शुकसन्देशे अकरोत् यथा कालिदासः मेघदूतकाव्ये अकरोत्।

प्राचीनटीकाकर्तुः धर्मगुप्तानुसारेण लक्ष्मीदासस्य नायकत्ववर्णनं वर्त्तते- "कालिदासोऽपि महाकविः पूर्वं नृपादेशवशात् प्रोषितः सन् निजामेव निस्सहविरहकद्द षितां प्रियामुद्दिश्य यक्षव्यपदेशेन सन्देशकाव्यम्। अतएवात्र आदिवाक्ये चक्रे, ददर्श, व्याजहार, ययाचे इत्येतानि पञ्चपदानि उत्तमपुरुषतया द्योत्यन्ते।

एकदा कविः स्वप्रियया सह निवसति स्म गुणकायाम्। तदा स्वप्नावस्थायं रामेश्वयां नियोजिताः अकस्मात्। इदानीं काले सः एक शुकपक्षी प्राप्तो अपि च यथाशीघ्रं सन्देशाय स्वप्रियां प्रार्थयति। कविः कथयति यत् शुकाय कृते अयं यात्रा सार्द्धैकदिवसपर्यन्तं भविष्यति। किन्तु जनाय कृते सप्ताहद्वयपर्यन्त भविष्यति। तस्मात् शुकं द्रुतं कृत्वा गुणकापुरात् रामेश्वरं पर्यन्तं मार्गस्य वर्णयित्वा प्रेषयति । शुकं कतयति- यत् रामेश्वरं नगरे विरमन्तु। तदन्तरं शुकं विप्राधिकारविधेयेषु केरलेषु प्रवेष्टुमुपदिशति कविः । तत्र च कन्याकुमारीक्षेत्रं,स्थानुमूर्त्यधिष्ठानं शुचीन्द्रक्षेत्रं च वर्णयः ततोऽनन्तशयने श्रीपद्मनाभक्षेत्रं च प्रस्तुवन् कोलम्बाख्यया विश्रुतां कूपकाधीश्वरानां कुलपुरीं प्रेषयति सन्देशहरम् । तदनन्तरं वल्लभग्रामम्, बिम्बलदेशं, बिम्बलीशानां, सैन्यकुठीरं सिन्धुद्वीपञ्च प्राप्य फुल्लानदीतटे विरमन्तु। मार्गमध्ये शुकः सुब्रह्मण्याख्यं महापण्डितं द्रष्टुमर्हति।

दत्तप्रेमा शिखिनि दलयन दानवान बाणमुक्ता सुब्रह्मण्यः पथि सुमनसां युथनेता निषेव्यः ।। (शुकसन्देशपू.64)

इतःपरं सुब्रह्मण्यदेवं नमस्कूर्वन् पेरियारनदीं गमिष्यति। पेरियारनद्याः उत्तरभागे अस्ति अतिप्रसिद्धः चेराराज्ञः यस्य राजधानी तिरुवाजीकुलम्। अयं शासकः केरलेषु अन्यशासकेषु प्रभूरूपेन मन्यते। त्वं अस्मिन् नगरेस्थितः जयरतेश्वरस्य मन्दिरमुपरि उड्डित्वा दूर्गां चाभिवन्द्य सायंकाले गुणकापुरे प्रविशेदिति कविरुपदिशति शुकम्। शुकः गुणकपुर्या आगत्य आनन्देन उल्लसित मुखरित करिष्यति इति पूर्वभागे –

आयत्यस्तं विरहिषु निजं तापमासज्य भाना वुढोल्लास प्रविश गुणकामूहशाली विशालम् ॥ (शुकसन्देशपू. 74)

शुकसन्देशस्य उत्तरभागस्य प्रारम्भ भवति- गुणकानगरस्य सौन्दर्यमय वर्णनाम्। गुणकानगरस्य परितः किलोवन्दी वर्त्तते । अपि च गह्वरयुक्तः कुल्यः अस्ति। नगरस्य भीतरिभागे वापयः सुन्दराणि उद्यानानि च सन्ति। तत्र सर्वदा पुरुषाः महिलाश्च परस्परं मिलित्वा आनन्दयति। वर्णनाऽयं कालिदासस्य अलकवर्णनैः सह समरूपयति । कविः युवनायिकायाः वर्णनमध्ये उत्तेजितो भवति अपि च तत्क्षण वियोगग्रथितः जातः स्मृत्वा-स्मृत्वा प्रेमिकायाः हृदयविदारकोः भवति। कविः पक्षीं परामर्शति यत् गृह्णातु सम्बोधनस्य प्रकामम् अवसरं मम प्रियाम्-सरजायाः वृक्षायै शाखायाः उपरि। कामार्त्ता प्रेमी निपुणोऽपि भविष्यविज्ञाने चिन्तयति यत् अकस्मात् विद्द प्तो प्रेमीतः शुकभावी- संकेतम् संप्रेषयितव्यम् प्रियार्थाय इदानीं काले शुकः तस्य तस्य प्रिया सन्देशयितुम् आरभत रामेण प्रेषितः हनुमानसदृशः यथा सीताम अशोकवाटिकायाम्। नायको उद्घघाटयति यत् तस्याः प्रेमी सुरक्षितः किन्तु स यक्षः प्रियावियुक्ते दुखिःतो अस्ति। प्रकृतिसौन्दर्योऽपि मानसिकदुःखो सा वर्धयति निकटे काले प्रियमिलनो युक्ता अस्ति धैर्यधारणस्य कारणात् जीवनधारणस्य कारण वा कालिदासस्य यक्षसदृशः नायकःस प्रेमिकायां प्रति अत्याधिकः चिन्तयति। सः सन्देशयति पदयात्रां कृत्वा यथा शीघ्रं तस्या निकटे आगमिष्यामि हनुमानसदृशः। सम्पूर्णविश्वे केवलं परस्परं परिचितं स्वप्नचिह्नानि अवर्णयत् अभिज्ञानाय शुकमुखम्। सप्नचिहेषु एकोऽपि पर्याप्तं यत् वर्णितः सन्देशः प्रेमीतः अगच्छत् इति निश्चितो भविष्यति। सन्देशसंप्रेषितोनन्तरं सन्देशवाहकः स्वतन्त्रो अस्ति यत् यत्र तत्र वा कुत्रोऽपि गच्छेतेति। नायकः अस्मिन् रूपेण धन्यवाद ज्ञापनम् करोति अपि च निश्चितोऽस्ति यत् सन्देशवाहकस्य यशः वृद्धिम् प्राप्तनोति उत्तरोत्तरम् अत्र न सन्देह, यथाहि दुःखी मित्रं सहायतां अकरोत् दुःखकाले । कविः इच्छति यत् भविष्यकाले सः प्रियावियुक्तो न भवेत् येन केन प्रकारेण।

मेघदूतमिति काव्यानुसारेण शुकसन्देसकाव्य लिखितमस्ति। एतस्मिन् कारणे बहुलाश सादृश्यमस्ति। यदि 'बरवर्णिनी' 'चिन्तातिलकञ्च टीकाद्वयमाधारीकृत्य समीक्षात्मक शोधः भवति तदा शुकसन्देशस्य महत्वम् अवगतम् भविष्यति इति मन्ये इतोऽपि

मेघदूतकाव्यात् शुकसन्देशकाव्यस्य मौलिकत्वं वैशिष्ट्य कीदृशम् तस्मिन् विषये ज्ञातुमर्हति। शुकसन्देशकाव्यमिदम् लक्षीदासस्य मात्रमेक ग्रन्थमस्ति। सम्यन्धारणा प्राप्यते तथा परिलक्ष्यते शुक्सन्देशकाव्येऽपि मेघदूतकाव्यतः यथा तत्कालिकसमये भौगोलिकविवरणस्य विषये रामेश्वरमन्दिरात् तिरुवन्तपुरपर्यन्त यात्रामार्गवर्णना, इतोऽपि तत्कालिकसमये सामाजिकचित्र कीदृशम् आसीत् तद्विषये ज्ञातुं शक्यते।

सहायकाग्रन्थसूची-

१) उष्णी, एन. पी. केरलीय संस्कृतसंन्देशकापसमीक्षा, रजतजपत्ती ग्रन्थमाला 22

२) काणे. पी. बी. संस्कृत काव्यशास्त्र का इतिहास, वाराणसी मोतीलालवानारसीदास, २९९०

३) बानाजी पतितपावन, उत्कलेषु संस्कृत गीतिकालस्य विकाशधारा प्रकाशक

४) विश्वनाथः, साहित्यदर्पण, सत्यव्रता वाराणसी, चौखाम्ब्रा विद्याभवन २००९

५) प्रवस्थी ब्रह्ममिश्र, अलङ्कारकोषः, दिल्ली हिन्दु प्रकाशन, १९८९

६) भामह, कामालङ्कारः रमण कुमार शर्मा, विद्यानिधिः दिल्ली 1975

७) मम्मट, काव्यप्रकाशः, ज्योत्सामोहन, नागप्रकाशकः, १९९९

८) आचार्यः सत्यनारायणः, संस्कृतशोधप्रविधि सौदामनी त्रिपाठी, पुरी २०१२

********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# स्वप्नवासवदत्तम्- राजात्वं च असीमप्रेमादर्शस्य एकम् प्रामाणिकपत्रम्

**Dr. Somnath Das**
Assistant Professor
Department of Sanskrit
Ashutosh college, Kolkata, West Bengal
Contact -6295679971
Email ID - somnath.das@asutoshcollege.in

अखिल भुवने प्राचीनकालतः मानवा: नानाविध विषये चर्चां करोन्ति। संस्कृत साहित्याकाशे पौराणीक काहिनितः वर्तमान समयोपयोगि अधिकः विषये रचना: सन्ति। सर्व विषयस्य प्रामाणिक दलिलं संस्कृतम्भवति। मानवजीवने आनन्द प्रदानाय संस्कृतसाहित्यम् इति उत्तमं विषयः खद्द । अत्र नानाविधः गल्पकाहिनि, नाटकं, गद्यकाव्यं, पद्यम् इत्यादि विशेषरूपेन उल्लिखितम् अस्ति । मानवजीवने सुख-दुःखम् अनुभूतिः भिन्नम् अपरः विषयः नास्ति, परन्तुः तन्मध्ये यदि वयं आनन्दविषयरूपेन साहित्यचर्चां करामहः तर्हि केवलमेव आनन्दं हि आनन्दम् । संस्कृत नाट्यसाहित्ये यथा प्रणयविषयरस आलोचना अस्ति तथा राजनीति विषये अपि अधिकः निदर्शनं प्राप्यते। संस्कृत नाट्यशास्त्रे एताइशं बहुनानि नाटकानि सन्ति तन्मध्ये भासरचितं श्रेष्टः नाटकं 'स्वमवासवदत्तम्' इति। अस्मिन् नाटके यथा राजनीतिविषयः अस्ति तथैव प्रणयकाहिनि अपि उल्लिखितम्।

**सूचकशव्दः-**

राज्यजयः, राज्ञः सर्वाङ्गिन् मङ्गलसाधनम्, अद्वयः मेलवन्धनम्, नैसर्गिकं मेलवन्धनम्।

राज्ञः नीति राजनीतिः । राज्यपरियाजनाय अत्यावश्यकः राजनीतिः इति । यदि कस्मिनश्चित् राज्ये राज्ञः नीति वलशाली न भवति तर्हि राज्यं दुर्बलः भवति। एतत् सत्यं यत्, यदि राजा अधिकरुपेण राजविद्यां निपुनं न भवति तर्हि मन्त्रिभिः सह विषयस्यचर्चाम् अत्यावश्यकं करिष्यति। मन्त्रिबुद्धिवलेन राजा अधिक कार्ये सफलं भवति। यराजमन्त्रिः सः सर्वदा राजकार्यकल्यानविषये अधिकः तत्परं भवति। 'स्वप्नवासवदत्तम्' इति नाटके एतादृशं मन्त्रिः अस्ति सः '। सः सर्वदा राजकार्ये निपुनः आसीत्। तस्य राजनीतिमतेन राजा उदयनः हृतराज्यं पुणः प्राप्तवान्। एतत् सर्वं मन्त्रि यौगन्धरायणस्य मध्ये सुनिपुनाम राजनीतिविद्यां आसीत्।

राजा सर्वदा तस्य राजत्वं तथा राजकोषवर्धनाय प्रादेशीक नृपेन सह युद्धं करोति । यद्यपि राज्यजयं अधिक: आनन्दं परन्तुः राज्यजयविषये सम्पक् रुपेन अन्तशक्तिः अनिवार्यम् भवति । राज्यजये राज्ञः राजकोष: वर्धनाय अधिक सहायतां करोति । परन्तुः राजा यदि सर्वविषये सम्यक् रुपेन ध्यानं न ददाति तर्हि राज्यः द्रुतं शक्तिहीन भवति । स्वसवासवदन्तम् नाटके राजानां कृते एतादृशम अभवत्। राजा अधिक समय पर्यन्तं तस्य पत्नी वासवदत्तया सह कालगतिवाहितम्, एतत् कारणे राज्यजयविषये ध्यान हीना आसीत् । राजकार्य परिवालनाय राजा सर्वदा सचेष्टं भविष्यति, तर्हि राज्यजयः भवति एवं प्रजाः सुखेन जीवनयापनं कर्तुं समर्थः भवन्ति । अतः प्रजाकल्यानाय अपि राजा अवश्यमेव राज्यजयं करिष्यति । 'स्वप्नवासवदत्तम्' नाटके अपि एतादृशं विषयं प्रति दृश्यं परिलक्ष्यते। यदि राज्ञः राजत्ववृद्धिः भवति तर्हि अति उत्तमं विषयः । राजत्ववृद्धिः भवति किन्तु प्रजाकल्यानं न भवति तर्हि राज्ये सुख-शान्तिः तथा सुश्रृङ्खला कदापि न भवति। अतः राजत्ववृद्धिना सह प्रजाहितविषये अपि अवश्यमेव चिन्तनं करोरीयम्। यस्मिन् राज्ये प्रजाशक्तिः, सैन्यशक्तिः, विभिन्न शक्तिः सम्यक् भवति तस्मिन् राज्यं स्वयं रुपेण राजत्वंवर्धयति । स्वसवासवदत्तम् इति नाटके मन्त्रिः मगधराज्यतः सैन्यागमनाय सचेष्टं भवति। राज्ये राजत्ववृद्धिना सह राजकोषस्योन्नयनं प्रति सम्मक् चिन्तनं करनीयम् । यदि राजा मन्त्रिना सह राज्योन्नयनं विषये मन्त्रणा करोति तर्हि राज्यः अधिकरुपेन अग्रे गछति। राजकार्यपरिचालनाय एतत् कार्यं अति निपुनतया रुपेण भवति

चेत् तर्हि सुराज्यः नाम्ना परिचितः भवति । एतत् विषये स्वप्नवासवदत्तम् नाटके मन्त्रिः अधिक निपुनम् आसीत्।

राज्य परिपालनाय राजा सर्वदा प्रधानः। राजवाक्यम् अति सिद्धम्। राजादेशपालने सर्वे वाध्यं भवति। सुनिपुनतया राजा राजकार्यं करोति । राज्यकल्याणे राजा अधिक सुदक्षः भवति। राज्यहिते न केवलं राजा प्रमुखः, मन्त्रि-प्रजाः अपि प्रमुखाः एतत् विषये राजा सर्वदा सम्यकतया चिन्तनं करणीयम्। प्रधानतया राजकल्याणे सर्वे गिलित्वा कार्यं करणीयम् । राजा सर्वहित कार्यादेश प्रमुखः परंतु राज्य कल्याणमयता विषये सर्वजनाः सिद्धम् । यदि वयं सर्वे मिलित्वा किमपि कार्यं कर्तुं समर्थः भवामः तर्हि तत् कार्यं सम्यक् रुपेण द्रुतं साफल्यं भवति । सर्वजनहिताय किञ्चित् त्यागं आवश्यकम्। किञ्चित् त्यगेन यदि अधिक तथा भविष्यत्काल पर्यन्तं तथा जनानां कृते अर्थात् भवति । अतः व्यागं करणीयम् । स्वप्नवासवदत्तम् इति नाटकस्य नायिका वासवदत्ता राजसुखं त्यक्तवया मन्त्रिः यौगन्धरायनेण सह परिचयात्मगोपनं कृत्वा मगधतपवने कालातिपातं कृतवती। एतत् कार्यं न केवलं स्वयं कृते कृतवती परन्तुः सर्वहिताय, प्रजाकल्याणाय, राज्यमंगलसाधनं कृतवती । अंतः आस्माकं जीवने यदि कल्यान विषये किमपि कार्यं करणीयं चेत् मिलित्वा करणीयम्।

मानवजीवन केवलं कर्तव्य पालने अतिवाहितं भवति एतत् न शोभानीयम्। कर्तव्यपालनेषु यदि किञ्चित् आनन्दं तथा सुखानुभूतिः आगछति तर्हि जीवनं सुन्दरं भवति । वयं जानिमः सुखपरं दुःखम् इति अपि च तत् परं पुणः सुखम् आगच्छति। स्वप्नवासवदत्तम् इति नाटके भासः उक्तवान्-

कालक्रमेण जगतः परिवर्तमाना चक्रारपंक्तिरिव गच्छति भाग्यपङ्क्तिः।

अर्थात् दुःखानि च सुखानि चक्राकारेण परिवर्तन्ते। मानवजीवदम् दुःखेन परिपूर्णम् इति मन्ये सुखाति अपि अन्वेष करोनीयम यति जीवने किश्चित् अपि सुखम् न आगतति तर्हि किमपि कार्यं प्रति सम्यकतथा शक्तिं न आगच्छति । इत्यस्मिन कारने जीवने सुखानुभूति अपरि- हार्यम् । यदि एतादृशं सुखं प्रेमादर्शे परिवर्तनं भवति तर्हि आनन्दं हि आनन्दम्। प्रेमालापे यत् सुखं अनुभवति तादृशं सुखम् अन्यत्र न प्राप्यते। संस्कृतनाट्यसाहित्ये प्रणयकाहिनिमध्ये अधिक रुपेण सुखा- नुभूतिः परिलक्ष्यते। स्वप्नवासवदत्तम् नाटके राजा उदयनः यदा वासवदत्तया सह कालातिपातं करोति तदा तस्य आनन्दस्य वार्ता प्रवहति ।

मानवजीवने सुखानुभूतिना सह प्रियजनानां प्रति यदा स्नेहं सर्वजनहिताय कल्याणं भवति तर्हि तत् व्यगं सार्थकम् भवति। त्यागं अधिक वर्धयति तदा मेलवन्धनं प्रति आकर्षम् अधिकः प्रवलं भवति। विना किमपि साफल्यं न भवति, अपि च काष्टं विना अपि सुखानुभूति न भवति । दुर्गम मार्गमातिक्रमेन हिमालयस्य तुषारशीतलतानुभवम् मानवजीवनं कदापि संगहीन न भवति। जनः कदापि निसङ्ग जीवन- यापनं कर्तुं न शक्नोति। जीवने सङ्गवध्यावश्यकम् । संस्कृतनाटके प्रणयावद्धः काहिनि अति प्रसिद्धम्। इत्यस्मिन् कारणे संस्कृतनाटकम् अति आकर्षितं भवति । मानवजीवने अपि प्रीयजनानां प्रति आकर्षम् अत्यावश्यकम्। वन्धनमपि विघ्नम् उत्घाटनं करोति। यदि राज्यनेता एकः न जीवनं अतिवाहित कर्तुं न शक्नोति, तर्हि साधारणजनः कीदृशं भवति । अस्माकं जीवने यदि वन्धनं भवति तर्हि वयं अतीव शक्तिनिपुताः भवामः।

पारस्परिक मेलबन्धनं मानवजीवने बोधविकाशाय मार्गउत्घाटनम् करोति । बन्धनं यादृशं प्रगाढ: भवति तादृशं गानवीकवोधः प्रकाशः विकशितं भवति। मानव हृदये प्रेमादर्शकारणे परस्परं नैकट्यां भवति। अतः जीवने यदि प्रणयः आगच्छति तर्हि तस्य जीवने बहवः परिवर्तन आगच्छति । तदा नवोन्मेष भवितुं अर्हति । सरवरे यदा कोमलं प्रस्फुटितकाले सुन्दर वातावरणं प्रवहति, सुगन्धि अपि प्रवहति तदा मानव जीवने प्रणयकाले आनन्दस्य वातावरणम् प्रवहति । परस्परं सन्निकर्ष अधिक रुपेण प्रतिभाति ।नैकट्यवोधतः आत्मिक चेतनायाः उन्मेषः भवति। मनविकजागरणं मानवजीवने अति गुरुत्वम्।

यस्य आत्मिक् वोधः नास्ति तस्य जीवने किमपि नास्ति। आत्मवोधः चेतानाय अस्माकं सदैव चिन्तनं करणीयम्। स्वार्थान्वेषि जना: केवलं आत्मसुखेन संतुष्टं भवति, किन्तु एतत् सम्यक् न भवति । सर्वजनहिताय अत्यावश्यक भवति आत्मबोधः। जगत् संसारे मानवाः भिन्नरूपेन आनन्दं करोन्ति किन्तु आत्मबोधविषये चिन्तनम म करोति। यस्य चैतन्यं नास्ति से जड़। श्री रामकृष्णः उक्तवान् - सर्वेजनानां चैतन्यं भवन्ति । चेतना मानव जीवने परिवर्तनं आनयति । आत्म चेतनबोधः यता जागरति तदा सर्वकल्यानं भवितुं अर्हति ।

वर्तमानकाले मानवाः प्रणयकाले अधिक समये आत्मवोधं विसर्जनं करोति, किन्तु अन्ते केवलं दुख्यं पुष्यते। स्वप्नवासवदत्तम नाटके अवन्तिका रूपिनी वासवदत्ता आत्मिकवोधे सचेष्टं आसीत। सा कदापि प्रणयमहे आत्मज्ञानशून्यं न भवति । अत: किमपि कार्यं सम्पन्नं काले सदैव सम्यक् तथा आत्मज्ञानस्य उन्मेषनं करोनीयम् ।

प्रेमालापे क आनन्दानुभुतिं प्राप्तुं न ईछति ? प्रेमालापे अस्माकं सदैव जीवनस्य उद्देश्य विषये एवं भविष्यतकालविषये सत्तावोधस्य प्रकाशः करणीयम् । यदि वयं सत्तावोधविषये ज्ञानं न लभते तदा बहवः समस्या आगच्छन्ति। सत्तावोधहिना कार्यं सिद्धं न भवति। स्वप्नवसवदत्तम् नाटके वासवदत्तयाः सत्तावोधः आसीत्। इसस्मिन कारणे कार्यं सम्यक रूपेण सम्पन्नम् अभवत् । अम्माकं जीवने अपि एतादृशं विषयोपरि चिन्तनं रक्षणीयम्। यदि एतत् भवति चेत् तर्हि सुन्दरं जीवन पालवीयं भवति ।

मानव जीवन सुख - दुःखम अस्ति अपि च विछेद अस्ति। विछेदे दुखं भवति किन्तु यदि विच्छेद महतकार्य सम्पादनार्थं संघटनं भवति तर्हि समाप्ते केवलम् आनन्दधारा प्रवहति । एतादृशं काहिनि अस्ति समवासदत्तम् नाटके। विच्छेद परं नैसर्गिक मिलने सुराधनिधारेव आनन्दानुभुति चलति । मिलनेमेव आनन्दम्।

**सहायकग्रन्थसुची-**


1. Bandyopadhyay, Shanti, Swapnavasavdattam, Sanskrit pustakbhandar.
2. Bandyopadhyay, Ashakkumar, Manusamhita, sadesh.
3. Basu Anil, Chandra, Arthashastram, Sanskrit book dipo.
4. Maxmuller.F, A History of Ancient Sanskrit Literature.
5. Weber. A, The History of Indian Literature.
6. Warder. A, K, Indian Kavya Literature-(VOLI-VII).
7. Sastri. Dr. Gourinath, A Concise History of Classical Sanskrit Literature.
8. Chatterjee. A.C, Kalidasa: His Poetry and Mind - 1941.
9. Singh. Amaldhari, Kalidasa A Critical Study - 1977.
10. Das, Debkumar, Sanskrit sahityeritihas, sadesh.


********

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# महाभारतादिग्रन्थेषु गार्हस्थ्ये नारीणां महत्त्वम्

**Dr. R. Shivkumarswamy**
Assistant Professor of Literature
Shree Rajarajeswari Veda Samskrita Snatakottara Adhyayana Centre
Swarnavalli Matha, Mathadevala-581336
Shirsi, Uttarakannada, Karnataka
Contact : 7353096127
E-mail : likhitamay30@gmail.com

**लेखनसार:**

**अस्मिन् लेखनावसरे यत् - भारतीयदर्शनानां मुख्यं प्रयोजनं मोक्ष:। मोक्षप्राप्तये पुरूषस्य** निवृत्तिरूपधर्म: अपेक्ष्यते। सोऽयं निवृत्तीरूपधर्म: विना नारीं न साध्यते। दर्शनानामनुसारं स्त्रीपुरूषसंयोगेन समुत्पद्यमानायां सृष्टौ नारीणां प्राधान्यं दृश्यते। अतः स्वजीवनं सुव्यवस्थितरूपेण निर्वोढुं मानवस्य आश्रमव्यवस्थाया: आवश्यकता वरीवर्ति। सा च आश्रमव्यवस्था चतुर्धा विभक्ता। एतेषु चतुर्षु आश्रमेषु द्वितीय: सर्वाश्रमाधारभूत: सर्वोत्कृष्ट: च गृहस्थाश्रम: इति प्रज्ञै: प्रोच्यते। अस्य गृहस्थाश्रमस्य आधारस्तम्भ: नारी एव। आश्रमस्य पञ्चयज्ञादीनि समस्तकर्माणि पुरुषेण समर्थतया निर्वोढुं नारी एव प्रधानं कारणम्। अतः पुरूष: एकाकी एव अमुम् आश्रमम् उत्तीर्य गन्तुं न पारयति। स्त्रियं विना पुरुषस्य जीवनम् अन्धकारमयं भवेत्। अतः गृहस्थाश्रमे नार्या: महत्त्वम् अनन्या अनितरसाधारणी अनुपमा अनिवार्या च सञ्जायते । एवं गृहस्थाश्रमे नार्या: महन्ताप्रतिपादका: विचारा: महाभारतादिषु ग्रन्थेषु दरीदृश्यन्ते। तत्र प्रतिपादिता: तादृशा: विचारा: आधुनिकसन्दर्भस्य पृष्ठभूमौ अत्र चर्च्यन्ते।

भारतीयसंस्कृतौ मानवस्य सम्पूर्णं जीवनं प्रायश: शतं वर्षाणि इति परिगणय्य तदायु: आश्रमनां समानताया चतुर्धा विभक्तं दृश्यते। तेषु चतुर्षु आश्रमेषु मनुष्यजीवनस्य आयुष: प्रमुख: द्वितीय: आश्रमस्तु गृहस्थाश्रम: एव। तदुक्तम् **“द्वितीयमानुषो भागं कृतदारो गृहे वसेत्”**१ इति।अयं गृहस्थाश्रम: व्यक्ते:, कुटुम्बस्य समाजस्य राष्ट्रस्य च उन्नतिसाधक: इति परिगीयते। भारतीया प्राचीना संस्कृति: याज्ञिकी संस्कृति: आसीत्। अतः वैदिककर्मकाण्डस्य प्रमुखमङ्गं यज्ञ:। यज्ञानुष्ठानाय पत्न्या: साहचर्यम् अनिवार्यम्। विना पत्नीं यज्ञकार्यम् असम्पूर्णं शास्त्रविरूद्धं च भवति। अतः भारतीयसमाजे विवाहस्य महत्त्वपूर्णं स्थानं प्रकल्पितम्। विवाह: एव गृहस्थाश्रमस्य मूलम्। यथा वायु: समेषां जीवजन्तूनां प्राणाधारभूत: तथैव इतरे त्रयः आश्रमाः अपि गृहस्थाश्रममेव आधारीकृत्य राजन्ते इति मनुना प्रोक्तम्।

एहिके आमुष्मिके च लोके मानवजीवनस्य सौष्ठवसम्मपादनाय विचारशीला: प्राचीना: महर्षय: मानवस्य वैवाहिकजीवनमेव **’गार्हस्थ्यस्य प्राणभूतं महत्वम्’**२ इति अकथयन्। विश्वविख्याते ऐतिहासिककाव्ये महाभारते तु युधिष्ठिरं नीतिमुपदिशन् भीष्मः इदं स्पष्टयति यत् – **“दाम्पत्यजीवनं यथाविधि य: न निर्वहति सः पुण्यसञ्चयं कर्तुं न शक्नोति। यतः धर्मर्थकामानां पुरूषर्थाणां समुचितसम्पादने पत्न्याः पात्रम् अनितरसाधारणम् अनुपमं च वर्तते। पुरूषार्थसम्पादनतत्परस्य पुरूषस्य पुरुषार्थसिद्धिकिर्येषु सविस्तरं निरन्तरं च कार्यं कुर्वती पत्नी दाम्पत्यजीवनप्रवाहस्य सुयोग्यां दिशं दर्शयति”**३ इति ।

महाभारते ऋषिं भरद्वाजं गृहस्थाश्रमस्य अनिवार्यत्वम् अनन्यत्वं च प्रतिपादयन् महर्षिः भृगुः कथयति यत् -**"गुरूकुले अध्ययनं समाप्य सामाजिकप्रपञ्चमागतः स्नातकः ब्रह्मचारी स्वीयसामाजिकदायित्व निर्व- हणाय आत्मीयस्य भावनात्मकसम्बन्धस्य विस्तरणाय च विवाहेन सम्बद्धः सन् गृहस्थाश्रमं प्रविशेत् "**४ **इति । अनेन विवाहकर्मणा धर्मार्थकामान् सम्पाद्य जगतः स्रष्टुः आज्ञां परिपालयन् जीवसृष्टिकर्मणि निरतः मनुष्यः अन्ते मोक्षं प्राप्तुं समर्थो भवति। अतः पुरुषः स्त्रिया सह विवाहबन्धनं प्रविश्य धर्मानुसारं गृहस्थजीवनं यापयेत्”** ५ इति।

बोधगम्ये धर्मसूत्रे अनेकप्रयोजनानां पूरयता सर्वोत्कृष्टः आश्रमः गृहस्थाश्रमः एव इति कथितः । सर्वैः सुखोपभोगैः साकमेव धर्मस्यापि समन्वयः अस्मिन् आश्रमे भवतीति हेतोः महर्षिः गौतमः गृहस्थाश्रमः सर्वाश्रमाणां मूलम् इति प्रतिपिपादयिष्यति ।

गृहस्थाश्रमः सर्वसमस्यानिर्भरः अतीव दुःखदायकः च इति बहुभिः यैः मुहुर्मुहुः निरुच्यते तैरिदम् अवश्यं विज्ञेयं यत् कण्वजमदग्निविश्वामित्रवसिष्ठ- भारद्वाजगौतमादयः महान्तः नैके ऋषयश्चत्रगृहस्थाश्रमे वर्तमानाः एव महन्ति तत्वानि शोधयाम्बभूवः । अतः एव प्राज्ञैः उक्तम् - ' **धन्यो गृहस्थाश्रमः** ' इति।

अस्मिन् गृहस्थाश्रमे सपत्नीकः एव पुरूषः ऋणत्रयं पञ्पयज्ञान् च यथाशास्त्रं पूरयति । अतः गृहस्थाश्रमेऽस्मिन् नारीणां प्रधानं स्थानम् उपकल्पितं दृश्यते । तदेव महर्षिणा व्यासेन प्रोक्तम्। '**गृहस्थ्येव हि धर्माणि सर्वेषांमूलमुच्यते**' इति । महान् वैयाकरणः पाणिनिरपि '**पत्युर्नो यज्ञसंयोगे**'६

इति सूत्रेण पत्युः यज्ञकार्ये या तेन सह समुपतिष्ठति सा एव पत्नी इति निर्वक्ति । यज्ञश्राद्धतपर्पणसन्तानोत्पादनानि शास्त्रश्रवणत्रिवर्गसेवनानि चेत्यादीनि गृहस्थाश्रमसम्बद्धानि कर्मविशेषाणि पत्नीं विना कर्तुम् अश- क्यानि । अतः गार्हस्थ्ये स्त्रीणां प्राधान्यं नितरामुररीक्रियते ।

वेदेषु अपि स्त्रीभ्यः ब्रह्मणः उपाधिः अपि परिकल्प्यते । तदुक्तम् - '**स्त्री हि ब्रह्मा बभेविथ' इति अपि च " अर्थो हि वा एष आत्मनो जाया** " [7] इति कविकुलगुरः कालिदासो (अपि) " **क्रियाणां खद्द धर्म्याणां सत्पत्नयो मूल- कारणम्** " [8] इत्यवादीत् । श्रौतसूत्रेष्वपि पत्नीद्वारा उच्चार्यमाणानां मन्त्राणां सन्दर्भवर्णनस्य उल्लेखानि दृश्यन्ते।

यज्ञाङ्गानि नैकानि कार्याणि पत्नी एव सम्पादयति । सा पत्युः अर्धम् अङ्गम् इति विश्लिष्यते । अतः सा अर्धाङ्गिनी इति आहूयते। भगवती श्रुतिः इत्थं कथयति यत् - " **स्वभावतः मनुष्यस्य देहे अर्धभागे पत्युः अपरे अर्धभागे पत्नयाः स्वरुपं निहितं भवति। यावत्पर्यन्तं पुरूषस्य स्त्रिया सह विवाहः न सम्पद्यते तावत्पर्यन्तं सः अर्धः एव भवति न तु परिपूर्णः**"[9] इति । रामायणकाले अश्वमेधयज्ञानुष्ठानावसरे स्वधर्मपत्न्याः सीतायाः अनुपस्थितौ श्रीरामः तस्याः स्वर्णमयीं मूर्तिं निर्माय अश्वमेधं चकार इति सर्वैः विदितमेव । एवं च देवत्वप्रतीकेषु प्रथमस्थानं नार्याः तदनु सारस्य भवति यथा लक्ष्मीनारायणौ उमामहेश्वरौ सीतारामौ चेत्यादिरूपेण । मनुस्मृतौ मातुः स्वरुपं गौरवं च इत्थं प्रतिपाद्यते यथा-

**'दशोपाध्यानामपेक्षया आचार्यः, शताचार्याणामपेक्षया पिता, सहस्त्रपितृणा- मपेक्षया मातुः गौरवम् अधिकं भवति'** [10] इति।

महाभारते गृहस्थाश्रमे नार्याः वैशिष्ट्यम् इत्थं वर्णितं यथा - 'न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते' इति । गृहिणीं विनागृहस्य गृहम् इति नाम एव अन्वर्थकं न भवति इति अनेन प्रतिपाद्यते। पत्नी एव पारिवारिक
जीवनस्य स्रोतः इति च कथ्यते। पत्नी एव गृहस्य आभूषणं समाजस्य रक्षयित्री च भवति इति महाभारते उल्लिख्यते। एवं महाभारतादिषु ग्रन्थेषु नारीणां महत्वं सम्यक् प्रतिपादितं दृश्यते। तादृशाः आदर्शाविचाराः अस्माभिरपि अधुनातनकाले अनुसरणीयाः वर्तन्ते।

## निष्कर्षः

राष्ट्रे समाजे कुटुम्बे गृहे च पुरूषः स्त्री च परस्परं पूरकशक्तित्वेन कार्यं कुरूतः। अनयोः उभयोर्मध्ये अविनाभावः सम्बन्धः वर्तते। एकं विहाय अपरस्य अस्तित्वस्य औचित्यमेव नास्ति। यथा रथस्य द्वे चक्रे अनुरूपतया परिवर्तमाने रथस्य गतिं समुचितदिशि वर्धयतः तथैव स्त्रीपुरूषौ च गार्हस्थ्ये अनुरूपतया परस्परं विज्ञाय व्यवहरन्तौ स्वजीवनस्य समाजस्य च उन्नतिं साधयतः । स्त्रीणां भूमिका न केवलं गृहस्थाश्रमिणः जीवने प्राधान्यं भजते किन्तु विश्वस्य सर्वासु सभ्यतासु संस्कृतिषु च महत्वपूर्णं स्थानं विन्दति।

**टिप्पण्यः**

१. मनुस्मृतिः , ४ – १ ।

२. महाभारतम् , शान्तिपर्व, १४४ - ५ , उत्तरार्धम् ।

३. महाभारतम् , शान्तिपर्व , ११४ - १६ , तथा पूर्वार्धम् ।

४. महाभारतम्, शान्तिपर्व, १९१ - १० ।

५. महाभारतम् , शान्तिपर्व, १९१ – १७ ।

६. अष्टाध्यायी , ४ - १ - १३३ ।

७. तैत्तरीयब्राह्मणम् , ३ - ३ - ३ – ५ ।

८. कुमारसम्भवम् , ६ - १३ ।

९. व्यासस्मृतिः , २ - १३ ।

१०. ऋग्वेदः , १० - ८५ - ४६

**********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# शारीरकमीमांसायाम् आतिवाहिकाधिकरणस्य विमर्शः

**Karthik Sharma K,**
Assistant Professor & Research Scholar
School of Vedic Knowledge Systems,
Chinmaya Vishwa Vidyapeeth, Adi Sankara Nilayam
Adi Shankara Marg, Veliyanad, Ernakulam, Kerala-682313
Mobile : 8848480197
E-mail : karthiksharma.k@cvv.ac.in

## उपोद्घातः

शारीरकमीमांसायां चतुर्थाध्यायस्य तृतीयपादस्य चतुर्थम् अधिकरणम् आतिवाहिकाधिकरणम् । ब्रह्मलोकप्रापकोपासनानां सन्निधौ पठितानि मार्गप्रतिपादकानि "अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासान् स्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादि- त्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते" (छा ४-१५-५ ) इत्यादीनिवाक्यानि विषयः । इमानि एव वाक्यानि स्वीकृत्य अस्मिन् पादे अधिकरणत्रयम् इतः प्राक् प्रवृत्तमस्ति; अर्चिराद्यधिकरणम् वाय्वधिकरणम् तडिदधिकरणम् च । तत्र च अर्चिराद्यधिकरणे मार्गाः इमे भिन्नाः इति पूर्वपक्षं सयुक्तिकं निरस्य मार्गैक्यं व्यवस्थापितम् । उत्तरयोः अधिकरणयोः क्रमविषयकः सन्देहः निवर्तितः । अस्मिन् अधिकरणे अर्चिरादीनां स्वरूपं निर्धार्यते ।ब्रह्मलोकसाधनत्वेन श्रुतानि उपासनाप्रकरणपठितानि यानि अर्चिरादीनि तत्प्रतिपादकानि वाक्यानि विषयः ।

## अधिकरणारम्भकसंशयः पूर्वपक्षश्च

अत्र च अयं संशयः ; श्रूयमाणानि अर्चिरादीनि १ किंरूपाणि मार्गचिह्नानिवा भोगभूमयो वा गन्तृणां नेतारो वा ? तत्रायं आद्यः पूर्वपक्षः अर्चिरादीनि मार्गलक्षणानि एव भवितुमर्हन्ति ।तथा हि देशान्तरं प्रतिष्ठासमानं पुरुषं प्रति प्रयुज्यमानस्य " इतः अमुं गिरिं गच्छ ततो न्यग्रोधम् ततो नदीं ततो ग्रामम् " इति मार्गोपदेशरूपवाक्यस्य यादृशी आनुपूर्वी तादृशी आनुपूर्वी ब्रह्मलोकं प्रतिष्ठासमानस्य उपासकस्य विषये प्रवर्तमानस्य अर्चिरादिवाक्यस्यापि वर्तते इति कृत्वा तत्प्रतिपाद्यानि अर्चिरादीनि मार्गलक्षणान्येव । तथा च अर्चिरादिवाक्यम्, मार्गप्रतिपादकम्, देशान्तरप्रेप्सुं प्रति गमनसाधनोपदेशरूपत्वात् लैकिकमार्गोपदेशवाक्यवत् इत्यादिः अनुमानप्रयोगः अत्र बोध्यः ।

अथवा अर्चिरादीनि भोगभूमयः भवितुमर्हन्ति । तथा हि " अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठस्तस्माद्विद्यां प्रशंसन्ति ॥", "अहोरात्रेषु ते लोकेषु सज्जन्ते" इत्यादिवाक्येषुभोगभूमिविवक्षया लोकशब्दस्य प्रयोगदर्शनात् अर्चिरादयः भोगभूमय एव भवितुमर्हन्ति । तथा च अर्चिरादिः, भोगभूमिः, लोकशब्दवाच्यत्वात्, पितृलोकवत् इति अनुमानप्रयोगः अत्र द्रष्टव्यः । ननु " अर्चिषो अहः अह्नः आपूर्यमाणपक्षम् " इति अर्चिरादिप्रतिपादके वाक्ये लोकशब्देन तेषां निर्देशो नास्ति खलु इति चेन्न " स एतं देवयानं पन्थानम् आपद्य अग्निलोकम् आगच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् " (कौ १-३)

संवत्सरः, आदित्यः, चन्द्रमाः, विद्युत् इति अष्टौ पदार्थाः । इति कौषीतक्युपनिषदि अर्चिरादीनां लोकशब्देन निर्देश्य- मानत्वात् । कथञ्चिदपि अर्चिरादयः आतिवाहिकाः भवितुं नार्हन्ति । तथा हि अर्चिरादीनाम् आतिवाहिकत्वं चेतनत्वे सत्येव सम्भवति । पूर्वपूर्वसीमावधिषु स्थित्वा स्वसीमाम् अतिक्रम्य सीमान्तरं ये प्रापयन्ति ते आतिवाहिकाः ।

अर्चिरादीनां ज्वलनादिषु अचेतनेषु निरूढवृत्त्या प्रयोगदर्शनात् अर्चिरादीनां अचेतनत्वनिश्चयात् न तेषाम् आतिवाहिकत्वसम्भवः ।

**अधिकरणस्य सिद्धान्तः**

एवं पूर्वपक्षे प्राप्ते अयमत्र सिद्धान्तः ; अर्चिरादयः आतिवाहिकाः एव भवितुमर्हन्ति इति । तथा हि "तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति" इति वाक्यात् आपाततः पुरुषोद्देशेन अमानवत्वं नेतृत्वम् इत्येतत् उभयं विधीयते इति प्रतीयते ।परन्तु तथा सति उभयविधाने वाक्यभेदः स्यात् अतः नेतृत्वस्य उद्देश्यकोटौ स्थापनं कृत्वा पुरुषनेतारम् उद्दिश्य अमानवत्वं विधीयते इति वक्तव्यम् । वाक्यभेदवारणाय एतादृशोद्देश्यविधेयभावे समर्थनीये पूर्वस्मिन् वाक्ये अर्चिरादिपदैः नेतारः मानवाः प्रकृताः, प्रकरणानुसारेण विद्युदनन्तरमपि मानवस्य नेतुः प्राप्तौ प्रकरणप्राप्तनेतृत्वानुवादेन अमानवत्वम् विधीयते इत्येव वक्तव्यम् इति तात्पर्यम् २ ।

२. ननु वाक्यभेदवारणार्थं अमानवत्वोद्देशेन नेतृत्वं विधातुं शक्यते खद्द , तथा च न अर्चिरादीनाम् आतिवाहिकत्वसिद्धिः इति चेन्न प्राप्तस्यैव उद्देश्यत्वम्, हेतौ पञ्चमीश्रवणात् प्रकरणानुसारेण गमनसाधनत्वावगमात् नेतृत्वप्राप्तिः उपपादयितुं शक्यते न तु अमानवत्वप्राप्तिः । तथा च नेतृत्वानुवादेन अमानवत्वं विधीयते इति स्वीकृत्यैव वाक्यभेदः परिहर्तव्यः ।

तथा च "अर्चिषोऽहः अह्नः आपूर्यमाणपक्षम्" इति पूर्वप्रकरणे अर्चिरादयः प्रतिपाद्यमानाः यदि नेतारः न स्युः तर्हि " तत्पुरुषोऽमानवः" इति वाक्ये वाक्यभेदः स्यात् , अतः अर्चिरादयः नेतारः इति भावः । यदि च " तत्पुरुषोऽमानवःस एनान् ब्रह्म गमयति " इति वाक्यस्य विद्युल्लोकपर्यन्तम् उपासकानां स्वयमेव गमनम् तदुत्तरं तु अमानवः पुरुषः उपासकान् नयन्ति इति विवक्षा भवेत् तर्हि " पुरुषः एनान् ब्रह्म गमयति " इत्येव वाक्यं स्यात् , अमानवः इति विशेषणं न स्यात् ।अमानवत्वविशेषणञ्च "पूर्वत्राऽपि पुरुषाः गमयितारः सन्ति किन्तु ते मानवाः विद्युल्लोकानन्तरं तु अमानवाः"इति द्योतयति ।

**प्रथमसूत्रार्थः**

तचा च इदं सूत्रम् - **आतिवाहिकास्तल्लिङ्गात्**इति । अर्चिरादयः आतिवाहिकाः मार्गनेतारः । कुतः ? तल्लिङ्गात् । 'चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति' (छा– ४-१५-५) इति अमानवत्व- विशेषणात् वैद्युतस्य इतरेषां मानवपुरुषत्वं गम्यते इति । लिङ्गमत्र नेतृत्वानुवादरूपम् सूत्रे विवक्षितम् ।ननु 'अर्चिः आरभ्य विद्युल्लोकप्राप्तिपर्यन्तं नेता कश्चन अस्मिन् वाक्ये न श्रूयते विद्युल्लोकात् ब्रह्मलोकं गन्तुं नेता कश्चन श्रूयते ।तथा च विद्युल्लोकपर्यन्तम् उपासकः स्वयमेव आगच्छति । ततः नेता अस्ति इत्येव वाक्यात् प्रतिपत्तव्यम् । अतः अनेन वाक्येन अर्चिरादीनां गमयितृत्वं न अवगम्यते' इति पूर्वपक्षं यः करोति तं प्रति तु पूर्वोक्तं समाधानं वक्तुं (अमानवत्वविशेषणस्य विधेयत्वान्यथानुपपत्त्या पूर्वेषाम् अर्चिरादीनां गमयितृत्वसिद्धिः) शक्यम् । यस्तु प्रमाणाभावादेव (गमयितृत्वबोधकशब्दाभावात्) अर्चिरादीनां गमयितृत्वं नास्तीति पूर्वपक्षयति तं प्रति नेदम् उपन्यासार्हम् । न च इदमेव वाक्यं पूर्वोक्तरीत्या प्रमाणम् (श्रुतार्थापत्तिद्वारा) इति वाच्यम् नेतृत्वस्य विधेयकोटिप्रवेशे खद्द अमानवत्वनेतृत्वोभयविधानप्रयुक्तविध्यावृत्तिलक्षणवाक्यभेदप्रसक्तौ तद्वारणाय नेतृत्वस्य उद्देश्यकोटौ स्थापनं कृत्वा वाक्यभेदः परिह्रियते पूर्वेषाम् अर्चिरादीनाम् च नेतृत्वं च साध्यते । तथा मास्तु अत्र विशिष्टविधिः अङ्गीक्रियताम् ।तथा च नेतृत्वस्याऽपि विधेयकोटौ निक्षेपे पूर्वप्राप्तिः नापेक्ष्यते इति नानेन वाक्येन अर्चिरादीनां नेतृत्वसिद्धिः , न हि विधेयस्य उद्देश्यवत् पूर्वप्राप्त्यपेक्षा । इदं सर्वं मनसि निधाय भाष्यकारः अवोचत् " ननु लिङ्गमात्रमगमकं न्यायाभावात् " इति । तथा च प्रथसूत्रप्रदर्शितलिङ्गस्य न्यायापेक्षायाम् द्वितीयं सूत्रं न्यायं वक्ति ।

**द्वितीयसूत्रार्थः**

अत्र इदं द्वितीयं सूत्रम् -**उभयव्यामोहात् तत्सिद्धेः** । उभयेषाम् – गान्तृणाम् (उपासकानाम्),अर्चिरादिपदमुख्यार्थानां च, व्यामोहात्– प्रज्ञा-राहित्यात् मार्गज्ञानाभावात् । तत्सिद्धिः – अर्चिरादिपदानां तन्मुख्यार्थाभि- मानिदेवतालक्षकतया आतिवाहिकपुरुषसिद्धिः । तथा हि नष्टस्थूलशरीरः सूक्ष्मशरीरवान् उत्क्रान्तिमान् ब्रह्मलोकप्रेप्सुः प्रज्ञारहितः उपासकः न स्वातन्त्र्येण गन्तुमर्हति ।

अतः ब्रह्मलोकं प्रति अयं केनचित् नेयः । श्रुतानि च अर्चिरादीनि मार्गचिह्नानि भोगभूमयो वा यदि स्युः तर्हि नैतेषां नेतृत्वं सम्भवति । तथा च धर्मिकल्पापेक्षया धर्ममात्रकल्पने लाघवात् श्रुतानाम् अर्चिरादीनां चैतन्यकल्पनमेव वरम् । यदि अर्चिरादयः भोगभूमयः मार्गचिह्नानि वा स्युः तर्हि उपासकानां गमनोपपत्यर्थम् अर्चिरादिव्यतिरिक्तः कश्चन चेतनः धर्मी कल्पनीयः स्यात्, तदपेक्षया अर्चिरादीनामेव चैतन्यरूपधर्मः कल्यताम् इत्याशयः । तथा च चैतन्यरुपधर्माश्रयस्य अर्चिरादेः "अर्चिषा" इति तृतीयया गमनसाधनत्वावगमात् आतिवाहिकत्वमपि सिद्धं भवति ।

किञ्च अर्चिरादीनाम् अनवस्थितत्वात् न मार्गलक्षणत्वम् । तथा हि अर्चिरादिवाक्ये अर्चि, अहः, शुक्लपक्षः, उत्तरायणम्, संवत्सरः, आदित्यः, चन्द्रमाः, विद्युत् इत्यष्टौ पदार्थाः निर्दिष्टाः सन्ति । एतेषां मध्ये अहःशुक्लपक्षोत्तरायणानां कालरूपाणां कालन्तरेषु मार्गचिह्नत्वं भोगभूमित्वञ्च न सम्भवति, तदा तेषाम् अभावात् । स्थिराणि हि मार्गचिह्नानि भवन्ति । रात्र्यादौ मृतस्य लोकान्तरगमने प्रतीक्षा नास्तीत्युक्तम् अधिकरणान्तरे ।

ननु एवमपि आतिवाहिकेषु अर्चिरादिशब्दप्रयोगः कथम् उपपद्यते इति चेन्नआतिवाहिकानां अर्चिराद्यभिमानात् तेषु अर्चिरादिशब्दप्रयोगः उपपद्यते ।

यदुक्तम् "अमुं गिरिं गच्छ ततो न्यग्रोधम् ततो नदीं ततो ग्रामम् " इति लौकिकमार्गोपदेशरूपवाक्यसादृश्यात् अर्चिरादिवाक्यस्यापि मार्गचिह्नत्वमेव भवितुमर्हतीति तन्न देशान्तरप्रेप्सुं प्रति उपदिश्यमाने मार्गसाधनोपदेशपरे "गच्छ त्वमितो बलवर्माणं ततो जयसिहं ततः कृष्णगुप्तं" इति वाक्ये प्रतिपाद्यमानानाम् बलवर्मादीनां न मार्गचिह्नत्वं न वा भोगभूमित्वं किन्तु आतिवाहिकत्वमेव । तथा च अर्चिरादिवाक्यम्, मार्गप्रतिपादकम्, देशान्तरप्रेप्सुं प्रति गमनसाधनोपदेशरूपत्वात् लौकिकमार्गोपदेश-वाक्यवत् इत्यस्य "गच्छ त्वमितो बलवर्माणं ततो जयसिहं ततः कृष्णगुप्तं" इति वाक्ये व्यभिचारः बोध्यः ।

ननु एवमपि लोकशब्दः कथम् आतिवाहिकेषु उपपद्यते इति चेत् यद्यपि ब्रह्मलोकं प्रयतः उपासकस्य , तदातिवाहिकस्य वा भोगभूमिः नास्ति तथापि अन्येषां तल्लोकवासिनाम् भोगभूमित्वात् लोकशब्दप्रयोगः उपपद्यते । तथा च अग्निस्वामिकं लोकम् प्राप्तः अग्निना अतिवाह्यते वायुस्वामिकं लोकं प्राप्तः वायुना इत्यर्थः पर्यवस्यति । किञ्च चिह्नत्वनेतृत्वसंशयस्य प्रकृते वाक्यशेषः निवारकः भवति । तथा हि उपक्रमे "तेऽर्चिषमभिसम्भवन्ति"(छा–४,१५,५) इति सम्बन्धसमान्यम् उक्तम् । उपसंहारे तु "स एनान् ब्रह्म गमयति" (छा–४,१५,६) इति सम्बन्धविशेषः अतिवाह्यातिवाहकत्वलक्षणः उक्तः इति "सामान्यवचने शब्दे विशेषापेक्षिणि दृष्टे विशेषशब्देन तत्सामान्यं नियन्तव्यम् इति न्यायात् अयमेव सम्बन्धः उपक्रमे अपि विवक्षितः इति निर्धार्यते । तथा च उपासकस्य अर्चिरादेश्च मिथः आतिवाह्यातिवाहिकत्वलक्षणः सम्बन्धः विवक्षितः इति ज्ञायते । तदुक्तं भामतीनिबन्धे "सामान्यवचने शब्दे विशेषाकाङ्क्षिणि स्फुटम् । यद्विशेषपदं तेन तत्सामान्यं नियम्यते । यथा ब्राह्मणमानय भोजयितव्यः इति तद्विशेषापेक्षायां यदा तत्सन्निधौ उपनिपतति पदं कठादि, तदा तेनैतद् नियम्यते ।" इति

## तृतीयसूत्रार्थः

ननु चन्द्रलोकोत्तरं विद्युतलोकः वरुणलोकः इन्द्रलोकः प्रजापतिलोकश्च आगच्छति ब्रलोकप्राप्तेः प्राक् । "तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति" इत्यनेन च विद्युल्लोकमारभ्य ब्रह्मलोकपर्यन्तम् अमानवः पुरुषः उपासकस्य गमयिता इति ज्ञायते । अतः कथम् वरुणादीनाम् आतिवाहिकत्वम् इति आकाङ्क्षायाम् तृतीयं सूत्रम् अवतरति – **वैद्युतेनैव ततस्तच्छ्रुतेः**इति । वैद्युतेनैव - विद्युल्लोकमागतः अमानवः पुरुषः वैद्युतः, तेन । ततः – विद्युदभिसम्भवनात् ऊर्ध्वम् । तच्छ्रुतेः – तस्यैव स्वयं वोढृत्वश्रुतेः ।

**सङ्गतिः**

प्रवाधिकरणे अर्चिरादीनां क्रमे निर्णीते उपेक्षानर्हस्य स्वरूपस्य स्मृतत्वात् पूर्वाधिकरणेन अस्य अधिकरणस्य प्रसङ्गसङ्गतिः वर्तते । ब्रह्मलोकरूपफलसम्बन्धिनः विचारस्य अस्मिन् अधिकरणे क्रियमाणत्वात् अस्य अधिकरणस्य अध्यायसङ्गतिः वर्तते एव । अर्चिरादिमार्गसम्बन्धिनः विचारस्य क्रियमाणत्वात् अस्य अधिकरणस्य पादसङ्गतिरपि वर्तते ।

**निगमनम्**

अत्रेदं न्यायसङ्ग्रहवचनम् ; 'निर्देशसारूप्यात् लोकशब्दश्रवणाच्च मार्गचिह्नत्वे भोगभूमित्वे वा प्राप्ते चेतनस्य स्वप्रयत्नरहितस्य ऊर्ध्वगमनं चेतनान्तराधीनमिति लौकिकन्यायेन अहःशुक्लपक्षोत्तरायणानां कालान्तरेषु मार्गचिह्नत्वभोगभूमित्वासम्भवात् तदभिमानिदेवताभिः एभिः भवितव्यमिति न्यायेन च अनुगृहीतात् वैद्युतात् उपर्यमानवपुरुषोन्नयनलिङ्गात् मानवाः चेतनाः नेतारः अर्चिरादयः इत्युक्तम् ।' तथा च अर्चिरादयः मार्गनेतारः इति सिद्धम् ।

**सन्दर्भग्रन्थाः**

१. ब्रह्मसूत्रशाङ्करभाष्यम् रत्नप्रभासमन्वितम् - द्वितीयः भागः, काशी संस्कृत ग्रन्थमाला - ७१, चौखम्बा संस्कृत संस्थान, वाराणसी, २००४

२. भामतीकल्पतरुपरिमलैः उपबृंहितम् ब्रह्मसूत्रशाङ्करभाष्यम्, निर्णयसागर मुद्रणालयः, मुम्बै, १९३८

३. Brahmasūtraśāṅkarabhāṣyam with commentary brahma vidyā bharaṇam, TheSamskrite Ducatio Society, Mylapore, Madras,1979

४. प्रकटार्थविवरण-भाष्यभावप्रकाशिका-न्यायनिर्णय-शारीरकन्यायसङ्ग्रहैः समन्वितं शारीरकमीमांसाभाष्यम्, अद्वैतग्रन्थरत्नमञ्जूषा ४७-रत्नम्, श्रीदक्षिणामूर्तिमठ प्रकाशनम्, वाराणसी, २००२

५. छान्दोग्योपनिषद्भाष्यम्, अद्वैतग्रन्थरत्नमञ्जुषा २४-रत्नम्,महेश-अनुसनधान-संस्थानम्, वाराणसी,२००५

***********

---

१. अर्चिरादीनि- अर्चिः, अहः, आपूर्यमाणपक्षः, षडुदङ्मासाः (उत्तरायणम्)

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# पञ्चतन्त्रान्तर्गते अपरीक्षितकारके वैद्येभ्यः प्रस्तुताः नीतयः

## (MORALS CONVEYED TO DOCTORS IN *APARIKSHITAKARAKA* OF *PANCHATANTRA)*

**Dr. Prashanta Gaonkar**
Associate Professor
K. L. E. Sri B. M. K. Ayurveda College
Belagavi-590003, Karnataka
Contact No. : 9449623988
E-mail : prashantpsir@gmail.com

विष्णुशर्मणा विरचितं पञ्चतन्त्रं जगत्प्रसिद्धं कथासाहित्यम् । पञ्च तन्त्रस्य रचनायाः हेतुभूता कथा एवं श्रूयते यत् दाक्षिणात्ये देशे महिलारोप्यम् इति नाम्नि कस्मिंश्चित् नगरे अमरकीर्तिः नाम राजा निवसति स्म । तस्य चत्वारः पुत्राः आसन् । सर्वेऽपि ते लोकज्ञानशून्याः मूर्खाश्चासन् । चिन्ताग्रस्तः स राजा स्वपुत्रान् नीतिकुशलान् कारयितुं विष्णुशर्मणमाहूय तस्य हस्ते स्वपुत्रान् समार्पयत् । विष्णुशर्मा अपि पुनरेतान् तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि ततः स्वनामत्यागं करोमीति प्रतिज्ञाय राजपुत्रान् तान् स्वीकृत्य आश्रमं प्राप्य तान् बहुप्रकारैः रोचकप्रसङ्गैः कथाभिश्च नीतिशास्त्रविशारदान् अकरोत् ।

अस्मिन् पञ्चतन्त्रे पञ्च विशेषान् अधिकृत्य कथाः अवान्तरकथाश्च भवन्ति । तद्यथा-

* मित्रभेदः
* मित्रसम्प्राप्तिः
* काकोलुकीयम्
* लब्धप्रणाशः
* अपरीक्षितकारकम्

पञ्चतन्त्रे सर्वास्वपि कथासु नीतिवचनानि, सूक्तयः, धर्मसूक्ष्माः, लोकज्ञानम्, चमत्काराः इत्यादिसार्वजनीनाः सार्वकालिकाः अंशाः समायान्ति । सर्वास्वपि कथासु जन्तवः, पशवः तत्र तत्र मनुष्याश्च पात्र- धारिणो भवन्ति । अत्र कथाभागः गद्ये सूक्तिभागश्च पद्येषु दृश्यते । एतदेवास्य पञ्चतन्त्रस्य वैशिष्ट्यम् । पञ्चसु तन्त्रेषु अपरीक्षितकारकम् अन्तिमं तन्त्रम् । अस्य तन्त्रस्य मुख्योद्देशः सर्वमपि कार्यं सम्यक् परीक्ष्य विश्लेष्य च कर्तव्यम् इति ।

वास्तविकरूपेण वैद्यकीयक्षेत्रं नाम अवलोकनेन प्रश्नेन तर्केण अनुभवेन ज्येष्ठानां गुरूणाम् अनुभविनां च सूचनया च कार्यसम्पादन- क्षेत्रमिति आचार्यचरकः अभिप्रैति । एतस्मिन् क्षेत्रे वैद्यः सच्चारित्रवान् भवेदेव । वैद्येन क्रियमाणा चिकित्सा केवलं स्वहिताय जीवननिर्वहणाय वा नैव भवेत् । सा चिकित्सा मानवकुलस्य हिताय भवेत् । यः वैद्यः अविचार्य वैद्यविज्ञानं वस्तु इव विक्रयणव्यवहारेण धनमर्जयति सः जीवनस्वर्णखनौ सुवर्णं विहाय शिलाखण्डान् मृत्तिकामात्रं वा प्राप्स्यति ।

वैद्येन तादृशमादर्शमयं वृत्तिजीवनं यापनीयं येन सर्वे मनुकुलजीविनः सौख्यं हितमयं चायुषं प्राप्नुयुः । तदर्थं वैद्यकीयक्षेत्रे प्रधानः वैद्यः अनुभविनां ज्येष्ठानां जीवनानुपालकः धर्ममार्गानुसरी परोपकारबुद्धिः च स्यात् । तदर्थं च नीतीनामनुपालनं वैद्येन विहितव्य- मेव । नीतयश्च हितोपदेशे सुभाषितेषु पञ्चतन्त्रेषु च भूरिशः उपलभ्यन्ते । तत्र पञ्चतन्त्रे कथानिरूपणपुरःसराणि नैकानि नीतिगर्भितानि अपरीक्षितकारके मन्थरकौलिककथायां कौलिकः मित्रस्य वचनमश्रुत्वा स्वप्रज्ञां च विहाय मन्थरसकाशात् बाहुद्वयं शिरसमेकं चातिरिक्तं सम्प्रार्थ्य जनैः लगुडादिभिः ताडितः निधनं गतः । तदुक्तं कथायाः नीतौ-

**यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः । स एव निधनं याति यथा मन्थरकौलिकः** ॥[1] इति ।

अतः स्वप्रज्ञा आदौ भवेत् । रोगीपरीक्षायां निदानसम्प्राप्त्यादिकं ज्ञातुं चिकित्साप्रदानाय च वैद्येषु स्वयं प्रज्ञा भवेदेव । तदभावे मित्राणामाप्तानां वा वचनानि श्रुणुयात् । न चेत् यथा कथायां कौलिकः दुरवस्थां प्राप तद्वदेव वैद्यस्य स्थितिः स्यात् । एवं स्वयं प्रज्ञायाः मित्राणां वचनानां च वैशिष्ट्यमावश्यकतां च कथेयं वक्ति ।

पञ्चतन्त्रे अपरीक्षितकारके सोमशर्मपितृकथायां स्वभावकृपणो ब्राह्मणः असम्भाव्यां चिन्तां विधाय भिक्षार्जितस्य सक्तुचूर्णस्य नष्टे कारणोऽभवत् । अनागतवत्या चिन्तया वर्तमानमपि विनष्टं भविष्यतीति कथेयं प्रतिपादयति । तदुक्तं नीतिश्लोके –

अनागतवतीं चिन्तामसम्भाव्यां करोति यः । स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥[2] इति ।

वैद्यः अपि सम्प्रतिविद्यमानलक्षणयैव रोगिणः समुपाचरेत् । अनागतवतीमसम्भाव्यां च अवस्थां परिकल्प्य वैद्यस्य प्रवृत्तिः न स्यादिति सोमशर्मपितृकथा निर्दिशति ।

पञ्चतन्त्रे अपरीक्षितकारके चन्द्रभूपतिकथायां भूपतिः लोभेन वानरसमूहनाशे कारणो भूत्वा वृद्धवानरद्वेषात् स्वपरिजनं कष्टे मृत्युकूपपातने च कारणोऽभवत् । स राजा चन्द्रभूपतिः विडम्बनां चाप्नोत् । सुभाषितानि प्रोक्तानि । सर्वमपि सङ्कलय्य एकत्रीकुर्मश्चेत् सुभाषितसारसागर एव भवेत् । अतस्तत्र पञ्चतन्त्रेषु अपरीक्षितकारकतन्त्रे वैद्यानां कृते प्रोच्यमानाः नीतयः अत्र सङ्क्षेपेण प्रतिपाद्यन्ते । पञ्चतन्त्रान्तर्गते अपरीक्षितकारके प्रथमा कथा नापितकथा अथवा क्षपणककथा इति । तत्र कथायां नापितः मणिभद्रनामकस्य श्रेष्ठिनः गृहे प्रवृत्तं क्षपणकस्य स्वर्णमयराशिरूपेण परिवर्तनं परीक्षां विना मणिभद्रवदाचचार । मणिभद्रस्य स्वप्नवृत्तिवृत्तान्तादिकं परिपूर्णतया अज्ञात्वैव क्षपणकान् दण्डेन ताडयितुमुद्युक्तोऽभवत् । तेन कारणेन राज्ञा दण्डमपि प्रदत्तम् । एवमपरिपूर्णं ज्ञात्वा प्रवृत्ते सति दण्ड एवोपभोक्तव्यः इतीयं कथा अपूर्णज्ञानस्य अवस्थामुक्त्वा सम्पूर्णं ज्ञात्वैव प्रवर्तितव्यमिति नीतिं प्रतिपादयति । तद्यथा तच्छ्लोके -

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् । तन्नरेण न कर्तव्यं नापितेनात्र यत्कृतम् ॥[3] इति ।

वैद्येन सम्पूर्णं ज्ञात्वैव चिकित्सा देया । रोगिणः अवस्था, तस्य दिनचर्या, आहार-विहारादिकं पृष्ट्वा ज्ञात्वा पुनश्च रोगस्य स्थितिः, निदानम्, कीयत्कालाद् बाधते इत्यादिकं ज्ञात्वैव अनन्तरं चिकित्सार्थं प्रवर्तेत । अन्यथा यथा नापितः दण्डार्होऽभूत् सा स्थितिः वैद्यस्यापि स्यादिति कथा बोधयति । कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितं वैद्येनापि न कर्तव्यम् । सुदृष्टं सुपरिज्ञातं सुश्रुतं सुपरीक्षितमेव आचरेदिति नीतिं कथेयं बोधयति ।

पञ्चतन्त्रान्तर्गते अपरीक्षितकारके द्वितीया कथा ब्राह्मणीनकुलकथा इति । अत्र कथायां नकुलस्य रक्ताञ्चितं मुखं दृष्ट्वा ब्राह्मणी अयथात्वं परिकल्प्य नकुलः मत्पुत्रममारयदिति मत्वा जलपूर्णघटं नकुलस्योपरि पातयित्वा बालरक्षकं नकुलं मारितवती । पश्चात्दृष्टे नकुलः ब्राह्मण्याः पुत्रं सर्पेण रक्षितवान् न तु मारितवान् । नकुलस्य मुखे सर्पस्य रक्तमेवासीत् न तु बालस्य । इदं पश्चाज्ज्ञात्वा ब्राह्मणी स्वकृतापराधेन पश्चात्तापेन चारुदत् । अपरीक्ष्य प्रवृत्तेन कार्येण निरपराधिनं नकुलं स्वहस्तादेव मारयित्वा सन्तापं प्राप ब्राह्मणी । तदुक्तं कथासम्बद्धे नीतिश्लोके -

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम् । पश्चाद्भवति सन्तापो ब्राह्मण्या नकुले यथा ॥[4] इति ।

कथायामस्यां ब्राह्मण्या अविचार्य प्रवृत्ते एव सा ब्राह्मणी सन्तापमलभत । वैद्येन अपि स्वीये कार्ये सम्यक् परीक्ष्यैव प्रवर्तितव्यम् ।

---

1. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 295
2. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 304
3. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 306
4. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 317

दर्शनस्पर्शनप्रश्नैः इत्युक्तरीत्या वैद्यः सम्यक्तया रोगिणं परीक्ष्यैव तस्य दोषधातुमलक्रियादिकं ज्ञात्वैव चिकित्सा देया । अन्यथा ब्राह्मणी यथा सन्तापमलभत तथैव वैद्योऽपि चकित्सायां निष्फलो भूत्वा सन्तापं प्राप्नुयात् । एवं कथेयं नीतिद्वारा सम्यक् परीक्ष्यैव प्रवर्तितव्यमिति वैद्याय बोधयति । पञ्चतन्त्रान्तर्गते अपरीक्षितकारके तृतीया कथा लोभाविष्टचक्रधरकथा इति । कथायामस्यां लोभी पुरुषः मित्रेण स्वर्णप्राप्तिना उक्ते सत्यपि वज्रप्राप्त्याशया अग्रे सम्प्रवृत्तः । बहुदूरं बहुकालं च अटिते अन्ते मस्तके चक्रभ्रमणमेव सम्प्राप ।अतः अतिलोभः न कर्तव्यः इति कथायाः नीतिः । तदुक्तं कथायाः नीतिबोधके सुभाषिते -

अतिलोभो न कर्तव्यः लोभं नैव परित्यजेत् । अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके ॥[5] इति ।

वैद्यस्यापि अतिलोभो न भवेत् । यथा चरकमहर्षिः वदति वैद्यः स्वकीयलाभाय न वैद्यवृत्तिं समाचरेदिति । यतः सर्वभूतानामनुकम्पया एव महर्षिभिः आयुर्वेदः प्रकाशितः । अतः यावदपेक्षितं तावदेव वैद्यः धनादिकं स्वीकुर्यात् । अतिलोभेन कदाचित् मस्तके चक्रभ्रमणमिव जीवने क्लेशः एव समापतति । अतः अतिलोभः वैद्येन न कर्तव्य इति कथा प्रतिबोधयति ।

पञ्चतन्त्रान्तर्गते अपरीक्षितकारके चतुर्थ्यां सिंहकारकमूर्खब्राह्मण कथायां बुद्धिमन्तः मृतं सिंहं जीवयित्वा तन्मुखे एव पतिताः । मन्दबुद्धिः अपि सामान्यज्ञानवान् वृक्षमारुह्य स्वप्राणानरक्षत् । तदेवोच्यते कथायाः नीतिश्लोके -

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा । बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥[6] इति ।

यथा अत्र सामान्यज्ञानवान् एव व्याघ्रात् सुरक्षितो भवति तद्वत् सामान्यज्ञानवानेव वैद्यः तत्क्षेत्रे तिष्ठति । युक्तिव्यपाश्रयचिकित्सासु वैद्यस्य सामान्यज्ञानमेव सहकरोति न तु पुस्तकस्य अध्ययनस्य वा ज्ञानम् । सामान्यज्ञानस्य वैशिष्ट्यमत्र कथायाः नीतौ प्रथितमस्ति ।

अपरीक्षितकारके पञ्चमी कथा मूर्खपण्डितकथा । तत्र पण्डिताः सुभाषितानामक्षरज्ञानमात्रमवाप्य यथाज्ञानं विहाय लोके हास्यतां गताः । तदुक्तं कथायाः नीतिश्लोके –

अपि शास्त्रेषु कुशलाः लोकाचारविवर्जिताः । सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ॥[7] इति ।

एवं वैद्यः अपि केवलं पुस्तकज्ञानेन उत्तमः न भवति । गाढं गूढं च ज्ञानं तस्मिन् भवेदेवेति मूर्खपण्डितकथाया नीतिः उद्बोधयति । तदिदानीं औपदेशिकेन रथघोषेण आतिदेशिकस्य बाधः अवश्यं भवति । तदत्र रथः द्रव्यत्वसामान्यात् दर्भयोः निवर्तकः । घोषश्च शब्दत्वसामान्यात् मन्त्रस्य निवर्तकः । अथवा रथस्य घोषः इति तत्पुरुषसमासमङ्गीकृत्य रथघोष एव दर्भमन्त्रयोः निवर्तकः इति चिन्तायाम् – यदि रथघोषः इत्यत्र रथस्य घोषः इति षष्ठी तत्पुरुषः अङ्गीक्रियते । तर्हि तत्पुरुषे पूर्वपदे लक्षणापत्तेः रथश्च घोषश्च रथघोषौ इति द्वन्द्व एवायम् । तत्रापि इतरेतरयोगद्वन्द्वाश्रयणे रथश्च घोषश्च रथघोषौ इति द्विवचनापत्तेः रथघोष इति एकवचनानुरोधेन समाहारद्वन्द्व एव स्वीकर्तव्यः । न च बहुव्रीहौ यथा अन्यपदार्थे लक्षणा तथा समाहारद्वन्द्वेऽपि पदद्वये लक्षणा स्यादित्यतः तदपेक्षया पूर्वपदमात्रे लक्षणां स्वीकृत्य तत्पुरुषाङ्गीकरणमेव वरमिति वाच्यम् । समाहारद्वन्द्वेऽपि पदद्वये लक्षणा न स्वीक्रियते । पाणिपादं वादय इत्यत्र पाणी च पादौ च पाणिपादम् इत्यत्र समाहारः इति कश्चित् न प्रतीयते । यदि समाहारः प्रतीयेत तर्हि पाणिपादयोः समाहारविशेषणत्वेन वादनकर्मत्वा-नुपपत्तिः स्यात् । अतः एकविध एव द्वन्द्वः । तत्र "सर्वो द्वन्द्वं विभाषाया एकवद्भवति" इति वचनेन एकवचनं वैकल्पिकम् । एवञ्च एकवचनान्तद्वन्द्वे "समाहारद्वन्द्वः" इति संज्ञाकरणमपि पारिभाषिकमेव । तथा च द्वन्द्वे कस्यापि लक्षणीयत्वाभवात् तत्पुरुषे च पूर्वपदे सम्बन्धिनी लक्षणा इत्यतः तत्पुरुषापेक्षया रथघोषः इत्यत्र द्वन्द्वाश्रयणमेव उचितम् ।

---

5. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 319
6. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 335
7. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 342

यदि परम् एकवचनस्य द्वित्वादौ लक्षणा इत्युच्येत लक्षणायाः जघन्यैकवचननिष्ठत्वात् पाशाधिकरणन्यायेन अदोष- त्वात् तत्पुरुषापेक्षया द्वन्द्वस्य प्रबलत्वमेव । पाशाधिकरणे "अदितिः पाशान् प्रमुमोक्त्वेतान्" इत्यत्र प्रत्ययनिष्ठ बहुवचनानुरोधेन अस्य बहुपाशकयागे उत्कर्षः न कृतः । बहुवचनस्य एकवचने लक्षणा इत्युक्तम् ।

तदुक्तं नीतिश्लोके –

यो लौल्यात् कुरुते कर्म नैवोदर्कमवेक्षते । विडम्बनामवाप्नोति यथासौ चन्द्रभूपतिः ॥[8] इति ।

एवं रीत्या वैद्यः अपि लौल्यात् किमपि कर्म न कुर्यात् । क्लेशेऽपि विचिन्त्य निर्णयस्वीकारे सर्वमपि कार्यं समीचीनं भवतीति चन्द्रभूपतिकथा सूचयति ।

अत्र पञ्चतन्त्रे अपरीक्षितकारके राक्षसगृहीतब्राह्मणकथायां चण्डकर्मानाम राक्षसः यदा ब्राह्मणमगृह्णात् तदा प्रश्नैरेव ब्राह्मणः स्वयं रक्षणमाप राक्षसात् । अतः पृच्छकेन सदा भाव्यमिति कथायाः नीतिः उद्घोषयति यथा -

पृच्छकेन सदा भाव्यं पुरुषेण विजानता । राक्षसेन्द्रगृहीतोऽपि प्रश्नान्मुक्तो द्विजः पुरा ॥[9] इति ।

चिकित्साक्षेत्रे रोगिणः परीक्षायां प्रश्नस्यापि महत्त्वं बहु विद्यते । यतः प्रश्नेनैव वैद्यः रोगिणः अवस्थां रोगस्य स्थितिं च ज्ञातुं पारयति । अतः कथेयं वैद्येन पृच्छकेन भाव्यमिति सूचयति ।

इत्येवं विष्णुशर्मविरचिते पञ्चतन्त्रे सर्वाण्यपि तन्त्राणि न केवलं वैद्येभ्यः अपि तु सर्वेभ्यः मानवेभ्यः आदर्शमयजीवनाय वृत्तये च मार्गदर्शकानि सन्ति । अत्र केवलमपरीक्षितकारकं नाम पञ्चमे तन्त्रे कथासु उक्ताः नीतयः प्रदर्शिताः । तत्रापि वैद्यकीयक्षेत्रे वैद्येभ्यः कथं नीतिदर्शिकाः भवन्तीति क्वचित्प्रतिपादितम् । केवलमपरीक्षितकारके एव एतादृश्यः नीतयः सहकुर्वन्ति । सम्पूर्णं पञ्चतन्त्रं तु वैद्येभ्यः स्वक्षेत्रे आदर्शवृत्तिसमुपादानाय निश्चप्रचं सहकरोति ।

**References :**

1. Dr. Rama SundarRao, Sanskrit for BAMS, 1st edition, Viajayavada, 2005

2. Panchatantra of Vishnusharma, Translated by G.L. Chandiramani,
1st edition 1991, Rupa Publications, Newdelhi

3. पञ्चतन्त्रकथासङ्ग्रहः Stories from PANCHATANTRA Sanskrit Text and English translation, Published by http://sanskritebooks.wordpress.com

********

---

8. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 344

9. Dr. M.Rama Sundar Rao, Sanskrit for BAMS 1st edition, page no. 294

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# रथघोषाधिकरणम्

**Jagadisha S. M.**
Research Scholar
National Sanskrit University
Rajiv Gandhi Campus
Mense, Shringeri-577139
Chikkamagaluru, Karnataka
Mobile : 9964455184
E-mail : nanujagadish.sharma@gmail.com

द्वादशाध्यायात्मकपूर्वमीमांसायां दशमाध्याये चतुर्थपादे द्वितीयाधिकरणे "रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति" इति विषयवाक्यमधिकृत्य बाधोपयोगितया विचारः प्रवृत्तः । इदं रथघोषाधिकरणं वर्णकद्वयेन रचितं खण्डदेवाचार्यैः । प्रथमवर्णके तावत् "शरमयं बर्हिर्भवति" इत्यत्र प्रकृतिप्राप्त वेद्यास्तरणसाधनीभूतकुशानां प्रत्याम्नानात् बाधः इति निरूपितम् । द्वितीय वर्णके रथघोषस्य प्राकृत उपकरणसाधनबाधाबाधचिन्ता प्रवृत्ता ।

वाजपेययागे "रथगोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति" इति श्रुतम् । अनेन वाक्येन अतिदेशप्रवृत्तेः पूर्वमेव रथघोषकरणकमुपाकरणमेव माहेन्द्रो- द्देशेन विधीयते । उपाकरणं नाम आज्ञादानम् । माहेन्द्रः स्तोत्रमपि भवति यागोऽपि भवति । प्रकृतौ उपाकरणं स्तोत्रद्वारकमित्यतः क्लृप्तत्वात् अन्यद्वारकत्वप्रसङ्गः नास्ति । माहेन्द्रोद्देशेन रथघोषकरणकौपाकरण विधाने विशिष्टोद्देशप्रयुक्तवाक्यभेदः स्यात् । अथवा पदत्रयेण माहेन्द्रस्तोत्रापूर्वसाधनीभूतोपाकरणानुवादेन रथघोषमात्रविधिः इति । प्रकृतौ आज्ञादानाख्ये उपाकरणे दर्भौ, उपावर्तध्वम् इति मन्त्रश्च साधनम् । तद्वत् एकवचनस्य द्वित्वादौ लक्षणाङ्गीकारेऽपि तस्याः जघन्ये एकवचननिष्ठत्वात् न दोषः । तत्पुरुषे तु प्रकृत्यर्थे एव लक्षणा इत्यतः तदपेक्षया द्वन्द्वस्य प्राबल्यम् ।

ननु माहेन्द्रस्तोत्रापूर्वसाधनीभूतोपाकरणानुवादेन रथस्य घोषस्य च विधाने उभयविधानप्रयुक्तवाक्यभेदः इति चेन्न । द्वन्द्वेन परस्परसहितयोरेव करणत्वविधानात् । न च तथापि इतरेतरयोगद्वन्द्वे साहित्यबोधनाय पदद्वयस्य साहित्यांशे लक्षणायाः आवश्यकत्वात् कथम् इतरेतरयोगद्वन्द्वस्वीकारः इति वाच्यम् । साहित्यस्य धवखदिरौ इत्यत्र यथा संसर्गविधया बोधः सम्भवति तथा साहित्यस्य बोधः भवतीत्यतः साहित्ये पदद्वयस्य लक्षणा नास्ति । धवखदिरौ छिन्दी इत्यत्र धवस्य स्वसहितखदिरवृत्तित्वसंसर्गेण कर्मत्वे अन्वयः । खदिरस्यापि स्वसहितधववृत्तित्वसंसर्गेण कर्मत्वे अन्वयः । तथा च धवखदिरयोः स्वसहितान्यवृत्तित्वसंसर्गेण कर्मत्वे अन्वयात् क्व लक्षणा । अतः रथघोषम् इत्यत्र इतरेतरयोगद्वन्द्व एव । तथा च रथः द्रव्यत्वसामान्यात् दर्भयोः निवर्तकः , घोषः शब्दत्वसामान्यात् मन्त्रस्य निवर्तकः इति सिद्धम् । पूर्वपक्षे न रथस्यैव घोषः इति प्रयोजनम् ।

ननु द्वन्द्वसमासस्वीकारात् रथघोषयोः परस्परसाहित्यावगमात् अरुणैकहायनीन्यायेन परस्परनियमात् रथस्यैव घोषः किं न स्यात् इति चेन्न । यादृशोपपदद्वयसमभिव्याहारे आगोपालाङ्गनं तदर्थयोः यादृश अन्वयः अवगम्यते । तादृशस्यैव तदर्थयोरन्यान्वयव्युत्पत्तौ पार्ष्टिकबोधविषयत्वम् । "अरुणया पिङ्गाक्ष्या एकहायिन्या सोमं क्रीणाति" इत्यत्र परिच्छेद्यपरिच्छेदकभावः पार्ष्ठेकबोधविषयः । आरुण्यादीनां द्रव्यपरिच्छेद- द्वारा क्रयभावनायाम् अन्वयः सम्भवति । अयं च पार्ष्टिकबोधः । अग्नये कृत्तिकाभ्यः इत्यादौ समुचय एव पार्ष्टिकबोधविषयः ।

पाणिपादं पश्य इत्यादौ परस्परसापेक्षेणैव एकरूपान्वयरूपस्य शाब्दबोधे एव भासमानत्वात् न कश्चित् पार्ष्टिकबोधविषयः ।

एवं निरूप्यनिरूपकभावापेक्षा । अतः न रथस्यैव घोषः । अपि तु यस्य कस्यचित् घोषः मन्त्रनिवर्तकः इति पूर्वपक्षसङ्क्षेपः । सिद्धान्तस्तु – नात्र इतरेतरयोगद्वन्द्वः । द्विवचनापत्तेः । अपि तु तत्पुरुषः एव स्वीकर्तव्यः । रथस्य घोषः रथघोषः इति । समाहार-द्वन्द्वोऽपि आश्रयितुं न शक्यते । समाहारः इति न कश्चित् विशेष्यतया भासते । अतः समाहारद्वन्द्वस्वीकारे प्रमाणं नास्ति । सर्वो द्वन्द्वः विभाषया एकवद्भवति इति वचनेन इतरेतरयोगद्वन्द्वे विकल्पेन एकवचनं विधीयते इत्यतः एकविध एव द्वन्द्वः इति चेन्न । “द्वन्द्वैकवद्भावो न पठितव्यो भवति समाहारैकत्वादेव तत्सिद्धेः” महाभाष्यानुसारात् समाहारः अस्तीति अवगम्यते । तथा च एकवचनान्तद्वन्द्वे समाहारद्वन्द्वः इति परिभाषाकरणमपि सिध्यति । समाहारद्वन्द्वे सिद्धे अनुशासनबलात् पदद्वये समाहारार्थे लक्षणा भवति । अतः एकत्रलक्षाणापादकतत्पुरुष एव ज्याय्यः इति । तथा च रथस्य घोषः रथघोषः इति तत्पुरुषस्वीकारात् घोषः रथस्यैव इति । तथा च रथघोषः दर्भमन्त्रयोः निवर्तकः इति ।

******

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# गृहप्रवेशमुहूर्तविचारः

**Viveksheel Pathak**
Research Scholar
National Sanskrit University, Jaipur Campus
Near Gopal Pura By Pass
Triveni Nagar-302018
Jaipur, Rajasthan
Mobile : **8988049665**
E-mail : kaushikviveksheel25191@gmail.com

**भूमिका –**

यदि मानवः स्वकीयगृहस्य निर्माणं पूर्णतया कारयित्वा निवृत्तो भवति तत्पश्चात् नूतनगृहप्रवेशाय उत्सुको भवति । गृहारम्भार्थं यथा नियमाः मुहूर्ताश्च परिपाल्यन्ते तद्वत् गृहप्रवेशसमयेऽपि मुहूर्तादीनां परिपालनं परमावश्यकं भवति । यतोहि शुभमुहूर्तादिषु कृते गृहप्रवेशे गृहप्रवेशकर्ता तस्य च परिवारः सुखपूर्वकं चिरकालं यावत् स्थास्यति गृहमपि दीर्घायुं सम्प्राप्य सुदृढतया तिष्ठति । अतः सम्पूर्णानां वास्तुशास्त्रीयनियमानां सूक्ष्मतया अवलोकनं कृत्वा तेषां च विधिवत्परिपालनं विधायैव नूतनगृहे प्रवेशः कार्यः ।

अत्र सर्वादौ प्रवेशस्य लक्षणं किमिति विषये शास्त्राधारेण कथ्यते । तद्यथा – शास्त्रेषु प्रवेशः चतुर्विधः प्रोक्तः । अपूर्वप्रवेशः, सुपूर्व- प्रवेशः, द्वन्द्वाभयप्रवेशः, वधूप्रवेशश्चेति। वधूप्रवेशस्य विवाहान्तर्गतत्वात् अत्रोल्लेखः न क्रियते । अत्र तावत् त्रिविधः प्रवेशः कथ्यते, नवीनगृहे यः प्रवेशः स अपूर्वप्रवेशः, यात्रातः पुनरागमनकालिकः सुपूर्वप्रवेशः, अग्निकाण्डेन विद्युत्द्वारा च दग्धगृहे जीर्णोद्धारसमये शत्रुणा वा भयात् परं पुनः प्रवेशः द्वन्द्वसंज्ञकप्रवेश उच्यते । यथोक्तम् –

**अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने तु सुपूर्वसंज्ञः। द्वन्द्वाभयस्त्वग्निभयादिजातः प्रवेश एवं त्रिविधः प्रदिष्टः॥** [१]

अनेन प्रमाणेनात्र नवीनगृहप्रवेशे सुपूर्वप्रवेशः विधेयः । अतः सम्प्रति तस्य प्रवेशस्य कालशुद्धिः मुहूर्तचिन्तामणिग्रन्थादिषु सुष्ठुरूपेण निर्दिश्यते यथा – उत्तरायणे ज्येष्ठमाघफाल्गुनवैशाखैतेषु चतुर्षु मासेषु, द्वारदिशः नक्षत्रेषु अर्थात् मृदुसंज्ञकनक्षत्रेषु ध्रुवसंज्ञकनक्षत्रेषु च, प्रवेशकर्तुः जन्मराशितः जन्मलग्नतः वा उपचये (तृतीयषष्ठदशैकादशेषु) स्थिरलग्नेषु (2,5,8,11), उपलक्षणत्वात् द्विस्वभावलग्नेषु (3,6,9,12) च राज्ञः यात्रातः पुनरागत्य गृहप्रवेशः नवीनगृहप्रवेशश्च शुभप्रदः ज्ञेयः । यथोक्तम् –

**सौम्यायने ज्येष्ठतपोऽन्त्यमाधवे यात्रानिवृत्तौ नृपतेर्नवे गृहे। स्याद् वेशनं द्वास्थमृदुध्रुवोडुभिर्जन्मर्क्षलग्नोपचये स्थिरे ॥** [२]

अधुना कस्मिन् मासे गृहप्रवेशं कृत्वा कीदृशं फलं लभ्यते तद् परिभाष्यते – माघमासे नवीनगृहप्रवेशे धनलाभः प्राप्यते, फाल्गुनमासः धनसुतलाभप्रदायकः, चैत्रमासः अर्थस्य हानिं करोति, वैशाखमासे धनधान्यलाभः पशुपुत्राणाञ्चाभिवृद्धिर्जायते । ज्येष्ठमासे पशुपुत्रलाभः स्यात्, अन्येषु अवशिष्टेषु आषाढश्रावणभाद्रपदाश्वयुक्कार्तिकपौषमासेषु गृहप्रवेशः हानिकारकः शत्रुभीतिकरश्च विज्ञातव्यः । शुक्लपक्षे नितरामभिवृद्धिः सञ्जायते कृष्णपक्षस्य तथा च दशमीपर्यन्तमेव गृहप्रवेशः प्रशस्यते एवं मन्यते । यदुक्तम् –

**माघेऽर्थलाभः प्रथमप्रवेशे पुत्रार्थलाभः खलु फाल्गुने च। चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे पशुपुत्रलाभः ॥**
**ज्येष्ठे च मासेषु परेषु नूनं हानिप्रदः शत्रुभयप्रदश्च। शुक्ले च पक्षे सुतरां विवृध्यै कृष्णे च यावद्दशमीं च तावत् ॥** [३]

विशेषरूपेण नूतनभवनादिषु तु उत्तरायणे एव गृहप्रवेशः प्रकर्तव्यः किन्तु तृणादिकुटीरेषु कदापि प्रवेशं कर्तुं शक्यते । उक्तं यथा –

**गृहारम्भोदितैर्मासैर्धिष्ण्यैर्वारैर्विशेद् गृहम्। विशेषात्सौम्यायने हर्म्ये तृणागारे तु सर्वदा ॥** [४]

सम्प्रति पुनरुद्धारात् पश्चात् गृहे कदा प्रवेशः शुभफलदायकः भवेत् तद्विषये उच्यते । अग्निकाण्डात् दग्धः, अतिवृष्ट्या पतितः, राजकोपाद्वा

पातितः एतेषां पुनः जीर्णोद्धारादिकं कृत्वा मार्गशीर्ष- कार्तिकश्रावणमासेषु पूर्वोक्तवैशाखज्येष्ठमाघफाल्गुनैतेषु च सप्तमासेषु, शतभिषा-पुष्यस्वातीधनिष्ठानक्षत्रेषु प्रवेशः शुभप्रदः स्यात् । एवमेव एतादृशकार्येषु गुर्वस्तशुक्रास्तबाल्यवृद्धावस्थानां सिंहस्थगुरुमकरस्थगुरु-लुप्तसंवत्सराणाम् इत्यादीनां दोषाणां विचारः न कर्तव्यः । तथापि पञ्चाङ्गशुद्धिं कारयित्वा विहितनक्षत्रेषु एव प्रवेशः विधेयः । तदुक्तम् –

**जीर्णे गृहेऽग्न्यादिभयान्नवेऽपि मार्गोर्जयोः श्रावणिकेऽपि सत् स्यात्। वेशोऽम्बुपेज्यानिलवासवेषु नावश्यमस्तादिविचारणाऽत्र ॥** [५]

पुनश्च यन्नक्षत्रं पापग्रहेण आक्रान्तं यदा स्यात्तदा तु त्रिष्वेव प्रवेशेषु तत् निषिद्धं विजानीयात् यथोक्तम् – **'क्रूरग्रहाधिष्ठितविद्धभं विवर्जनीयं त्रिविधप्रवेशे'** । [६]

तदनन्तरं गृहप्रवेशदिनात्प्राक् करणीयवास्तुपूजायै नक्षत्राण्युच्यन्ते । गृहप्रवेशात् पूर्वं मृदुसंज्ञकेनक्षत्रेषु (मृगशिरा-रेवती-चित्रा-अनुराधा), ध्रुवसंज्ञकनक्षत्रेषु (उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी), क्षिप्रसंज्ञक नक्षत्रेषु (हस्त-अश्विनी-पुष्य), चरसंज्ञकनक्षत्रेषु (स्वाती-पुनर्वसु-श्रवणा-धनिष्ठा-शतभिषा), मूला चैतेषु सप्तदशनक्षत्रेषु वास्तुपूजनं भूतबलिदानञ्च कर्तव्यम् । उक्तं यथा –

**मृदुध्रुवक्षिप्रचरेषु मूलभे वास्त्वर्चनं भूतबलिं च कारयेत् ॥** [७]

गृहनिर्माणानन्तरं तस्मिन् गृहे सविधिना प्रवेशः क्रियते । यथा पूर्वमुक्तं त्रिप्रकारकप्रवेशः, यस्मिन् गृहप्रवेशसमये वास्तुपूजनं निश्चयेन कर्तव्यम् । यथोक्तम् –

**निर्माणे मन्दिराणां च प्रवेशे त्रिविधेऽपि वा। वास्तुपूजा प्रकर्त्तव्या यस्मात्तां कथयाम्यतः ॥** [८]

यः मानवः वास्तुपूजां विनैव नूतनवेश्मे प्रविशति सः नैकविधेभ्यः रोगेकलहक्लेशादिभ्यः सर्वदा ग्रस्तः तिष्ठति । अतः सुखा-रोग्यादिसौविध्यार्थं वास्तुपूजनम् अवश्यमेव करणीयम् । निर्दिष्टं शास्त्रेषु यथा –

**वास्तुपूजामकृत्वा यः प्रविशेन्नवमन्दिरे। रोगान्नानाविधान्क्लेशानश्नुते सर्वसङ्कटम् ॥** [९]

गृहप्रवेशाय पञ्चाङ्गशुद्धिं वराहमिहिरकृतयोगयात्राग्रन्थानुसारं कथं विधेयमिति प्रदर्श्यते । रेवती-धनिष्ठा-शतभिषा-रोहिणी-उत्तरा फाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदानक्षत्रेषु एतेषु सप्तसु, बलवच्चन्द्रे सति, शुभवासरेषु (सोम-बुध-गुरु-शुक्रेषु), रिक्तातिथिञ्च परित्यज्य अन्यासु तिथिषु गृहप्रवेशः शुभकरः निगदितः । यथोक्तम् –

**पौष्णे धनिष्ठास्वथ वारुणेषु स्वायम्भुवर्क्षेषु त्रिषूत्तरेषु। अक्षीणचन्द्रे शुभवासरे च तिथावरिक्ते च गृहप्रवेशः ॥** [१०]

**लग्नशुद्धिः तिथिशुद्धिः प्रवेशविधिश्च -**

यस्मात् स्थिरलग्नात् द्विस्वभावलग्नाद्वा केन्द्रस्थानेषु (1,4,7,10), त्रिकोणभावयोः (5,9), आयधनत्रिगभावेषु (11,2,3) च पूर्णचन्द्र बुधगुरुशुक्रसहिताः शुभग्रहाः संस्थिताः स्युः, अत्रापि चन्द्रलग्नराहित्यं स्यात् । त्रिषडायभावेषु पापग्रहाः उपविष्टाः भवेयुः, चतुर्थाष्टमस्थाने सर्वग्रहरहिते स्यातां तादृशे लग्ने गृहं प्रविशेत् । गृहस्वामिनः जन्मराशितः जन्मलग्नराशितः वा अष्टमराशिः प्रवेशलग्नं न स्यात् । रविभौमवासरौ, रिक्तातिथिम् (4,9,14), चरलग्नम् (1,4,7,10), अमावस्याम्, चैत्रमासं चैतान् परित्यज्य शुभवासर-तिथि-मास-स्थिर-द्विस्वभावलग्नेषु जलपूरित-पञ्चपल्लवान्वित(आम्र-वट-अश्वत्थ-उदुम्बर-पाकड)-दूर्वा-कुश-पञ्चरत्न-सर्वौषधियुक्त-स्थूलवर्तिका समन्वित- घृतपूरित- दीपकयुक्तकलशादिभिः सहितं सच्चरित्रं वेदपाठीब्राह्मणविदुषः अग्रे कारयित्वा मङ्गलगानं कृतवत्यः सौभाग्यवत्यः महिलाः गृहस्य बालादिसदस्यैः साकं शंख-घण्टादिभिः नादपूर्वकं गृहस्य वारमेकं परिक्रमां कृत्वा भकूटस्य शुद्धौ अत्र भकूटशुद्धं नाम भकूटं षष्ठाष्टकादिभिः शुद्धं यस्य च वर्णनं विवाहप्रकरणे वर्णो वश्य तथा तारा इत्यादिनापि शुद्धं भवेदिति ।[११] एवं सम्यक् विचार्य गृहप्रवेशकरणम् उत्तमं विहितमस्ति । उक्तं यथा –

**त्रिकोणकेन्द्रायधनत्रिगैः शुभैर्लग्ने त्रिषष्ठायगतैश्च पापकैः ।। शुद्धाम्बुरन्ध्रे विजनुर्भमृत्यौ व्यर्कारिक्ताचरदर्शचैत्रे ।**

**अग्रेऽम्बुपूर्णं कलशं द्विजांश्च कृत्वा विशेद् वेश्म भकूटशुद्धम् ॥**

एवं च शास्त्रमतानुसारं शकुनविचारोऽपि गृहप्रवेशसन्दर्भे ज्ञेयः भवति येन गृहप्रवेशः शुभदः स्यात् ।

**वामगतार्कज्ञानम् –**

यस्मिन् लग्ने प्रवेशः अभीष्टः तस्मादष्टमं यत्स्थानं तस्मात् अष्टमस्थानात् पञ्चसु (8,9,10,11,12) स्थानेषु रवौ स्थिते पूर्वाभिमुखगृहप्रवेशकर्तुः वामः सूर्यः भवेत्, दक्षिणाभिमुखगृहे प्रवेशः इष्यते तदा पञ्चमभावात् पञ्चसु (5,6,7,8,9) भावेषु, उत्तराभिमुखे भवने गृहप्रवेशाय द्वितीयस्थानात् पञ्चसु (2,3,4,5,6) स्थानेषु, पश्चिमाभिमुख- भवने गेहप्रवेशाय एकादशस्थानात् पञ्चसु (11,12,1,2,3) भावेषु यदि सूर्यः तिष्ठति तदा वामरविर्भवति । प्रवेशे वामरवेः सम्भवम् अत्यन्तं शुभप्रदं विजानीयात् ।

पूर्णातिथौ (5,10,15) पूर्वाभिमुखगृहे प्रवेशः लाभदायकस्स्यात्, नन्दातिथौ (1,6,11) दक्षिणाभिमुखभवने शुभः, पश्चिमाभिमुखगृहे भद्रा- तिथौ (2,7,12) प्रवेशः शुभप्रदः, उत्तराभिमुखे गृहे च जयातिथौ (3,8,13) प्रवेशः शुभदायकः प्रकीर्तितः । यथोक्तम् –

**वामो रविर्मृत्युसुतार्थलाभतोर्के पञ्चमे प्राग्वदनादिमन्दिरे। पूर्णातिथौ प्राग्वदने गृहे शुभौ नन्दादिके याम्यजलोत्तराने ॥** [१२]

स्पष्टतायै चक्रम् –

| गृहमुखम् | पूर्वमुखगृहे | दक्षिणमुखगृहे | पश्चिममुखगृहे | उत्तरमुखगृहे |
|---|---|---|---|---|
| सूर्यस्थानम् | 8,9,10,11,12 | 5,6,7,8,9 | 2,3,4,5,6 | 11,12,1,2,3 |
| तिथिः | पूर्णा<br>5,10,15 | नन्दा<br>1,6,11 | भद्रा<br>2,7,12 | जया<br>3,8,13 |

गृहप्रवेशसन्दर्भे दर्शनीयं कलशवास्तुचक्रमुभयत्र ग्रन्थयोः मध्ये मुहूर्तचिन्तामणिग्रन्थस्य आधारेणैव कृतमस्ति, तस्योपक्रमः सम्प्रति निरूप्यते । कलशस्याष्टौ विभागाः कार्याः – मुखम्, कण्ठः, गर्भः, गुदा चेति चत्वारः, पूर्वादिक्रमेण चत्वारः विभागाः एवमाहत्याष्टधा जाताः । सूर्याधिष्ठितनक्षत्रात् प्रवेशकालिकनक्षत्रं यावत् गणनां कृत्वा एकं नक्षत्रं कलशाकृतौ वास्तुनि मुखे संस्थाप्य फलम् अग्निदाहस्य भयम्, ततः चत्वारि नक्षत्राणि पूर्वस्यां दिशि स्थापनीयानि तेषु जनवासशून्यं, अग्रिमाणि चत्वारि भानि दक्षिणस्यां लाभकारकाणि, तदग्रिमभानि चत्वारि पश्चिमस्यां लक्ष्मीप्रदानि, ततः अग्रेसराणि चत्वारि नक्षत्राणि उत्तरस्यां कलहकारकाणि, अग्रिमाणि चत्वारि नक्षत्राणि गर्भे विनाशकराणि, ततः त्रीणि गुदायां स्थिरप्रदानि, तदनु त्रीणि कण्ठे स्थिरतां यच्छन्ति । यथोक्तम् –

**वक्त्रे भूरविभात् प्रवेशसमये कुम्भेऽग्निदाहः कृताः प्राच्यामुद्वसनं कृत्वा यमगता लाभः कृताः पश्चिमे ।**
**श्रीर्वेदाः कलिरुत्तरे युगमिता गर्भे विनाशो गुदे रामाः स्थैर्यमतः स्थिरत्वमनलाः कण्ठे भवेत् सर्वदा ॥** [१३]

गृहप्रवेशप्रसङ्गे केचित् राहुविचारमपि करणीयमिति कथयन्ति । तद्यथा –

सूर्यः यस्मिन् राशौ सञ्चरति, तद्राशिक्रमेण प्रतिमासे राहुरपि तस्यां दिशि मासे च भ्रमति । यदि एषः राहुः द्विरागमने गृहप्रवेशकाले च दक्षिणतः पृष्ठतो वा स्यात्तदा शुभकरः ज्ञातव्यः। तडागादिषु त्रैमासिकं, द्वयङ्गयात्रादिकार्यप्रसङ्गेषु च मासिकरूपेण विचारयेदिति । उक्तमपि –

**यद्राशिगोऽर्कः खलु तद्दिशि स्याद्राहुः सदा गच्छति मासि मासि। द्विरागमे वाऽपि गृहप्रवेशे राहुः प्रशस्तः खलु दक्षपृष्ठे।**
**त्रैमासिकं तडागादौ मासिकं द्वयङ्गकर्मणि ॥** [१४]

**निष्कर्षः –**

कालस्य नैकानि अङ्गानि तेषु पञ्चाङ्गानि प्रमुखाणि भवन्ति यथा – 1) वर्षः 2) मासः 3) दिनम् 4) लग्नम् 5) मुहूर्तश्चेति । एतेषाञ्च उत्तरोत्तरं प्राबल्यमुच्यते । ज्योतिश्शास्त्रे महर्षिभिः एतेषां कालानां शुद्धिः सर्वविधशुभकार्येषु नूनं कर्तव्येति निर्दिष्टमस्ति । अस्माकं मनीषिभिः कालस्य सूक्ष्मनिरीक्षणं कृतं येन अयमेव निष्कर्षः सिध्यति यत् प्रत्येकस्य कार्यस्य कृते पृथक्पृथक् कालखण्डस्य पृथक्पृथक् महत्त्वं गुणधर्माश्च भवन्ति । अनुकूलकाले कार्यकरणेन सफलता प्राप्यते अत इयं सूक्ष्मदृष्टिः मुहूर्तस्याधारस्तम्भोऽस्ति । अनेनैव कारणेन मुहूर्तस्यानुकूलतायाः चयनेन शुभता तु भवत्येव अशुभतायाश्च सम्भावना अपि न तिष्ठति । अतः नूतनगृहप्रवेशस्य मुहूर्तविषयान् विज्ञाय गृहपतिः समुचिते काले गृहप्रवेशं कृत्वा सर्वविधसौख्यादिकं सम्प्राप्तुं शक्नोति ।

एवं प्रकारेण पूर्वविधिभिः अनुसारं शुभलग्ने सकलगुणयुक्ते वितानपुष्पामालादिभिरलंकृते वेदघोषैश्च युक्तभवने गृहप्रवेशं कुर्यात् । गृहप्रवेशं कृत्वा स्थपतिवार्धक्यादीन् ज्योतिर्विदः विधिज्ञान् पुरोहितसदृशान् नागरिकान् दीनानाथान् कृपणादीन् च यथाशक्त्या भूमिसुवर्णगोवस्त्र–आभूषणादिभिः सन्तोष्य सम्पूज्य च तेभ्यः स्वशुकामनाः प्रकाम्येत् । यथोक्तम् –

**एवं सुलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुतिघोषयुक्तम्। शिल्पज्ञदैवज्ञविधिज्ञपौरान् राजार्चयेद् भूमिहिरण्यवस्त्रैः ॥** [१५]

एवं सम्यक्प्रकारेण समग्रविधिनामनुसरणं कृत्वैव गृहप्रवेशः क्रियते तदैव समेषामपि मानवेभ्यः श्रेयस्कराय भवेदिति ।

*********

**पादटिप्पण्यः -**

१. मु. चिं. पी. टी., अ. १३, पृ. सं. -६१४

२. मु. चिं. पी. टी., अ. १३, श्लो.- १

३. व. सं., अ. ८, श्लो.- ८, ९

४. मु. चिं. पी. टी., अ. १३, पृ. सं. -६११

५. मु. चिं., अ. १३, श्लो. – २

६. मु. चिं. पी. टी., अ. १३, श्लो.-२

७. मु. चिं., अ. १३, श्लो. – २

८. मु. चिं. पी. टी., अ. १३, पृ. सं. -६१५, व. सं., अ.- २

९. मु. चिं. पी. टी., अ. १३, पृ. सं. -६१५

१०. यो. या., अ.-१६, श्लो.- १३

११. राशिकूटादिकं सर्वं दम्पत्योरिव चिन्तयेदिति वसिष्टः, मु. चिं., पृ. सं., - ६१९

१२. मु. चिं., अ. १३, श्लो.- ५

१३. मु. चिं. पी. टी., अ. १३, श्लो.- ६

१४. वा. र. व., अ. १०, श्लो.-५६

१५. मु. चिं., अ. १३, श्लो.- ७

*******

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# तात्पर्यार्थविमर्शः

**Dr. Manmohan Tiwari**
Associate Professor
Department of Sanskrit
Pro. Rajendra Singh (Rajju Bhayya) Viswavidyalaya
(Formerly Allahabad State University)
Prayagraj-211010, Uttarapradesh
Contact No. : 8805095519
E-mail : manmohan03071973@gmail.com

पदवाक्यप्रमाणविषये बहुभिः बहुश्रुतमस्माभिः। तत्र भवन्तः वाक्यार्थविचारप्रवीणाः मीमांसकाः पदार्थसंसर्गरूपं वाक्यार्थं तात्पर्यार्थतया वाच्यतामुखेन च बोधयन्तः सन्ति। अतो संसर्गः यत्र पदवृत्तिबोधस्य अविषयत्वात् वाक्यस्य तात्पर्याख्यया नाम्ना वृत्त्या प्रतिपाद्यमानः सन् प्रतीतिविषयकः भवति स तात्पर्यार्थ इति उच्यते। अयं तात्पर्यार्थः वाच्यलक्ष्यव्यङ्ग्यव्यतिरिक्तो पदसमूहगम्यः भवति। अतः अभिहितानां पदार्थानां अन्वयं संसर्गं वा बोधयन्ति इति अभिहितान्वयवादिनः कथ्यन्ते। गौरवात् पदानां पदार्थमात्रे शक्तिः न च पदार्थसंसर्गरूपे अर्थे अभिधायाः अप्रवृत्तेः शक्तिस्तत्र। अतः अभिहितान्वयवादमते पदार्थ संसर्गरूपः वाक्यार्थः एव तात्पर्यार्थः पदवृत्तिबोध-अविषयकः अपदार्थोऽपि वाच्यार्थविलक्षणशरीरः वाक्यार्थरूपेण बोधविषयको भवति।

अभिधया परस्परान्वितानां पदार्थानाम् उपस्थितिं बोधं वा मन्वानः अन्विताभिधानवादिनः इति उच्यन्ते। वाच्य एव वाक्यार्थः इति अन्विताभिधानवादिनः। आकाङ्क्षायोग्यतासन्निधिवशाद्वक्ष्यमाण स्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थः विशेषवपुः अपदार्थोऽपि वाक्यार्थः समुल्लसति इति अभिहितान्वयवादिनां मतम्। का.प्र.प.उ.३६.३७ आचार्यमम्मटोऽपि तात्पर्यार्थोऽपि केषुचित् इति सूत्रेण निर्देशं चकार।

अत्र जिज्ञास्यते यत् तात्पर्यं तदर्थत्वं तत्परत्वं वा एकमेव वस्तुतत्त्वं भवति, उताहो पृथक्-वस्तुतत्त्वमिति स्यात्। तत्र तात्पर्यं तदर्थत्वं तत्परत्वं वा एकमेव वस्तु पृथक्-पृथक् पदोपादानादपि समानप्रतीतिविषयकत्वाद्- विशिष्टम्। तेषु सर्वेषु अर्थेषु अभिधैव व्यापारः। न च लक्षणा न वा व्यञ्जनेति। आचार्यमम्मटः स्वप्रणीते काव्यप्रकाशे शब्दार्थयोः स्वरूपं प्रतिपादयन् वाचकलाक्षणिकव्यञ्जकशब्दानां विभागं कृत्वा तेषां वाच्यलक्ष्यव्यङ्ग्यभूतान् अर्थान् प्रतिपाद्य तात्पर्यार्थमपि तात्पर्यार्थोऽपि केषुचित् इति सूत्रयाञ्चक्रे। पदसमूहगम्यः वाक्यार्थः वाच्यः तात्पर्यार्थोऽपि वा तात्पर्याख्यया वृत्या प्रतिपाद्यमानत्वात्। वाच्यतः भिन्नः । आहोस्वित् वाच्यरूप एव असौ तात्पर्यार्थः। तदर्थत्वं तत्परत्वं वा वाच्यतो अभिन्नः, वाच्यतावच्छेदकत्वेन स्वीकारात्। यथा-

## तात्पर्याख्याशक्तिः

स वाक्यार्थः परं प्रधानतया प्रतिपाद्यः येषां यानि तत्पराणि पदानि तेषां भावः तात्पर्यम्, तद्रूपा शक्तिः तात्पर्याख्या शक्तिरिति-

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने। तदर्थं तात्पर्यार्थं वाक्यं तद्बोधकं परे॥ साहित्यदर्पणः, द्वितीयपरिच्छेदः कारिका २०

उदाहरणं यथा - घटं करोति इत्यनेन घटवृत्तिकर्मत्वानुकूलाकृतिरूपः अर्थः बोध्यते अथवा घटमानय इत्यत्र घटनिष्ठकर्मतानिरूपकमानयनम् इति। अत्र घटशब्दस्य अभिधया घटरूपार्थोपस्थितिः जायते, अम् प्रत्ययस्य च कर्मतारूपोऽर्थः प्रतिपद्यते। आनय इति क्रियाशब्दस्य आनयनानुकूलो व्यापारः। अत्र वृत्तिता, निष्ठा, निरूपकता वा न कस्यचिद् शब्दस्य अर्थः अतः अपदार्थोऽपि वृत्तितातात्पर्यवशाद् अनयोः संसर्गविधया भासते इति स्पष्टम्। कुमारिलभट्टस्य अभिहितान्वयवादे अभिधया पदानां पदार्थोपस्थितिः जायते पदार्थानां सम्बन्धरूपवाक्यार्थोपस्थितिरपि वाक्यस्य तात्पर्याख्यया शक्त्या भवति। अतः तात्पर्यार्थः उच्यते।

प्रभाकरनये तु अभिधया परस्परान्वितपदार्थोपस्थिति: जायते। अत: मतेऽस्मिन् पदार्थसंसर्गरूप: वाक्यार्थ; वाच्य एव भवति।

वाच्य एव वाक्यार्थ: इति अन्विताभिधानवादिन:॥ काव्यप्रकाशे द्वि, उ.

वस्तुत: आचार्य: मम्मट: काव्यप्रकाशस्य द्वितीयोल्लासे अभिहितान्वयवादं प्रतिपादयामास, पञ्चमोल्लासे तु अन्विताभिधानवादं विस्तरेण निरूपयामास्। येप्याहु: अन्विताभिधानवादिन: यत्, शक्तिग्रहणप्रक्रियायां तत्रस्थ: बालक: उत्तमवृद्धस्य शब्दान् प्रत्यक्षभूतेन श्रोत्रेन्द्रियेण श्रवणविषयीकरोति, तदनन्तरं मध्यमवृद्धेन क्रियमाणं गवानयनादिकार्यं चक्षुषा गोचरीकरोति तथा चेष्टारूपेण अनुमानेन मध्यमवृद्धस्य व्यवहारान् निश्चिनोति। यदयमेतदर्थविषयकज्ञानवान् । यदि अयमेतदर्थविषयक: ज्ञानवान् न अभविष्यत् तर्हि इहास्य प्रवृत्तिरपि न अभविष्यत्। अतो मतेऽस्मिन् अखण्डवाक्यस्य वाक्यार्थे शक्ति:, न तु पदस्य पदार्थ मात्रे शक्ति: पुनश्च तेषामन्वयबोध: स्यात्। शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति-

श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया । अन्यथाऽनुपपत्या तु बोधेच्छक्तिं द्वयात्मिकाम् ।

अर्थापत्याऽवबोधेत सम्बन्धं त्रिप्रमाणकम् ॥ प्र. ५.१,२

अन्विताभिधानवादिमते वाच्यवाचकभावसम्बन्धं प्रत्यक्षानुमानार्थापत्ति प्रमाणै: बाल: अनुमिनोति। श्रोतु: प्रतिपन्नत्वञ्च यदयमेतच्छब्दजन्यैतदर्थ गोचरज्ञानवान् भवति एतच्छब्दश्रवणानन्तरमेतदर्थगोचरचेष्टावत्वादिति चेष्टया अनुमिनोति। अनन्तरं द्विविधां शक्तिं वाचकत्वं वाच्यत्वं च सङ्केतापरनामकं वाक्यवाक्यार्थयो: सम्बन्धं अन्यथानुपपत्या प्रमाणेन गामानयेति वाक्यश्रवणाद् गवानयनाद्यर्थ- ज्ञानमेतद्वाक्येन एतदर्थस्य वाच्यवाचकता सम्बन्धं विना अनुपपन्नमिति अर्थापत्या जानीयात्। अनन्तरम् उक्तप्रमाणत्रयाधिगतं सङ्केतं आवापोद्वापाभ्यां गोशब्दस्य गौरेवार्थ: अम् विभक्ते: कर्मता रीत्या पदपदार्थनिष्ठतया अवधारयेत्। अनन्तरम् उक्तरीत्या पश्चात् आवापोद्वापाभ्यां वाक्यान्तर्वर्ति- पदार्थमपि मनसि धारयति यथा गो शब्दस्य गौरेवार्थ: अम् विभक्ते: कर्मत्वमिति रीत्या विशेषत: पदपदार्थनिष्ठया वाक्य- स्थितानामेव पदानामन्वितै: पदार्थै: अन्वितानामेव सङ्केतो गृह्यते इति, विशिष्टा एव पदार्था: वाक्यार्थो न तु पदार्थानां वैशिष्ट्यम् । का.प्र.प.उ .२२४

ये तु मीमांसका: तात्पर्यतया अभिधां स्वीकृत्य तन्मुखेनैव व्यङ्ग्य- व्यञ्जकभावापन्नमपि व्यङ्ग्यार्थमासादयन्ति तथा व्यञ्जनाव्यापारं निराकुर्वन् अभिधाया: सर्वत्र प्रवृत्तिं दर्शयन्ति। तेषां मतानि यथा- यदप्युच्यते- नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते, ये त्वभिदधति सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार:, यत्पर: शब्द: स शब्दार्थ:, यत्तु विषं भक्षय मा चास्य गृहे भुङ्क्था: । एभि: वाक्यै: प्रतिपाद्यमान: नैमित्तिकार्थ:, वाच्यलक्ष्यव्यङ्ग्यरूप: अर्थ:, तदर्थ:, तात्पर्यतया जायमान: अर्थ: तत्र सर्वेषु अर्थेषु शब्द एव निमित्तम्, तथा अभिधैव अर्थबोधकतानुकूलो व्यापार: अर्थात् तात्पर्याकृष्टाभिधैव तत्र वृत्ति:। न च उक्तार्थात् विलक्षण: कश्चन व्यङ्ग्यार्थ: न वा अपूर्व: कश्चन व्यञ्जनाव्यापार:, इति मीमांसकानां मतम् ।

तात्पर्यानतिरेकाच्च व्यञ्जनीयस्य न ध्वनि:। किमुक्तं स्यादश्रुतार्थतात्पर्येऽन्योक्तिरूपिणि॥ दशरूपके च.१

विषं भक्षय पूर्वो यश्चैवं परसुतादिषु। प्रसज्यते प्रधानत्वाद्धनित्वं केन वार्यते॥ द.च.२

अत्र तात्पर्यवादिन: ध्वने: समावेशं निषेधरूपतात्पर्ये कुर्वन्ति निषेधरूपं यथा विषभक्षणादपि दुष्टमेतद्गृहे भोजनम् इति अश्रूयमाणपदम्। इह ध्वनिवादिन: अपि प्रतीयमाने निषेधार्थे एव तात्पर्यं मन्यन्ते। रसादिप्रतीतिरपि अश्रूयमाणपदाज्जायते तत्र साम्यत्वे न च कापि विनिगमना। किञ्च विषभक्षणरूपविध्यर्थे तात्पर्यापत्तेश्च सुहृद्वाक्यतासम्बन्धात्। अत्र आचार्यमम्मटादयस्तु उपात्तस्यैव शब्दस्य अर्थे तात्पर्यं आसादयन्ति न तु अश्रूयमाणपदस्य वा, अतोऽत्र प्रतीयमानस्य प्रतीतिस्तु सर्वथा तात्पर्यभिन्ना व्यञ्जनयैव साध्या इति भाति। किन्तु धनिकादयस्तु आचार्या: यदर्थे यस्य शब्दस्य तात्पर्यं स तात्पर्यार्थ : इति रसादिप्रतीतिस्तु तदर्थतावदिति प्रतिभाति । यथा-

एतावत्येव विश्रान्तिस्तात्पर्यस्येति किम्कृतम्। यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम्॥ द. च.४

अभिधया व्यङ्ग्यार्थबोध: भवितुन्नार्हति वाच्यव्यङ्ग्ययो: स्वरूपभेदात्। यथा वाच्य: विधिरूप: तर्हि प्रतीयमानार्थ: निषेधरूप:। अत्र आलङ्कारिकाणां सम्मति: वर्तते यत् प्रतीयमानार्थस्य प्रतीति: अभिधालक्षणातात्पर्या- ख्याभ्यो वृत्तिभ्य: पृथक् व्यञ्जनाव्यापारेण साध्या । न चाभिधाया: प्रवृत्ति:, तत्र वाच्यं बोधयित्वा तत्र तस्या: विश्रान्ते:। यथा-

शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव:, विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिविशेषणे ॥ काव्यप्रकाशे पञ्चम: . उ.

तत्रभवान् सकलशास्त्रपारावारीण: राजानक: मम्मट: व्यङ्ग्यव्यञ्जकसद्भावाश्रितस्य ध्वने: महत्त्वं प्रतिष्ठापयन् प्रत्यपादि यत् अन्विताभिधानवादे अभिधया अन्वितपदार्थोपस्थिति: जायते । तत्र वाक्यार्थोपस्थितिरपि वाक्यभूतस्य शब्दस्य अभिधया वृत्या एव सम्भवति वाक्यार्थबोधाय न च तात्पर्याख्याया: वृत्ते: आवश्यकत्त्वम्। अत्रापि सामान्येन अन्वितस्य भानं न च विशेषेणान्वितस्य प्रतीतिर्वा भवति । एवमेव अभिहितान्वयवादे अभिधया केवलपदार्थोपस्थिति: जायते अनन्तरं पदार्थसंसर्गरूपवाक्यार्थबोधाय तात्पर्याख्या वृत्ति: आसाद्यते, तत्र वाक्यार्थबोध एव यदि शक्ते: अविषय: तर्हि तदतिदूरभूतस्य व्यङ्ग्यार्थस्य वाच्यत्वे का वार्ता ?।

अत: उभयनयेऽपि व्यञ्जनाया: आवश्यकत्वमुचितमेव प्रतिभाति। काव्यप्रकाशे प. उ.२२५.२२६.२२७.२२८

******

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# नैषधचरितालोके वैदिकदेवस्य स्वरूपम्

**Tumpa Jana**
Assistant Professor
Department of Sanskrit
Narajole Raj College, Narajole,
Daspur-721211, Paschim Medinipur, West Bengal
Contact No. : 9933482016
E-mail : tumpanrc@gmail.com

महाकाव्यपरम्परायां श्रीहर्षस्य नैषधचरितम् स्यात् संस्कृतसाहित्यस्य अन्तिमं महत्वपूर्णं महाकाव्यम्। श्रीहर्षः अतीव विद्वान् आसीत्, यतः ग्रन्थेषु तस्य विविधशास्त्रस्य पारदर्शिता लक्षिता। तस्य लिखितेषु बहुग्रन्थेषु सर्वाधिकः श्रेष्ठः तथा लोकप्रियो ग्रन्थः नैषधचरितम् द्वाविंशसर्गे रचितस्य अस्य महाकाव्यस्य कथावस्तु महाभारतस्य वनपर्वस्य नलोपाख्यानम्। ग्रन्थोऽयं नल-दमयन्त्योः प्रेमकाहिन्या परिपूर्णोऽपि अत्र साहित्यस्य चमत्कारिता अतुलनीया। संस्कृतसाहित्यस्य तस्मात् प्रसिद्धा उक्तिः- तावद्भा भारवेर्भाति यावन्माघस्य नोदयः। उदिते नैषधे काव्ये क्व माघः क्व च भारविः अस्मिन् महाकाव्ये न केवलं काव्यस्य रमणीयता, अपि च अस्ति सर्वेषां शास्त्राणां ज्ञानम्। श्रीहर्षेण सर्वेषां शास्त्राणां ये तावत् सिद्धान्ताः सन्ति,ते इतिवृत्तवर्णनच्छलेन ग्रन्थेसमुपस्थिताः,अर्थात् वेदवेदान्तन्यायादिदर्शनेषु राजनीतिशास्त्रप्रभृतिषु च यानि तत्त्वानि वर्तन्ते, तानि तत्त्वानि अस्मिन् महाकाव्ये समुपस्थाप्यन्ते। एतस्मात् कारणात् नैषधचरितम् अवलम्व्य श्रुयते- नैषधं विद्वदौषधम् इति। विदुषां मनसि यत् किञ्चित् अज्ञानजनितं मालिन्यं वर्तते, तस्य मालिन्यस्य अपनोदनं नैषधचरितस्य पाठादेव भवति, यतः श्रीहर्षेण सर्वशास्त्रीयचिन्तानां दर्शनतत्त्वानां च समुपस्थापनं नैषधचरिते कृतम्। नैषधचरितस्य प्रतिपादितः अर्थः तस्मात् सहजेन न उपलब्धः।श्रीहर्षेण एवमपि अङ्गीकृतं यत् साधारणमतिनां दुर्मेधसां वा यथा ग्रन्थेऽस्मिन् सहजेन प्रवेशो न स्यात्, एतदर्थं स्वेच्छया ग्रन्थग्रन्थिं केषुचित् स्थलेषु लिखितम्- ग्रन्थग्रन्थिरिह क्वचित्...मास्मिन् खलः खेलतु (नैषध,२२/१५२)।श्रीहर्षस्य अनेन वचनेन स्पष्टं यत् काव्येऽस्मिन् विविधशास्त्रस्य उपस्थापनं तेन कृतम्।येषु वेदशास्त्रम् अन्यतमम्।वस्तुतः वेदं विना किमपि ज्ञानं न सम्पूर्णं भवति।अत्रैव सर्वज्ञानं निहितमस्ति।वेदानां ज्ञानाहरणं कृतिषु तेषां च प्रभावः प्रायः सर्वेषां पण्डितानां संस्कृतकवीनां महाकवीनां च मध्ये दृश्यते।महाकविः श्रीहर्षो नापि एतेषु व्यतिक्रमः।तस्य ग्रन्थे तस्मात् वैदिकसाहित्यस्य अनुशीलनं दरीदृश्यते। विशेषतः वैदिकदेवस्य स्वरूपं वैशिष्ट्यं वा ।

**तेषां वैशिष्ट्यानाम् उल्लेख एव एतस्य प्रबन्धस्य उद्देश्यः।**

वेदशास्त्रस्य प्रधानो विषयो देवता।प्रत्येकं वैदिकमन्त्रे अस्ति एका अधिष्ठात्री देवता।मन्त्रैः तासां प्रशंसा तथा आवाहणं कृतं मन्त्रद्रष्टृभिः ऋषिभिः।एतासां देवानाम् उत्पत्तिः कदा कथम् अभवत् अस्मिन् विषये स्थितं प्रमाणम् असम्भवम् एव।यतः बहुप्राचीनजनजातिः कालस्य करालग्रासे ग्रस्ता। तेषां संस्कृतिरपि ताभिः सह विलुप्ता जाता।येषां प्राचीनजनजातीनां सामान्यपरिचयः प्राप्यते, तेषाम् अनुशीलनेन ज्ञायते यत् ते जीवनधारणस्य प्रधानं कारणं तथा संस्कृतिं देवतारुपेण पूजन्ति स्म।अर्थात् वैदिकधर्मे जीवनयापनेन सह सम्पर्कयुक्ता देवता प्राप्यते। वेदे वर्णिता प्रायः प्रत्येकं देवता एकैकस्य पार्थिवपदार्थस्य अधिष्ठातृदेवता।यथा- पार्थिवस्य अग्नेः अधिष्ठाता देवता अग्निः,सूर्यस्य देवता सूर्यः सविता वा आदित्यदेवः वा,झञ्झावातस्य देवता मरुत्,जलस्य देवता वरुणदेवः इति। वस्तुतः सूर्यः द्युलोकस्य, वायुः इन्द्रः वा अन्तरिक्षलोकस्य एवञ्च अग्निः पार्थिवलोकस्य उपद्रवात् पृथिवीं रक्षन्ति इति मन्यन्ते ऋषयः। यास्काचार्येण तस्मात् उक्तम्- तिस्रः एव देवता इति नैरुक्ताः।

अग्निः पृथ्वीस्थानः।वायुर्वेन्द्रो वान्तरिक्षस्थानः। सूर्यो द्युस्थानः।तासां महाभागात् एकैकस्या अपि बहुनि नामधेयानि भवन्ति

अपि ता कर्मपृथकत्वात्।यथा होताध्वर्युब्रह्मोद्गातेत्यप्येकस्य सतः (निरुक्तम्,५/२)। वैदिकदेवानां स्वरुपं तथा वैशिष्ट्यं विविधम्।नैषधचरितेऽपि वैदिकदेवतानां कानिचित् वैशिष्ट्यानि श्रीहर्षेण प्रतिपादितानि। तानि एव वैशिष्ट्यानि अत्र आलोचितानि। देवाः यज्ञै सन्तुष्टाः भवन्ति यज्ञकारिणां च अभीष्टं पूरयन्ति। श्रीहर्षेण तस्मात् प्रोक्तं यत् नलस्य यज्ञेन सन्तुष्टाः देवताः तस्य राज्ये स्वर्गीयभोग्यवस्तूनि असृजन्- इष्टेन पूर्तेन नलस्य... कोरकमुद्गिरन्ति [1] (३/२१) अन्यत्र तेन उदितं देवताः नलस्य यज्ञेषु तृप्यन्ति- गिरापि वक्ष्यन्ति मुखेषु तर्पणादिदं न देवा मुखलज्जयैव ते [2] । मल्लिनाथेन अस्य व्याख्यायां जीवातुटीकायाम् उल्लिखितं यत्- मुखेषु तर्पणात् प्रीणनात् देवाः । वस्तुतः देवाः अग्निमाध्यमेन यज्ञस्य हविर्भागं स्वीकुर्वन्ति । येन कारणेन अग्निः देवतानां मुखम् इत्यनेन विभूषितः- अग्निर्वै देवानां मुखम् (ऐ.ब्रा.७/१६)। अतः प्रत्येकं यज्ञस्य मूलोद्देश्यं भवति आहुतिद्रव्येन देवानां सन्तुष्टिविधानं तेभ्यश्च अभीष्टफललाभम्।

वैदिकदेवस्य अन्यदेकं स्वरूपं स्यात् स्तुत्या देवानामाराधनम्। येन कारणेन वेदे सूक्तस्य आविर्भावः।सु उक्तम्=सूक्तम्।शोभनं सुन्दरं वा वचनम् एव सूक्तम्।वेदस्य मन्त्रभागाः सूक्तैः परिपूर्णाः।प्राचीनार्यजातयः प्राकृतिक शक्तेः स्वेषां रक्षणार्थं ता देवता इति मत्वा शोभनेन वचनेनस्तुतिम् अकुर्वन्।अतः वेदे सूक्तैः देवानाम् अर्चना विहिता।वस्तुतः प्रत्येकं सूक्ते एकाधिकाः मन्त्राः दृश्यन्ते।यास्काचार्येण तस्मात् भणितं निरुक्तग्रन्थे यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति [3] । अतः प्रतिपाद्यते यत् - स्तोता सूक्तैः देवतानां सन्तुष्टिं विधायते।

नैषधचरितेऽपि उक्तं वेदस्य कार्यं भवति देवानां गुणकीर्तनम्- श्रुतिः सुराणां गुणगायणी । देवाः भवन्ति प्रभूतसम्पदः अधिष्ठातारः। तस्मात् कारणात् यज्ञैः सन्तुष्टाः भूत्वा देवाः नलस्य राज्ये स्वर्गीयभोगसामग्रीकरुपां सम्पदम् असृजन्- इष्टेन पूर्तेन नलस्य... कोरकमुद्गिरन्ति [5] । पञ्चमसर्गे दृश्यते देवराजः इन्द्रः तस्य अर्जितां सम्पदं सत्पात्रेषु दानार्थम् उद्ग्रीवम् आसीत्। एतत् वचनं तेन नारदस्य समीपे प्रकाशितं कृतम्- पूर्वपूण्यविभववायलब्धा... शान्तिक विधिर्विधिद्दष्टः (नैषध,५/१३)। देवाः प्रभूतसम्पदः अधिष्ठातारः- एतस्य वचनस्य पुष्टिः देवशब्दस्य व्युत्पत्तिमध्ये अस्ति। आचार्यः यास्कः देवशब्दस्य निर्वचनप्रसङ्गे अवदत्- देवो दानाद्वा (निरुक्तम्,७/४/१५)। अर्थात् यो दानं करोति स देवः। एतेन प्रतिपाद्यते यत् देवान् निकषा सर्वप्रकारं धनमस्ति।येन कारणेन दानेषु समर्थाः भवन्ति। विश्वस्य सर्ववृत्तान्तम् अवगताः स्युः वैदिकदेवताः।तासु विश्वस्य सर्ववस्तोः ज्ञानं वर्तते। नैषधचरिते तस्मात् पठितम्- तदखिलमिह...निरस्तानन्दमिद्रादिषु द्राक् [6] । श्लोकेऽस्मिन् नलः आह इन्द्रादयः देवाः त्रिभुवनस्य सर्ववृत्तान्तमवधारणे समर्थाः, अर्थात् ते सर्वज्ञाः। नारायणेन तस्य टीकायां तस्मात् कथितम्- इन्द्रादिषु त्रिभुवे जनानां यावन्वृत्तौ निष्पन्नो वृत्तान्तः समाचारस्तस्य साक्षात्कृतौ प्रत्यक्षीकरणे कृतिषु कुशलेषु । वेदेऽपि देवानां सर्वज्ञत्वं सिद्धम्। ऋग्वेदस्य अग्निसूक्ते अग्निदेवप्रसङ्गे कविक्रतुः अर्थात् सर्वज्ञः इति विशेषणं प्रयुक्तम्- अग्निर्होता कविक्रतुः...देवो देवेभिरागमत [7] । अस्य मन्त्रस्य कविक्रतुः इत्यस्य व्याख्यायां स्वामी दयानन्द सरस्वती अवदत्- सर्वज्ञः क्रान्तदर्शनो वा । यास्काचार्येण उक्तम्- सर्वाणि प्रज्ञानानि प्रतिमुञ्चते। मेधावी कविः क्रान्तदर्शनो भवति (निरुक्तम्,१२/१३)।

---

१. नैषधचरितम्,३/२१ ।
२. नैषधचरितम्,३/१५३ ।
३. निरुक्तम्,७/१/१ ।
४. नैषधचरितम्,९/१४८ ।
५. नैषधचरितम्, ३/२१ ।
६. नैषधचरितम्, ९/१५९ ।
७. ऋग्वेद, १/१/५ ।

अन्यत्रापि अग्नेः सर्वज्ञत्वस्य परिचयः प्राप्यते- विश्वं स वेद [8] । शतपथब्राह्मणे देवानां सर्वज्ञता प्रदर्शिता (शतपथब्राह्मण, ३/४/२/६-७)।

श्रीहर्षेण सप्तदशसर्गे कथितं यत् देवता सत्यवाक्- अबन्धवाक् । अस्य पदस्य मल्लिनाथकृते व्याख्या यथा- अबन्ध्यवाक् अमोघवचनः, वेदरुपसत्यवचने इत्यर्थः। अन्यत्र अर्थात् द्वितीयसर्गे सत्यवादिना वृहस्पतिना सह नलस्य तुलना दृश्यते- इति तं स विसृज्य धैर्यवान्नृपतिः सुनृतवाग् वृहस्पतिः' (नैषध,२/६३)। सत्यवाक् इत्येवं वैशिष्ट्यं वैदिकदेवानां क्षेत्रेऽपि प्रयुक्तम्। यथा शतपथब्राह्मणे उक्तम्- सत्य वै देवाः, अनृतं मनुष्याः अर्थात् देवताः सत्यरुपाः,मनुष्याः च असत्यरुपाः (शतपथब्राह्मण, १/१/१/४)। वृहद्देवताग्रन्थे उक्तं यत् ब्रह्म सत्यम् एव-ब्रह्म वाक् ब्रह्म सत्यं च ब्रह्म सर्वमिदं जगत् (वृहद्देवता, २/४०)।अतः वैदिकदेवाः सत्यवादिनः। देवाः अनिमेषदृष्टयः। देवानाम् अस्य वैशिष्ट्यस्य उल्लेखः नैषधकारेण कृतः स्वग्रन्थे- अस्वेदगात्राचलश्यामरौघैरमीलनेत्राः...भिदां न भेजुः [9] । श्लोकेऽ स्मिन् अमीलनेत्राः इत्यस्य अर्थः अनिमेषदृष्टयः। तस्मात् मल्लिनाथेन प्रोक्तम्- अमीलानि अनिमिषाणि, यद्वा न मीलन्तीत्यमीलानि पश्चाद्यश्च। तानि नेत्राणि येषां ते तथोक्ताः अनिमिषदृष्टयः इत्यर्थः । एतत् वैशिष्ट्यं वैदिकदेवानां क्षेत्रेऽपि प्रयुक्तं स्यात्। शतपथब्राह्मणे तस्मात् प्राप्यते यत् देवताः कदापि शयनं न कुर्वन्ति- न वै देवाः स्वपन्ति [10] । अन्यत्र कथ्यते देवानां चक्षुषः कदापि अश्रुः न आयातः [11] । एतेन अवगम्यते यत् निद्रा तथा अश्रुविमोचनं पलकविहीनस्य चक्षुषः क्षेत्रे एव प्रयोज्यम्।

गोभिलगृह्यसूत्रे प्राप्यते देवाः पलकविहीनाः, ते सदा मनुष्याणां कर्मणः अनुशीलनं कुर्वन्ति [12] । मित्रदेवप्रसङ्गे वैदिकसाहित्ये उल्लेखः अस्ति यत् स अनिमिषदृष्ट्या मनुष्याणां कर्म पश्यति- मित्रः कृष्टीरनिमिषाभिचष्टे (ऋक्.३/५३/१)।

वैदिकदेवाः अमृताः अमराः वा। स्वाहा देवा अमृता मादयन्ताम् [13] देवाम् अमृतान् पिप्रियं च (ऋक्.७/१७/४) यत्र देवा अमृतमानशानाः (यजुः.३२/१०)- एवम्प्रकारेण वैदिकसाहित्ये देवानां अमरत्वं सिद्धम्। शतपथब्राह्मणे उल्लेखमस्ति यत् प्रथमं तावत् देवाः अमराः नास्ति, पश्चात् ते केनचित् यज्ञेन अमरतां प्राप्नोति' (शतपथब्राह्मणे, ११/१/२/१२,११/२/३/६)। श्रीहर्षेणापि तस्य ग्रन्थे देवानाम् अमृतत्वं प्रतिष्ठितम्। षोड़शसर्गे तेन प्रोक्तं यत् मनुष्याः न अमृतपानकारिणः- यद्यप्यपीता वसुधालयैः... यदस्मै दधते सुधान्धसः (नैषध,१६/७)। पञ्चमसर्गेऽपि श्रीहर्षेण सममेव वचनं कथितम्- वीक्ष्य वः खलु तनूममृतादाम् दृङ्निमज्जनमुपैति सुधायाम् (नैषध,५/९४)। देवतासु वहुरुपधारणस्य क्षमतास्ति। तस्मात् देवाः इच्छानुसारं विविधरुपं धारयन्ति। नैषधचरितस्य त्रयोदशसर्गे दृश्यते इन्द्रादिचतुष्टयदेवाः दमयन्तीं पत्नीरुपेण कामयन्तः नलरुपं धारयित्वा स्वयंवरसभायाम् उपस्थितवन्तः। एतेन दमयन्ती प्रकृतं नलं ज्ञातुम् असमर्था आसीत्। यद्यपि सा परवर्तीकाले इन्द्रादिदेवानां सन्तुष्टिविधानेन एव नलं ज्ञातुं समर्थाः शक्याः। दमयन्ती देवानां नलवत् इदं रुपधारणम् मायाजालम् इत्यनेन विभूषितवती- मुग्धा दधामि...दिगधिपानपि ताः स्पृशन्ति (नैषध,१३/४६)। वैदिकसाहित्यस्य विविधोपाख्यानेषु देवानां वहुरुपधारणस्य क्षमता उल्लिखिता।केनोपनिषदि (तृतीयखण्डम्) दृश्यते देवासुरयोः युद्धे ब्रह्मा जयं प्राप्य तद्जयं देवेषु अर्पणं कृतवान्।परन्तु देवाः तद्जयं स्वेषामेव इति मत्वा आनन्दम् अकुर्वन्। अनन्तरं ब्रह्मा तेषां देवानां भ्रमं दूरीकृतवान् यक्षरुपं धारयित्वा। देवानां वासस्थानं स्वर्गः। ते तत्र सर्वायासेन वसन्ति। शतपथब्राह्मणे उक्तं देवताः अमरतायाम् अर्थात् स्वर्गे निवासं कुर्वन्ति।

---

८. ऋक्,१०/११/१ ।
९. नैषधचरितम्, १०/३३ ।
१०. शतपथब्राह्मण, ३/२/२/२२ ।
११. मै.स.२/१/१०,ऐ.ब्रा.५/१/२) ।
१२. गोभिलगृह्यसूत्र, ४/६/१६ ।
१३. ऋक्.३/४/११ ।

ते यज्ञमाध्यमेन दिवम् अर्थात् स्वर्गं गतवन्तः- यज्ञेन वै देवाः। दिवमुपोदक्रामन्.... [14] । तैत्तिरीयसंहितायामपि (१/७/१/३)एवमेव वचनं प्राप्यते। अथर्ववेदे कथितं यत् देवताः पितृभ्यां सह स्वर्गलोके निवसन्ति (६/१२३/३)। नैषधचरिते श्रीहर्षोऽपि तुल्यं वचनं प्रोक्तम्। तेन नलमाध्यमेन कथितम् इन्द्रादीनां स्वर्गवासिनां देवानाम् अभिलाषः कदापि न व्यर्थो भवति- न व्यहन्यत कदापि...त्यजत्वसमतामदमद्य [15] । अत्र स्वःसदाम् इत्यस्य अर्थः स्वर्गवासिनाम्। तस्मात् मल्लिनाथेन प्रोक्तम्- स्वःसदः स्वर्वासिनः । षष्ठसर्गे नैषधकारः अवदत् देवाः परमेन सुखेन स्वर्गम् अधिवसन्ति स्वर्गे सतां शर्म... (नैषध,६/९८)। अधुना जिज्ञासा वैदिकदेवानां स्वरुपज्ञानस्य किं प्रयोजनम्? अस्य उत्तरे उक्तं वैदिककर्मेण लौकिककर्मेण च इष्टफलस्य सिद्धिः,यतः देवताः सुखदायिकाः।ते अनिष्टनिवारणं कृत्वा मनुष्यानां सुखं प्रदायन्ति।एतस्मात् कारणात् देवानां स्वरुपज्ञानं सर्वेषाम् अपरिहार्यम्। बृहद्देवताग्रन्थे तस्मात् कथितम् इष्टस्य सिद्ध्यर्थं देवतानां स्वरुपज्ञानं प्रयोजनम्। यावत् पर्यन्तं देवानां स्वरुपज्ञानं न भवति, तावत् पर्यन्तं वैदिककर्मस्य तथा लौकिककर्मस्य फलप्राप्तिः न सम्भवति- न हि कश्चिदविज्ञाय ...फलमश्नुते (बृहद्देवता,१/४)। प्रत्येकं देवस्य द्वे रुपे स्तः-शान्तरूपम् उग्ररूपं च। शान्तरूपं सुखदा उग्ररूपं च दुःखदा। वायुदेवः शान्तः भवति यदा स शनैः शनैः वहति,परन्तु अतीव झञ्झया सह वाहितः वायुः उग्रः स्यात्। वस्तुतः अग्निवायुप्रभृतिनां देवतानां सुखदुःखादिरुपं मनुष्यस्य नाधीनम्। तथापि यदि मनुष्याः तेषां यथार्थस्वरुपं जानन्ति, तर्हि ते अनिष्टस्य निवारणम् इष्टस्य च लाभं कर्तुं सफलाः भवन्ति। अधुनापि वैज्ञानिकाः प्राकृतिकशक्तेः स्वरूपज्ञानाय सर्वदा अन्वेषणं कुर्वन्ति। येन ते प्राकृतिकविपर्ययस्य नियन्त्रणं समयानुसारं करिष्यन्ति,एवञ्च सर्वेभ्यः इष्टप्राप्त्यर्थं सर्वदा प्रचेष्टां कुर्वन्ति। पुनः मनुष्याः देवताभ्यः सुखम्,समृद्धिम्,स्वर्गः, मोक्षम् इति प्राप्यन्ते। अतः वक्तुं शक्यते यत् देवतानां स्वरुपज्ञानं सर्वेषां प्रयोजनम्।

**अनुशीलितग्रन्थपञ्जी-**


१. रय,रामकुमार. वैदिक माइथोलोजी. वाराणसी. चौखम्बा विद्याभवन.२०१४

२. दत्त,रमेशचन्द्र.ऋग्वेदसंहिता(बंगाली). कलकत्ता.संस्कृत पुस्तक भाण्डार. १९७६

३. त्रिपाठी,गयाचरण.वैदिक देवताः उद्भव और विकाश. वाराणसी. भारतीय विद्या प्रकाशन.१९८१.

४. शर्मा, शिवदत्त. नैषधचरितम्. लखनऊ. उत्तर प्रदेश संस्कृत संस्थान.१९९८

५. शास्त्री,देवर्षि सनाढ्य(सम्पा.).नैषधीयचरितम्.चौखम्वा कृष्णदास एकाडेमी.२०१३.

६. उनियाल, प्रो घनश्याम. देवतातत्वविज्ञान.होशियारपुर.कात्यायन वैदिक साहित्य प्रकाशन.२०१६.

७. झा, देवनारायण.नैषध समीक्षा. नाग


**************

---

१४. शतपथब्राह्मण, १/७/३/१ ।

१५. नैषधचरितम्, ५/१२३ ।

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# शिक्षा सामाजिकविकासश्च

**Dr. Venkataramana Bhat**
Associate Professor
Department of Education
Central Sanskrit University
Rajiv Gandhi Campus
Mense, Shringeri-577139
Chikkamagaluru, Karnataka
Contact No. : 9933482016
E-mail : dr.venkataramana.bhat@csu.co.in

शोश्रूयते हि निस्संघस्य निसंगस्य च एकाकिनः मानवस्य कल्पनाऽपपि दुरूहेति । मानवः समूहजीवीति कृत्वा समाज अपेक्ष्यते इति निश्चप्रचम् । मानवानां पारस्परिकसम्बन्धजालं समाज इत्युच्यते । समाजस्य प्रोन्नतिः शिक्षया इति शिक्षाविदां समाजशास्त्रिणाञ्च आशयः। शिक्षासमाजयोः सम्बन्धः गरीयान् वर्तते। समाजस्य स्वरूपं शिक्षाव्यवस्थायाः स्वरूपं निश्चिनोति । शिक्षाव्यवस्थायाः स्वरूपं समाजस्य स्वरूपं निश्चिनोति । यस्मिन् राष्ट्रे शिक्षाव्यवस्था सुदृढा भवति तद्राष्ट्रं विकासमेति । सामाजिक-आर्थिक-नैतिक-राजतान्त्रिकदृष्ट्या तद्राष्ट्रं दृढं भवति ।यथा-

परिवर्तिनि संसारे मृतः कोऽवा न जायते । स जातो येन जातेन याति देशः समुन्नतिम् । [1]

अस्मिन् राष्ट्रे सर्वमपि परिवर्तते । परिवर्तनमस्ति चेदेव विकासः भवति।Social change is the social evolution[2] शिक्षां विना समाजः नास्ति,समाजं विना शिक्षा नास्ति । अतः शिक्षासमाजयोः सम्बन्धः अविच्छिन्नः । शिक्षा एव समाजं विकासयति । सामाजिकपरिवर्तनस्य प्रबलम् उपकरणं भवति शिक्षा । समाजस्य प्रगतौ शिक्षायाः महद्वैशिष्ट्यमस्ति । सामजिकपरम्परायां,सामाजिकनियन्त्रणे,सांस्कृतिकतत्त्वे च शिक्षा समाजस्य प्रमुखम् उपकरणमस्ति ।

जवाहर् लाल् नेहरू महोदयस्य अभिप्रायः एवमस्ति- Education is Supposed to develop an integrated human being and to prepare young people to perform useful function for society and take part in collective life.

शिक्षया सामाजिकभावनायाः जागर्या भवति । व्यक्तिः समाजे एव आत्मनः उन्नतिं सम्पादयति । समाजं विना प्रपञ्चेऽस्मिन् मनुजस्य अस्तित्वमेव नास्ति । अनया दृष्ट्या व्यक्तेः सामाजिकभावनायाः वृद्धिः परमावश्यकी विद्यते । महत्कार्यमिदं शिक्षामात्रेणैव सिध्यति । इदं कर्म विद्यालयमाध्यमेन पूर्णं भवति । सामाजिकवातावरणभूयिष्ठविद्यालये बालकः विविधक्रियासु आत्मानं प्रवर्तयति। तस्यां परिस्थितौ बालके स्वाभाविकरूपेणैव सामाजिकभावना जागर्ति । अग्रे स एव बालकः सामाजिकभावनां मनसि निधायैव समाजोपयोगिकर्मणि प्रवर्तते । यथा-

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः । व्यवहारेण जायन्ते मित्राणि रिपवो यथा ॥[3]

समाजस्य राजनैतिकक्षेत्रं समभिवर्धयति इयं शिक्षा । संसारस्यास्य राजनैतिकविचाराः शिक्षया एव आविर्भवन्ति । द्वयोः देशयोः राजनैतिकविचारान् आकलय्य तौलनिकरीत्या अध्येतुं शिक्षायाः भूमिका महती वर्तते ।

---

1. भर्तृहरेः नीतिशतकम्

2. Kings Ley Devis

3. शिक्षायाः सामाजिकाधाराः, सच्चिदानन्दः, ए. पि.

अनेनैव व्यक्तौ राजनैतिक जागरूकता एधते । कर्त्तव्याकर्त्तव्यकर्मसु वैचक्षण्यमपि शिक्षयैव समायाति । समाजस्य आर्थिकक्षेत्रोन्नतये शिक्षा योगदानं विदधाति । आर्थिकाभिवृद्धिं समलक्ष्य व्यावसायिकोद्देश्यं प्रबलयति शिक्षा । विभिन्नक्षेत्रेषु जीविकार्थं बालके दक्षताम् उत्पादयति। समाजे व्यक्तिः बहुषु क्षेत्रेषु स्वसामर्थ्यानुसारेण कर्म कृत्वा अभिवृद्धिमानयति।

सामाजिकपरिवर्तने शिक्षा विशिष्टं स्थानमावहति । सामाजिकपरिवर्तनं नाम सामाजिकविकासः । आधुनिकविज्ञानक्षेत्रे प्रविधिक्षेत्रे च अनुसन्धानानि समभूवन् । नवीना आविष्काराः समजनिषत । अनेन वैचित्र्यपूर्णं परिवर्तनम् सम्पन्नं प्रपञ्चे । अनुसन्धित्सूनां ज्ञानमेव एतस्य सर्वस्य कृते कारणमित्युक्तौ नातिशयोक्तिः । अनुसन्धानेन जनानाम् आचारेषु,विचारेषु,आदर्शमूल्येषु,लक्ष्येषु च परिवर्तनानि अभवन् । अतो हेतोः शिक्षा सामाजिकपरिवर्तनसाधनमपि तु आधुनिकतासम्पादकसाधनमित्यकथयत् अलेक्स्-

"Education is the most powerful factor in making men modern in modern socety"

व्यक्तेः सामाजीकरणप्रक्रियायां शिक्षा बहूपकरोति । इयं हि प्रक्रिया निरन्तरा । बालकस्य सामाजिकविकासस्य प्रारम्भः परिवारे भवति । बालकः मातुः प्रभूतम् सम्पादयति ज्ञानम् । अत एव सा प्रथमशिक्षिकेति कथ्यते । अनन्तरं प्रविशति विद्यालयम्। विद्यालयः समाजस्य लघुरूपं भवति । विद्यालये गुरोः ज्ञानम् अवाप्नोति । नागरिको भूत्वा समाजस्य प्रत्येकं क्षेत्रे उपविश्य कार्यं करोति। एवमस्य सामाजीकरणप्रक्रिया समाजोऽपि विकासमेति ।

सामाजिकनियन्त्रणेऽपि शिक्षा साहाय्यं करोति । समाजे विद्यमाना अन्धविश्वासाः शिक्षयैव निर्गच्छन्ति । समाजे पारिवारिकविघटनं सामाजिकविघटनञ्च जायमानं वर्तते । तत्र कारणम् अशिक्षिता एव । एतत्सर्वं नियन्त्रयति शिक्षा । यदि सामाजिकनियन्त्रणं न करोति इयं शिक्षा तदानीं समाजस्य विकासः दुस्साध्य एव । समाजविकासाय, चरित्रनिर्माणाय, नैतिकविकासाय, सभ्यतायाः संरक्षणाय, संस्कृतेः सरक्षणाय, राष्ट्रियैकतायाः जागरणाय, जन्मजातशक्तीनां प्रगतिशीलविकासाय च शिक्षायाः महत्त्वम् अद्यत्वे वरीवर्ति । मेकैवर् महोदयः इत्थं वदति यत्-

The quality of the nation is the quality of the social units whose common life it is-if the fuel is poor how can the flame be bright. दोषयुक्तं तैलं यथा दीपं ज्वलयितुं न शक्नोति तथैव राष्ट्रनिर्मातारः दुर्बलाः चेत् कथं राष्ट्रं राराजते ।

समाजे शिक्षकस्य पात्रं कथमस्तीति चिन्तनीयम् । शिक्षकस्य दायित्त्वविषयोऽपि विचारणीयः वर्तते । अध्यापकानां स्थितिः तदीयसमाजस्य सामाजिकमूल्यानि प्रतिबिम्बयति । इदञ्च सर्वैरप्यङ्गीकृतं सत्यम् । अध्यापकान् क्रियाशीलमार्गे याश्च प्रेरयेयुः तादृश्यः परिस्थितयः चोत्पद्येरन् । शिक्षकाः प्रशिक्षणम् अवाप्नुयुः । प्रशिक्षणमेव शिक्षकम् उत्तमसमाजस्य निर्माणाय प्रेरयति प्रवर्तयति च । अप्रशिक्षिता अध्यापकाः समाजं नाशयन्ति । राष्ट्रियैकतायाः सम्पादने, राष्ट्रबन्धुत्वसम्पादने, उत्तमनागरिकाणां निर्माणे, पारस्परिकसौहार्दजीवनसम्पादने, वैज्ञानिक क्षेत्रस्याभिवृद्धये च शिक्षकाणां स्थानं प्रमुखं विद्यते । अध्यापकाः योग्यताधारेण, व्यक्तिनिरपेक्षरूपेण, कार्यक्षमतारूपेणच चिताः भवेयुः ।

शिक्षकशिक्षा एका निरन्तरप्रक्रिया । शिक्षायाः आवश्यकता मनुष्यमात्रस्य वर्तते । उत्तमः शिक्षकः छात्रान् समीचीनमार्गे गमयति । आङ्ग्लभाषायाः कश्चित् आभाणकः इत्थं निरूपयति यत्- The teacher is a friend, philosopher and a guide इति । समाजस्य निर्माता शिक्षकः छात्रणां कृते सुहृत्, तत्त्वोपदेशकः,पथप्रदर्शकश्च भवति। शिक्षया विना मानवजीवनं न सारभूतं भवति। न कश्चिदेतादृशोऽस्ति शिक्षालेशं विनाऽपि जीवनं सरलतया यापयति । किमपि काठिण्यं समायाति यदा तदा एव मानवः स्वानुभवजन्यज्ञानोन्मुखो भूत्वा सत्यान्वेषणं कृत्वा तथ्यम् अन्विष्यति । तन्निवारयितुञ्च निरन्तरं यतते । यदि योग्यशिक्षा तेनार्जिता स्यात् तदा सानन्दं समस्यां समाधातुं शक्नोति ।

कस्याऽपि राष्ट्रस्यादर्शाः विकासश्च तद्राष्ट्रियशैक्षणिकविचारैः शिक्षाव्यवस्थया च अवगन्तुं शक्यते । राष्ट्रस्य सभ्यता, संस्कृतिः, अभिवृद्धिः, पद्धतिः, सम्प्रदायश्च शिक्षायाः शिक्षकस्य च उत्कर्षे सन्निहिताः भवन्ति । आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनँ सन्धानम् । इत्यधिविद्यम् ।[4]

अधीतिबोधाचरणप्रचारणैः दशाश्चतस्रः प्रणयन्नुपाधिभिः। चतुर्दशत्वं कृतवान् कुतस्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥[5]

आत्मा वाऽरे द्रष्ट्व्यः श्रोतव्यः मन्तव्यः निधिध्यासितव्यः[6] ॥ इत्यादीनि वाक्यानि प्राचीनशिक्षणपद्धतिं सूचयन्ति । तस्मिन् काले गुरोः सर्वज्ञत्वं तथा क्रियान्वयावबोधन सामर्थ्यमित्युभयोः मिश्रणेन शिक्षणमत्यन्तं प्रभावपूर्णमासीत्। तदानीन्तनकाले औपचारिकशिक्षणस्य,योग्यताप्रमाणपत्रस्य अध्यापकनियुक्तेश्च आवश्यकता नासीत् । अत एव शिक्षकशिक्षा अपि नासीत् । सर्वत्र सर्वे वेदद्रष्टारः,मुनयः गुरवः,अनहङ्कारिणः ,ब्रह्मचारिणः, छात्राश्चासन् । अतः शिक्षायां ज्ञानस्य,चरित्रस्य,आचरणस्य प्रचारणस्य च परिशुद्धं रूपं दरीदृश्यते स्म। तदाह मनुमुनिः तस्य स्मृतौ-

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥[7]

औपचारिक-अनौपचारिक-निरौपचारिकभेदेन च शिक्षायाः प्रकारत्रयम् अस्ति । सर्वेषां महात्मनां व्यवहारेण तेषामुपदेशेन च अस्माभिः शिक्षणमवाप्तव्यम् । जन्मप्रभृति मरणं यावत् मनुष्यः अधिगच्छति । यथा-

आचार्यात् पादमाधत्ते पादं शिष्यः स्वमेधया । पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥[8]

इति सुभाषितवचनानुगुणं शिक्षणप्रक्रियेयं निरन्तरं प्रचलति । यः कोऽपि विचारः भवतु सः सर्वोऽपि विचारः अस्माभिः श्रोतव्यः । तेन व्यक्तित्त्वविकासः जायते । यथा-" आनो भद्राः क्रतवो यन्तु विश्वतः"[9] इति मन्त्रानुसारं सद्विचाराः सर्वाभिः दिग्भिः समायान्तु इति मन्त्रस्यास्य सारः । समीचीनं वचनम् अवरः कथयति चेदपि श्रोतव्यमस्माभिः । यथा-

युक्तियुक्तं वचोग्राह्यं बालादपि शुकादपि । अयुक्तमपि न ग्राह्यं साक्षादपि बृहस्पतेः ॥[10]

एतैः सर्वैः विषयैः अस्माकं व्यक्तित्त्वविकासः बोभवीति । प्रत्येकमपि व्यक्तिविशेषस्य विकसपुरस्सरं समाजस्य विकासोऽपि भवति । समाजः सकारात्मकरीत्या विकसितः भवेदित्येव मन्मनीषा ।

**परिशीलितग्रन्थाः**


| | | |
|---|---|---|
| 1. शिक्षायाः सामाजिकाधाराः | 2. शिक्षायाः दार्शनिकाधाराः | 3. सिद्धान्तकौमुदी |
| 4. सुभाषितरत्नभाण्डागारः | 5. शैक्षिकसमाजशास्त्रम् | 6. नैषधीयचरितम् |
| 7. मनुस्मृतिः | 8. मन्त्रमन्दारः | 9. नीतिशतकम् |


***********

---

4. शिक्षावल्ली-तैत्तिरीयोपनिषत् ।
5. नैषधीयचरितम्, १.४ ।
6. बृहदारण्यकोपनिषत्, २.४.५ ।
7. मनुस्मृतिः ।
8. सुभाषितरत्नभाण्डागारः ।
9. ऋग्वेदः ।
10. सुभाषितरत्नभाण्डागारः ।

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# अभिनयदर्पणे तद्धितप्रयोगाः

**Y. Shanmuga Priya Dharshini**
Research Scholar
Madras Sanskrit College, Chennai
Tamil Nadu
Contact No. : 9566182534
E-mail : priadarshini.cni@gmail.com

**उपक्रमः**

नाट्ये शास्त्रं बोधयितुं भरतमुनिना 'नाट्यशास्त्रम्' इति ग्रन्थो विरचितः। तस्यार्वाचीनोऽचार्यो नन्दिकेश्वरोऽभिनयस्य स्पष्टीकरणार्थमपिच विनियोगानां बोधनार्थम् 'अभिनयदर्पणम्' इतिमहदुपयोग ग्रन्थमरचयत्। प्रायोऽभिनयः,रसाः, तेषां विनियोगाः इत्यादि विषयार्थमयं ग्रन्थः पठ्यते।'प्रियतद्धिताः दाक्षिणात्याः' इत्यतो ग्रन्थेऽस्मिन् भाषायामौत्सुक्यं दातुम् सौन्दर्यञ्च भवितुं तद्धितप्रोयोगानामालोचनं क्रियते।

**शैषिकाः**

बुद्ध्वाऽथ ताण्डवं ताण्डोर्मर्त्येभ्यो मुनयोऽवदन्। पार्वती त्वनुशास्ति स्म लास्यं बाणात्मजामुषाम्॥ (अभि.दर्प. ५)

नाट्योत्पत्तिरेवं दर्शितं यन्नाट्यवेदंपूर्वं भरताय चतुर्मुखेन दत्तम्। अनन्तरं शम्भुः प्रयोगमुद्धतं स्मृत्वास्वप्रयुक्तं स्वगणाग्रण्या तण्डुना भरताय न्यदीदिशत्। तण्डुना प्रोक्तमित्यतः 'तेन प्रोक्तम्'(४।३।१०१) इति सूत्रादण्प्रत्ययप्रयोगोऽत्र दृश्यते। तत्ताण्डवं पश्चात् मुनयो मर्त्येभ्योऽवदन्।

ऐन्द्रं च गारुडं चैव ब्रह्मस्थानमिति क्रमात् । (अभि.दर्प. २७५)

पादविन्यासभेदेन स्थानकादीन् वक्तुं सन्दर्भे इदमित्येतस्मिन्नर्थे 'तस्येदम्' (४।३।१२०) इति सूत्रादण्प्रत्ययो योजितः। एकपादं समाकुञ्च्य स्थित्वान्यपदजानुनी उत्तानिते सति करं न्यस्य स्थितिरैन्द्रमितीरितम्।गरुडस्याकृतिरिव भासमानात्तत्सम्बन्धाद्गरुडस्येद-मित्यर्थेऽण्प्रत्ययान्तः शब्दोऽत्र दृश्यते।

तया द्वारवतीगोप्यस्ताभिः सौराष्ट्रयोषितः। ताभिस्तु तत्तद्देशीयास्तदशिष्यन्त योषितः॥ (अभि.दर्प. ६)

पूर्वं पार्वती देवी बाणात्मजामुषां लास्यमनुशास्ति स्म। उषया द्वारवतीगोप्योऽनुशिष्टाः। ताभिस्सौराष्त्रप्रदेशस्य योषा अनुशिष्टाः। ताभिस्तद्देशीया इतरयोषा अपि ज्ञातवन्त इति क्रमः।अत्र 'सौराष्ट्र' इति पदं तद्धितप्रत्ययान्तं भवति। सुराष्ट्रादागता इत्यर्थे 'तत आगतः' (४।३।७४) इति सूत्रादथवा सुराष्ट्रस्येदमित्यर्थे वा 'तस्येदम्' (४।३।१२०)इति सूत्रात्शैषिकोऽण्विधितः। देशीया इति पदे तद्देशे भवा इत्यर्थे 'तत्र भवः' (४।३।५३) इति सूत्राच्छप्रत्ययो विधितः।

**भावकर्मार्थाः**

कीर्तिप्रागल्भ्यसौभाग्यवैदग्ध्यानां प्रवर्धनम्। औदार्यस्थैर्यधैर्याणां विलासस्य च कारणम्॥ (अभि.दर्प.९)

कीर्तिः, प्रागल्भ्यं, सौभाग्यं, वैदग्ध्यमित्यादीन्नाट्यं वर्धयति। अपि चौदार्यं, स्थैर्यं, धैर्यमित्यादीनां विलासकारणञ्च भवति। एवं नाट्यप्रशंसां वक्तुमवसरयाचार्येणोक्तम्। इह प्रगल्भस्यभावःकर्म वेत्यर्थेष्यञ्प्रत्ययो योजितः।एवमेवसौभाग्यं, वैदग्ध्यम्, औदार्यं,स्थैर्यं, धैर्यमेतेषां भावकर्मणोरर्थयोःष्यञ्प्रत्ययो

योजितः। 'वर्णदृढादिभ्यः ष्यञ्च' (५।१।१२३) इति सूत्रात्स्थैर्यं तद्धितान्तमिति सिद्धम्।

'गुणवचनब्राह्मणादिभ्यः कर्मणि च'(५।१।१२४) इति सूत्रादन्येषु पदेषु तद्धितान्तं सिद्धम्।

स्थिरे कचग्रहे दार्ढ्ये वस्त्वादीनां च धारणे । (अभि.दर्प. ११७)

हस्तानां विनियोगदशायां मुष्टिहस्तविषये एवमुक्तम्। दृढस्य भावः कर्म वा दार्ढ्यम्। अत्रापि 'वर्णदृढादिभ्यः ष्यञ्च'(५।१।१२३) इति सूत्रात्समर्थनं भवति। कोमुष्टिहस्तइति प्रश्ने कुञ्चितानामङ्गुलीनां तलान्तरे मेलनादङ्गुष्ठश्चोपरियुतो मुष्टिहस्तोभवेदिति समाधानम्।

एवमेव माङ्गल्यं, मात्सर्यं, वैवर्ण्यं, सौन्दर्यमित्यादिष्वपि भावकर्मणोरर्थयोः ष्यञ्प्रत्ययो नियुक्तः।

**मत्वर्थीयाः**

श्रीमान् धीमान् विवेकी वितरणनिपुणो गानविद्याप्रवीणः सर्वज्ञः कीर्तिशाली सरसगुणयुतो हावभावेष्वभिज्ञः। (अभि.दर्प. १७)

सभापतिलक्षणमिति विषये एवमाचार्येण प्रोक्तम्। श्रीः, धीः, विवेक इत्यादयो यस्य सन्ति, यः पारितोषकवितरणे निपुणः, गानविद्यायां प्रवीणः, सर्वञ्च जानाति, यः कीर्तिशाली भवति, सरसगुणेन युक्तः, हावभावेष्वभिज्ञः, ससभापतिर्भवितुमर्हति। मतुप्प्रत्ययान्तौ श्रीमान्धीमानिति द्वौ शब्दौ। इनिप्रत्ययान्तोविवेकी शब्दः। पूर्वे 'तदस्यास्त्यस्मिन्निति मतुब्'(५।२।९४)इति सूत्रमर्थं प्रत्ययञ्च बोधयति। अपरे 'अत इनिठनौ'(५।२।११५) इति सूत्रमिनिप्रत्ययं दर्शयति।

**स्वार्थिकाः**

वाचिकं सर्ववाङ्मयम्। (अभि.दर्प. १)

अभिनयदर्पणस्य मङ्गलश्लोक एष शिवस्य ध्यानपूर्वकं नमस्कारार्थं दत्तः। अखिलं भुवनं शिवस्याङ्गं भवति; व्याहृतं सर्ववाङ्मयं तस्य वाग्भवति; चन्द्रतारादयस्तस्याहार्यं; सात्त्विकं तस्य स्वरूपम्। अत्र वाचिकमिति पदे 'वाचो व्याहृतार्थायाम्'(५।४।३५)इति सूत्राद्व्याहृतार्थायां वाचि वर्त्तमानायां वाक्शब्दात्स्वार्थे ठक्प्रत्ययो भवति। वाङ्मयमिति शब्दात् 'तत्प्रकृतवचने मयट्' इति सूत्रात्प्रकृतवचने प्राचुर्येऽर्थे वर्त्तमानान्मयड्प्रत्ययः स्वार्थे विधीयते।

**उपसंहारः**

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्। (मालविकाग्निमित्रम् १.४)

भिन्नरुचेर्जनस्यैकं समाराधनं नाट्यमिति कालिदासेन उक्तम्। केवलं भिन्नरुचिरिति न। परन्तु भिन्नशास्त्राणांवीक्षणार्थमपि नाट्यमेकं समाराधनमिति नाट्यग्रन्थमिह व्याकरणदर्शनार्थंस्वीकृतम्। नानार्थं दर्शितुं नानाप्रत्ययान्तशब्दानां शाब्दसौन्दर्यं स्पष्टीकर्तुं लघिष्ठः प्रयत्नः कृतः।

**सहायकग्रन्थसूची**

1. Nandikeśvara Abhinayadarpaṇam;Edited and translated by Dr.Manomohan Ghosh.
2. Dance Gestures, with English Translation of Abhinayadarpaṇam; by Dr.P.Ramachandrasekhar.
3. अष्टाध्यायी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
4. अष्टाध्यायी-भाषा-प्रथमावृत्तिः(चतुर्थ-पञ्चमाध्यायात्मक-द्वितीयः भागः), पं. ब्रह्मदत्तः जिज्ञासु।

*******

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# वेदोक्तदिशा समाजे सौहार्दतायाः पालनम्

(तैत्तिरीययजुरारण्यकचतुर्थप्रश्नपरिपठितपृथिवीशान्ता इति मन्त्रानुरोधेन)

**Mr. Ganesh Bhat,**
Research Scholar,
Amity School of Liberal Arts
Department of Sanskrit and Performing Arts
Amity University, Haryana, Amity Education Valley
Gurugram (Manesar-122413, Haryana State
Mobile No. : 9008691205
E-mail : bhat.gani@gmail.com

**प्रस्तावना**

अस्माकं भारतीयपरम्परायां वेदाः बहुमुख्यं स्थानं आवहन्ति । वेदाः बहुप्राचीनतमाः[1] इत्यत्र नास्ति संशयः, अनेके विद्वांसः यद्यपि विभिन्नकालगणनां [2] दत्तवन्तः तथापि प्रायेण सर्वेषां विदुषाम् ऐकमत्यं वर्तते यत्ते वेदाः एव सर्वप्राथम्येन आगताः इति । वेदमन्त्रान्ज्योतिष्यशास्त्रम् [3] इत्यादिकम् अवलम्ब्य अनेके विद्वांसः स्वकालगणनां दत्तवन्तः। तत्र वैदेशिकाः विद्वांसः वेदस्य अपौरुषेयत्वं नपरिगणयन्ति [4], परन्तु भारतीयाः बहवः अपौरुषेयत्वम् उक्त्वा सृष्टेः आरंभतः [5] विद्यन्ते वेदाः इति निगदन्ति । केचन विद्वांसः एवं सन्ति - दयानन्दसरस्वती, अविनाशचन्द्रः,तिलकः, जैकोबी इत्यादयः । पुरुषेण न कृतं इत्यतः अपौरुषेयत्वं सिध्यति [6]।

**वेदविचारः**

वेदः द्वापरयुगपर्यन्तमपि एकः एव आसीत्, द्वापरयुगे व्यासनाम्ना सुप्रसिद्धः कृष्णद्वैपायनः वेदविभागं कृतवान् । वेदानां विभागं कृत्वा स्वशिष्येभ्यः चतुर्भ्यः प्रत्येकं एकं वेदम् अददात् । ऋग्वेदं पैलाय, यजुर्वेदं वैशंपायनाय सामवेदं जैमिनये अथर्ववेदं सुमन्तवे इत्येवं विभागेन [7] इति । अग्रे च वैशंपायनस्य शिष्यः याज्ञवल्क्यः सूर्योपासनेन शुक्लाख्यं नूतनं वेदराशिम् अलभत्, अतः सः वेदः वाजसनेयीसंहिता [8] इत्यपि कथ्यते । यत्र च केवलं छन्दोबद्धाः मन्त्राः लभ्यन्ते ताः ऋचः इति प्रकीर्तिताः। अक्षपादः स्वन्यायसूत्रे एवंव्याख्याति "पादेनार्थेनचो- पेतावृत्तबद्धाःमन्त्राः [9] " इति । ऋग्वेदः दशसुमण्डलेषु विभक्तः वर्तते, आहत्य १०५८० मन्त्राः वर्तन्ते । गद्यरूपेण विद्यमानाः मन्त्राः यजुर्वेदः इत्याख्यायते । "अनियताक्षराव- सानोयजुः[10]", गद्यात्मकः यजुः[11]", शेषेयजुशब्दः[12], यजुर्यजतेः, एकप्रयोजनं साकांक्षं पदजातमेकं यजुः" इत्यादीनि यजुः शब्दस्य लक्षणानि उक्तानि सन्ति । अयं वेदः द्विधा विभक्तः वर्तते, कृष्णः शुक्लः च इति भेदेन । अयं च वेदः सप्तसु काण्डेषु, ४४ प्रपाठकेषु, ६३१ अनुवाकेषु च विभक्तः वर्तते । अत्र च कृष्णयजुर्वेदे तैत्तिरीयसंहिता, मैत्रायणीसंहिता, काठकसंहिता, इत्यादयः प्रसिद्धाः वर्तन्ते [13]। यत्र च मन्त्राः ब्राह्मणाः एकत्र वर्तन्ते सः भागः कृष्णयजुर्वेदः इति वक्तुं शक्नुमः । यत्र च केवलं संहितामन्त्राः भवन्ति अनियताक्षरत्वेन सः शुक्लयजुर्वेदः इति कथ्यते । अयं चशुक्लयजुर्वेदः ४० अध्यायेषु, ३०३ अनुवाकेषु, १९७५ कण्डिकासु विभक्तः वर्तते । अस्य वेदस्य माध्यन्दिनशाखा काण्वशाखा च बहुप्रसिद्धा वर्तते [14]। गीत्यात्मकाः मन्त्राः यत्र विद्यन्ते सः सामवेदः इति पदेन कथ्यते। "सामानियोवेत्तिसवेदतत्वम् [15]" इत्यनेन पुनश्च वेदानां सामवेदोस्मि [16] इति गीतावचनात्सामवेदस्य महत्वं ज्ञायते । सामवेदः प्रणवस्य अथवा ओंकारस्य प्रतिपादकमस्ति इति छान्दोग्ये उच्यते[17]। पूर्वार्चिकम् उत्तरार्चिकम् इति सामवेदस्य विभागद्वयं दृश्यते । तत्र च पूर्वार्चिके ६५० मन्त्राः तथा उत्तरार्चिके १२२५ मन्त्राः सन्ति । सामवेदः संगीतस्य उद्गमस्थानम् इत्यपि कथयितुं शक्यते । तत्र सामवेदे मध्यम - गान्धार - ऋषभ -षड्ज - निषाद - धैवत – पञ्चमाः इति सप्तस्वराः विद्यन्ते । तत्र सामवेदे कौथुमीयशाखा, राणायनीयशाखा, जैमिनीयशाखा, इत्येवं प्रसिद्धाः वर्तन्ते[18]।

अन्तिमः वर्तते अथर्ववेदः, थर्व – हिंसायां इति धातुना [19] व्युत्पन्नः अयं शब्दः । कुमारिलभट्टः वदति "शान्तिपुष्टि अभिचारार्थीहि एकब्रह्म ऋत्विगाश्रितः[20]" इति । अस्मिन्च अथर्ववेदे विंशतिकाण्डाः ७३१ सूक्तानि, ५९८७ मन्त्राः च विद्यन्ते । अथर्ववेदोक्तमन्त्राः द्विधा विभक्तुं शक्यन्ते रक्षामयी विनाशमयी च इति । पिप्पलाद – शौनक – मौदादयः शाखाः वर्तन्ते अस्मिन्वेदे[21]।

**वेदानां महत्वम्-**

वेदानाम् उत्पत्तिविषयकः विचारः समाप्तः, तेषां रचनाविषयकजिज्ञासा अपि प्रस्तुता, वेदानां विभागः अपि दर्शितः पूर्वस्मिन्भागे एव । अधुना उच्यते वेदानां महत्वं किमिति । एते च वेदाः ज्ञानस्य आकरः इति वक्तुं शक्यते विशिष्टविज्ञानप्रबोधकत्वात् । भारतीयसंस्कृतेः मूलभूतः ग्रन्थः वर्तते अयं वेदः । अस्मिन्च वेदे तत्वशास्त्रसंबद्धाः[22] विचाराः उक्ताः सन्ति । राजनीतिः इत्युक्तौ किं भवति इत्यपि ज्ञायते । मनोविज्ञानविषयकानिसूक्तानि लभ्यन्ते । आयुर्वेदसंबद्धाः[23] मन्त्राः वनस्पतयः [24] च उक्ताः सन्ति प्रायेण अथर्ववेदे । गणितसंबद्धाः विचाराः विद्यन्ते, सः एव अद्य वेदगणितनाम्ना [25] बहुप्रसिद्धः वर्तते । पदार्थविज्ञानं भूगर्भविज्ञानं नाटकादिकं च दृश्यन्ते । संवादसूक्तानि[26] एव प्रायेण बहूनां काव्यानां रचनायां आधारीभूताः वर्तन्ते । एतादृशविचारान् अतिरिच्य मानवधर्मः कथितः वर्तते । एकः मानवः स्वजीवने कीदृशगुणान् आचरेत् इति विचारः विस्तृतः वर्तते । बहुमुख्यतया परोपकारः[27] सत्कर्म, सत्कारः, आदरः [28] अध्ययनम्, अध्यापनम् इत्येते विचाराः उक्ताः वर्तन्ते । वेदभाषा अत्युत्तमा वैज्ञानिकी च इति वक्तुं शक्यते । वेदस्य महत्वम् एवं दृश्यतेयत् – वेदोखिलोधर्ममूलम्[29], ब्राह्मणेन निष्कारणः षडङ्गो वेदो अध्येयः ज्ञेयः च [30] इत्येवमादयः । एतदतिरिच्यापि शिल्पशास्त्रम्, अर्थशास्त्रम्, विश्वबन्धुत्वभावना, परोपकारः, राष्ट्रियता च उक्ताः सन्ति । "माताभूमिः पुत्रोऽहं पृथिव्याः[31], वसुधैवकुटुंबकम्"[32] इत्यादयः बहुप्रसिद्धाः उक्तयः वर्तन्ते वेदेषु ।

**अद्यतनसमाजस्य स्थितिः**

अद्य वयं पश्यामः अस्माकं समाजे जीवनं कथं वर्तते इति । सौहार्दयुतं जीवनं कथमिति भारतेन सर्वेभ्यः अन्येभ्यः राष्ट्रेभ्यः दर्शितम् । परन्तु अधुना काले भारते एव शान्तिः न दृश्यते । समाजः समजः च इति पदद्वयं बहुमुख्यं पात्रं भजते तर्हि समाजः इत्यस्यकः अर्थः? यत्र च पशवः न भवन्ति, संस्कारयुक्ताः मानवाः समूहरूपेण वासं कुर्वन्ति, परस्परसाहाय्य – सहकारेण च जीवन्ति, स्व अहंकारं त्यक्त्वा सर्वेभ्यः अहम् इति भावनया व्यवहरन्ति सः समाजः इति कथयितुं योग्यः भवति । यच्च एकात्ममानवतावादः[33] इत्यपि कथयितुं शक्यते । संवीयते अत्र[34] इति, सम् + अजघञ्, अजोर्व्यघञपोः [35] इत्यनेन विभावः न भवति, अजिव्रज्योश्च[36] इत्यनेन कुत्व निषेधे सति समाजः इति रूपम् । पशुभिन्नानां संघः इत्यमरकोषे [37] वर्तते । भागवतमहापुराणे तावत् - "धर्मव्यतिक्रमोह्यस्य समाजस्य ध्रुवं भवेत् । यत्राधर्मः समुत्तिष्ठेन्नस्थेयं तत्र कर्हिचित् ।।[38] इत्युक्तं वर्तते । तथैव नपुंसकलिङ्गे वर्तते समजम् इति पदम् । समजन्ति पशवो यत्र[39], वनम् इत्यर्थः बुध्यते, पशुसमूहः मूर्खाणां समूहः[40] इति च । अतः वयं मानवाः समाजे स्मः इत्युक्तौ तत्र सामाजिकन्यायः अथवा केचन नियमाः पालनीयाः भवन्ति । परस्परादरेण प्रीत्या विश्वासेन च नित्यं व्यवहर्तव्यं भवति । अतः एव उक्तं वेदे, "वसुधैव कुटुंबकम्"[41] इति । इयं पृथिवी एव मम कुटुंबं वर्तते, अत्रत्याः सर्वे अपि मम बान्धवाः इत्याकारकः मनोभावना अत्यावश्यकी वर्तते । यच्च इदानीन्तनस्थितौ न दृश्यते ।

अस्मिन्शोधलेखे तावत्तैत्तिरीयशाखायाः कृष्णयजुर्वेदस्य आरण्य- कतः शान्तिः इति विचारः स्वीकृतः वर्तते । आरण्यके तावत्षड्प्रश्नाः विद्यन्ते, उपनिषत्त्रयं तथा एकाग्निकाण्डः[42] च । तत्र प्रत्येकं प्रश्नस्य आरम्भः शान्तिमन्त्रद्वारा एव भवति इति तु विदितमेव, दशशान्तयः अपि प्रसिद्धाः वर्तन्ते ।

**पृथिवी शान्ता इति मन्त्रः**

एतान्शान्तिमन्त्रान् अतिरिच्यापि चतुर्थः प्रश्नः "नमोवाचेयाचोदिता [43] " इत्याख्यः अन्तिमे अनुवाके घोषशान्ति-इत्याख्ये [44] शान्तिविषयकः विचारः बहुविशिष्टरूपेण उक्तः वर्तते । स च मन्त्रः एवं वर्तते यत् – "पृथिवी शान्ता साग्निना शान्ता सा मे शान्ता शुचं शमयतु । अन्तरिक्षं शान्तं तद्वायुना शान्तं तन्मे शान्तं शुचं शमयतु । द्यौः शान्ता सा आदित्येन शान्ता सा मे शान्ता शुचं शमयतु । पृथिवी शान्ति अन्तरिक्षं शान्ति द्यौः शान्तिः दिशः शान्तिः अवान्तरदिशाः शान्तिः अग्निः शान्तिः वायुः शान्तिः आदित्यः शान्तिः चन्द्रमाशान्तिः नक्षत्राणि शान्तिः आपः शान्तिः ओषधयः शान्तिः वनस्पतयः शान्तिः गौः शान्तिः अजाः शान्तिः अश्वः शान्तिः पुरुषः शान्तिः ब्रह्मशान्तिः ब्राह्मणः शान्तिः शान्तिरेव शान्तिः शान्तिर्मे अस्तु शान्तिः । तयाहं शान्त्या सर्व शान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तुशान्तिः ।[45] "एवमग्रे तस्मिन् एव मन्त्रे दृश्यते – "पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतं शृणवाम शरदश्शतं प्रब्रवाम शरदश्शतं अजीतास्याम शरदश्शतं ज्योक्च सूर्यं दृशे।[46] " अयं च मन्त्रः शान्तिं सौहार्दतां बोधयति । तत्र सायणभाष्यम् आधारीकृत्य अस्य विवेचनम् अधः क्रियते ।

**विवरणम्**

मन्त्रे पृथिवी इति उक्तं वर्तते, पृथिवी देवता इत्यस्य अयमर्थः यत्र च सर्वेमानवाः, प्राणिनः पक्षिणः च जीवन्ति, सा पृथिवी शान्ता भवतु, सर्व उपद्रव शमनं करोतु इत्यर्थः । उपद्रवाः इत्यनेन कस्य ग्रहणं इति प्रश्नः उदेति । आधिभौतिकाः आधिदैविकाः आध्यात्मकाः च उपद्रवाः[47] नश्यन्तु इत्यर्थः । अतः एव श्लोकाः उक्ताः सन्ति "समुद्रवसने देवी पर्वतस्तमण्डले विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे " इत्येवमादयः । अतः अत्र पृथिवीम् उद्दिश्य प्रार्थना विधीयते मां रक्षतु, शान्तिः भवतु अस्माकं प्राणिनाम् उपरि इति । न केवलं पृथिवी परन्तु अग्निदेवता अपि शान्ता भवतु इत्यभिप्रायः वर्तते । अग्निदेवेन सह पृथिवी शान्ता भवतु । अतः अग्निरपि जीविनः विषये क्रुद्धः मा भूत्, अग्निः वैपरीत्यः न संभवेत् एवं शान्तः भवतु इत्यर्थः । एवं च पृथिवी देवता तथा अग्निदेवता उभे अपि अस्मान्रक्षन्तु शान्ते भूत्वा इत्यर्थः । अतः नारायणोपनिषत्सु [48] मृत्तिकासूक्तं दृश्यते यत्र च वर्तते भूमिर्धेनुर्धरणी लोकधारिणी [49]" इत्येवमादयः स्तुतिपरकाः मन्त्राः । एवमेव ऋग्वेदे अग्निसंबद्धानि[50] सूक्तानि सन्ति । एते देवते मम शोकं दुःखं नाशयन्तु, येन च सर्वेषां शोकनाशनं करोतु, सर्वे अपि भूतग्रामाः सुखेन शान्त्या च जीवन्तु इत्येतादृशी प्रार्थना ।

एवमेव अग्रे अन्तरिक्षलोकः शान्तः भवतु, वृष्टिः तस्मात् एव लोकात्भवति इत्यतः, सः लोकः अस्मान्रक्षतु, अतिवृष्टिः अथवा अनावृष्टिः मा भूत् इत्यभिप्रायः । न केवलं सः अन्तरिक्षः लोकः, वायुदेवेन सह सः अन्तरिक्ष लोकः शान्तः भवतु इत्यर्थः । यदि वायोः अभावः तर्हि वृष्ट्यभावः, यदि अधिकः वायुः तर्हि सृष्टिनाशः अतः तद्वयं मा भूत् इति कृत्वा, तयोः देवयोः प्रार्थना क्रियते । ऋग्वेदस्य प्रथममण्डले एव वर्तते वायुविषयकः मन्त्रः "वायवायाहि दर्शते मे सोमा अरंकृतः[51]" इति । एवं च अत्रापि जनहितार्थं प्रार्थना दृश्यते, यद्यपि शान्तिः तथापि सर्वलोकहितार्थं विधीयते प्रार्थना । यत्र च जाति – धर्म – देश – अनवच्छेदेन प्रार्थना लोककल्याणार्थं विद्यते ।

एवमेव अग्रे द्युलोकः शान्तः भवतु, आदित्येन देवेन सह इति विषयः वर्तते । अग्निः पृथिवीस्थानीयः , वायुः अन्तरिक्षस्थानीयः एवमेव आदित्यः द्युस्थानीयः देवता [52] वर्तते । द्वादशादित्याः सन्ति इति आरण्यके अरुणप्रश्ने [53] वर्तते, द्वादशसंख्याकाः न परन्तु द्वादशविभिन्नरश्मियुक्तः एकः एव आदित्यः इत्यर्थः । द्वादशादित्याः[54]- विवस्वान्, अर्यमन्, त्वष्टा, सवितृ, भग, धाता, मित्र, वरुण, अंस, पूषन, इन्द्र, विष्णु इति च उक्तमेव, प्रत्येकं मासस्य विशिष्टरश्मिद्वारा समस्तलोकान्रक्षतु इति च प्रार्थाना क्रियते । "तरणिर्विश्वदर्शतो जयोतिष्क्रदसि सूर्य [55]" इत्यादयः प्रार्थनाः दृश्यन्ते एव । अग्रे सर्वाः देवताः स्वीकृत्य सर्वाः अपि शान्ताः भवन्तु, भूत्वा च अस्मान्रक्षन्तु इति प्रार्थना दृश्यते ।

पृथिवी, अन्तरिक्षं, द्यौः, दिशः, अवान्तरदिशाः, अग्निः, वायुः, आदित्यः, चन्द्रमाः, नक्षत्राणि, आपः, ओषधयः, वनस्पतयः, गौः, अजाः, अश्वः, पुरुषः, ब्रह्म, ब्राह्मणः, शान्तिः च इत्येवम् एते देवताः स्वकार्यरताः सर्वदा शान्ताः एव भवन्तु, येन च लोकस्य अस्य स्थितिः सिध्यति, सर्वे अपि मानवाः जीवन्ति इत्यर्थः व्यक्तो भवति । देवताः, पञ्चभूतानि, आहारः, वनस्पतयः, प्राणिनः, ब्रह्मणि ये निष्ठाः, एवम् एते सर्वे अपि शान्त्या परस्परसौहार्देन जीवन्तु इत्यर्थः । यथा गीतायाम् उच्यते "**देवान्भावयतानेन ते देवाः भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।।** [56] " इति। "**न राज्यं न च राजासीन्नदण्डो न च दाण्डिकः । धर्मेणैव प्रजाः सर्वे रक्षन्तिस्म परस्परम् ।।**" इति । तस्मिन्सत्येयुगे अथवा वेदकाले, राजा इति कश्चन अधिकारी न आसीदेव, अयम् अस्य प्रदेशः इदम् अपरस्य स्थानम् इति विभागः एव नासीत्, इत्युक्तौ राज्यमेव नासीत् इत्यर्थः ।

यदि राज्यमेव नास्ति तर्हि कथं वा राजा भवति । कश्चन अपराधी इति न आसीत्, अतः यः दण्डं ददाति न्यायवादी वा नासीत् एव । इत्युक्तौ चौर्यादि कर्मणिरताः न भवन्ति स्म इत्यर्थः । केवलं धर्ममार्गेण एव सर्वाः अपि प्रजाः, जनाः परस्परं रक्षणं कुर्वन्ति स्म । अनार्यस्य आचरणमेव न भवति इत्युक्तौ कुतः राजा, अधिकारी वा अपेक्षितः । वेदेषु एतादृशपरिकल्पना समाजस्य वर्तते । **"दुदोह गां स यज्ञाय सस्याय मघवादिवम् । संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।।** [57] " इति ।

रघुवंशे कालिदासः कथयति त्रेतायुगीयानां अधिकारिणां विषये यत्र पृथिवीं निष्पीड्य ततः संपदर्जितवान्, संपदा यज्ञादिकं कृतवान् । तथैव इन्द्रः स्वलोकात्वृष्टिं प्रेषितवान् । देवताभ्यः अपेक्षितहविः प्रदानेन राजा ताः रक्षयामास । एवमेव इन्द्रः मनुष्येभ्यः अपेक्षितवृष्टिप्रधानद्वारा भूलोकं रक्षितवान । इदं च उदाहरणान्तरं वर्तते परस्परसहयोगेन कथं जीवनीयमिति । इत्थं च श्लोकैः ज्ञायते यत्सर्वे अपि आदानप्रदानेन सह जीवन्ति स्म इति ।

एकोनत्रिंशत्तमेमन्त्रे [58] अयं च यजमानः वदति यत् एतादृश- शान्तिपुरस्सरं सर्वानिष्टशमनहेतुद्वारा मदर्थम् अथवा सर्वेभ्यः शान्तिं प्रयच्छतु इति प्रार्थयति । द्विपदे इत्युक्तत्वात्मनुष्यः इति ग्रहणं कर्तव्यं भवति, चतुष्पदे इत्यनेन समग्रप्राणिजातं लक्ष्यते, एवम्च समग्रभूत- ग्रामाय सा शान्तिदेवता शान्तिं सौमनस्यं च यच्छतु इति प्रार्थयति । अग्रे पश्येम शरदश्शतम् इत्यादिषु उच्यते यत्शतसंख्याकान्संवत्स- रान्सर्वदा पश्येम इति । पश्येम इति उत्तमपुरुषबहुवचनत्वात्ज्ञायते केवलं एकस्मै न उच्यमानम् अथवा प्रार्थ्यमानं वर्तते परन्तु सर्वेभ्यः मानवेभ्यः अस्मभ्यम् इत्यर्थः स्वीकरणीयः भवति । सर्वे अपि जीविनः जीवनादि- व्यापारान्प्राप्नवाम, नन्दाम इत्यनेन ज्ञायते द्रव्यैः संपत्तिभिः समृद्धाः भूत्वा वयं सर्वे नन्दाम, आनन्देन भवेम इत्यर्थः । तादृशजीवनेन सर्वे अपि वयं मिलित्वा मोदाम, सौमनस्येन जीवनस्य याथार्थ्यं लक्ष्यं प्राप्नुयाम । भवाम इत्यनेन स्वस्मिन्भवाम, स्वात्मनि स्थिताः भूत्वा साधयामः इत्यर्थः । अनन्तरं वर्तते शृणवाम इति, अस्य अयमर्थः-

वेदशास्त्ररहस्यं शृणवाम इति, मोक्षशास्त्राणाम् अध्ययनं कुर्मः अथवा तेषां श्रवणं [59] कुर्मः इति अवगतः अर्थः । यच्च अस्माभिः अधीतं तत्सर्वं शिष्येभ्यः कथयामः प्रकथयामः प्रब्रवाम प्रकृष्टेन बोधयामः । तत्रापि स्वशिष्येभ्यः इति नास्ति परन्तु शिष्येभ्यः इति, येन च अवगतं भवति यत्स्वस्य शिष्यः वा अन्यस्य इति प्रश्नः नास्ति ये च अन्तेवासिनः सन्ति तेभ्यः प्रबोधयामः इति । अन्ते च वर्तते अजीताः भवेम इति, केनचिदपि शत्रुणा अजीताः भवेम इत्यर्थः । यदि कश्चन शत्रुः आक्रमति तर्हि वयं मिलित्वा तं निवारयामः, सर्वदा मिलित्वा जीवेम इत्यर्थः अवबुध्यते । एवं च बहुदीर्घं कालं यावत्सूर्यं द्रष्टुं समर्थाः भवेम, जीवनं यथार्थं कुर्मः इत्यर्थः । एवं च न कुत्रापि वैमनस्याः भवेम इत्यर्थः परन्तु सर्वे मिलित्वा शान्तिं वर्धयामः इति।

**उपसंहारः**

स्वीकृतः विचारः सायणभाष्यस्य आधारेण वर्तते । पृथिवी शान्ता इत्ययं मन्त्रः विचार्यते । समाजे शान्तिः मुख्या भवति इति

निष्कर्षः प्राप्यते इति । सः विचारः यथामति निरूपितः वर्तते । एवमेव बहवोविचाराः समाजमुखिनः सन्ति अस्माकं भारतीयपरंपरायां प्रामुख्येन वेदेषु । "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपद- स्यार्थे ह्यात्मार्थे पृथिवीं त्यजेत्। [60]" एतादृशं उदात्तं चिन्तनं वेदं विना अन्यत्र कथं वा भवितुमर्हति । स्वजनः एव स्यात्, कुलः एवमुख्यः भवति, स्वकुलं स्यात्स्वग्रामः मुख्यः भवति, स्वग्रामः एव स्यात्जनपदं मुख्यं भवेत्, जनपदः एव स्यात् आत्मार्थं तदपि त्यक्तं भवेत् इति । अतः समाजः एव बहुमुख्यः इति सर्ववेदेषु, उपजीव्येषु, काव्येषु च निगदितं वर्तते ।

**टिप्पण्यः**

१. संस्कृतवाङ्मय- अन्तःप्रवेशिका । २. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ३. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ४. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ५. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ६. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ७. संस्कृतशास्त्रमञ्जूषा । ८. संस्कृतशास्त्रमञ्जूषा । ९. संस्कृतवाङ्मय- अन्तःप्रवेशिका । १०. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ११. संस्कृतवाङ्मय- अन्तःप्रवेशिका । १२. संस्कृतवाङ्मय- अन्तःप्रवेशिका १३. संस्कृतवाङ्मय- अन्तःप्रवेशिका । १४. संस्कृतवाङ्मय- अन्तःप्रवेशिका । १५. संस्कृतवाङ्मय- अन्तःप्रवेशिका । १६. श्रीमद् भगवद्गीता । १७. छान्दोग्योपनिषत् । १८. संस्कृतवाङ्मय- अन्तःप्रवेशिका १९. संस्कृतवाङ्मय- अन्तःप्रवेशिका । २०. संस्कृतवाङ्मय- अन्तःप्रवेशिका । २१. संस्कृतवाङ्मय- अन्तःप्रवेशिका । २२. उपनिषदः । २३. अथर्ववेदः । २४. अथर्ववेदः । २५. लीलावती, बौधायनधर्मसूत्रम् । २६. विश्वामित्र- नदी, सरमा, पाणि इत्यादयः । २७. पुराणानि । २८. शिक्षावल्ली । २९. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ३०. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ३१. अथर्ववेदः । ३२. ऋग्वेदः । ३३. दीनदयाल उपाध्यायः । ३४. अमरकोशः । ३५. अमरकोषः । ३६. अमरकोषः । ३७. अमरकोषः । ३८. भागवतपुराणम् । ३९. अमरकोषः । ४०. शब्दरत्नावली । ४१. ऋग्वेदः । ४२. यजुर्वेद आरण्यकम् ४३. यजुरारण्यकम्, चतुर्थप्रश्नः । ४४. यजुरारण्यकम्, चतुर्थः प्रश्नः । ४५. यजुरारण्यकम्, चतुर्थः प्रश्नः । ४६. यजुरारण्यकम्, चतुर्थः प्रश्नः । ४७. साङ्ख्यकारिका । ४८. महानारा- यणोपनिषत्, यजुर्वेद आरण्यकम् । ४९. महानारायणोपनिषत्, यजुर्वेद आरण्यकम् । ५०. ऋग्वेदः, प्रथमं सूक्तम् । ५१. ऋग्वेदः, तृतीयं सूक्तम् । ५२. संस्कृतवाङ्मय- अन्तःप्रवेशिका । ५३. अरुणप्रश्नः । ५४. श्रीमद् भगवद्गीता, भागवतं च । ५५. ऋग्वेदः । ५६. भगवद्गीता । ५७. रघुवंशम् । ५८. यजुरारण्यकम्, चतुर्थः प्रश्नः । ५९. वेदान्तोक्तश्रवणमनननिध्यासनम् । ६०. कौटिल्यस्य नीतिशास्त्रम् ।

**आकरग्रन्थाः**


1. पृष्ठसंख्या ३५१ - ३५३, आनन्दाश्रमसंस्कृतग्नथावलिः, ग्रन्थाङ्कः ३६, कृष्णयजुर्वेदीयतैत्तिरीयारण्यकम्, श्रीसायणाचार्य विरचितश्रीभाश्यसमेतम्, शालिवाहनशकाब्धः १८१९, खिस्ताब्धः १८९८
2. पृष्ठसंख्या १ - ८, व्रजजीवनप्राच्यभारतीग्रन्थमाला २००, संस्कृतवान्मयअन्तःप्रवेशिका

   (A gate way to Sanskrit Literature) Meant for all exams like UGC Net – code 73 authored by Dr. Somanath Dash, Associate Editors Dr. Paramita Panda, Dr. jyotsnaManjari panda, Chaukhamba Sanskrit Pratishthan. ISBN: 9788170847748.
3. पृष्ठसंख्या १ - ५७, संस्कृतशास्त्रमणजूषा - उदयशंकरझा ,प्रकाशक - चौखंबासुरभारतीप्रकाशान गोपालमन्दिर लेन, पोस्ट बाक्स नं ११२९, वाराणसी २२१००१, संस्करण: २०१९.

   ISBN: 9789383721863.


********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# अद्वैतामोददिशा अविद्यायाः सप्तविधानुपपत्तिनिरसनम् उपपत्तिसमर्थनञ्च

**Mrudula V.V.**
Research Scholar
Department of Sanskrit Vedanta
Sree Sankaracharya University of Sanskrit
Kalady, Kerala
Contact No. : 7012753462
E-mail : mrudulavv8@gmail.com

अद्वैतवेदान्तानुसारं ब्रह्मैकमेव परं तत्त्वं सत्यं अन्यत्सर्वमज्ञानकल्पितत्वादनित्यञ्च। नामरूपात्मकस्यास्य प्रपञ्चस्य कारणभूतमज्ञानं निर्विशेषब्रह्मज्ञानेनैव निवर्तते, तदा एव मोक्षो भवति। अद्वैतवेदान्तशास्त्रोक्तं भावरूपं ज्ञानविरोधि चेदमज्ञानं श्रुत्यादिषु अविद्या, माया, प्रकृतिः, तमः, मिथ्याज्ञानमित्यादिषु नामकेषु प्रसिद्धं वर्तते। शास्त्रे बहुत्र प्रतिपादितां, प्रधानप्रमेयेषु एकां जगत्कारणीभूतामिमामविद्यामङ्गीकृत्यैव प्रपञ्चमिथ्यात्वसमर्थनं तथा ब्रह्माद्वैतस्थापनञ्च कर्तुं शक्यते इति अद्वैतवेदान्तशास्त्रमविद्यावादः अथवा मायावादः इत्यस्मिन् नाम्न्यपि प्रसिद्धं भवति।

अविद्यावादस्य दर्शनान्तरेषु खण्डनाक्षेपादिकं बहु कृतं दृश्यते, तेषां निरसनमपि अद्वैतिभिः ग्रन्थेषु प्रतिपादितञ्च। एवं रीत्या अद्वैतवेदान्तशास्त्रनिरूपितामविद्यामनूद्य एकादशशतकीयेन रामानुजाचार्येण विशिष्टाद्वैतवेदान्तमतमवलम्ब्यविरचिते ब्रह्मसूत्रस्य श्रीभाष्ये खण्डनादिकं कृतं दृश्यते– अविद्यायाः सप्तविधानुपपत्तयः इति। तथा अद्वैतिभिराचार्यैरपि तासामनुपपत्तीनां निरसनं कृतम् अविद्यायाः अस्तित्वमपि स्थापितञ्च। तत्रैको ग्रन्थः वर्तते विंशतिशतकीयेन वासुदेवशास्त्रि अभ्यङ्करेण विरचितः अद्वैतामोदनामकः। अद्वैत–विशिष्टाद्वैतवादग्रन्थेषु प्रमुखे नूतने चास्मिन् ग्रन्थे विशिष्टाद्वैतिभिः मायावादस्योपरि कृतानामाक्षेपानां खण्डनं तथा च श्रीभाष्यकृता प्रदर्शितानां अविद्यायाः सप्तानुपपत्तीनां निरसनञ्च वर्तते।

श्रीभाष्यकृता प्रदर्शिताविद्यानुपपत्तीनां अद्वैतामोददिशा निरसनम्, अविद्यायाः उपपत्तिस्थापनञ्चास्मिन् पत्रे प्रस्तूयते।

**अविद्योपपत्तिः अद्वैतामोदे**

रामानुजाचार्यविरचिते श्रीभाष्ये प्रथमपादस्य प्रथमसूत्रस्य व्याख्यानावसरे महासिद्धान्तनामके भागे एव अविद्यायाः सप्तविधानुपपत्तिः प्रदर्शिता वर्तते। अविद्यायाः अनुपपत्तयः सन्ति आश्रयानुपपत्तिः, तिरोधानानुपपत्तिः, स्वरूपानुपपत्तिः, अनिर्वचनीयत्वानुपपत्तिः, प्रमाणानुपपत्तिः, निवर्तकानुपपत्तिः, अविद्यायाः निवृत्त्यनुपपत्तिश्च।

1. **अविद्यायाः आश्रयोपपत्तिः**

अविद्या एव भ्रमं जनयति, तर्हि तस्याः आश्रयः कः भवति ? न जीवः, अविद्यापरिकल्पितो जीवो अविद्यायाः आश्रयश्चेत् अविद्याजीवत्वयोः अन्योन्याश्रयदोषो भवति। तथा नापि अविद्या ब्रह्माश्रित्य भ्रमं जनयति, ब्रह्म च ज्ञानस्वरूपमविद्याविरोधि च इति अविद्यायाः आश्रयविषये अनुपपत्तिं प्रदर्शयति श्रीभाष्यकारः यथा – 'सा हि किमाश्रित्य भ्रमं जनयतीति वक्तव्यम् ?'[1] इत्यादि।
अद्वैतमते तावत् भामतीविवरणप्रस्थानभेदेन जीवः अविद्यायाः आश्रयो भवति ब्रह्मापि। भामतीकाराणां वाचस्पतिमिश्राणां मते अविद्यायाः आश्रयो जीवः यतो हि 'अहमज्ञ' इत्यनुभूयते। रामानुजाचार्येण तत्राक्षिप्तः अविद्या –जीवत्वयोः यः अन्योन्याश्रयदोषः सोऽपि न भवति। अद्वैतामोदकारेण तस्मिन् प्रसङ्गे विशिष्टाद्वैतिनां जीवस्य कर्माश्रयत्वमनूद्य प्रतिप्रश्नः क्रियते, यथा परमात्मशरीरभूतस्य जीवस्य कर्माश्रयत्वे सति यः अन्योन्याश्रयदोषो भवति सः बीजाङ्कुरन्यायेन यथा परिह्रियते तथैवात्रापि अविद्यायाः आश्रयः जीवः इत्यत्र

1. श्रीभाष्यम्– प्रथमखण्डम्, रामानुजाचार्यः, मेडिकल् हाल् मुद्रणालयः, काशी, पृ.सं ४५७ ।

आक्षिप्तः अविद्याजीवत्वयोः अन्योन्याश्रयदोषोऽपि परिह्रियते इति। तथा अविद्यायाः आश्रयो जीवः भवतीति सिध्यति। एवं सुरेश्वराचार्यप्रकाशात्मयतिप्रभृतीनां मते ब्रह्म अविद्यायाः आश्रयो भवति। अत्र यः अविद्याविरोधित्वहेतुरुक्तः सः न भवति। 'अहं जानामि', 'अहं न जानामि' इति ज्ञानमज्ञानञ्च द्वयमपि साक्षिचैतन्यरूपेण ब्रह्मैव प्रकाशयति। अतः ब्रह्माश्रित्यापि अविद्या भ्रमं जनयतीति सिद्धान्तं सिध्यति। एवं रीत्या अद्वैतामोदे अविद्यायाः आश्रयानुपपत्तिः परिह्रियते, उपपत्तिः स्थाप्यते च।

2. अविद्यायाः तिरोधानानुपपत्तिः

'किं च अविद्या प्रकाशैकस्वरूपं ब्रह्म तिरोहितमिति वदता स्वरूपनाश एवोक्तः स्यात्...'[2] इत्यादि अविद्यायाःतिरोधानानुपपत्तिः श्रीभाष्ये। प्रकाशतिरोधानमित्यस्य विशिष्टाद्वैतिभिः अर्थद्वयं विकल्पेनोक्तं यत् प्रकाशस्योत्पत्तिप्रतिबन्धो वा विद्यमानस्य विनाशो वेति। 'प्रकाशतिरोधानं नाम सत एव प्रकाशस्यानवभासो न तु प्रकाशनाशः इति'[3] तिरोधानशब्दस्य युक्तोऽर्थः अभ्यङ्करेण दत्तः। यथा मेघेनआवृते सति प्रकाशो तिरोहितो भवति, तत्र न केनापि 'सूर्यप्रकाशो नष्टः' इति व्यवह्रियते तथा अत्रापि भवतीति उदाहरणसहितमाचार्योऽभ्यङ्करः अविद्यायाः तिरोधानानुपपत्तिं खण्डयति।

3. अविद्यायाः स्वरूपोपपत्तिः

'अपि च निर्विषया निराश्रया च स्वप्रकाशेयमनुभूतिः स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मान- मनुभवतीत्यत्र...'[4] इत्यादि स्वाश्रयदोषरूपाविद्यायाः स्वरूपं सत्यं वा मिथ्या वा इति प्रश्नपूर्वकं स्वरूपानुपपत्तिः प्रतिपादिता श्रीभाष्ये। यदि सः स्वाश्रयदोषः सत्यं भवति, तर्हि तत्र द्वैतापत्तिर्भवति। यदि सः मिथ्या भवति, तर्हि तस्य दोषस्य कल्पना करणीया इत्येवमनवस्था भवतीति रामानुजाचार्येणोच्यते।

अद्वेतामोदे आक्षेपस्य समाधानमेव दीयते – अद्वैतिनां मते ज्ञानस्वरूपं ब्रह्मैव सत्यम्। भावरूपाज्ञानं तस्य ब्रह्मणः शक्तिरेव भवति। तत्र शक्तेः शक्तिमदपेक्षया पृथगस्तित्वं नास्त्येव। एवञ्च अविद्यायाः प्रातिभासिकत्वमेवास्ति न पारमार्थिकत्वमित्यतः तत्र द्वैतापत्तिर्न भवति। एवञ्च प्रकृतिः माया आदि शब्दैः व्यवह्रियमाणा भवत्यविद्या तस्याश्च कार्यं भवति महत्तत्वम्। तस्मिन् महत्तत्वे (बुद्धौ) प्रतिबिम्बितं चैतन्यं जीवः। तथा बिम्बभूतशुद्धचैतन्यस्य निर्विषयत्वे निराश्रयत्वेऽपि प्रतिबिम्बभूतचैतन्यस्य स्वाश्रयदोषरूपाविद्यावशात् अनन्तविषयत्वमनन्ताश्रयत्वञ्च भवति। तथात्मानमनुभवति। स च स्वाश्रयभूतः भावरूपाज्ञानरूपदोषः अपारमार्थिकः एव, तथा तस्य अन्यदोषापेक्षा नास्तीत्यतः तत्र अनवस्थापि न भवति। यथा दीपः तत्समीपस्थं घटं प्रकाशयति, स्वमपि प्रकाशयति, तदर्थमन्यस्य दीपस्यापेक्षा नास्ति इति उदाहरणसहितमविद्यायाः स्वरूपोपपत्तिः स्थाप्यते।

4. अविद्यायाः अनिर्वचनीयत्वोपपत्तिः

'एतदुक्तं भवति सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यं सर्वा च प्रतीतिः सदसदाकारा'[5] इत्यादि अविद्यायाः सदसदनिर्वचनीयत्वमनुपपद्यते श्रीभाष्ये।

अद्वैतामोदे एवं समाधीयते– लोके शुक्लपीतादिकं रूपं प्रकाशव्यवस्थाप्यं भवति। तथा च अन्धकारस्य कृष्णं रूपं, प्रकाशस्याविषयमपि प्रकाशसापेक्षत्वेन तस्याभावप्रतियोगितया प्रकाशव्यवस्थाप्यं भवति। तद्वदत्रापि भावरूपाज्ञानं यत् सत्प्रतीतेः विषयो न भवति, यतो हि ब्रह्मैव सत्, एवं गगनकुसुममिव नासत्प्रतीतेरपि विषयः इति सदसत्प्रतीतेरविषयोऽपि प्रतीतिव्यवस्थाप्यं भवत्येव।

---

2 Ibid ,पृ.सं ४६१ ।

3 अद्वैतामोदः, वासुदेवशास्त्रि अभ्यङ्करः, आनन्दाश्रममुद्रणालयः, १९७५, पृ.सं १५९।

4 श्रीभाष्यम्– प्रथमखण्डम्, रामानुजाचार्यः, मेडिकल् हाल् मुद्रणालयः, काशी, १८११, पृ.सं ४६२ ।

5 श्रीभाष्यम्– प्रथमखण्डम्, रामानुजाचार्यः, मेडिकल् हाल् मुद्रणालयः, काशी, पृ.सं ४६६।

तच्च भावरूपाज्ञानम् अनिर्वचनीयस्वरूपञ्च भवति इत्येवम् अविद्यायाः अनिर्वचनीयत्वोपपत्तिः समर्थिता।

5. अविद्यायाः प्रमाणोपपत्तिः

भावरूपाज्ञानमविद्या प्रत्यक्षानुमानार्थापत्तिश्रुतिस्मृतिप्रमाणसिद्धं भवतीति सिद्धान्तः। किन्तु रामानुजाचार्यः अविद्यायाः प्रमाणानु- पपत्तिं प्रदर्शयति, एकैकमपि प्रमाणं स्वीकृत्य आक्षेपान् प्रकटयति च।

* 'यदुक्तमनुमानेनापि भावरूपाज्ञानं सिध्यतीति तदयुक्तम् अनुमानासंभवात्'[6] इति अनुमानप्रमाणसिद्धत्वमनुपपद्यते श्री भाष्ये। किन्तु प्रकाशात्मयतिप्रभृतिभिराचार्यैः अविद्यायाः अनुमानस्वरूपं स्पष्टमुक्तं वर्तते यथा 'विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभाव व्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं, अप्रकाशितार्थ प्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्'[7] इति।

- 'न श्रुतिभिः सदसदनिर्वचनीयाज्ञानप्रतिपादनम्। नाप्यैक्योपदेशानुपपत्त्या'[8] इति श्रीभाष्ये श्रुतिप्रमाणेन अर्थापत्त्या च अविद्या नोपपद्यते इति अनुपपत्तिः प्रदर्शिता। किन्तु अद्वैतामोदकारेण अविद्यायाः श्रुतिप्रमाणसिद्धता एवमुच्यते–

'श्रुत्यादिकमविद्यायां प्रमाणं स्याद्यथायथम्। सत्याधिष्ठानधीस्तत्र स्यादविद्यानिवर्तिका'[9]।।२१।। इति ।

तथा 'एवं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढाः'[10] (छा.८/३/२) इत्यत्र अनृतशब्दस्य अद्वैतिनां अनिर्वचनीयमज्ञान-मित्येवार्थः स्वीक्रियते इति मूलभूताज्ञानं श्रुतिषु बहुत्र सिद्धमेवेति तस्याक्षेपस्य परिहारो निर्दिश्यते।

- नासदासीयसूक्तेऽपि (तै.ब्रा. २/८/९/३/४) भावरूपाज्ञानं सिध्यतीति अद्वैतिनामभिप्रायः। 'नासदासीन्नोसदासीत्' इत्यादि मन्त्रे 'तमः' शब्दस्तु 'न सदासीत्', 'न असदासीत्' इति निषेधद्वयसहितं सदसदनिर्वचनीयमज्ञानं द्योतयति। एवञ्च सूक्तेऽस्मिन् विद्यमानानि 'आनीतवातं स्वधया तदेकम्', 'तुच्छेनाभ्वापिहितम्' इत्यादीनि वाक्यानि मूलभूताज्ञानार्थकानि भवन्ति। तत्राचार्येण अभ्यङ्करेण सूक्तस्यास्य सायणाचार्यकृतेऽर्थो मूलाभूताज्ञानसिद्ध्यर्थं युक्ततरः इत्यनेन अस्मिन् प्रसङ्गे सम्पूर्णं दीयते, एवं श्रुतिभिः भावरूपाज्ञानं प्रतिपाद्यते इति स्पष्टीक्रियते च।

- 'इतिहासपुराणयोरपि न ब्रह्माज्ञानवादः क्वचिदपि दृश्यते'[11] इत्याक्षेपं बहूनि उदाहरणानि दत्त्वा अभ्यङ्करः परिहरति। वायुपुराणे 'रज्जावहिर्मरौ' (१०४/३९, ४०, ४१) इत्यादयः श्लोकाः, देवीभागवते 'अहमेवासं' (१, २, ४) इत्यादयः श्लोकाः, विष्णुपुराणे 'ज्योतींषि विष्णु..' (२/१२१३८) इत्यादयोऽपि अज्ञानवादमेव प्रतिपादयन्ति। एवं प्रकारेण 'भावरूपाज्ञानं','ब्रह्माज्ञानवादः' इत्यादि प्रसिद्धा अविद्या प्रत्यक्षानुमानश्रुतिस्मृत्यर्थापत्त्यादि प्रमाणसिद्धेति अविद्यायाः प्रमाणोपपत्तिः।

6. अविद्यायाः निवर्तकोपपत्तिः

'यदुक्तं निर्विशेषब्रह्मविज्ञानादेव अविद्यानिवृत्तिं वदन्ति श्रुतयः इति, तदसत्.. .'[12] इति श्रुतयः सविशेषब्रह्मज्ञानमेव उद्घोषयन्ति न तु निर्विशेषब्रह्मज्ञानं, तथा च निर्विशेषब्रह्मज्ञानस्य अविद्या निवर्तकत्वमपि नास्तीति अविद्यायाः निवर्तकानुपपत्तिः प्रदर्शिता श्रीभाष्ये। सा च निरस्यते अद्वैतामोदकारेण यथा– मायावादे अखिलं सर्वं मिथ्या भवति, तन्मूला चाविद्या। तस्याः अविद्यायाः निवर्तकं भवति निर्विशेषब्रह्मज्ञानम्, तच्च ज्ञानं श्रुतयः एव बोधयन्ति। तत्त्वमसि (छा.उ.६/८/७), अयमात्मा ब्रह्म (बृ.उ.२/५/२९) इत्यादीनि

6 Ibid, पृ.सं ४९२ ।
7 अद्वैतामोदः, वासुदेवशास्त्रि अभ्यङ्करः, आनन्दाश्रममुद्रणालयः, १९७५, पृ.सं १६३।
8 श्रीभाष्यम्– प्रथमखण्डम्, रामानुजाचार्यः, मेडिकल् हाल् मुद्रणालयः, काशी, पृ.सं ५२४।
9 अद्वैतामोदः, वासुदेवशास्त्रि अभ्यङ्करः, आनन्दाश्रममुद्रणालयः, १९७५, पृ.सं १७५ ।
10 Ibid, पृ.सं १७५ ।
11 श्रीभाष्यम्– प्रथमखण्डम, रामानुजाचार्यः, मेडिकल् हाल् मुद्रणालयः, काशी, पृ.सं ५२५।
12 Ibid, पृ.सं ५४५ ।

जीवब्रह्मैक्यप्रतिपादकानि श्रुतिवाक्यानि निर्विशेषब्रह्मज्ञानमेवोद्बोधयन्ति इति। तत्र श्रुतिवाक्येषु सविशेषत्वोक्तिर्भवतीत्यतः तेन सविशेषब्रह्मज्ञानमेव प्रतिपाद्यते इति सविशेषब्रह्मज्ञानस्य अमृतत्वप्रापकत्वं पुनराक्षिप्यते श्रीभाष्यकारेण। किन्तु विशेषणानि अविद्यामूलकानीत्यतः सविशेषब्रह्मज्ञानस्य साक्षादमृतत्वप्रापकत्वं नास्ति, तेन अविद्यानिवृत्तिः सम्पूर्णतया न भवतीत्यतोऽपि मोक्षो न भवति। तथा च निर्विशेषब्रह्मज्ञानादेव अविद्यानिवृत्तिर्भवति मोक्षश्च तथा भवतीति निर्विशेषब्रह्मज्ञानस्य अविद्यानिवर्तकत्वं साधयित्वा अविद्यानिवर्तकोपपत्तिं स्थापयति।

7. अविद्यानिवृत्त्युपपत्तिः

'यत्पुनरिदमुक्तं ब्रह्मात्मैकत्वविज्ञानेनैव अविद्यानिवृत्तिः युक्तेति, तदयुक्तं...'[13] इत्यविद्यानिवृत्त्यनुपपत्तिः श्रीभाष्ये। अद्वैतामोदे च अस्याः निरसनमेवं वर्तते–'अतो निवृत्तिरप्यस्य अविद्यायाः न दुर्वचा। अविद्यां तत्त्वतो ज्ञात्वा मुच्यते कर्मबन्धनात्।। २२ ।।'[14] इति। निर्विशेषब्रह्मज्ञानम् अविद्यानिवर्तकमित्युपपन्नम्। तदर्थमविद्यायाः तत्त्वतो ज्ञानमथवा अविद्यायाः अविद्यात्वेन ज्ञानमावश्यकम्। सुखदुःखादयो मिथ्येति ते नात्मगुणाः इति च बुद्धिरावश्यकी। तथा सुखलाभार्थं दुःखनिवारणार्थञ्च प्रवृत्तिर्न भवति, कर्मणः मुक्तिश्च भवति। नात्र बन्धस्य परमार्थत्वम्।

आचार्यः 'तस्मात् दुःखात्मक'मित्यादि विष्णुपुराणस्थश्लोकमुदाहृत्य ज्ञानात्मकं ब्रह्मैव सत्यं,'आत्मा वा अरे द्रष्टव्यः..' (बृ.उ. २/४/५) इत्यादि श्रुतिषु कर्तृकर्मभेदेन प्रतीयमानो भेदः, लोके प्रसिद्धः शिवविष्णुरित्यादि भेदोऽपि औपाधिकः एव इति प्रतिपादयति। तथा भेदज्ञानमिदं निर्विशेषब्रह्मज्ञानादेव निवर्तते इति च अविद्यायाः निवृत्त्युपपत्तिरपि प्रतिपादिता स्थापिता च।

अविद्या सृष्टिकाले स्वयं भिन्ना भवति, अयं प्रपञ्चः तादृशभेदमूलकोऽपि। एवम् अविद्याप्रतिबिम्बितचैतन्यं जीवोऽपि परमात्मनः सकाशात् भिन्नः भवति, तथा भेदज्ञानं भवति। अविद्यायां, तस्याः परिणामभूते बुद्ध्युपाधौ च प्रतिबिम्बितो जीवः 'यदा च पूर्वकृतसुकृतौघवशान्निर्मलान्तःकरणः सद्गुरुणोपदिष्टः सन्नेतदविद्यास्वरूपं यथात्म्येनावगच्छति तदा सद्य एव मुक्तो भवति'[15] इति प्रतिपाद्य श्रीभाष्ये रामानुजाचार्योक्त अविद्यायाः सप्तविधानुपपत्तिं निरस्य अविद्योपपत्तिं संस्थाप्य सिद्धान्तसंरक्षणं कृतवानाचार्यो वासुदेवशास्त्रि अभ्यङ्करः स्वग्रन्थे अद्वैतामोदे।

**सहायकग्रन्थाः**


१. अद्वैतामोदः, वासुदेवशास्त्रि अभ्यङ्करः, आनन्दाश्रममुद्राणालयः, १९७५ ।
२. श्रीभाष्यम्– प्रथमखण्डम्, रामानुजाचार्यः, मेडिकल् हाल् मुद्रणालयः, काशी, १८८६ ।
३. Comans Michael, 'Advaitāmoda, A study of Advaita and Viśiṣṭādvaita', Orient book distributers, 1986.
४. R. Thangaswami, ABibiliographical Survey of Advaita Vedanta Literature [1](Sanskrit), University of Madras, 1980.
५. Swami Nikhilananda, 'Vedāntasāra of Sadānanda', Advaita Ashrama, Mayavati, 1931.
६. DaśopaniṣadSruthipriyaBhāṣābhāṣyam (Vol I, II, Malayalam), Narendrabhooshan, DC Books, Kottayam, 2012.


****************

13 Ibid, पृ.सं ५९२ ।
14 अद्वैतामोदः, वासुदेवशास्त्रि अभ्यङ्करः, आनन्दाश्रममुद्रणालयः, १९७५, पृ.सं १९२ ।
15 Ibid, पृ.सं १९३ ।

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# मीमांसादर्शने कर्मसिद्धान्तः - एकम् अध्ययनम्

**Loopamudra Goswami**
Research Scholar
Kumar Bhaskar Varma Sanskrit & Ancient Studies University
Dhamdhama Road, P.O. : Nalbari-781337, Assam
E-mail – loopamudragoswami03@gmail.com
Mobile - 7896748106

**प्राक्कथनम् –**

भारतीयदर्शनस्य ऐतिहासिकविकासक्रमः वेदवत् वर्तते । यथा वेदो अनादिः तथैव दर्शनानि अपि अनादिकालाद्विकसितानि । अपि च भारतीयानां दार्शनिकज्ञानानां विचाराणां धर्माणाञ्च आश्रयः वेदा एव सन्ति । अतएव वेदस्य भारतभुवौ प्राणवत्स्थानमस्ति । वेदमूलकत्वात् दर्शनपरम्परायां वेदप्रामाण्यवादीरूपेण षड्दर्शनपरम्पराः प्रचलन्ति । याः खलु आस्तिकनाम्ना अभिधीयन्ते । यथा सांख्ययोग-न्यायवैशेषिक मीमांसावेदान्ता इति । अपराणि त्रीणि दर्शनानि नास्तिकदर्शनानि सन्ति, यथा चार्वाकबौद्धजैनानि इति । तथा च नास्तिकानि वेदनिन्दकरूपेण प्रसिद्धानि [1] इति । एवम् आस्तिकनास्तिकभेदेन भारतीयदर्शनं द्विविधं दृश्यते । तत्र मीमांसादर्शनं षड्षु दर्शनेष्वन्यतममस्ति इति प्रथितमेव । तच्च मीमांसादर्शनं पूर्वमीमांसा अथवा कर्ममीमांसात्वेन ख्यातमस्ति ।

मान् पूजायाम् इत्यस्माद्धातोः मानेर्जिज्ञासायाम् इति वार्तिकेन जिज्ञासारूपार्थे सन् प्रत्ययो विहितः ततः निष्पन्नो अयं मीमांसा- शब्दः । यथा -मान्-सन्-टाप् स्त्रीलिंगविवक्षायाम् इति । वस्तुतस्तु मान् धातुः पूजा–जिज्ञासा-विचारार्थे व्यवह्रियते । यथा अर्थसंग्रहे- अतो धर्मविचार-शास्त्रमिदमारम्भणीयम्[2] इति । पुनः भामत्यामुच्यते- पूजितविचारवचनो मीमांसाशब्दः[3] । परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलतया च विचारस्य पूजितता इति । सन्दिग्ध वेदवाक्या-र्थविचारात्मकं मीमांसाशास्त्रमिति सिद्ध्यति । अर्थात् अस्य वेदवाक्यस्य अयमर्थो न वेति संशये सति तन्निर्णयोपाय-भूतन्यायनिबन्धनं शास्त्रं मीमांसाशब्दस्य अर्थः । इतोऽपि वेदेषु विचारनिर्णयार्थे पुनः कुत्रचित् व्याख्यानार्थे अपि मीमांसाशब्दस्य प्रयोगः दृश्यते । तथा तैत्तरीयसंहितायाम् - उत्सृज्यां नोत्सृज्यां इति मीमांसन्ते ब्रह्मवादिन[4] इति । यतोहि कर्मकाण्डविषयकवेदवाक्यानि अत्र विचार्यन्ते अतएव शास्त्रमिदं कर्ममीमांसानाम्ना ज्ञायते । पुनः ज्ञानकाण्ड-विषयकवाक्यार्थविचारः उत्तरमीमांसादर्शने जायते । उभयोः विचाराः अपि स्वतन्त्राः वर्तन्ते । अस्मिन् शोधपत्रे पूर्वमीमांसादर्शनस्य कर्मवादसिद्धान्तः, तेषां राद्धान्तानां व्यवहारिकमूल्यम्, तथा अध्यात्मवादिनां कृते अयं पक्षः कथं सोपानवत् अस्ति एवं वस्तुतस्तु कर्मवादः उपयोगी न वा इत्यादि विषयाः अपि मया व्याख्यात्मकशैल्या अग्रे आलोच्यन्ते । व्यवहारिकमूल्यम्, तथा अध्यात्मवादिनां कृते अयं पक्षः कथं सोपानवत् अस्ति एवं वस्तुतस्तु कर्मवादः उपयोगी न वा इत्यादि विषयाः अपि मया व्याख्यात्मकशैल्या अग्रे आलोच्यन्ते ।

**कर्ममीमांसा-**

कर्मगतिश्चित्रा दुर्विज्ञाना चेति[5]। मानवजीवनस्य रहस्यमयः विषयः सः एव यत् – कर्मणः का परिभाषा तज्जातं फलञ्च किम्।

---

1. योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः । स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ मनुस्मृतिः, २-११ ।
2. कामेश्वरनाथ मिश्र, अर्थसङ्ग्रहः, पृष्ठ सं. ४ ।
3. आचार्यजगदीशशास्त्री, भामती, पृष्ठ, १७ ।
4. तैत्तरीयसंहिता, ५-७-१ ।
5. रामप्रसाद, दा योग आफ पतञ्जलि, पृष्ठ, ११० ।

कर्मज्ञानं जीवने किं करणीयं किं न आचरणीयं तत् पाठयति । अतिसम्प्रति तद्ज्ञानाभावात् समाजे व्यभिचारो दृश्यते । मानवयोनिः कर्मयोनिः अस्ति । अतः यदि वयं कर्मसिद्धान्तं न सम्यक्तया अवगच्छामः तर्हि पुनर्जन्मनः व्यर्था प्रक्रिया बारं बारं प्रचलेत् । मनुष्याः परमलक्ष्यं प्राप्तुम् असमर्थाः भविष्यन्ति ।

अतएव श्रीमद्भगवद्गीतायामपि भगवता कर्मविज्ञानं प्रतिपादितं बहुत्र । कर्ममीमांसा साधारणतः सार्वभौमहितसम्बन्धिनी, धर्मानुकूलिनी, शान्तिप्रदायिनी, शास्त्रगामिनी, ईश्वरीयव्यवस्थानुकूला अस्ति । प्रायः चार्वाकं विहाय अन्यानि दर्शनानि कार्यकारण भावसिद्धान्तं प्रतिपादयन्ति । तेषु केचन सत्कार्यवादिनः सन्ति, केचन असत्कार्यवादिनः ।

सत्कार्यवादिनां मते कार्यम् उत्पत्तेः प्राक् कारणे विद्यते । असत्कार्यवादिनां मते कार्यं, उत्पत्तेः प्राक् कारणं न विद्यते । कारणं कार्यस्य सहकारीमाध्यमं भवति । उभयत्र कारणाधारेण सहायेन वा कार्यस्य उत्पत्तिः जायते इति सिद्धान्तः । बौद्धदर्शने तमेव सिद्धान्तं प्रतीत्यसमुत्पादसंज्ञया विवृणितम् । विना कारणं किमपि कार्यं नोत्पद्यते । एवं कर्मनियमस्यापि एषः एव सिद्धान्तोऽस्ति । प्रत्येक्कर्मणां फलं भवति । विना कर्म फलं नोत्पद्यते । कर्म कारणं, फलं तस्य कार्यम् इति निगुढार्थः । मनुष्याः स्वस्य कर्मणः कृते स्वयमेव उत्तरदायिनः सन्ति । एतत् सत्यम् आधुनिकैरपि स्वीकृतम् - 'what you serve is what you deserve' । भारतीयदर्शने विषयद्वये विशेषावधानं दीयते । तौ स्तः - ज्ञानं कर्म च । लौकिकदृष्टौ सुखतो जीवनयापनाय उत्कृष्टस्थानं भजते ज्ञानम् । एवं कर्मणः परिभाषा आचारः आचरणं वा । शुद्धकर्मभावनया परिपूरितः पुरुषः सात्त्विकचिन्तनेन सत्यरहस्यम् अवज्ञातुं समर्थः भविष्यति । अतएव मोक्षाधाररूपं कर्मसिद्धान्तं भारतीयविद्वांसः अङ्गीकुर्वन्ति । उच्यते च-

श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः । चोदनालक्षणैः साध्या तस्मात् तेष्वेव धर्मता ।।[6]

**मीमांसादर्शने कर्मसिद्धान्तः**

भारतीयदर्शनस्य सर्वासु विचारधारासु कर्मवादः स्वीक्रियते । कर्मन् शब्दः डुकृञ् करणे[7] इति धातुना सह मनिन् प्रत्ययसंयोगात् निष्पन्नो (जायते) । यस्यार्थोऽस्ति- कार्यम्, कर्तव्यम्, व्यवसायो प्रवृत्तिर्वा । आस्तिक-नास्तिकभेदेन सर्वाणि दर्शनानि स्वस्य दर्शने कर्मसिद्धान्ताः प्रतिपादयन्ति । अधुना मीमांसादर्शने कर्मसिद्धान्तः विस्तरेण मया आलोचितः । कर्मेति मीमांसकाः । अर्थात् यज्ञीयकर्मकाण्डस्य अनुष्ठानमेव मीमांसकानां कर्मसिद्धान्तोऽस्ति । मीमांसकाः कर्म एव धर्मनाम्ना उच्यन्ते । अत्र कर्म इत्युक्ते वेदविहितकर्म । तस्मात् वेदविहितकर्मणः एव मनुष्याणां व्यक्तित्त्वस्य अभिवृद्धिः जायते ।

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् । आयुष्यं तेज आरोग्यं देहि मे एतत् कर्मम् ॥[8]

अन्ये दर्शने ईश्वरस्य यत् स्थानम् अस्ति , तद् स्थानं मीमांसायां कर्मण अस्ति, यतोहि वेदविहितकर्म एव धर्मोऽस्ति । यथा अर्थसंग्रहे लौगाक्षिभास्करपादेन उच्यते – यागादिरेव धर्मः । तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म[9] इति । वेदविदितकर्मफलानां विषये मीमांसकाः द्विधा विचारयन्ति । मीमांसादर्शनस्य लब्धख्याति आचार्यः कुमारिलभट्टपादस्तु ब्रूते धार्मिककर्मणाम् अनुष्ठाने इष्टसाधनज्ञानमेव कारणम् । प्रभाकरमते तु कार्यताज्ञानमेव कारणपदेन व्यपदिश्यते । अनेन मतेन वेदविहितकृत्यानामनुष्ठानां कर्तव्यावबुध्यैव करणीयं न सुखोपलब्धिबुद्ध्या । परन्तु कुमारिलमते इच्छाविशेषस्य सिद्ध्यर्थमेव कर्मविशेषं कर्तव्यम् ।

---

6. सुचरित मिश्र, मीमांसाश्लोकवार्तिकम्, पृष्ठ, ११६ ।
7. पाणिनीयधातुपाठः, ८-१० ।
8. हरिषदत्त, एडभान्सेस एण्ड स्कोलारली रिसार्ज इन एलायेड एडुकेशन, पृष्ठ, ४ ।
9. कामेश्वरनाथ मिश्र, अर्थसङ्ग्रहः, पृष्ठ, ११ ।

इत्थम् इदं स्पष्टम् अस्ति यत् प्रभाकरमते निष्कामकर्मयोगदृष्टैव कार्याणि कर्तव्यानि । श्रीमद्भगवद्गीतायाः कर्मयोगस्य प्रभावः अत्र स्पष्टतया दृश्यते ।

मीमांसादर्शनानुसारं वेदप्रतिपादितकर्मणां भेदाः यथा –नित्य- नैमित्तिक- प्रायश्चित्त - काम्य-उपासनादयः । अत्र कर्म इत्युक्ते क्रियते इति कर्म । नित्यकर्म – वेदविहितं कर्मेदं प्रतिदिनं करणीयं द्विजातिनां कृते इदं कर्म कर्तव्यमस्ति । यथा – प्रातःकाले आरध्यस्मरणम्, सन्ध्या –जप–वन्दनादि । तस्य अकरणे प्रत्यवायजनकत्वम् । उक्तं चापि वेदान्तसारे- नित्यान्यकरणे प्रत्यवायसाधनानि संन्ध्यावन्दनादीनि[10] इति । अत्र उद्धृतिरियं प्रासंगिकः । यतोहि, व्यवहारसम्पादनार्थम् उत्तरमीमांसाकाः पुर्वमीमांसकानामेव सरणिमनुसरन्ति । नैमित्तिककर्म-निमित्त पूर्वकं वेदप्रतिपादितं कर्म नैमित्तिककर्म अस्ति । कर्मेदं निर्धारितितिथिपक्षे एव करणीयम्। यथा– राहूपरागे स्नानादि, व्रतादि, श्राद्धादि, यज्ञोपवीतजातकर्मादि कर्माणि । कर्तव्यानि कुमारिलभट्टानुसारं पूर्वोक्तकर्मादीनाम् अनुष्ठाने पापक्षयो जायते, तद्विपरीते पुंसाः पापभोगिनः भवन्ति । प्रभाकरमीमांसानुसारं नैमित्तिककर्म महात्मभिः निष्कामभावेन कर्तव्यम् । इदं कर्म तु विशेषावसरे समापन्ने करणीयम् ।

प्रायश्चित्तकर्म – प्राय अर्थात् पापः, चित्तः विशोधने इत्यर्थः । पापनाशाय प्रायश्चित्तकर्मादीनामपि व्यवस्था वेदे सन्ति । यथा- चान्द्रयणादीनि व्रतानि ।

काम्यकर्म – काम्यकर्म कामनासिद्ध्यर्थे करणीयम् । कर्मेदं वैकल्पिकम् । यतोहि काम्यकर्मणि कर्तुः स्वतन्त्र्यं वर्तते । यथा – पुत्रेष्टियज्ञः, स्वर्गकामयज्ञादि । अस्य अकरणे दोषो न संजायते । तत्र काम्यन्तु तदेव कथ्यते यत् कदाचित् कामनया क्रियते । अत्र स्वर्गकामो यजेत वाक्यानुसारं स्वर्गप्राप्तेः कामनया यजनरूपं कर्म कर्तव्यम् ।

उपासना – स्तुतिमूलकम् इष्टदेवतायाः ध्यानमेव उपासना । अर्थात् स्तुति एव देवोपासना अस्ति । मीमांसकानां मते मन्त्र एव देवतास्वरूपम् अस्ति । अत एव तैः मन्त्रैः स्तूयन्ते । यस्मात् मन्त्ररूपकर्मणा पुण्यफलं लभ्यते ।

इतोऽपि शुभाशुभकर्मोपदेशावसरे मीमांसकाः नित्यादिकर्मणाम् अनुष्ठानम् अपि तु कलञ्जं न भक्षयेत्[11]। असत्यं मा वद[12], इत्यादिरूपेण निषिद्धकर्म वर्जितव्यम् इत्येवं प्रतिषिद्धकर्मणः विषयेऽपि उत्तीर्यते । एवं विविधानि कर्माणि दृश्यन्ते वेदेषु- काम्यप्रति-सिद्धनित्यनैमित्तिकानि । विश्वेऽस्मिन् कर्मैव श्रेष्ठं वस्तु । कर्मणा फलमवश्यमेव प्राप्यते । प्रसंगेऽस्मिन् अचार्यः बादरायणः ईश्वरमेव फलप्रदायकम् इति मन्यते । यज्ञैरेव तत्तफलानामुत्पत्तिः भवति । यद्यपि कर्मानुष्ठानस्य फलप्राप्तेश्च समये व्यवधानं दृश्यते यतोहि कर्म अनुष्ठीयमानमेव सद्यः फलदायकं न भवति प्रत्युत तत्कर्मफलं कालान्तरे सम्भवति । अतएव वैषम्यमिमं दूरीकर्तुं मीमांसादर्शने अपूर्वनामकसिद्धान्तः प्रतिपादितः कर्मणः । यस्मात् कर्मकरणाद् अपूर्वं जायते, अपूर्वाच्च फलमुत्पद्यते । शंकराचार्यस्तु अपूर्व-कर्मफलमध्यवर्तिन्या दशाविशेषफलोत्पतेः पूर्वावस्था वा स्वीकरोति । अपूर्वस्य कल्पना तु मीमांसकानां प्रधानसिद्धान्तोऽस्ति । कर्मानुष्ठानं निष्कामभावनया करणीयम्, तथा च सदैव साधुकर्म एव करणीयम्तत् सुखोत्पतेः हेतुरिति मीमांसा शिक्षयति । पाश्चात्यपण्डितः जर्मनतत्त्वज्ञः मैनुअब – कान्तमहाभागः कर्तव्यविषये मीमांसावद् मन्यते । अस्य मतानुसारं तु कर्तव्याणां सम्पादनं निरपेक्षबुद्ध्या एव करणीयं जनैः न तु स्वार्थ-बुद्ध्या । इत्थमपूर्वमेव कर्मफलञ्च बाधयितृश्रृंखला वर्तते ।

**उपसंहारः**

मीमांसादर्शने कर्मणः तात्पर्यं यज्ञसम्बन्धिकर्मकाण्डस्य अनुष्ठानमस्ति। अस्य दर्शनस्य अयमेव आशयः यत् – वैदिकयागादिकर्म विना

१०. डा. यमुनाराम त्रिपाठी, वेदान्तसारः, पृष्ठ, ९ ।
११. जगदीश मिश्र, भारतीय दर्शन, पृष्ठ, ५१० ।
१२. तत्रैव ।

पुरुषस्य स्वर्गप्राप्तिः न भवति । अपि तु दर्शपुर्णमासादि यज्ञोऽपि अनुष्ठानात् पश्चादेव फलप्रदायको भवति । कार्य – कर्मफलयोः मध्यवर्तिनी एषा योग्यता अपूर्वनाम्ना अभिधीयते इति मया पूर्वमेव आलोच्यते । उक्तं चापि –

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा । योग्यताशास्त्रगम्या या सा परापूर्वमिष्यते ।।[13]

अपूर्व अथवा योग्यता योगस्य सूक्ष्मावस्था अस्ति, यत् कर्मणः उपजायते पुनः फलप्राप्तिपर्यन्तं यजमानस्य आत्मनि तिष्ठति इति । तस्मात् कर्मणा एव पुरुषस्य स्वर्गप्राप्तिः भवति। तत्र पुरुषस्य धर्माधर्मनिरूपणे वेद एव प्रमाण्यम् । वेद एव यजमानं मनुष्यं वा विधि-प्रेरणा-वाक्येन कर्मणि नियोजति । पुनः वेदे विश्वासपूर्वकं विहित- कर्माचरणैः मनुष्याः सद्गतिं प्राप्नुवन्ति । तत्र वेदस्य विधिकर्मणां प्रतिपादनं मीमांसाशास्त्रं करोति । अत एव उच्यते इति कर्तव्यता भागं मीमांसा पूरयिष्यतीति[14] इति कर्तव्यता अर्थात्- कर्मसम्पादनं किमर्थं करणीयम्, कथं करणीयम्, केन करणीयम्, कुत्र करणीयम्, कदा करणीयम् इत्यादि मीमांसा व्यपस्थापयति । यतोहि धर्मः अपि इति कर्तव्यतायाः पाठं पाठयित्वा मनुष्यान् त्रायति नरकात्, अतएव धर्म –कर्मणोः प्रत्यक्षसम्बन्धं दृश्यते । धर्मः यदि साध्यः तर्हि कर्म साधनम् अस्ति । कर्मणां लोकोपादेयत्वमपि विद्यते । यथा कर्मफलं यदि अङ्गीकुर्मः चेत् किञ्चिदपि कर्मकरणसमये जागरुकाः भवामः । किञ्च सन्ततं सत्कर्मकर्तुं सज्जाः भवामः एवम् असत्कर्मणः दूरं स्थित्वा नैजं जीवनं रक्षयितुं पारयामः । कर्मफलमेव अस्मान् पाठयति - न हिंसेत् न द्विष्टात् इत्यादि । वेदादिकर्म अस्मान् अनुशासनमपि शिक्षयति , चित्तमलं दूरीकरोति , शारीरिक – मानसिकशक्त्योः अभिवर्धयति । उपासनादिकर्म मनोस्वास्थ्यमपि रक्षति । इतोऽपि सर्वेषां भारतीयदर्शनानां मोक्षप्राप्तिरेव मूलोद्देश्यम् । प्रपञ्चसम्बन्धविलयो मोक्षः[15] इति मोक्षस्वरूपमुक्तं मीमांसकैः। जगता सह आत्मनः सम्बन्धविनाशस्यैव संज्ञा मोक्षः । भोगायतनं शरीरं भोगसाधनानि इन्द्रियाणि भोगविषयाः पदार्थाश्च । एतेषां त्रयानां बन्धनानामात्यन्तिको विनाश एव मोक्षः । मीमांसामते काम्यनिषिद्धकर्माणि बन्धनजनकानि । परन्तु नित्यनैमित्तिककर्माणि एतेभ्यः दोषेभ्यः रहितानि सन्ति । अत एतानि कर्माण्येव मोक्षप्रदायकानि सन्ति मीमांसामते । कर्म –उपासना – शुद्धज्ञानाविर्भाव सहायकाः सन्ति, यस्मात् मोक्षप्राप्तिः भवति इत्येवं मीमांसाचार्याः कर्मविज्ञानस्य उपादेयत्वमुपदिशन्ति । यतोहि मीमांसकाचार्याः कर्ममोक्षयोः मध्ये अन्योन्याश्रयसम्बन्धोऽस्ति इति मन्यते, पुरुषस्य कृतकर्म एव तस्य बन्धनकारणम् इति ।

तत्र काम्यनिषिद्धकर्माणि बन्धनस्वरूपाणि सन्ति । अन्यत्र नित्यनैमित्तिकादि कर्तव्यपालनेन पुरुषः परमपुरुषार्थलब्धुं शक्नोति । यद्यपि मीमांसकाः कर्माणि एव मोक्षसाधनानि इति स्वीकुर्वन्ति, परन्तु आत्मज्ञानमपि अनुपेक्षणीयं तन्मते । मोक्षप्राप्तौ प्रधानकारणं कर्म अप्रधानकारणञ्च ज्ञानमेवास्ति । अतः कर्तव्यशास्त्रदिशा मीमांसाज्ञानकर्मसमुच्चयं मन्यते इति शम् ।

**सन्दर्भग्रन्थाः, मुख्यसहायकग्रन्थाः**


1. अर्थसंग्रहः. व्याख्याकारः कामेश्वरनाथ मिश्र. वाराणसी; चौखम्बा सुरभारती प्रकाशन, २०१६
2. तन्त्रवार्तिकः, व्याख्याकारः गंगानाथ झॅ.कोलकाता; एसियाटिक सोचाइति ऑफ वेंगल , १९०८
3. पाणिनीयधातुपाठः निस्स्वरः. संस्कृतडाक्यूमेंट ऑर्गेनाइजेशन, २०१८
4. मीमांसाश्लोकवार्तिकम्. व्याख्याकारः सुचरित मिश्र. संशोधकः के.साम्बशिवशास्त्री. नवदेहली; राष्ट्रियसंस्कृतसंस्थानम्, २०१४


---

१३. गंगानाथ झा, तन्त्रवार्तिकः, पृष्ठ, ३९४ ।
१४. जगदीश मिश्र, भारतीय दर्शन, पृष्ठ, ५२० ।
१५. डा. विजयशङ्कर पाण्डेयः, डा. जमुना पाठकः, संस्कृत निबन्ध मकरन्दः, २, पृष्ठ, ७२ ।

5. भामती. सम्पादकः अचार्यः जगदीश शात्री. वाराणसी; मोतिलाल बनारसी दास, २०१०

6. मनुस्मृतिः. टीकाकारः पण्डित श्री हरगोविन्द शास्त्री. वाराणसी; चौखम्बा संस्कृत सीरीज अफिस, २०११

7. वेदान्तसारः. व्याख्याकारः डाँ यमुनाराम त्रिपाठी. वाराणसी; शारदा संस्कृत संस्थान

**सन्दर्भग्रन्थाः**

१. जगदीश चन्द्र मिश्र, भारतीय दर्शन. वाराणसी; चौखम्बा सुरभारती प्रकाशन, २०१६

२. डॉ. विजय शंकर पाण्डेयः डॉ. यमुना पाटकः, संस्कृत निबन्ध मकरन्दः. वाराणसी; चौखम्बा संस्कृत सीरीज आफिस, २०१६

**आन्तर्जालीयस्रोतांसि** -

1. https://archive.org/details/dli.language.1931
2. https://books.google.com/books/about/The_Yoga_Darsana_Of_Patanjali_With_The_S.html?id=uyB4NbDYQ18C

***********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# वैष्णवदर्शनेषु अचिन्त्यभेदाभेददर्शनस्य स्थानम्

**Shaibal Acharya**
Ph. D. Research Scholar
Department of Sanskrit and Philosophy,
Ramakrishna Mission
Vivekananda Educational and Research Institute,
Belur Math, Howrah-711202, West Bengal.
Contact no : 9875366501
Email Id : joyachrya1995@gmail.com

**उपोद्घातः**

धर्मार्थकाममोक्षपुरुषार्थचतुष्टयेषु मोक्ष एव परमं चरमञ्च लक्ष्यं त्रैगुण्यवशवर्तिनां मनुजनूनामित्यत्र नास्ति विवादावसरः। मोक्षश्च सततं जननमरणप्रवाहप्रपञ्चे संसरतः जीवस्य स्वस्वरूपसच्चिदानन्दावाप्तिरूपः। विदितचरमेवैतत् समेषां यत् दर्शनानुसारिण्या सरण्या एव विदित्वा तत्त्वं परमार्थतः आत्मसाक्षात्काररूपः मोक्षः प्राप्यते जीवैः। यद्यपि 'नदीनां सागरो गति'रितिवत् दर्शनानां समेषाम् आत्मतत्त्वावबोधनाय एव प्रयासः तथापि समेषां दर्शनानां न साक्षात्तदर्थप्रतिपादकत्वमपि तु परम्परया इति तत्तद्दर्शनानुधावनेन सम्यक् ज्ञायते। तस्मात् साक्षादात्मतत्त्वप्रतिपादनात् वेदान्तदर्शनापराभिधम् उत्तरमीमांसादर्शनम् अपरदर्शनापेक्षया उत्तुङ्गविष्टरमधिरोहति। इदमुत्तरमीमांसादर्शनं श्रुतिस्मृतिन्यायप्रस्थानानां व्याख्यानभेदात् अद्वैत-द्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-अचिन्त्यभेदाभेदप्रभृतिषु प्रायः दशाधिकेषु सम्प्रदायेषु विभक्तम्। तेषु भागेषु भक्तिपरायणमद्भुतव्याख्यानम् अचिन्त्यभेदाभेददर्शनम्। बङ्गेषु उद्भूतं विस्तृतं चेदं चैतन्यसम्प्रदायगतदर्शनमाभारतं वैष्णवदर्शनेषु उत्तुङ्गविष्टरमधिरोहति इत्यत्र नास्ति सन्देहावसरः।

**पञ्चमस्त्वचिन्त्यभेदाभेदः–**

श्रीश्रीकृष्णचैतन्यस्य दीक्षागुरोः ईश्वरपुर्याः गुरुः माधवेन्द्रपुरी माध्वसम्प्रदायभुक्तः आसीत्। तस्मात् चैतन्यदेवोऽपि माध्वसम्प्रदाया- न्तर्गतः इति केषाञ्चिन्मतम्। किञ्च, तेषां नये पद्मपुराणोक्तं श्री-ब्रह्म-रुद्र-सनकनामकं वैष्णवं सम्प्रदायचतुष्टयमतिरिच्य नान्यः सम्प्रदायः भवितुमर्हति। श्रीसम्प्रदायाचार्यः रामानुजः, ब्रह्मसम्प्रदायाचार्यः मध्वः, रुद्रसम्प्रदायाचार्यः विष्णुस्वामी, चतुः सनसम्प्रदायाचार्यः निम्बार्कः। वङ्गीयवैष्णवसम्प्रदायः ब्रह्मसम्प्रदायस्य माध्वसम्प्रदायस्य वा एका शाखा। माध्वनये ईश्वरः सेव्यः, जीवः सेवकः। गौडीयसम्प्रदायस्यापि तन्मतम्। परन्तु केवलं सेव्यसेवकभावयोः साम्यं प्रदर्श्य गौडीयसम्प्रदायस्य माध्वान्तर्गतत्वं प्रमाणयितुं न शक्यते। तथा सति समग्रवैष्णवसम्प्रदायस्य श्रीब्रह्मादिभेदः न स्यात्।उपरन्तु तयोः भेदविषयकानि विद्यन्ते बहुनि कारणानि ।

**उपाधिभेदः** – माध्वाः सन्न्यासाश्रमे 'तीर्थः' इति उपाधिमङ्गी- कुर्वन्ति, तत्र माधवेन्द्रेश्वरानन्दयोः सन्न्यासाश्रमे 'पुरी' इति उपाधिः आसीत्। एतेनैव स्पष्टतः भेदः दृश्यते।

**उपास्यभेदः** – माध्वानामुपास्यः वैकुण्ठेश्वरः नारायणः, परन्तु गौडीयचैतन्यसम्प्रदायस्य उपास्यः व्रजविहारी श्रीकृष्णः। माध्वसाम्प्रदायिकाः वैकुण्ठेश्वरं नारायणमेव परब्रह्मरूपेण उपासन्ते। परन्तु गौडीयाः व्रजविलासिनं नन्दनन्दनं श्रीकृष्णमेव परब्रह्मरूपेणाङ्गीकुर्वन्ति। किञ्च, नारायणः श्रीकृष्णस्यैव प्रकाशः विलासरूपः इत्यामनन्ति।

**उपासनाभेदः** – उभयोः उपासनाप्रक्रियायामपि भेदः दरीदृश्यते। मध्वाचार्योपदिष्टभजनसम्बद्धा सर्वदर्शनसंग्रहस्य उक्तिः – 'भजनं दशविधं वाचा सत्यं हितं प्रियं स्वाध्यायः, कायेन दानं परित्राणं परिरक्षणं, मनसा दया स्पृहा श्रद्धाश्चेति। अत्रैकैकं निष्पाद्य नारायणे समर्पणं भजनम्॥'१ इति। तथाहि, माध्वविहितदशविधभजनेषु सत्यं हितं प्रियकथनं शास्त्रानुशीलनं चेति चत्वारि वाचिकभजनानि, दया स्पृहा श्रद्धा चेति त्रीणि मानसिकभजनानि, दानं परित्राणं परिरक्षणं चेति त्रीणि कायिकभजनानि।

एतेषु प्रत्येकं सम्पाद्य नारायणे समर्पणमेव भजनम्। परन्तु वर्णाश्रमादिधर्मपरित्यागपूर्वकं श्रवणकीर्त्तनादिशुद्धसाधनभक्तेः अनुष्ठानमेव गौडीयसम्प्रदायस्य उपासनानुष्ठानम्।

**लक्ष्यभेदः** – लक्ष्यविषयेऽपि विद्यते उभयोः महद्भेदः। पञ्चविधमुक्तिप्राप्तिपूर्वकवैकुण्ठगमनमेव माध्वानां मूलं लक्ष्यम्।२ गौडीय वैष्णवानान्तु ब्रजविलासिनः श्रीकृष्णस्य प्रेमसेवा एवैकमात्रं लक्ष्यम्, पञ्चविधमुक्तेः एकाऽपि तेषां न काम्या।

किञ्च, माध्वाः भेदवादिनः, गौडीयाश्च अचिन्त्यभेदाभेदवादिनः। उभयोः सम्प्रदाययोः जीवब्रह्मणोः सम्बन्धविषये विद्यते महती विमतिः।एवं सेव्यसेवकभावमतिरिच्य सर्वेषु विषयेषु माध्वगौडीययोः विद्यते महान् भेदः। अपि च, श्रीमन्मध्वाचार्यस्य एवं काश्चन उक्तयः सन्ति याः न केवलं शास्त्रविरुद्धाः अपि तु गौडीयानां हृदयविदारका अपि।श्रुतिस्मृत्यनुसारेण ब्रजगोप्यः कृष्णकान्ताः श्रीकृष्णस्य स्वरूपशक्तेः मूर्तविग्रहरूपाः, ताः न जीवतत्त्वभूताः।३ परन्तु श्रीमन्मध्वाचार्यः ताः 'अप्सरस्त्री' इत्येवंरूपेण प्रतिपादितवान्। तस्य नये अप्सरसः प्राकृताः स्वर्वासिन्यः रमण्यः, जीवतत्त्वभूताः, देहसुखभोगपरायणाः, स्वीयदेहेनापि अपरप्रीतिविधानेऽपि सङ्कोचहीनाः।४ अथच, ब्रजगोपीनां कृष्णसुखैकतात्पर्यमयप्रेम सर्व्वतोभावेन कामगन्धलेशहीनं तत् शास्त्रसम्मतम्।५ शास्त्रानुसारेण ब्रजगोप्यः भक्तकुलमुकुटमणयः, भगवतः प्रियतमाः, तासां प्रेम्णा एव सः वशीभूतः। श्रीकृष्णः स्वयमेव उवाच यत् ब्रह्मा, रुद्रः, वैकुण्ठेश्वरी लक्ष्मीदेव्यपि तस्य तथा न प्रियाः, यथा- गोप्यः६ । तत्र श्रीपादस्य मध्वाचार्यस्य नये भक्तौ गोप्यपेक्षया अष्ट- महिष्यः श्रेष्ठाः, ततः सहस्रगुणश्रेष्ठा नन्दगृहिणी यशोदा, ततः श्रेष्ठा देवकी, ततः श्रेष्ठः वसुदेवः, वसुदेवापेक्षया अर्ज्जुनः, अर्ज्जुनापेक्षया बलरामः श्रेष्ठः। ब्रह्माणमतिरिच्य नास्ति कोऽपि बलरामापेक्षया श्रेष्ठः भक्तः।७

किञ्च, श्रीकृष्णचैतन्यस्य नास्ति तादृशी कापि उक्तिः यत्र एवं प्रतीयते यत् तेन माध्वमतमङ्गीकृतम्, प्रत्युत तेन नाङ्गीकृतमित्यत्र विद्यते नैकानि प्रमाणानि। तथाहि, दक्षिणप्रदेशे भ्रमणकाले मध्वानुगतैः आचार्यैः तत्त्वविचारं कृत्वा माध्वमतस्यैव खण्डनं कृतं तेन। इत्यत्र श्रील कविकर्णपूरकृते 'श्रीचैतन्यचन्द्रोदयनाटके' श्रीचैतन्यदेवस्य वचनमपि८ प्रमाणत्वेन स्वीकर्तुं शक्यते। किञ्च, कृष्णचैतन्यस्य साक्षाच्छिष्याणां रूपसनातनप्रभृतिनां तथा तेषां शिष्याणां जीवगोस्वामिनां कृतौ माध्वमतानुकूलवचनाभावात् प्रतिकूलवचनावलोकनात् एतत् स्पष्टमेव प्रतीयते यत् गौडीयचैतन्यसाम्प्रदायिकाः न माध्वमतावलम्बिनः। एवं विचार्यमाणे चतुर्विधवैष्णवसम्प्रदायभिन्नः पञ्चमः अचिन्त्यभेदाभेद- सम्प्रदायः इत्यत्र नास्ति विवादावसरः।

**अचिन्त्यभेदाभेदपदनिर्वचनम्–**

भेदश्च अभेदश्च भेदाभेदौ इति द्वन्द्वसमासः, अचिन्त्यौ भेदाभेदौ अचिन्त्यभेदाभेदौ इति द्वन्द्वसमासः, अचिन्त्यभेदाभेदौ यस्मिन् दर्शने तत् अचिन्त्यभेदाभेददर्शनम्। अचिन्त्यानन्तशक्तिशालिनः परतत्त्वाश्रितशक्तिभिः सह परतत्त्वस्य युगपत् भेदाभेदरूपः अचिन्त्यः सम्बन्धः एव 'अचिन्त्यभेदाभेदवादः' इत्याख्येनाख्यापितः। गौडीयवैष्णव- नये भेदाभेदयोः युगपत् सहावस्थितिः नित्या सत्यञ्च। परन्तु अचि- न्त्यत्वात् मनुष्यमतौ न प्रतीयते, अतः शास्त्रोपदिष्टत्वात् स्वीकार्यम् । अप्राकृतविषयेषु शास्त्रमेव अभ्रान्तप्रमाणम् इति सम्प्रदायप्रसिद्धिः। अचिन्त्यस्य शास्त्रप्रमाणत्वमाचार्यशङ्करपादैरप्यङ्गीकृतम्।९ महाभारतेऽपि उक्तं – "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।"(महाभारते, भीष्मपर्वणि ५/१२) इति।उपनिषत्सु, ब्रह्मसूत्रेषु, तद्भाष्यभूतश्रीमद्भागवते, श्रीमद्भगवद्गीतायां श्रीविष्णु-पुराणेषु शब्दप्रमाणेषुसर्वतन्त्रसिद्धान्तः 'अचिन्त्यभेदाभेदवादः' ग्रथितः। एषः एव वादः श्रीचैतन्यदेवप्रचारितः गौडीयगोस्वामिभिः प्रपञ्चितः दार्शनिकः सिद्धान्तः। श्रीजीवगोस्वामिपादः स्वकृते सन्दर्भे तद्व्याख्यायां सर्वसम्बादिन्याञ्च 'अचिन्त्यभेदाभेदवादं' विस्तृतभावेन-प्रपञ्चितवान्। तेन श्रीभगवत्सन्दर्भे 'तस्मै समुन्नद्धविरुद्धशक्तये, नमः परस्मै पुरुषाय वेधसे' (४/१७/३३) इति श्रीमद्भागवतस्य श्लोक-मुद्धृत्य परमेश्वरस्य विरुद्धशक्तिसमूहस्य अचिन्त्यत्वप्रदर्शनार्थमुक्तं –"तासामचिन्त्यत्वमाह – आत्मेश्वरोऽतर्क्यसहस्रशक्तिः।

उक्तञ्चाचिन्त्यत्वम् – 'श्रुतेस्तु शब्दमूलत्वात्', 'आत्मनि चैवं विचित्राश्च हि' (ब्र.सू – २/१/२७-२८)" आत्मेश्वरोऽतर्क्यसहस्रशक्तिः।... उक्तञ्चाचिन्त्यत्वम् – 'श्रुतेस्तु शब्दमूलत्वात्', 'आत्मनि चैवं विचित्राश्च हि' (ब्र.सू – २/१/२७-२८)" इति।(श्रीभगवत्सन्दर्भः, अनुच्छेदः १४-१५)तथाहि, परमात्मा जीवानामीश्वरः, तस्य शक्तिसमूहः तर्कातीतः अचिन्त्यः अनन्तो वा। परमतत्त्वस्य युगपद्विरुद्धशक्तिमत्त्वं शक्तेः अचिन्त्यत्वञ्च ब्रह्मसूत्रस्य उपर्युक्ताभ्यां सूत्राभ्यां प्रपञ्चितम्। किञ्च,'बृहच्च तद्दिव्यमचिन्त्यरूपं' (मुण्डकोपनिषत् ३/७), 'अचिन्त्यः स आत्मा स विज्ञेयः'(माण्डूक्योपनिषत् १) 'अचिन्त्यमव्यक्तमनन्तरूपं'(कैवल्योपनिषत् १/६) 'अपाणिपादोऽह- मचिन्त्यशक्तिः' (कैवल्योपनिषत् २/११) 'अचिन्त्यरूपं दिव्यं सर्वेश्वरम- चिन्त्यमशरीरं' (सुबालोपनिषत्, खण्डः ८) प्रभृतिश्रुतिभिः परमात्मनः अचिन्त्यत्वं पुनः पुनः प्रतिष्ठापितम्।

पुनश्च गीतायामपि अचिन्त्यत्वं प्रख्यापितं भगवता - 'सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्।' (श्रीमद्भगवद्गीता ८/९) इति।विष्णुपुराणेऽपि पराशरमैत्रेयसम्बादे ब्रह्मणः अचिन्त्यत्वं परिस्फुटम् –'शक्तयः सर्वभावानामचिन्त्यज्ञान- गोचराः।'(१/३/१)इति। न केवलं तत्, 'अपाणिपादो जवनो ग्रहीता...' (श्वेताश्वतरोपनिषत् ३/१९) 'अणोरणीयान् महतो महीयान्' (श्वेताश्वतरो- पनिषत् ३/२०) 'तदेजति तन्नैजति तद्दूरे तद्वन्तिके' (ईशावास्योपनिषत् ५) इत्यादिभि श्रुतिभिः श्रीजीवगोस्वापादैरुक्तं'दुर्घटघटकत्वं ह्यचिन्त्यत्वम्' (श्रीभगवत्सन्दर्भः, अनुच्छेदः १६) ब्रह्मणः भूयशः प्रतिपादितं भवति उपनिषत्सु।

एवं परमात्मनः अचिन्त्यत्वं प्रतिपाद्य भेदाभेदौ प्रतिपाद्येते। तथाहि, परतत्त्वस्य स्वरूपशक्तेः, तटस्थाख्यायाः जीवशक्तेः, बहिरङ्गायाः मायाशक्तेः परिणतिः भगवत्परिकरः, भगवद्धाम, अनन्तमुक्तः बद्धजीवः अनन्तब्रह्माण्डश्च। अनयोः शक्तिशक्तिमतोः भेदः अभेदश्च उभयः स्वाभाविकः- एवं कपोलकल्पितमुदन्तं न प्रतिपाद्य श्रुतार्थापत्तिप्रमाणानुसारेण शब्दमूलकप्रमाणबलेन वा शक्तिमतः अचिन्त्यभेदाभेदवादप्रतिष्ठानपूर्वकं श्रुतिमन्त्रवेदान्तसूत्राणाञ्च समन्वयं साधितवन्तः गौडीयवैष्णवाः। उदाहरणपुरःसरमुच्यते यत् समुद्रतरङ्गयोः भेदः अभेदश्च वक्तुं न शक्यते। तथाहि, समुद्रस्य एकप्रदेशे उद्भूतः तरङ्गः एकत्र लयं प्राप्नोति। सः तरङ्गःजलमयत्वप्रभृतिगुणैः समुद्रात् यद्यपि अभिन्नः तथापि समुद्रनिष्ठगम्भीरत्वादिगुणायुक्तत्वात् पार्थक्यं भजते। यथा अग्नि- दाहिकाशक्योः, कस्तूरीगन्धयोः वा भेदः अभेदो वा वक्तुं न समर्थः कश्चित्। समुद्रतरङ्गयोः उदाहरणे, तरङ्गस्य समुद्रलीनत्वात् पृथग्रूपेण दर्शनायोग्यत्वात् ऐक्यं प्राप्नोति। तदा तरङ्गः समुद्रस्वरूपं प्राप्तः इति उच्यते। तथैव स्वकारणे ब्रह्मणि तेजःप्रभृतिस्थानीयांशे मुक्तिकाले लीयमानाः जीवाः ब्रह्मैक्यं प्राप्तवन्तः इत्युच्यते, परन्तु जीवानां स्वभावनिष्टपरिच्छेदत्वात अनन्तसुखघन- ब्रह्मत्वस्य प्राप्तिः न भवति। अतः, मुक्तिकालेऽपि जीवब्रह्मणोः पृथग्रूपेण दर्शनाभावात् अभिन्नता, क्वचिच्च परिच्छिन्नरूपेण अवस्थितत्वात् भिन्नत्वं परिलक्ष्यते।निर्णयस्त्वयमेव– यथा परिच्छिन्नानां नदीप्रवाहाणाम् अपरिच्छिन्नविचित्ररत्नादिमयसमुद्रत्वप्राप्तिर्न सम्भवति, केवलं बहिःसत्तालोपेनैव समुद्रतावाप्तिरित्युच्यते।

**प्रमाणानि** –

प्रमाणाद्धि प्रमेयसिद्धिः। अतः चैतन्यमतानुयायिनः स्वप्रमेय- सिद्ध्यर्थं प्रमाणानि स्वीकुर्वन्ति। परन्तु प्रमाणानां सख्याविषये विद्यते विमतिः। श्रीजीवगोस्वामी प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, आर्षः, अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यं, चेष्टा चेति दशप्रमाणानि स्वकृतौ उल्लिखितवान्। परन्तु शब्दप्रमाणं विना नव प्रमाणानि सापेक्षाणि पुरुषजनितभ्रमप्रमादविप्रलिप्साकरणापाटवादिदोषयुक्तत्वात्। शब्दप्रमाणे नास्ति तादृशः दोषसमूहः, अपौरुषेयत्वात्। शब्दप्रमाणं परब्रह्मणः प्रकटितम्, स्वतःप्रमाणमिदम्। प्रत्यक्षादिप्रमाणानि शब्दप्रामाण्यनिरसने असमर्थः। शब्दप्रमाणस्य प्रतिकूलप्रमाणानि न स्वीकरणीयानि। अनुमानादीनि प्रमाणानि यत्र शब्दप्रमाणस्य सहायकानि तत्रैव तेषां ग्रहणम्। बलदेवविद्याभूषणः तत्त्वसन्दर्भग्रन्थस्य टीकायां अष्टौ प्रमाणानि स्वीकृतवान्, तानि च प्रत्यक्षानुमानोपमानशब्दाभावार्थापत्तिसम्भवैतिह्यानि।

तेनापि शब्दस्यैव मूलप्रमाणत्वं स्वीकृतं, अन्येषां गौणत्वम्। वेदान्तस्यमन्तकग्रन्थे राधादामोदरः प्रत्यक्षानुमान- शब्दप्रमाणानां त्रयाणामेव उल्लेखं कृत्वा शेषाणाञ्च तेष्वेव अन्तर्भावितवान्। एषः ग्रन्थः चैतन्यमतस्य प्रारम्भिकः पाठ्यग्रन्थः। अतः प्रमाणत्रयवादः एव सामान्यं चैतन्यमतम्। एतन्मतानुसारेणापि शब्दप्रमाणमेव मूलम्, अन्यौ द्वौ सापेक्षौ।

अन्ये दार्शनिकाः यत्र शब्दप्रमाणत्वेन वेदमङ्गीकुर्वन्ति, तत्र गौडीयवैष्णवाः इतिहासपुराणानि परब्रह्मणः निःश्वासप्रकटितत्वात् शब्दप्रमाणे गणयन्ति। पुराणं वेदार्थपरिपूरकं, तस्मात् वेदतुल्यम्। सात्त्विकं राजसिकं तामसिकञ्चेति त्रिविधं पुराणम्। सात्त्विकपुराणे श्रीकृष्णस्य, राजसिकपुराणे ब्रह्मणः, तामसिकपुराणे शिवस्य महिमा कीर्तितः। परमार्थविषये सात्त्विकपुराणस्य प्रामाण्यमेव श्रेष्ठम्। सात्त्विकपुराणेषु श्रीमद्भागवतपुराणमेव सर्वश्रेष्ठम्। व्यासदेवः वेदोपनिषदां तात्पर्यनिर्णयार्थं ब्रह्मसूत्राणां रचनं कृतवान्। गौडीयवैष्णवानां नये शङ्कराचार्यप्रभृतिभाष्यकाराः ब्रह्मसूत्रस्य यथार्थमर्मोद्घाटने असमर्थाः। तस्मात् स्वकृतब्रह्मसूत्राणां यथार्थार्थनिर्णयार्थं स्वयं वेदव्यासः श्रीकृष्णस्य रूपगुणलीलावर्णनात्मकं श्रीमद्भागवतपुराणमररचत्। गौडीयानां नये श्रीमद्भागवतपुराणं ब्रह्मसूत्रस्य अकृत्रिमभाष्यम्। एतदेव सर्वप्रमाणचक्रवर्ती। एतत्प्रामाण्यमेव परमं चरमञ्च।

एवं गम्भीरतया पर्यालोच्यते चेत् अचिन्त्यभेदाभेददर्शनस्य विशिष्टवैशिष्ट्यं विद्वज्जनज्ञानगोचरीभूतं भवति। न केवलं भिन्नं लक्ष्यमपि तु दर्शनस्य वादोऽपि अन्यान् अतिशेते। पुराणानुसारेण चत्वारि एव वैष्णवदर्शनानि इति वाचकानां मतं अचिन्त्यभेदाभेददर्शनस्य पञ्चमत्वप्रदर्शनेनअचिरेणैव खण्डितं भवति। न केवलं तत्, अपि तु सर्वाणि वैष्णवदर्शनानि अतिरिच्यअचिन्त्यभेदाभेदवादः उन्नतविष्टरमधिरोहति इति निश्चप्रचमिति शिवम्।

**टिप्पण्यः**

१. माधवाचार्यः; सर्वदर्शनसंग्रहः;सपरिशिष्ट प्रकाश हिन्दीव्याख्या; व्याख्याकार – डॉ उमाशङ्करशर्मा ऋषि; चौखम्बा विद्याभवन; वाराणसी;२२१००१; पूर्णप्रज्ञदर्शनम्, पृ. २२७

२. पञ्चविध मुक्ति पाञा वैकुण्ठे गमन। साध्यश्रेष्ठ हय एइ शास्त्रनिरूपण॥ (श्रीचैतन्यचरितामृतम्. २/९/२३९)

३. तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः। चन्द्ररूपी मतः कृष्णः कला -रूपास्तु ताः स्मृताः॥ सम्पूर्णमण्डला तासां मालिनी षोडशी कला। प्रतिपत्तिथिमारभ्य सञ्चरत्यासु चन्द्रमाः॥ षोडशैव कला यास्तु गोपीरूपा वरानने। एकैकशस्ताः संभिन्नाः सहस्रेण पृथक् पृथक्॥ एवं ते कथितं देवि रहस्यं ज्ञानसम्भवम्। य एवं वेद पुरुषः स ज्ञेयो वैष्णवो बुधैः॥ (५५४-५५७)

(स्कान्द-प्रभासखण्डे, शिवगौरीसम्बादे गोप्यादिमाहात्म्ये)

४. विमक्तावपि कामिन्यो विष्णुकामा व्रजस्त्रियः। द्विषिणश्च हरौ नित्यं द्वेषेण तमसि स्थिताः॥ स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरःस्त्रियः। काश्चित् काश्चिन्न कामेन भक्त्या केवलयैव तु॥ भक्त्या वा कामभ्क्त्या वा मोक्षो नान्येन केनचित्। कामभक्त्याप्सरःस्त्रीणामन्येषां नैव कामतः॥ उपास्यः श्वशुरत्वेन- देवस्त्रीणां जनार्दनः। जारत्वेनाप्सरःस्त्रीणां कासाञ्चिदिति योग्यता॥–

मध्वाचार्यविरचितभागवततात्पर्यम्।

५. यत्ते सुजातचरणाम्बुरुहंस्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु।
तेनाटवीमटसि तद्व्यथते न किं स्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः॥ श्रीमद्भागवतम् १०/३१/१९

६. न तथा मे प्रियतमो ब्रह्मा रुद्रश्च पार्थिव। न च लक्ष्मीर्न चात्मा च यथा गोपीजनो मम॥ ३५ धृत आदिपुराणवचनम्।

(कविराजगोस्वामिकृते लघुभागवतामते भक्तामृते उद्धृतमादिपुराणवचनम्)

७. कृष्णप्रियाभ्यो गोपीभ्यो भक्तितो द्विगुणाधिकाः। महिष्यष्टौ विना यास्ताः कथिताः कृष्णबल्लभाः॥ ताभ्यः सहस्रसमिता यशोदा नन्दगेहिनी। ततोऽप्यभ्यधिका देवी देवकी भक्तितस्ततः॥ वसुदेवस्ततो जिष्णुस्ततो रामो महाबलः। न ततोऽभ्यधिकः कश्चित् भक्त्यादौ पुरुषोत्तमे॥ विना ब्रह्माणमीशेशं स हि सर्व्वाधिकः स्मृतः॥ - भागवततात्पर्यम् (११/१२/२२)

८. श्रीकृष्णचैतन्यः – कियन्त एव वैष्णवा दृष्टास्तेऽपि नारायणोपासका एव। अपरे तत्त्ववादिनस्ते तथाविधा एव। निरवद्यं न भवति तेषां मतम्॥ - श्रीचैतन्यचन्द्रोदयनाटकम् ८/१ (अत्र अपरे इत्यनेन माध्वानामेव ग्रहणं कृतं श्रीचैतन्यदेवेन।)

९. 'यदा लौकिकानां प्रत्यक्षदृष्टानामपि शक्तिरचिन्त्या, तदा शब्दैक- समधिगम्यस्य ब्रह्मणः किमु वक्तव्यम्?' इति। -

भाष्यरत्नप्रभा २/१/२७

********

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# शब्दशास्त्राभिमतलडर्थस्वरूपम्

**Sankha Subhra Gachchhit**
Ph. D. Research Scholar
Department of Sanskrit and Philosophy,
Ramakrishna Mission Vivekananda
Educational and Research Institute,
Belur Math, Howrah,711202, West Bengal.
**Contact no :** 9123020789
**Email Id :** sankhasubhra96@gmail.com

कृत्स्नोऽपि लोकव्यवहारः शब्दपरः। अतः प्राचीनकालादारभ्य शास्त्रमर्मज्ञाः बहवो महर्षयः अखिललोकव्यवहारहेतोः शब्दज्ञानाय नैकानि व्याकरणशास्त्राणि प्राणैषुः। स च शब्दो वर्णपदवाक्यरूपो भवति। सामान्यतो वर्णस्य पदस्य वाक्यस्य च अर्थवाचकता प्रायः समैरेव उररीकृता वर्तते। एवमेव वैयाकरणैः वर्णस्फोट-पदस्फोट-वाक्यस्फोटश्चेत्यादयः अष्टौ स्फोटाः अङ्गीकृताः सन्ति। तत्र वाक्येनैव अर्थपर्यवसानत्वात्यद्यपि वाक्यस्फोटस्यैव मुख्यत्वं भट्टनागेशादिभिः स्वीकृतम्, तथापि पदार्थज्ञान-मन्तरावाक्यार्थज्ञानं न सम्भवती- त्युच्यते- "प्रतिवाक्यं सङ्केतग्रहासम्भवात्, तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया वाक्ये पदानि विभज्य पदे प्रकृतिप्रत्ययविभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं कल्पयन्ति स्माचार्याः"[i] इति। अतो वाक्यार्थज्ञानात् प्राक् पदार्थज्ञानमावश्यकमस्ति। शब्दस्य वर्णपदवाक्यरूपेषु 'अपदं न प्रयुञ्जीत' इति प्रसिद्धवचनात् अपदस्य प्रयोगानर्हत्वे किं नाम पदमिति पिपृच्छिषा जागर्ति। तत्र सुबन्तं तिङन्तं च पदं भवतीति "सुप्तिङन्तं पदम्"[ii] इति पाणिनीयसूत्रेण ज्ञायते। अत्र सुबित्यनेन स्वौजसिति सूत्रे सु इत्यतः सुपः पकारपर्यन्तं प्रत्याहारः स्वीक्रियते। तिङित्यनेन च दशविधाः लकाराः गृह्यन्ते। ते च यथा- लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् चेति। तत्र भट्टोजिदीक्षितेनापि न्यरूपि- "तत्रादौ दश लकाराः प्रदर्श्यन्ते- लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ्"[iii] इति। जगदीशभट्टोऽपि प्राह- "ताश्च तिङः लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् भेदेन दशविधाः"।[iv] एतेषां च लकाराणां कर्तृकर्मसंख्याकालाः अर्थाः वर्तन्ते। एवं लकाराणामर्थः कश्चन कालोऽपि विद्यते। तत्र दशलकाराणां द्विधा विभागो दृश्यते, तद्यथा –टिल्लकाराः, ङिल्लकाराश्च। तत्र लट्, लिट्, लुट्, लृट्, लेट्, लोट् इति षट् टितः लकाराः, लङ् लिङ्, लुङ्, लृङ् इति चत्वारः ङितः लकाराः भवन्ति। तत्र भूषणसारग्रन्थे टिल्लकाराणामर्थः सामान्येन कौण्डभट्टेन कारिकया प्रत्यपाद्यत-

"वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति। विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः॥"[v] इति।

तत्र लट्लकारस्य वर्तमानार्थे शक्तिः, लिट्लकारस्य परोक्षे शक्तिः, लुट्लकारस्य श्वोभाविनि शक्तिः, लृट्लकारस्य भविष्यति शक्तिः, लेट्लोट्लकारयोः विध्यादिषु प्रेरणादिषु च शक्तिरिति अनया कारिकया विज्ञायते। तत्र "वर्तमाने लट्"[vi] इत्यादिसूत्रैः लकाराणामर्थः भूतभविष्यद्वर्तमानरूपः इत्यपि विज्ञायते। स च भूतभविष्यद्वर्तमानादिव्यवहारः कालाधीनः इत्यतः कालस्वरूपं किम्,

---

i वैयाकरणसिद्धान्तलघुमञ्जूषा, पत्रम्-४
ii पाणिनीयसूत्रम्, (१.४.१४)
iii सिद्धान्तकौमुदी, तृतीयः भागः, पत्रम्, -४
iv शब्दशक्तिप्रकाशिका, पत्रम्,-३९१
v वैयाकरणभूषणसारः, (सुबोधिनीव्याख्योपेतः), पत्रम्-१२१
vi पाणिनीयसूत्रम्, (३.२.१२३)

कालस्य कति भेदाः सन्तीति आदावेव ज्ञातव्यम्। अतः अग्रे कालविषये आलोच्यते। किं नाम कालत्वमिति विषये विद्यन्ते बहूनि मतानि। तत्र अविद्यायाः शक्तिविशेषः एव कालः इति अद्वैतिभिः स्वीक्रियते।[vii] अतीतादिव्यवहारहेतुः कालः[viii] इति नैयायिकाः अनुमन्यन्ते। नित्यो विभुरखण्डश्च कालः इति वैशेषिकाः निगदन्ति।[ix] आकाशाद्युपाधिविशेषेणैव कालकृतव्यवहारोपपत्तौ नास्ति अन्यः कालः इति साङ्ख्यपण्डिताः।[x] प्रकृतेः परिणामस्य अतिभङ्गुरस्य विभोः क्षणस्य धारा एव कालः इति पातञ्जलाः।[xi] प्रसिद्धपरिमाणा सूर्यादिग्रहक्रियैव क्रियान्तरपरिच्छेदहेतुत्वात्काल इति ज्योतिषविदः।[xii] षडिन्द्रियवेद्यः कालः[xiii] इति प्राभाकरमीमांसकाः वदन्ति। एवं कालविषये विविधदर्शनग्रन्थेषु नैकानि मतानि सन्ति । तत्र वैयाकरणनिकाये कालस्वरूपं किमिति अधस्तादुपपादयिष्यते। पाणिनिमहर्षिणा न क्वापि कालस्य परिभाषा विहिता।

अतः पाणिनीयव्याकरणमकालमित्युच्यते। तद्यथा- "पाणिन्युपज्ञमकालकं व्याकरणम्"।[xiv] इति। भगवता फणिमणिना कालस्वरूपविषये "कालाः परिमाणिना"[xv]इत्यस्मिन् सूत्रे भाष्ये प्रोक्तम्- "येन मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमाहुः। तस्यैव कयाचित्क्रियया युक्तस्य अहरिति रात्रिरिति च। कया क्रियया। आदित्यगत्या। तयैवासकृदावृत्तया मास इति संवत्सर इति च भवति।"[xvi]इति। तत्रैव कैयटाचार्येण भाष्यप्रदीपव्याख्याने अवादि- "तरुतृणलताप्रभृतीनां कदाचित् उपचयः, अन्यदा त्वपचयः। स प्रत्ययान्तराविशेषेऽपि यत्कृतः स कालः इत्यर्थः। यद्येवं तस्यैकत्वात् कथमहरादिविभाग इत्याह- तस्यैवेति। परोपाधिक एव सर्वस्य भेदः।"[xvii] इति। एवं तरुलताप्रभृतीनां कदाचित्ह्रासः, कदाचिच्च वृद्धिर्भवतीति उपचयापचयाभ्यां कालः अनुमीयते। तत्र आचार्येण भर्तृहरिरपि प्रोवाच-

"मूर्तीनां तेन भिन्नानामुपचयापचयाः पृथक्। लक्ष्यन्ते परिणामेन सर्वासां भेदयोगिना॥"[xviii] इति।

तत्रनागेशभट्टास्तु क्षणप्रवाह एव काल इति वदन्ति। तत्रोच्यते- "प्रकृतेः परिणामस्य विवर्तस्य वा अतिभङ्गुरस्य विभोः क्षणस्य धारायाः कालत्वात्"[xix] इति। शब्दब्रह्मणि कालः शक्तिरूपेण स्थितः इति हरिमतम्। यां शक्तिमाश्रित्य अनन्ताः कलारूपाः शक्तयः जन्मादिविकाराणां कारणतां बिभ्रति। उक्तञ्च-

"अध्याहृतकलां यस्य कालशक्तिमुपाश्रिताः। जन्मादयो विकाराः षड् भावभेदस्य योनयः॥"[xx] इति।

विश्वेऽस्मिन् सर्वाः क्रियाः उत्पत्तिस्थितिलयेषु अन्तर्भूताः सन्ति। उत्पत्तिस्थितिलयानाञ्च यन्निमित्तभूतं वर्तते स एव कालः इत्युच्यते वाक्यपदीयग्रन्थे महर्षिहरिणा-

---

vi भूषणसारतत्त्वप्रकाशिका, पत्रम्,- १०५
viii तर्कसंग्रहसर्वस्वम्, पत्रम्,- १९
ix भूषणसारतत्त्वप्रकाशिका, पत्रम्,- १०५
x भूषणसारतत्त्वप्रकाशिका, पत्रम्,- १०५
xi भूषणसारतत्त्वप्रकाशिका, पत्रम्,- १०५
xii भूषणसारतत्त्वप्रकाशिका, पत्रम्,- १०५
xiii वेदान्तदर्शनकोशः, पत्रम्,-१६१
xiv काशिका, (२.४.२१)
xv पाणिनीयसूत्रम्, (२.२.५)
xvi व्याकरणमहाभाष्यम्, पत्रम्, -४२१
xvii व्याकरणमहाभाष्यम्, पत्रम्, ४२१
xviii वाक्यपदीयम्, तृतीयं काण्डम्, कालसमुद्देशः, कारिका-१३
xix भूषणसारतत्त्वप्रकाशिका, पत्रम्, -१०५
xx भूषणसारतत्त्वप्रकाशिका, पत्रम्, -१०५

“उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम्। निमित्तं कालमेवाहुः विभक्तेनात्मना स्थितम्॥ ”[xxi] इति।

अयं च कालः अद्यतनानद्यतनभेदात् द्विविधः। अद्यतनकालश्च त्रिधा भवति- भूतभविष्य- द्वर्तमानभेदात्। अनद्यतनकालश्च द्विधा विभज्यते- भूतभविष्यद्भेदात्। एवमेव कस्य लकारस्य कः अर्थः इति विचारे क्रियमाणे लकारेषु प्रथमोपस्थितत्वात् लटः अर्थविषये एव प्रबन्धेऽस्मिन् चिन्त्यते।

लट्लकारस्य अर्थविषये प्रायः सर्वेषां वैयाकरणानां सम्मतिः विद्यते। लडर्थो वर्तमानकालः इति सर्वे एव अङ्गीकुर्वन्ति। तत्र लटः वर्तमानार्थकत्वे "वर्तमाने लट्"[xxii] इति पाणिनीयसूत्रमेव प्रमाणम्। वर्तमानकाले विद्यमाना या क्रिया तद्वाचकात् धातोः लट् इति सूत्रार्थः। तथा च कौण्डभट्टः अवोचत्- "वर्तमानेऽर्थे लट् वर्तमाने लट् इति सूत्रात्"।[xxiii] नागेशभट्टेनापि ऊचे- "लडादेशस्य वर्तमानकालः"।[xxiv] इति। तत्र किं नाम वर्तमानत्वमितिविषये उच्यते वैयाकरणमूर्धन्यैः कौण्डभट्टैः वैयाकरणभूषणसारग्रन्थे- "प्रारब्धापरिसमाप्तत्वं वर्तमानत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्"।[xxv] इति। एवं वर्तमानस्य लक्षणद्वयमुक्तं कौण्डभट्टेन। तत्र प्रथमं लक्षणं तावत्प्रा- रब्धापरिसमाप्तत्वम्[xxvi] इति। अस्यार्थो भवति- प्रारब्धापरिसमाप्त-क्रियोपलक्षिततत्वमिति। अत्र उपलक्षितत्वं नाम आश्रयत्वम्। तथाहि प्रारब्धापरिसमाप्तक्रियाश्रयत्वं वर्तमानत्वमित्यर्थः फलति। तत्र भट्टनागेशाः अपि निजगदुः - "तत्र वर्तमानत्वं प्रारब्धापरिसमाप्तक्रियाधिकरणसमयत्वम्"।[xxvii] इति। तत्र पाकक्रिया नाम चुल्ल्युपरिधारणप्रभृति- चुल्ल्यधस्स्थापनपर्यन्तं प्रवर्तते। चुल्ल्युपरिधारणेन आरभ्यते, चुल्ल्यधस्स्थापनेन च परिसमाप्यते, तदन्तरालसमये या क्रिया सा प्रारब्धापरिसमाप्ता क्रिया। तदाश्रयो यः कालः सः वर्तमानकालः इत्युच्यते। एवं च पचतीति लट्लकारः प्रयुज्यते। एवं प्रथमलक्षणसमन्वयः इत्थं ज्ञेयः। तत्र द्वितीयं लक्षणं तावदुच्यते - भूतभविष्यद्भिन्नत्वमिति।

[xxviii] तत्र भूतत्वं नाम वर्तमानध्वंसप्रतियोगिसमयत्वमिति।[xxix] भविष्यत्वं च वर्तमानप्रागभावप्रतियोगिसमयत्वमिति।[xxx] एतदुभयभिन्नत्वमेव वर्तमानत्वमितिभावः। पतञ्जलिमहर्षिणापि महाभाष्ये एतादृशमेव लक्षणं प्रोक्तम्- "भूतभविष्यत्प्रतिद्वन्द्वो वर्तमानः कालः।"[xxxi] अनया रीत्या यदा पाकक्रिया प्रारब्धा अर्थात्चुल्ल्युपरिधारणं कृतम्, तस्यां दशायां पाकक्रियायाः ध्वंसप्रागभावौ न भवतः इति तत्प्रतियोगित्वं पाकक्रियायां नास्तीति भूतभविष्यद्भिन्नत्वरूपवर्तमानकालिकत्वं वर्तते इति लट्प्रयोगः सङ्गच्छते इति समन्वयः। तत्र पुनः वर्तमानत्वविषये उपजायते काचित्संशीतिः। ननु कश्चिदध्ययने प्रवृत्तोऽस्ति। अध्ययनक्रियासमाप्तेः प्रागेव मध्ये भोजनादिक्रियामपि सः सम्पादयतीति अध्ययनक्रियायाः समाप्त्यभावे सति भोजनादिक्रियायाश्च व्यवधानसत्त्वे तत्र 'अधीते' इति वर्तमानकालप्रयोगो नोपपद्येत खलु इतिचेदुच्यते हि वार्तिककृता- "प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वात्"।[xxxii] तत्र कैयटेन व्याख्यातम्-

---

xxi वाक्यपदीयम्, तृतीयं काण्डम्, कालसमुद्देशम्, कारिका- ३
xxii पाणिनीयसूत्रम्, (३.२.१२३)
xxiii वैयाकरणभूषणसारः, पत्रम्, - १२१
xxiv परमलघुमञ्जूषा, पत्रम्, -११८
xxv वैयाकरणभूषणसारः, पत्रम्,-१२१
xxvi वैयाकरणभूषणसारः, सुबोधिनीव्याख्योपेतः, पत्रम्,-१२२
xxvii वैयाकरणसिद्धान्तलघुमञ्जूषा, पत्रम्, -८५२
xxviii वैयाकरणभूषणसारः, सुबोधिनीव्याख्योपेतः, पत्रम्,-१२३
xxix वैयाकरणसिद्धान्तलघुमञ्जूषा, पत्रम्, -८५२
xxx वैयाकरणसिद्धान्तलघुमञ्जूषा, पत्रम्, -८५२
xxxi व्याकरणमहाभाष्यम्, पत्रम्,-१९५
xxxii व्याकरणमहाभाष्यम्, पत्रम् - १९५

"इहाधीमह इत्यध्ययनं प्रवृत्तं प्रारब्धं, न च तद्विरतम्। यदा च भोजनादिकां क्रियां कुर्वन्तो नाधीयते तदाऽधीयमह इति प्रयोगो न प्राप्नोति इति वचनम्।"[xxxiii] व्याख्यानेन अनेन एतत्सिद्ध्यति यत्वर्तमानकालस्य प्रयोगः तत्रैव भवति यत्र क्रिया प्रारब्धा न तु उपरता। यत्र क्रियान्तरव्यवहितत्वेन उपरता सा तत्र न वर्तमानकालत्वमिति। एवञ्च अत्रापि प्रवृत्ते अध्ययने मध्ये भोजनादिव्यवधाने सति तस्मिन्काले अधीते इति प्रयोगानुपपत्तिरिति चेत्, तत्रोच्यते भाष्ये- "न्याय्या त्वेषा वर्तमानकालता। कुतः? आरम्भानपवर्गात्। आरम्भोत्रानपवृक्तः। एष एव च नाम न्याय्यो वर्तमानकालो यत्रारम्भो न पवृक्तः। यं खल्वपि भवान् मुक्तसंशयं वर्तमानकालं न्याय्यं मन्यते 'भुङ्क्ते देवदत्त' इति। तेनैतत्तुल्यम्। सोऽपि ह्यवश्यं भुञ्जानो हसति वा जल्पति वा पानीयं वा पिबति। यद्यत्र युक्ता वर्तमानकालता दृश्यते। इहापि युक्ता दृश्यताम्।"[xxxiv] अस्याशयः, यत्र आरब्धायाः क्रियायाः परिसमाप्तिः नास्ति, तत्र वर्तमानकालो भवति। अतः अध्ययनक्रियायामारब्धायां तस्याः समाप्तिपर्यन्तं भोजनादिक्रियाकृतव्यवधाने सत्यपि तस्यां वर्तमानकालता अस्त्येव व्यवधानरूपेण प्रतीयमानायाः भोजनादिक्रियायाः नान्तरीयकत्वात्। देवदत्तो भुङ्क्ते इत्यादिषु तु वर्तमानकालता नूनमेव स्वीक्रियते। अत्रापि खलु भोजनादिक्रियायां हसनजल्पनादिक्रियाव्यवधानं वर्तते एव। अतः यथा तत्र वर्तमानत्वमङ्गीक्रियते, तद्वदत्रापि 'अधीते' इत्यादौ वर्तमानकालत्वं स्वीकरणीयमिति भाष्याशयः। एवञ्च हरिमतेऽपि न तथा वर्तते काचित्क्रिया यत्र क्रियान्तरव्यवधानाभावो विद्यते। यथा भोजनादिक्रियां कुर्वन् देवदत्तो मध्ये श्वसनादिक्रियां करोत्येव। अतः तथा अन्तर्वर्तिनीभिः क्रियाभिः मुख्यक्रियायाः व्यवधानमादाय वर्तमानत्वाभावो नैव शङ्क्यः, मध्ये विद्यमानाः सर्वाः अपि क्रियाः मुख्यक्रियायाः अङ्गभूताः सन्तीत्येवं मन्तव्यम्। तद्यथा वाक्यपदीये-

> “व्यवधानमिवोपैति निवृत्त इव दृश्यते। क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः॥”
>
> “न च विच्छिन्नरूपोऽपि सो विरामान्निवर्तते। सर्वैव हि क्रियान्येन सङ्कीर्णैवोपलभ्यते॥”
>
> “तदन्तरालदृष्टा वा सर्वैवावयवक्रिया। सादृश्यात् सति भेदे तु तदङ्गत्वेन गृह्यते॥”[xxxv] इति।

एवं वर्तमानकालस्य प्रोक्तलक्षणद्वये स्वीकृते सति आत्मा अस्ति, पर्वताः तिष्ठन्ति इत्यादौ लड्प्रयोगो कथमुपपद्यते इत्याशङ्का। यतो हि क्रियायाः प्रारब्धापरिसमाप्तत्वे हि वर्तमानकालः, तदेव खलु लड्प्रयोगः इत्युक्तम्। तथा सति आत्मधारणानुकूलक्रियायाः नित्यत्वात्सदा वर्तमानत्वात्प्रारम्भाभावे सति प्रारब्धासमाप्तत्वरूपस्य वर्तमानत्वस्य तत्क्रियायाः अभावात्कथं तत्र लड्प्रयोगः सङ्गच्छते इति शङ्का। एवमेव पर्वताः तिष्ठन्ति इत्यादौ अपि पर्वतकर्तृकसत्तायाः अपि अनादित्वात्सत्तानुकूलक्रियायाः आरम्भस्यैव अभावे प्रारब्धापरिसमाप्तत्वरूपस्य वर्तमानत्वस्य अभावात्कथं तिष्ठन्तीति लड्प्रयोगो युज्यते इत्यपरः प्रश्नः। तत्र वैयाकरणभूषणसारग्रन्थे कौण्डभट्टः अकथयत्यत्यद्यपि- आत्मकर्तृकधारणानुकूलव्यापारस्य पर्वतकर्तृकस्थित्य- नुकूलव्यापारस्य च नित्यत्वात् प्रारब्धासमाप्तत्वरूपं वर्तमानत्वं तत्र दुरुपपादं, तथापि लड्प्रयोगोपपत्तिस्तु सिद्ध्यत्येव। तद्धि यस्मिन्काले आत्मा अस्ति, पर्वताः तिष्ठन्ति चेति प्रयोगः क्रियते तदा तत्तत्कालिकराज्ञां या क्रिया प्रारब्धापरिसमाप्ता विद्यते, तत्क्रियागतं वर्तमानत्वं पर्वतकर्तृकस्थितौ आरोप्यपर्वताः तिष्ठन्तीति इति प्रयोगः सङ्गमनीयः। तत्र भाष्यकारोऽपि वदति- "इह भूतभविष्यद्वर्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरणम्"।[xxxvi] एवमेव आत्मा अस्तीति प्रयोगेऽपि शरीरविशिष्टः आत्मा आत्मशब्दवाच्य इति अङ्गीकृत्य शरीरस्य या क्रिया प्रारब्धापरिसमाप्ता तदीयक्रियागतं वर्तमानत्वमात्मनि आरोप्य आत्मा अस्ति इति व्यवहारः उपपादनीयः।

---

xxxiii व्याकरणमहाभाष्यम्, पत्रम् - १९५
xxxiv व्याकरणमहाभाष्यम्, पत्रम् - १९५
xxxv वाक्यपदीयम्, कालसमुद्देशः, कारिका - ९२-९४
xxxvi वैयाकरणभूषणसारः, पत्रम् - १२२

प्रसङ्गे अस्मिन् वाक्यपदीयकाराणामपि मतमपि स्मर्तव्यम्। तद्यथा-

"परतो भिद्यते सर्वमात्मा तु न विकम्पते। पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते॥"[xxxvii] इति।

एवं च अस्याः कारिकायाः स्फुटं ज्ञायते यत् आत्मास्ति, पर्वताः तिष्ठन्तीत्यादौ आत्मसत्तायाः, पर्वतकर्तृकत्वस्थितेश्च नित्यत्वेन अनादित्वात्स्वतो वर्तमानत्वादिभेदस्योपपादयितुम् अशक्यत्वेऽपि पदार्थान्तर- गतक्रियातो वर्तमानत्वादिकमुपपादयितुं शक्यमिति।

एवं वैयाकरणभूषणसार-वैयाकरणसिद्धान्तलघुमञ्जूषा-परमलघुमञ्जूषा-वाक्यपदीय-महाभाष्यग्रन्थदिशा लडर्थस्वरूपं प्रत्यपादि। तत्र आदिमे भागे तावत् कालस्वरूपं वर्णयित्वा तत्र दशलकाराणां कालविषयकविचारे क्रियमाणे प्रकृतप्रबन्धस्य विषयत्वात् लकारेषु आदिमोपस्थितत्वात् लट्लकारार्थविषयमालोचयित्वा आत्मा अस्ति, पर्वताः तिष्ठन्ति इत्यादिप्रयोगसिद्धिपुरःसरं लडर्थस्वरूपं शोधप्रबन्धेऽस्मिन् उपपादितमिति शम्।

## परिशीलितग्रन्थाः


१. वैयाकरणभूषणसारः (शाङ्करीव्याख्योपेतः), मारुलकरोपाह्वशङ्करशास्त्री (संशोधकः), गङ्गाधरबापूराव काळे (प्रकाशकः), पुणे : आनन्दाश्रममुद्रणालयः, 1957।

२. परमलघुमञ्जूषा (किरणावली-संस्कृतव्याख्योपेता-हिन्यनुवादसहिता च), आचार्यः लोकमणि-दाहालः (व्याख्याकारः), वाराणसी : चौखम्बा सुरभारती प्रकाशन, 2018।

३. वैयाकरणभूषणसारः (सावित्रीहिन्दीव्याख्योपेतः), आद्याप्रसादमिश्रः (सम्पादकः), वाराणसी : सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, 1988।

४. आचार्यः, रामकृष्णः, भूषणसारतत्त्वप्रकाशिका, तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, 2010।

५. परमलघुमञ्जूषा (भावप्रकाशिका-बालबोधिनी-संस्कृत-हिन्दीव्याख्योपेता), जयशङ्करलालत्रिपाठी (सम्पादकः), वाराणसी : चौखम्बा-कृष्णदास-अकादमी, 2011।

६. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता), तृतीयो भागः, गिरिधरशर्मा-चतुर्वेदः ; परमेश्वरानन्दशर्मा विद्याभास्करः (सम्पादकौ), देहली : मोतीलाल-बनारसीदास, 2012।

७. वाक्यपदीयम् (प्रकाश-अम्बाकर्त्रीव्याख्याद्वयोपेतम्), तृतीयकाण्डम् (कालसमुद्देशः), पण्डित-रघुनाथशर्मा (सम्पादकः), वाराणसी : सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, 2000।

८. वैयाकरणसिद्धान्तलघुमञ्जूषा (कला-कुञ्जिकाव्याख्याद्वयोपेता), प्रथमो भागः, माधवशास्त्रिभाण्डारि; नरहरिशास्त्रिपेण्डसे (सम्पादकौ), नई-देहली : राष्ट्रिय-संस्कृत-संस्थान, 2012।

९. व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमेतम्)। गुरुप्रसादशास्त्री(सम्पा.)। देहली : प्रतिभा प्रकाशन, 1999.

१०. वैयाकरणभूषणसारः (सुबोधिनीव्याख्योपेतः), चन्द्रिका-प्रसाद-द्विवेदी (व्याख्याकारः), देहली : चौखम्बा-संस्कृत-प्रतिष्ठान, 2016।


---

xxxvii वाक्यपदीयम्, कालसमुद्देशः, कारिका –८०

११. अष्टाध्यायी, श्रीगोपालदत्तपाण्डेयः (सम्पा.), वाराणसी : चौखम्बासुरभारतीप्रकाशनम्, 2000।

१२. वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीव्याख्योपेता), सभापतिशर्मोपाध्यायः, बालकृष्णपञ्चोली (सम्पादकौ), वाराणसी चौखम्बासंस्कृतप्रतिष्ठानम्, 1966।

१३. बृहद्वैयाकरणभूषणम् (रूपालीटिप्पणीयुतम्), मनुदेवभट्टाचार्यः (सम्पा.), वाराणसी : चौखम्बा अमरभारती प्रकाशनम्, 1985।

१४. पाण्डेयः, मुरलीधरः, वेदान्तदर्शनकोशः, वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः,1998।

१५. कुरुंगटी, रामशास्त्री, तर्कसंग्रहसर्वस्वम्, महानन्दझा (सम्पा.), वाराणसी : भारतीयविद्यासंस्थानम्, 2004।

१६. भट्टाचार्यः, जगदीशतर्कालङ्कारः, शब्दशक्तिप्रकाशिका, ढुण्ढीराजशास्त्री (सम्पा.), वाराणसी: चौखम्बाप्रकाशनम्, 2007।

१७. व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमेतम्, भाष्यप्रदीपोद्योतच्छायासारं पदमञ्जरी-शब्दकौस्तुभादिकं समवलम्ब्य), शिवदत्तशर्मा, रघुनाथ-काशीनाथ-शास्त्री (सम्पादकौ), देहली : चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2018।

१८. काशिका (न्यास-पदमञ्जरी-भावबोधिनी-सहिता), तृतीयः भागः, जयशङ्करलाल-त्रिपाठी, सुधाकर-मालवीयः (सम्पादकौ), वाराणसी : तारा-बुक्-एजेन्सी, 1986।

१०. परमलघुमञ्जूषा (वंशीटीकोपेता), वंशीधरमिश्रः (व्याख्याकारः), श्रीनिवासशर्मा (सम्पा.), वाराणसी : चौखम्बा विद्याभवनम्, 2006।

**********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# भारतीयतायाः सन्मूलं हि परिवारपद्धतिः

**Dr. R. Suresha**
Faculty,
Department of Studies in Sanskrit,
University of Mysore,
Mysuru – 570006, Karnataka
Email :drrsuresha@gmail.com
Mobile: 9980833466

**संक्षेपः –**

भारतीये सम्प्रदाये युगव्यवस्था मुख्या, यत्र सृष्टिः ऋषमूलमिति मन्यते। अपरे केचन वैदेशिकाः विकासवादे विश्वसन्तः वानरात् मानवस्य क्रमगतोन्नतिम् अभिप्रयन्ति। तथापि, काले गते, विश्वस्मिन् अनेकाः संस्कृतयः विकसिताः, काश्चन नामावशेषाः इति तु समेषाम् इतिहासविदां समानः आशयः। यदि मानवस्य विकासयात्रां सूक्ष्मेक्षिकया अवलोकयामः तर्हि संस्कृतिनाशाय संस्कृतिसंवर्धनाय हेतुभूताः अंशाः बुध्यन्ते। उपचत्वारिंशत्संस्कृतयः कालकवलिताः बभूवुः। आबहोःकालाच्चैतन्ययुक्तासु अङ्गुलिमेयासु संस्कृतिषु भारतीया संस्कृतिरपि अन्यतमा। इयं न केवलं जीवितवती दीर्घं कालम्, अपि तु साधनया महद्योगदानं प्रादात्। अस्याः दीर्घजीवनम् उत्कृष्टयोगदानं च अन्योन्याश्रितम्। इत्थं च, दीर्घजीवनेन महद्योगदानम्, उत्तमयोगदानाच्च दीर्घजीवनमिति तात्पर्यम्। परमाणोः परमात्मानं, व्यक्तिविकासात् विश्वशान्तिं, तन्त्रज्ञानात् तत्त्वज्ञानं, विज्ञानसूत्रात् दर्शनसूत्रं, शून्यात् पूर्णं च यावत् सर्वस्यास्य, ज्ञानविभागे भारतीयानां योगदासस्य सन्मूलम् परिवारपद्धतिरिति इह विचार्यते।

**कूटशब्दाः –**

भारतीयता, संस्कृतिः, परिवारपद्धतिः, मानवविकासः, सुस्थिराभिवृद्धिः

**प्रास्ताविकम् –**

अस्मिन् जगतीतले भारतीया संस्कृतिः महती विशिष्टा इत्यत्र न कस्यचनापि सन्देहसन्दोहः। बहुभ्यः शतमानेभ्यः अत्रत्यानां लोकानां जीवनपद्धतिः, संस्कृतिः, आचारः, विचारः, व्यवहारः इत्यादयो अंशाः बुधजनान् आवर्जयन्ति। भारतीयान् अधिकृत्य विदेशीयाः कथयन्ति यत् एते व्यक्तिस्तरेउत्तमाः, स्वजातिस्तरे सङ्घटिताः, किन्तुदेशस्तरे असङ्घटिताः इति। वैविध्यमये हिन्दूधर्मे व्यक्तिस्वातन्त्र्येण सार्धम् अनितरसाधारणं विचारस्वातन्त्र्यं दीयते इति हेतोः हैन्दवाः बान्धवाः भवितुं क्लिश्यन्ति। अनेकतायाम् एकता इति सूत्रेण भारतीयाः यदि बद्धाः अभविष्यन् तर्हि उपद्विसहस्रवर्षाणां पराधीनता नाभविष्यत्। यद्यपि विचारस्वातन्त्र्ये अयं दोषः इति प्रतीयते तथापि अनेनैव हेतुना हिन्दूधर्मः संरक्षितः अद्यावधि। परतन्त्रे स्थितानां बह्वीनां संस्कृतीनां नामापि न श्रूयते। किन्तु भारतं तादृशो देशः यः उपद्विसहस्राब्दानां परायत्तां विजित्यापि सांस्कृतिकेन वैभवेन जीवति। सत्यम्, आर्थिकदृष्ट्या महन्नष्टेपि येन विशिष्टेन कारणेन आसेतुहिमाचलम् इयं संस्कृतिः विलसति तस्य नाम कौटुम्बिकपद्धतिः।

**व्यक्तिसंस्कारेण राष्ट्रनिर्माणम् –**

मानवः समाजजीवी। एकान्ते उषितुं नेच्छति। समुदाये वसतः तस्य यदि संस्कारः स्यात् तर्हि देशनाशाय न कदाचिदपि चिन्तयति। कथं मानवस्य संस्कारः स्यादित्युक्ते, परिवारव्यवस्थेति कालपरीक्षितं समाधानं समायाति। परिवारे प्रतिव्यक्ति मुख्यं भवति। आबालवृद्धाः परिवारे स्वकार्यम् अन्यसेवां च कुर्वाणाः लक्ष्यन्ते। परिवारसदस्यानां सेवया व्यक्तिः संस्क्रियते। ज्येष्ठानां मार्गदर्शनेन उदात्तजीवनेन प्रेरिताः कनीयांसः कुटुम्बगौरवं परिरक्षितुं यतमानाः, सन्मार्गम् अनुत्सृज्य जीवितुं बद्धकटयः भवन्ति। अनेन कौटुम्बिकमौल्यानि प्रतिष्ठाप्यन्ते।

"स जातो येन जातेन याति वंश समुन्नतिम्" इति भणितिः प्रसिद्ध्यति अस्यां भूमौ। कुलं शीलेन धार्यते (चाणक्यनीतिः-5.8)। अत एव सदाचारः प्रमुखः। सद्व्यवहारवति कुटुम्बे जातमेव पुरुषं वाञ्छन्ति स्म राजानः मुख्ये कार्ये। यतो हि त एव विश्वासभूमयः। अयमपि सापवादः नियमः इति न पृथग्वक्तव्यम्। तद्यथा - एतदर्थे कुलीनानां नृपाः कुर्वन्ति सङ्ग्रहम् ।आदिमध्यावसानेषु न ते गच्छन्ति विक्रियाम् ॥ (चाणक्यनीतिः 3.5) प्राचीनानां कुटुम्बभावना विशाला आसीदित्यत्र प्रमाणं "यत्र विश्वं भवत्येकनीडम्" इत्यसौ वेदोद्घोषः। समग्रं जगदेव अस्माकं परिवारः इति या आर्षा भावना सा नान्यत्र प्राचीनग्रन्थेषु द्रष्टुं शक्या। "उदारचरितानां तु वसुधैव कुटुम्बकम्" इति कथने यः अन्तरङ्गभावः सः आधुनिकैः (global citizen /mindset इति) बहुधा प्रशंस्यते। उपनिषत्सु पञ्चकोशाः उपवर्णिताः देहिनः। वर्तमाने काले, देशस्य कृते एते पञ्चकोशा एवं चिन्तयितुं शक्यन्ते। देहिनः अन्नमयः कोशः एव देशस्य भौगोलिकी संरचना। देहिनःप्राणमयः कोशः एव राष्ट्रभक्तिः। प्राणिनः मनोमयः कोशः एव देशस्य भावैक्यता। देहिनः विज्ञानमयः कोशः राष्ट्रकल्याणसङ्कल्पः।देहिनः आनन्दमयः कोशः देशप्रेम। एवं पञ्चसु कोशेषु समन्वये साधिते राष्ट्रं स्वस्थं भवेत्।

**मूलनि मौल्यानि –**

भारतीयायां परम्परायां दुर्लभस्य मानवजीवनस्य चतुर्विधलक्ष्यं निर्दिष्टम्। धर्मार्थकाममोक्षाणाम् आरोग्यं मूलमुत्तममिति (चरकसंहिता-सूत्रस्थानम्-1.24) वदतः आयुर्वेदाचार्यस्यापि आशयः स्वास्थ्येन पुरुषार्थचतुष्टसिद्धिः, न तु केवलं सुखोपभोगः। अर्थकामप्रधानाः संस्कृतयः कालगर्भं प्रविष्टाः। सनातनसंस्कृतेः सुस्थिरतायाम् (sustainability) धर्ममोक्षयोः समावेशोपि अन्यतमं कारणम्। जीवनस्य समग्रदृष्टिम् उपस्थापयति असौ चतुर्विधपुरुषार्थभावः। आधुनिके काले उपभोगवादेन बह्व्यः व्यक्तिगताः सामाजिकाः च समस्याः समुद्भूताः इति मेनिरे समाजविज्ञानिनः। स्त्रियः न भोगसाधनम् इति वदन्त्या चाणक्यनीत्या मातृत्वभावः संस्थाप्यते। तद्यथा राजपत्नी, गुरुपत्नी, मित्रपत्नी, पत्नीमाता, स्वमाता च पञ्चैता मातरः स्मृताः इति श्लोकेन। ज्येष्ठभ्राता, विद्यागुरुः च पितृकल्पाः स्युः। ऋणानुबन्धरूपेण पशुपत्निसुतालयाः इत्यादिषु वाक्येषु कर्मानुसारिणी जीवनगतिः प्रतिपादिता, तथापि पुरुषकारेण विना दैवं न सिद्ध्यति इति कथयन्ति अनल्पानि वाक्यानि। स्त्रीपुरुषयोः, जम्पत्योः, विधिपौरुषयोः, सुखदुःखयोः परस्परविरुद्धस्वभावयोः समन्वयेन एव जीवनं चकास्ति। कालिदासस्य रघुवंशे प्रथमसर्गे भणितं यत् सन्ततिः शुद्धवंश्या हि परत्र इह च शर्मणे इति। सत्सन्तानार्थमेव राजा दिलीपः प्रायतत। गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः इति भवभूतिवाणी मननीया। सुपुत्रः कुलदीपकः, किन्तु सन्तत्याराधनायां न कदापि गुणाः अनाद्रियन्ते। वरमेको गुणी पुत्रः। दुष्पुत्रश्चेत् निन्द्य एव।एकेन शुष्कवृक्षेण दह्यमानेन वह्निना। दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा॥चाणक्यनीतिः-3.15॥ किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् (मृच्छकटिकम्-8.29)। शीलं सर्वत्र वै धनम्। पिण्डे पिण्डे मतिर्भिन्ना इति विचारे सत्यपि समन्वयः साधनीयः इत्यत्र महाभारतीयः दृष्टान्तः स्मार्यः। परस्परविरोधे तु वयं पञ्च च ते शतम्। परैस्तु विग्रहे प्राप्ते वयं पञ्चाधिकं शतम्॥ एवं परिवारे बहुविधानां मौल्यानाम् आचरणेन अनुसरणेन सुराष्ट्रनिर्माणं स्यात्।

**परिहासायते परिवारः –**

एकविंशे शतमाने, तान्त्रिके युगे सर्वक्षेत्रेषु मालिन्येन मूलप्रकृतिः नष्टप्राया। भारतस्य कौटुम्बिकपद्धतिरपि इह नापवादः। प्राचीने भारते त्र्यधिकाः प्रजातयः (generation) एकत्र निवसन्तिस्म। बालाः, पितरः, पितामहादयः एवं त्रिस्रः प्रजातयः सहैव गृहम् अधितिष्ठन्तिस्म। बालैः वृद्धसेवा, वृद्धैश्च बालसंस्कारः इत्येवं प्रथमान्तिमयोः प्रजात्योः वात्सल्यं मध्यमप्रजातिविषयकं समानशत्रुकाधीनम्। स्वचिन्तनं + सहचिन्तनं = सम्यक्चिन्तनम्। प्राचीनस्य परिवारपद्धतेः सूत्रमिदम्।The family that eats together, prays together and laughs together, will stay together इति समाजविज्ञानिनाम् मतम्। सहभोजनं, मातृभोजनं, कौमुदीभोजनम् इत्यादि सम्पूर्णतयैव विस्मृतम् अस्माभिः। दिने एकवारं वा सहभोजनं कर्तुं प्रयासः कार्यः परिवारे।

प्रत्यहं सहैव प्रार्थना विधेया। कौटुम्बिकं मनोरञ्जनं, क्रीडा यदि परिवारसदस्यैः सार्धम् अनुभूयते, तर्हि आत्मीयता वर्धते। अत एव नवदम्पत्योः मध्ये विवाहे सन्दर्भे माङ्गल्यधारणादूर्ध्वं काश्चन क्रीडाः आयोज्यन्ते याभिः उभयोः अन्योन्यता वर्धते। एवं क्रियमाणेषु परिवारः स्वस्थः अभिवर्धते। किन्तु, प्रसक्ते सन्दर्भे भारतीयाः परिवाराः ह्रस्वाः सन्ति। परिवारजनेषु समन्वयः न्यूनः जायमानः। Live together इति भारतीयात् परिवारपद्धतेः living together इति पाश्चिमात्यां रीतिम् अनुरुन्धानाः सन्तीत्यहो दुर्विधिः। परस्परप्रीतेः अपेक्षया व्यक्तिस्वातन्त्र्यं निजसुखं च बहुमन्यमानः। समन्वयाभावात् सङ्घर्षः, संवादलोपात् विवादः, धन्यताननुभवात् मान्यताप्रपित्सा, सिद्ध्यभावात् प्रसिद्धिःलोलुपता च वर्धमाना दरीदृश्यते। प्राचीनाः शीघ्रकोपिनः क्वचित् सन्तोपि दीर्घद्वेषिनः नासन्। अद्यतने समाजे कामादयः विकाराः नरीनृत्यन्ति। शनैर्विद्या शनैर्वित्तमिति प्राचीनं मतम्। किन्तु एतत् विद्यावित्तविषयकं सहनम् अदृश्यतां गतम्। क्रमिकविकासः नाद्रियते अनया प्रजात्या। सर्वं त्वरया सम्पादनीयमिति मन्यन्त एतर्हि। एवमसन्तुष्टा इयं प्रजातिः सुखोपभोगे रता सत्यपि नैव सन्तुष्यति। अशान्तस्य कुतस्सुखमिति भगवद्वाणी संस्मर्या। दाम्पत्यकलहः अनेकेषु सन्दर्भेषु विच्छेदपर्यवसायीति चेखिद्यते चेतः। कौटुम्बिके न्यायालये लघुभिरपि बीजैः विवादाः विच्छेदोन्मुखाः विवर्धमानाः दिने दिने। वैवाहिकः सम्बन्धः जन्मान्तरीयः अनुबन्धः इति भावः तृणायते। स्त्रियः शोषिताः दुर्बलाः इति मत्वा संविधानेन प्रदत्तः अधिकारःदुरुपयुज्यते क्वचित्। तेनैव अस्त्रेण काश्चित् नववध्वः पतीन् पीडयन्त्यः सन्तीति परिदृश्यते। काश्चन दुष्टशक्तयः कुतन्त्रेण परिवारव्यवस्थां दुर्बलां कर्तुम् ईहन्ते। इयं बहुसंस्कृतीया भूमिः, न तु असंस्कृतीया। जात्यतीयवादम् उपस्थापयन्तः संस्कृतिमूलात् जनान् विमुखीकर्तुम् कैश्चन प्रयासाः क्रियन्ते। मतपरिवर्तनेन परिवारच्छेदनमिति कुयुक्तिः प्रयुज्यमाना। एवं बहुभिः प्रकारैः परिवारसंस्था स्वस्वरूपम् अपहाय प्रकारान्तरं भजमानास्ति।

**उपसंह्रियते** -

गुणवत्ता-जीवनं (quality of life) गुणाराधनाधीनम्। जीवनस्य (life) अपेक्षया जीविका (livelihood), मौल्यस्य (value) अपेक्षया कुशलता (skill) न कदापि मुख्या भवेत्। सामाजिक-कुशलताः (social skills), संवहन-कुशलताः (communication skills), उदात्तचिन्तनं (higher order thinking), संयमः (self control), स्वविषयकं धनात्मकं चिन्तनम् (positive self concept) इति इमाः पञ्च सूक्ष्मकुशलताः कुटुम्बे एव वर्धन्ते, नान्यत्र। शिशोः संवर्धनार्थं परिवारमन्तरा विहिताः convent इत्यादयः सर्वाः यत्नाः विफलाः बभूवुः। नान्यः पन्थाः विद्यते। इमं सूक्ष्मं विचारं विज्ञायं, कुटुम्ब-प्रबोधनादयः अनेकाः संस्थाः कार्यरताः। स्वस्थपरिवारार्थं जीवनपद्धतिः (life-style), चिन्तनशैली (mindset) च परिवर्तनीया। परिवारव्यवस्थायां सुदृढायां सत्याम् स्वास्थ्यम् (health), सन्तोषः (happiness) सामरस्यं (harmony) च प्रतिष्ठाप्यन्ते, अनेकाः समस्याः समाहिताः भवन्तीति सर्ववेद्यम्। धन्ये गृहस्थाश्रमे मान्यं राष्ट्रं, स्वस्थं जगत्।

**आकरग्रन्थसूची**


- चाणक्यनीतिः
- व्यास-महाभारतम्
- चरकसंहिता
- मृच्छकटिकम्
- रघुवंशम्
- सुभाषितरत्नभाण्डागारः


***********

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# नवराष्ट्रियशिक्षानीतिः संस्कृतक्षेत्रानुकूलता च

**Dr. Ganesh T. Pandit**
Associate Professor
Central Sanskrit University, Jaipur Campus
Near Gopal Pura By Pass
Triveni Nagar-302018
Jaipur, Rajasthan
Contact No. : 9449103568
E-mail : manovinodini@gmail.com

**पीठिका**

अथ 'पुराणमित्येव न साधु सर्वम्' इतीदं कालिदासीयं वचनं विदितमेव समेषाम्। सम्प्रति नवराष्ट्रियशिक्षानीतेः (NEP-2020) क्रियान्वयनावसरे विशिष्य पौराणिकशैक्षिकनीतीनां परिष्कारपरित्यागादीनामवसरे च 'पुराणमित्येव न साधु सर्वम्' इत्येतदेव श्लोकवाक्यं पौनःपुन्येन स्मृतिपथमधिरोहति। तत्र हि भारतसर्वकाराधीनेन मानवसंसाधनविकासमन्त्रालयेन अर्थात् साम्प्रतिकशिक्षामन्त्रालयेन २०२० तमे संवत्सरे प्रकटीकृता राष्ट्रियशिक्षानीतिः अद्यापि समग्रे देशे विदेशेषु च चर्चायाः विषयः वर्तते। बहुषु राज्येषु बहुत्र स्थानेषु च अस्याः क्रियान्वयनमपि सञ्जातमस्ति। अतः अस्याः नीतेः संस्कृतक्षेत्रानुकूलतायाः परिदृश्ये समीक्षात्मकलेखोऽयं लिखितोऽस्ति।

**नीयते प्राप्यते अयनं मोक्षो वा यया सा नीतिः** इति नीतिशब्दस्य निर्वचनमुच्यते। परमत्र प्रयुक्तः नीतिशब्दः नीतिशास्त्रद्योतकः (Ethics) नास्ति। अत्र तु नीतिशब्दः योजना (Policy) इत्यर्थे प्रयुक्तोऽस्ति। राष्ट्रस्यास्य नवशैक्षिकयोजनायाः परिचायकनीतिरेषा न तु नीतिशास्त्रसम्बद्धेति पिण्डितोऽर्थः।

पञ्चोत्तरैकशतं पुटेषु (१०५) उपनिबद्धा भागचतुष्टये विभक्ता च एषा नीतिः साद्यन्तं भारतीय- ज्ञानप्रणालीं समर्थयति। नीतेरस्याः परिचयः आद्येषु पुटेषु उल्लिखितोऽस्ति । राष्ट्रविकासार्थमपेक्षिततत्त्वानां सम्पूर्तिरेव अस्याः नीतेः लक्ष्यमिति (पुटसङ्ख्या - ०४)तत्र सूपपादितम्। ततः प्रथमे भागे विद्यालयशिक्षा इत्यस्मिन् खण्डे विद्यालयशिक्षायाः भविष्यत्कालिकं स्वरूपमाश्रित्य बहुधा विवेचितमस्ति। शिशुशिक्षायां बालवाटिकायाः परिकल्पना अपि (१.६-पृष्ठसङ्ख्या-१०) अत्र सुष्ठु कृता।

द्वितीये भागे गुणवत्तापूर्णविश्वविद्यालयानां महाविद्यालयानां च शिक्षायाः स्वरूपम् आश्रित्य परामर्शः प्रदत्तः। उच्चशिक्षाक्षेत्रस्य आमूलचूलं परिवर्तनं विदधातुमत्र संसूचनाः प्रदत्ताः (९.३ पृष्ठसङ्ख्या- ५३) सन्ति।

तृतीये भागे व्यावसायिकशिक्षायाः प्रौढशिक्षायाः भारतीयभाषाणां कलानां च विषये विस्तारेण उपपादितमस्ति। संस्कृतेः समृद्धः भण्डारो नाम भारतदेशः इति (२२.१ पृष्ठसङ्ख्या-८६) तत्र सुस्पष्टमुल्लिखितमस्ति। प्राचीनवाङ्मयस्य दर्शनशास्त्राणां च अध्ययनाय च इयं नीतिः यूनः प्रचोदयतितमाम्। अन्ते चतुर्थभागे भारतीयज्ञानप्रणाल्याः क्रियान्वयनाय कीदृशी रणनीतिः निर्मेया इति लिपिबद्धमस्ति। २०४० तमे वर्षे अनया नवनीत्या प्राप्तपरिणामान् पूर्णशः अवलोक्य पुनरपि समीक्षणं करणीयम् (२७.३ पृष्ठसङ्ख्या- १०२) इति लिखितम्।

नवशिक्षानीतिरेषा पूर्णरूपेण भारतीयकलाः भारतीयभाषाः ज्ञानविज्ञानपरम्पराः च समर्थयति; यतोऽहि देशोऽयम् अग्रेसरः भवितुम् एतानि सर्वाणि तत्त्वानि अनिवार्याणि सन्ति। परं विद्यमानायाः शैक्षिकसंरचनायाः परिष्कारेण विना एतत्सर्वं न सम्भवतीति विज्ञाय १०+२+३ इत्यस्याः वर्तमानशैक्षिकसंरचनायाः स्थाने ५+३+३+४ इत्यस्याः नवीनसंरचनायाः यथाशीघ्रम् अनुप्रयोगाय समितिः उद्घोषयत्। नवीनशैक्षिकसंरचनायाः क्रियान्वयनाय कर्णाटकराज्यसर्वकारेण सर्वादौ उत्साहः प्रदर्शितः। नवीनसंरचनायाः सर्वादौ क्रियान्वयनाय साम्प्रतिकः सर्वकारः यतमानोऽपि वर्तते। परं सर्वेषु राज्येषु सत्वरमेव नवीनसंरचनायाः अनुप्रयोगः न स्यादपि।

एतत्सर्वं मनसि निधायैव राष्ट्रियशिक्षानीतिसमित्या दशवर्षात्मकः कालखण्डः( २०३०) नूतनायाः संरचनायाः क्रियान्वयनाय अवसरः प्रदत्तः वर्तते। एकेन हस्तेन करताडनं यथा असम्भवं तथैव केवलं केन्द्रसर्वकारस्य यत्नेन नवनीतेः पूर्णशः क्रियान्वयनम् असम्भवमेव। पुनः भारतीयसंविधानेन शिक्षा समवर्तिसूच्यां निक्षिप्ता विद्यते। तन्नाम शिक्षायाः प्रचारप्रसारयोः दायित्त्वं केन्द्रराज्यसर्वकारयोरुभयोरपि वर्तते। एवम् उभयविधसर्वकारयोः पारस्परिकसहयोगः एव राष्ट्रियशिक्षानीतेः पूर्णरूपेण क्रियान्वयने मानदण्डायते। अतः समग्रे भारते नवनीतेः पूर्णशः क्रियान्वयानात् पूर्णशः प्राप्तपरिणामान् अवलोकयितुम् आकलयितुं च शक्नुमः।

'बालस्तावत् क्रीडासक्तः' इति विज्ञाय बालस्य तृतीये वयसि एव शिक्षारम्भः क्रीडामुखेन भवतु इति नवनीतौ उल्लिखितम् अस्ति। Learning by Playing, Learning by Doing, Learning by Observation इत्यादयः आधुनिक-मनोवैज्ञानिकशिक्षणविधयः आधारभूतस्तरात् एव प्रयुज्यन्ते चेत्तर्हि सुमहान् लाभः भविष्यति इति सुस्पष्टम्। परन्तु एतेषां विभिन्नविधीनां क्रियान्वयनात्पूर्वम् एतदर्थम् अपेक्षितानां मार्गदर्शकाणां शिक्षकाणां च नियोजनं यथाशीघ्रं विधेयमिति नीतिसमितिरलिखत्। भारते अद्य शिक्षकाणां छात्राणां च अनुपातः नातिश्लाघ्यः वर्तते। पुनः भवनानि ग्रन्थालयाः कक्ष्याः च पर्याप्तमात्रेण न विद्यन्ते इत्यतः क्षतिपूर्तिं कृत्वैव अग्रे पदं निक्षेपणीयमिति नीतिसमितिः साग्रहमवोचत्। विद्यालयपरित्यागप्रवृत्तिमतां बालानां सङ्ख्या यदि न्यूनीकर्तव्या तर्हि समग्रशिक्षायाः प्रारूपं परिवर्तनीयमित्यपि अत्रैव उच्यते।

पाठ्यक्रमः आमूलाग्रं परिष्कर्तव्यः इत्येव अत्र उच्यते (4.5) न तु परिवर्धयितव्य इति। साम्प्रतिकं भारभूतं पाठ्यक्रमं परिष्कृत्य तत्स्थाने पर्येषणाधारितः विश्लेषणाधारितः अनुप्रयोगकेन्द्रितः च पाठ्यक्रमः संरचनीय एवेति नीतिनिर्माणसमितेः आशयोऽस्ति।

बहुभाषाभाषिणां बालानां (4.12) निर्माणं बाल्यादेव शक्यमित्यतः मातृभाषया सह इतरभाषाणामपि शिक्षणं बाल्यादेव देयमिति इयं समितिः अभिप्रैति। वस्तुतः इतः पूर्वं प्रकटितासु नीतिषु माध्यमिके उच्चमाध्यमिके च स्तरे भाषात्रयस्य अध्ययनार्थं संसूचनाः प्रदत्ताः आसन्। परम् इयं नीतिः तत्पूर्वं भाषाणाम् अध्ययनार्थं बलमयच्छत् इति विशेषः एव। प्राथमिकस्तरे संस्कृताध्ययनाय वैकल्पिकाः अवसराः अत्र प्रकल्पिताः सन्ति।

'अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्' आसीत् आद्यः शङ्कराचार्यः। बालानां मस्तिष्कस्य विकासः अपि अष्टवर्षाभ्यान्तरे अधिकाधिकरूपेण सञ्जायते (85%) इति परिभाव्य नीतौ एतद्विषये विस्तरेण उक्तमस्ति। जीन् पियाजे महोदयस्य संज्ञानात्मकसिद्धान्तस्य अपि सुमहान् प्रभावः राष्ट्रियशिक्षानीतिनिर्माणसदस्यानाम् उपरि अभूत् इति प्रतिवेदनस्य सूक्ष्मेक्षिकया अवलोकनेन विज्ञायते। पुनश्च संस्कृतभाषा न केवलं शास्त्रीयभाषा अपि तु इयम् आधुनिकी भाषा अपि (4.17) वर्तते इत्यतः भाषात्रयस्य अध्ययनसन्दर्भे संस्कृतस्य वैकल्पिकं स्थानं देयमिति उक्तमस्ति। आङ्ग्लभाषामात्रमोहग्रस्ताः आधुनिकाः बालाः विदेशभाषाः तन्नाम फ्रेन्च्, जर्मन्, स्पेनिश्, रूसी इत्याद्याः भाषाः अपि पठेयुरिति अत्रैव उक्तमस्ति। परन्तु भाषात्रये भाषाद्वयम् अनिवार्यरूपेण भारतीयं भवेदेवेति अत्र सुस्पष्टम् उक्तमस्ति। इदं तु सौकर्याय एव। परं किशोरावस्थायां भाषाद्वयमेवेति चिन्तनम् क्वचित् औचित्याय न कल्पेत। एषा प्रक्रिया संस्कृतभाषायाः विकासदृष्ट्या अननुकूला एवास्ति।

शिक्षकाणां स्तरः स्थानं वेतनमानदेयादिकम् अद्यापि नातिश्लाघ्यं वर्तते । अतः इमे हि राष्ट्रस्य भविष्यनिर्मातारः यथाशीघ्रं सुदृढीकर्तव्याः इति नीतौ प्रोक्तम्। शिक्षकपात्रतापरीक्षाप्रणाल्याः (TET) परिष्काराय नियतरूपेण सञ्चालनाय (5.4) शिक्षकचयन-प्रक्रियायां वस्तुनिष्ठसाक्षात्कारपद्धतेः जोडनाय च अत्र संसूचनाः प्रदत्ताः सन्ति। विद्यालयपाठ्यचर्यायाः प्रारूपनिर्माणवेलायां छात्राः पूर्णरूपेण केन्द्रबिन्दवः भवेयुः, तत्रापि बालिकानां किशोराणां च विविधसमस्याः मनसिकृत्य एव अग्रे प्रवर्तनीयमिति अत्र उदाहृतं विद्यते।

बहुविषयकाध्ययनपरम्परा अथवा सर्वविद्यासमावेशितपरम्परा पुरा तक्षशिला नालन्दा इत्यादिषु शिक्षाकेन्द्रेषु आसीत्। बाणभट्टेन कादम्बर्यां उल्लिखिताः (11.1) चतुषष्टिः कलाः ज्ञानस्य विषयविशेषरूपेण उपवर्णिताः सन्ति। एतादृश्यः सर्वविद्याभिः सङ्कलिताः प्रणाल्यः एव आधुनिकभारतीयोच्चशिक्षाकेन्द्रेषु दृश्येरन् इति अत्र साग्रहम् उल्लिखितम् अस्ति। एतादृशाः उल्लेखाः संस्कृतवाङ्मयं परोक्षरूपेण समर्थयन्ति।

शिक्षकप्रशिक्षणकार्यक्रमस्य सम्प्रत्ययः एव पूर्णरूपेण परिष्कृतः भवेत् इति धिया एकीकृतः चतुर्वर्षीयः शिक्षकशिक्षाकार्यक्रमः 2030 संवत्सराभ्यन्तरे समग्रभारते अनुष्ठेय इति नवनीतौ उल्लिखितम् अस्ति। एतदतिरिच्य व्यावसायिकशिक्षास्वपि बालानां ध्यानाकर्षणाय (16.3) नैकाः संसूचनाः प्रदत्ताः वर्तन्ते। अनुसन्धानक्षेत्रे गुणवत्तासंवर्धनं नीतेरस्याः प्रमुखं लक्ष्यमित्यपि (17.8) उद्घोषितं दृश्यते। एतत्कर्मणि साफल्यसम्पादनाय राष्ट्रियानुसन्धानप्रतिष्ठानस्य (National Research Foundation) प्रतिष्ठापनप्रस्तावोऽपि तत्र कृतः वर्तते।

स्वास्थ्यकृषिवाणिज्यविधिप्रविधिशास्त्रप्रभृतिषु क्षेत्रेषु अपि (20.1/2/3/4/5) महत्परिवर्तनं कर्तुमत्र संसूचनाः विद्यन्ते। संस्कृतेः समृद्धभाण्डारोपमे भारते तज्जीवातुभूतानां भाषाणां कलानां विभिन्नसंस्कृतीनाम् अभिव्यक्तीनां प्रोन्नयनाय (22.1) अन्ताराष्ट्रियस्तरे अतुल्यभारतस्य भव्यरूपप्रदर्शनाय अपेक्षितानि कौशलानि भारतीयैः किशोरैः अधिगन्तव्यानीति नीतावत्र निगदितम्। संस्कृतभाषायाः व्याप्तिः पाठशालापर्यन्तं संस्कृतविश्वविद्यालयानां पर्यन्तमेव वा सीमिता न स्यात् इत्यतः आधुनिकधारायां त्रिभाषासूत्रे उच्चशिक्षायां च संस्कृतस्य वैकल्पिकं स्थानं भवत्विति (22.15) भावः नीतौ दृश्यते। न केवलं संस्कृतस्य अपि तु सर्वासां शास्त्रीयभाषाणां पुनरुद्धाराय विद्यमानाः सार्थकमार्गोपायाः चर्चिताः सन्त्यत्र। पूर्वोदाहृताभ्यः अनुदाहृताभ्यश्च योजनाभ्यः क्रियारूपदानाय केन्द्रसर्वकारेण समेषां राज्यसर्वकाराणां सहयोगं स्वीकृत्य दशकद्वये (२०३० -२०४०) सर्वत्र नीतेरस्याः क्रियान्वयनं सम्पादनीयमित्याशाभावेन (27.3) विरमति इयं लिपिबद्धा नीतिः।

## परिशीलितग्रन्थसूची –

1. राष्ट्रिय शिक्षा नीति - 2020, मानव संसाधन विकास मंत्रालय, भारत सरकार

2. विकासोन्मुख भारतीय समाज में शिक्षक तथा शिक्षा - 2010 , प्रो. एस. पी. रुहेला, श्री विनोद पुस्तक मन्दिर, आगरा -2

3. आधुनिक भारतीय शिक्षा की समस्याएँ -2016, डा.एस.पी.गुप्ता तथा डा. अलका गुप्ता, शारदा पुस्तक भवन, इलाहाबाद

4. शब्दार्थकौस्तुभः -1999, साहित्यविद्वान् चक्रवर्ती श्रीनिवासगोपालाचार्यः, बाप्को प्रकाशन, बेङ्गळूरु प्रेस, बेङ्गळूरु

*********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# काश्मीरशैवाचार्यरामकण्ठकृतसर्वतोभद्रविवणाख्ये गीताव्याख्याने योगस्वरूपविमर्शः

**Arupam Sanyal**
Research Scholar
Department of Sanskrit and Philosophy
Ramakrishna Mission
Vivekananda Educational and Research Institute
Belur Math, Howrah-711202, West Bengal
Contant No. : 9434139084
E-mail : sanyalarupam94@gmail.com

## काश्मीरशैवाचार्यपरम्परायां गीताशास्त्रम्-

भारतस्यान्येषु सम्प्रदायेषु यथा तथैव काश्मीरशैवसम्प्रदायेष्वपि श्रीमद्भगवद्गीतायाः समस्ति सुमहत्स्थानम्। गीताशास्त्रं शैवागमपदभाक् यतः महाभारते उक्तमेव उपमन्युः श्रीकृष्णाय शिवज्ञानं प्रादात् अतः उपमन्युतः प्राप्तशिवज्ञानः कृष्णस्तु शैवाचार्य एव। अतः तत्प्रोक्ता गीतापि शैवशास्त्रम्। काश्मीरस्य शैवशाक्तपरम्परायां गीतायाः अस्ति महत्त्वपूर्णं स्थानम्। अधिकांशतः शैवपरम्परायामेवमेव दृश्यते यत् शैवागमेषु प्राप्तशिवज्ञानः जनः शिवाद्वयशासनगतान् सिद्धान्तानुपदिशति। गीतायाः उपदेष्टा तु श्रीकृष्णः यो हि शैवाचार्यः उपमन्युतः शिवाद्वयशासनगतं ज्ञानम् अवाप। अतएवोक्तं शैवेनोक्तत्वादागम एष। न केवलं काश्मीरस्य शैवपरम्परायां शाक्तपरम्परायामपि श्रीमद्भगवद्गीतायाः समस्ति महत्त्वपूर्णं स्थानम्। काश्मीरस्य क्रमाख्ये शाक्तसम्प्रदाये अपि गीता क्रमदर्शनस्य आगमत्वविषये उक्तम्। तथाहि उक्तं तेन क्रमदर्शनस्य प्रख्याते ग्रन्थे महार्थमञ्जर्याम्-

एनमेव महार्थं युद्धारम्भे पाण्डुपुत्रस्य। षोडशशक्तिर्देव उपदिशति माधव इति शिवम्। [1]

पुनः अस्मिन् हि सम्प्रदाये कृष्णः गीताग्रन्थे शाक्ततत्त्वमेव व्यक्तीचकार। उक्तं हि महार्थमञ्जर्याः परिमलटीकायाम्- "माधवः पाण्डुपुत्रायोपदिशतीति गुरुशिष्यभावोद्भावनेन इमं विवस्वते योगम्... रहस्यं ह्येतदुत्तमम् इति गुरुपर्वक्रमात्मनः सम्बन्धस्यानुसन्धेयता द्योत्यते ।" महार्थमञ्जरी पृ- १८७। [2] इत्थं स्पष्टं प्रतीयते काश्मीरस्य आगमिकपरम्परायां गीतायाः कीदृशं स्थानमस्तीति। शैवाचार्याणां शाक्ताचार्याणां मते तेषां शास्त्रप्रतिपादिततत्त्वस्य परतत्त्वस्वरूपस्यैव परिचयः गीताशास्त्रपाठात् लभ्यते। काश्मीरशिवाद्वयशासनगताः सिद्धान्ताः अत्र प्रकाशिताः वर्तन्ते इति शिवाद्वयशासनविदां मतिः। अतएव काश्मीदेशीयानां शैवाचार्याणां महती परम्परा विद्यते गीताशास्त्रव्याख्यानस्य। गीताशास्त्रं हि आगमज्ञानस्वरूपत्वादादृतं शैवाचार्यैः।

## गीतायाः काश्मीरिकटीकापरम्परा-

काश्मीरदेशे सुप्राचीना हि गीतायाः टीकारचनपरम्परा। तत्र सर्वप्रथमं शिवसूत्रकारेण वसुगुप्तेन वासवीनाम्नी टीका आरचिता। परन्तु सा टीका सम्प्रति न लभ्यते। एवमेव राजानकेन रामकण्ठेन सर्वतोभद्रविवरणाख्या व्याख्या विरचिता । टीकैषा नवमशतकीया । एतदनन्तरं महामाहेश्वराचार्येण अभिनवगुप्तेन गीतार्थसंग्रहाख्यं व्याख्यानं कृतम्। एतद् व्याख्यानं स्वव्याख्यागरिम्णा प्रसिद्धिं गतम्। एतदितिरिच्यापि सन्ति बहूनि व्याख्यानानि गीतायाः। तेषु च राजानक-आनन्दवर्धनस्य आनन्दीटीका, राजानकलक्ष्मीरामस्य तत्त्वप्रकाशव्याख्यानम्, राजानकलासकस्य लासकी इत्यादीनि सन्ति टीकाः। उपलभ्यमानासु टीकासु प्राचीनतमा राजानकरामकण्ठस्य टीका। राजानकरामकण्ठस्य टीका एषा भावगाम्भीर्येण च विदुषां मनः आवर्जयति। अभिनवगुप्तात् परं काश्मीरशैवागमपरम्परायां या

1. महार्थमञ्जरी, पृ.-७० ।
2. महार्थमञ्जरी, पृ.-१८७ ।

गीताटीका अत्यन्तं महत्त्वं वैलक्षण्यञ्च भजते सा हि टीका एषा सर्वतोभद्रविवरणाख्या। पुनः अत्र विषयाः विस्तरशः वर्णिताः सन्ति। तत्र वर्णितेषु विषयेषु योगस्वरूपविषये अस्माभिः चर्चा क्रियते।

**सर्वतोभद्रटीकानुसारेण योगस्वरूपम्**

परमेश्वरदशासम्प्राप्तेरुपायभूतः हि योगः। तस्य च योगस्य प्रसङ्गवशात् सर्वप्रथमं रामकण्ठेन वेदादिशास्त्रस्य विषये उक्तम्- "यावता शास्त्रैकदेशेन परमार्थोपलब्धिलक्षणार्थक्रियानि विधिसहस्त्रसंकुलादपि उपादातव्यम् । किमुक्तं भवति। यथा तृषितेन अर्थिना सुसंपूर्णात् समुद्रकल्पादपि जलाशयात् स्वार्थक्रियासम्पत्तिमात्रक्षममुदकं स्तोकं समुपादीयते, न सर्वो जलाशयः।

एवं ज्ञानक्रियाविषयविविधार्थसार्थसम्पूर्णादपि वेदशास्त्राद् तत्त्वजिज्ञासुना तदवगममात्रोपयोगी एव अर्थः उपादातव्यः, नतु सर्वमेव वेदशास्त्रमिति।" [3] अर्थात् वेदादिशास्त्रेषु प्रवृत्तिमार्गोचितानि बहूनि कर्माणि विधीयमानानि सन्ति। तानि कर्मविधायकानि वाक्यानि पुरुषं कर्मणि कर्मफले च प्रवर्तयन्ति। परन्तु परमार्थबोधेच्छूना सर्वान्येतानि विधिवाक्यानि न आश्रयणीयानि। समुद्रतुल्ये अग्निहोत्रादिविविधविधिवाक्यान्विते वेदे यत् यत् परमार्थबोधरूपाभिप्रेतस्य अर्थस्य सिद्धिं करोति तत् तदेव ग्राह्यम्। रामकण्ठेन अर्थक्रिया इति शब्दस्य प्रयोगः कृतः अर्थक्रियाशब्देन व्यावहारिकप्रयोजनानुकूला क्रिया इत्यभिप्रायः शैवशास्त्रविदाम्। [4] अतः टीका-कारस्याभिप्रायः अत्र यत् यद्यपि प्रवृत्तिमार्गोपपेदशकानि असंख्यानि विधिप्रतिपादकानि क्रियानिदेशकानि वाक्यानि सन्ति वेदे तथैव च निवृत्तिप्रतिपादिकानि बहूनि ज्ञानमार्गनिर्देशकवाक्यान्यपि विद्यन्ते सरहस्ये वेदशास्त्रे तथापि यः परमतत्त्वजिज्ञासुः जनः तेन स्वपरमार्थ बोधार्थरूपार्थसिद्धिः यत्परिमाणेन भवति तदेव ग्राह्यमुपादेयतया न सर्वं वेदादिशास्त्रोक्तं वाक्यजातम्। अनेन च रामकण्ठेन वेदादिशास्त्रेभ्यः आहृतस्य ज्ञानस्य सीमा निर्धारिता। शैवागमशास्त्रविद्भिः श्रुतिः आगमार्थस्यैव परिपूरकत्वेन मन्यते।

आगमार्थं विवेचयन्तः शैवाः वेदार्थविचारे प्रवृत्ताः भवन्ति। तत्र ये अंशाः आगमशास्त्रप्रतिपादितस्य परमशिवतत्त्वस्य प्राप्तौ सहायभूताः ते एव अर्थाः ग्रहणीयाः। विविधविषयकाः वेदाः तत्र मोक्षाख्यस्य परमतत्त्वस्य विषये आलोचिताः वेदार्थाः आगमशास्त्रार्थोपयोगित्वेन स्वीकरणीयाः अद्वयशैवशासनविदां जनानामिति तात्पर्यं रामकण्ठस्य। परमतत्त्वोपलब्ध्युपायः योगः अतः तस्य सहायकत्वेन यथोचितवेदार्थविचारः आवश्यकः इत्यपि बोद्धव्यम्। योगः इति शब्दस्य टीकायां शास्त्रनिर्दिष्टानां कर्मणामाचरणे शास्त्रोक्तात्माद्वैतज्ञाननिष्ठत्वमिति निगदितम्। [5] योगप्रसङ्गवशादेव रामकण्ठेन तेन हि कर्मत्यागाविषयिणी आलोचना विहिता कर्मण्येवाधिकारस्ते इत्यादिषु श्लोकेषु। [6] तत्रैव च तेन परमतत्त्वप्राप्त्युपायः विवृतः। रामकण्ठेनोक्तं यत् अनित्येभ्यः देहादिभ्यः आत्मप्रत्ययस्य व्यावृत्तिं विधाय अद्वैतचिज्ज्योतिस्वरूपमात्मानं विभाव्य पुनः निवृत्त्यात्मकं शास्त्रविहितं कर्म करणीयम्। अत्र हि तेन निवृत्तिशब्देन देहमनोवागादिभ्यः निवृत्तिमूलकं परमपदमभिहितम्। एतानि शास्त्रविहितानि कर्माणि नित्यनैमित्तिककाम्यादिभेदेन विविधानि। एतेषु कर्तृत्वमेव अधिकारः इति उच्यते। तत्राधिकृतेन जनेन शास्त्रकर्मणि प्रवर्तितव्यम्। कर्मणां कदापि आत्यन्तिकः त्यागः असम्भवः यतः शरीरधारिणा जनेन कदापि कर्म अकृत्वा स्थातुं न शक्यते। सर्वकर्मत्यागरूपे सन्न्यासावस्थायामपि न भवति कर्मत्यागः। राजानकरामकण्ठमते सन्न्यासावस्थायां केचन नियमाः अनुपाल्यन्ते ते हि नियमा अपि वर्णाश्रमकर्मवदेव ग्राह्याः। [7] अतः कर्मत्यागः

---

3. सर्वतोभद्रविवरणम्,पृ-४४ ।
4. शैवदर्शनबृहत्कोषः, प्रथमःखण्डः,पृ. ५४ ।
5. सर्वतोभद्रविवरणम्, पृ.- ४६ ।
6. सर्वतोभद्रविवरणम्, पृ.- ४४ ।
7. सर्वतोभद्रविवरणम्, पृ.- ४५ ।

असम्भवः पुनरन्यया दृशा उक्तं रामकण्ठेन टीकाकृता यत् कर्मणाम् अत्यागः अपि त्यागः।[8] व्यवहारिकजगति समवलोक्यते यत् कर्मणां त्यागग्रहणे च रागद्वेषौ मुख्यकारणभूतौ अतः कस्मिन्नपि विषये कस्यापि रागः भवति चेत् तस्य कर्मणः ग्रहणं भवति। एवमेव यो हि विषयः कस्यापि विद्वेषस्य कारणं सः त्यज्यते जनैः विद्विष्टत्वात्। अतः रागद्वेषव्यतिरिक्तेन कर्मणां ग्रहणत्यागस्य प्रसङ्गः न दृश्यते। पुनः रागेण द्वेषेण च कर्माचरणम् अतत्त्वविद्भिः क्रियते । अतः कर्मणां त्यागः विरुद्धकर्माचरणं च तत्त्वविदां नेष्टम्।[9] स्वतन्त्रचिदद्वयतत्त्वमेव आत्मतत्त्वत्वेन विवेचयन्ति तत्त्वविदः जनाः। तेषां कृते हि परमसमत्वबोधरूपा परमा समाधिदशा लक्ष्यभूता भवति। अतः कर्मणामनाचरणं कर्मणां विरुद्धाचरणम् उभयोः एव समानतया उपपन्नता नास्ति। अतः कर्ममात्रे एव अधिकारः भवति जनानां। श्रुत्युक्तानां स्मृत्युक्तानाञ्च कर्मणां भोगोपभोगरूपेषु दृष्टेष्वदृष्टफलेषु च अधिकारः न करणीयः। ये हि आत्मतत्त्वम् अज्ञात्वा फलान्यभिवाञ्छ्य तेषु तेषु कर्मसु प्रवृत्ताः भवन्ति ते जनाः तेषां कर्मणामेव वासनाः अन्तःकरणेषु बीजरूपेण तिष्ठन्ति। अनित्यानामेषां कर्मफलानां यदा उपभोगक्षयो भवति उतवा वक्तुं शक्यते कर्मफलानि यदा क्षीणानि भवन्ति तदा अन्तःकरणे बीजरूपेण स्थिताः नानाप्रकारकाः कर्मफलवासनाः तासां तासां कर्मफलवासनानामाणुगुण्येन विविधप्रकाराणां जन्मनां कारणत्वेन पर्यवस्यन्ति। एवं हि कर्मफलवासनानुसारेण विविधेषु योनिषु भ्रमन्ति जीवाः अतत्त्वविदः। तत् तज्जन्मनः कारणत्वेन कर्मफलानि। कर्मफलानां कारणत्वेन च कर्माणि भवन्ति। इत्थं क्रमशः वासनातः कर्म कर्मणः कर्मफलं कर्मफलरूपेण जन्म इति वासनाजन्मकर्मकर्मफलचक्रं निरन्तरं चलति।[10] एवमेव संसारचक्रे निमग्नः जीवः बद्धः भवति। अतः एतादृशः बद्धदशाप्राप्तिः जीवस्य मा भवतु इति कारणात् योगः आवश्यकः। शास्त्रनिर्दिष्टानां कर्मणामाचरणे शास्त्रोक्ता- त्माद्वैतज्ञाननिष्ठत्वेन कर्म करणीयम्। शुभानां कर्मणाम् अशुभानाञ्च च कर्मणां फलानि फलवासनया एव उत्पद्यन्ते अतः अद्वैतज्ञाननिष्ठत्वेन वासनाराहित्येन च कर्म आचरणीयम्।

अद्वैतज्ञाननिष्ठया कर्माणि क्रियन्ते च फलानि नोत्पद्यन्ते। तज्ज्ञाननिष्ठतया कर्मणामाचरणे वासनाबीजानि अक्षमानि भवन्ति यथा दग्धबीजानां नास्ति फलवत्ता। ज्ञानाग्निना वासनाबीजानि भवन्ति दग्धानि तेन च परमेश्वरदशाप्राप्तिरूपं मोक्षपदं समवाप्यते।[11] एवमेव कस्याप्यवस्थायां कर्मपरिहारस्य विधानं भवति। तत्र तत् कर्मपरिहारः अकर्मेति उच्यते। तस्मिन् हि अकर्मणि अपि जीवस्य आसक्त्यापत्तिर्भवति। अतः जीवः तं अकर्मदशां प्रति आसङ्गयुक्तः भवति। परन्तु राजानकरामकण्ठमते गीतायां तस्याकर्मणः सङ्गराहित्यमुपदिष्टं भगवता पार्थसारथिना। सो अकर्मणि आसक्ति परोक्षरूपेण कर्मवत् फलकारकत्वं भवति। फलवशात् पुनः जन्ममरणादिचक्र बद्धो भवति जीवः। अतएव कर्मान्तरवत् स अपि बन्धस्य कारणत्वात् त्याज्यम्। अकर्मणि सङ्गरहितत्वमपि योगः।[12] उक्तं हि राजानकेन रामकण्ठेन योगशब्दस्य विषये कपिलादिभिः सांख्याचार्यैः प्रणीतस्य सांख्यनामकस्य ज्ञानस्य पातञ्जलादिप्रवर्तिते योगादिशास्त्रे स्थितिरस्ति। अर्थात् कपिलादयः सांखशास्त्रप्रवर्तकानां सांख्यनामकं यत् तत्त्वप्रसंख्यानात्मकं ज्ञानमस्ति तस्य प्रतिष्ठा चित्तवृत्तिनिरोधलक्षणात्मके योगे भवति।[13] एवमेव यत् आत्मनः अद्वयज्ञानम् उपदिष्टं गीताशास्त्रे तस्यापि आत्माद्वयज्ञानस्य स्थितिः कर्मानुष्ठानसमाधिरूपे योगे अस्ति। अर्थात् शास्त्रविहितानि यानि कर्माणिभवन्ति तेषां कर्मणाम् अनुष्ठानात् समाधिदशाप्राप्तिरेव मुख्यं लक्ष्यं कर्मानुष्ठातुः जनस्य। अतः एतादृशे आत्माद्वयज्ञाननिष्ठया कर्मानुष्ठानात्मके योगे प्रतिष्ठा एव गीताशास्त्रस्याशयः। यस्मिन् कस्मिन्नपि आश्रमे कस्यापि स्थितिर्भवतु तेन आत्माद्वज्ञाने स्थितः भूत्वा कर्माचरणं विधेयम्।

---

8. तदेव ।
9. तदेव ।
10. तदेव ।
11. सर्वतोभद्रविवरणम्,पृ.४६ ।
12. सर्वतोभद्रविवरणम्,पृ.-४६ ।
13. तदेव

अत्र हि तेन आश्रमपरिहारस्य विषये अपि उक्तं तथाहि- तत्र तादृशे योगे स्थितः आश्रमान्तरपरिहारेण कृतप्रतिष्ठः सन् यथोक्तानि कर्माणि अनुतिष्ठ। [14] इत्यत्र आश्रमान्तपरिहारशब्देन तस्य तात्पर्यम् यत् फलप्राप्तेः कृते यत् ये उपायाः सन्ति तेषामुपाये वा फलप्राप्तिविषये एव यदि कर्मानुष्ठाता आसक्तचित्तः भवति तर्हि सः न योगः। अतः आश्रमान्तरपरिहारेणात्र आश्रमविहितकर्मफलप्राप्तिः फलप्राप्त्युपायैकचित्तत्वं परिहृत्य अद्वयज्ञानस्थितत्वेन कर्माचरणं करणीयमिति तात्पर्यार्थः। फलासक्तचित्तेन कर्माणि क्रियन्ते चेत्तर्हि तर्हि फलप्राप्तौ सत्यां सुखं फलस्य अलाभात् दुःखं कर्मिणा अनुभूयते। परन्तु राजानकस्य रामकण्ठस्यायमेवाशयः यत् गीताशास्त्रे एतस्याः फलासक्तेः परिहारः एव उपदिष्टः। अतः अद्वयज्ञाननिष्ठत्वेन कर्माचरणं क्रियते चेत् फलप्राप्तौ वा फलाप्राप्तौ वा निर्विकारचित्तत्वं भवति। अद्वयात्मज्ञाननिष्ठः जनः नित्यनिजस्वरूपान्दं प्रत्यवमृशन् कर्मणः साफल्ये वा असाफल्ये वा न कोऽपि सुखदुःखात्मकमनुभवं प्राप्नोति। समत्वप्राप्तिरेव योगः इति टीकाकास्याशयः। येन हि समत्वबुद्ध्या सुखदुःखमतीत्य विकाररहित्वेन कर्मानुष्ठानं क्रियते योगनिष्ठेन जनेन। [15] वस्तुतः योगनिष्ठस्य पुरुषस्य सर्वेषु अनुष्ठानेषु यद्यपि प्रवृत्तिः अवश्यम्भाविनी तथापि यत्किमपि अनुष्ठानं क्रियते चेत् तत् अनित्यविषयाणां भोगेप्सया न कर्तव्यं यतः प्रागेवोक्तं यत् तदेव बन्धनस्य कारणम्। स्वस्य परमस्वतन्त्रचित्स्वरूपं विस्मृत्य बद्धदशां प्राप्य जीवः योनिषु सञ्चरति कर्मफलाकाङ्क्षकारणात् अतः यो हि स्वतन्त्रः सः देहादिषु आत्मबुद्ध्या फलाकाङ्क्षया कर्म कृत्वा आत्मानं बद्धं करोति । अतः कर्मफलत्यागरूपे अग्नौ शुभाशुभफलं समर्प्य कर्माचरणीय- मित्याशयः। भोगेच्छाराहित्यमेव मोक्षकारणम् कर्मफला-काङ्क्षाराहित्यञ्च फलप्रसवसामर्थविनाशः। अतः भोगेच्छाराहित्येन कर्म कृत्वा तस्य शुभाशुभां फलं च निर्विकारचित्तत्वेन स्वीकृत्य जनः त्यागवान् इति भवति तस्य कर्मफलाकाङ्क्षात्यागात्। पुनः रामकण्ठेनोक्तं यत् कर्मत्यागरूपः योगः गीतायाः आशयः न। न तु क्लेशादिभयात् कर्मणां त्यागः आशयः शास्त्रस्यास्य अपितु फलाकाङ्क्षाक्षारहिते नित्यकर्मानुष्ठानरूपे त्यागरूपे च तात्पर्यम् गीताशास्त्रस्य योगशब्देन। उक्तं हि तेन- न हि त्यागादिमात्रं ज्ञानं मन्यते [16]

**उपसंहारः**

इत्थं रामकण्ठेन योगस्य स्वरूपं विस्तरशः वर्णितम्। तस्य योगस्वरूपवर्णनम् अन्येभ्यः गीताव्याख्याकारेभ्यः विलक्षणम्। पुनः तत्र प्राचीनत्वमप्यस्ति अस्य व्याख्यानशैल्याः। अन्येषां गीताव्याख्याकारैः सह पार्थक्यमिदमेवास्ति यत् तस्य व्याख्यानशैली अन्वयार्थमात्रपरा। परन्तु तथापि तेन अन्वयमुखिव्याख्यावसरे एव स्वीयाः सिद्धान्ताः प्रकटिताः। ते हि सिद्धान्ताः यद्यपि गाम्भिर्यपूर्णाः तथापि अस्ति तत्र सुस्पष्टत्वं सिद्धान्तस्य। योगस्वरूपविषये राजानकरामकण्ठेन सुसंहतशैल्या यत् विवृतं तत् काश्मीरशैवागमपरम्परायाः कर्मविषयकप्राचीनानामवधारणानां परिचयं ददाति। अतः टीका एषा स्वव्याख्यानगरिम्ना एव अन्यतमा इति कथयितुं शक्यते।

**अवलोकिताः ग्रन्थाः**

१. श्रीमद्भगवद्गीता राजानकरामकण्ठविरचितसर्वतोभद्रविवरणोपेता, सम्पा. पण्डितमधुसूदनकौलशास्त्री, श्रीनगरम्, निर्णयसागर मुद्रणालयः, १९४६ (प्रथमसंस्करणम्)।

२. शैवदर्शनवृहत्कोषः , परियोजनानिदेशकः व्याख्याकारश्च- बलजिन्नाथपण्डितः, सम्पा. प्रियतम चन्द्रशास्त्री, जम्मु, श्रीरणवीरसंस्कृतविद्यापीठम्, २००१।

३. महेश्वरानन्दः, महार्थमञ्जरी, सम्पादकः- व्रजवल्लभद्विवेदी, सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी, १९९२।

14. तदेव । 15. तदेव । 16. तदेव ।

***********

**Volume XIX : January to June – 2022, ISSN 2250-1711**

**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# शब्दस्य सामर्थ्यद्वयनिरूपणम्

**Dr. P. R. Archana Karanth**
Guest Lecturer, Dept. Of Vyakarana
Karnataka Sanskrit Univercity
Chamaraja Pete-560018, Bengaluru, Karnataka
Ph no. – 9481904228
e-mail – archanakaranth6@gmail.com

यथा श्रुतिभिः ब्रह्मतत्त्वस्य जगत्कारणत्वं निरूपितं तद्वत् "वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं सन्तनोति । वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते"1, "ओमित्येकाक्षरं ब्रह्म"2, "ओमिति ब्रह्म, ओमितीदं सर्वम्"3 इत्यादि वाक्यैः ब्रह्मणः शब्दरूपतायाः प्रतिपादनात् शब्दब्रह्मैव जगत्कारणम् । तथा ह्ययं नामरूपात्मकः दृश्यमानः संसारः अखण्डशब्दतत्त्वस्य विवर्तरूप इत्यामाम्नायविदः विदुः । तथा च प्रसिद्धा ह्येषोक्तिः –

**सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥**4

अर्थादेतत् जगदादौ कर्तृपारतन्त्ररहितेभ्यः अपौरुषेयेभ्यः वेदेभ्यः अजायत इति । वेदानाञ्च शब्दरूपत्वात् शब्दादुत्पत्तिरिति सिद्धम् । महाभारतस्य शान्तिपर्वणि पाराशरिरप्येवमुदाजहार -

**अनादि निधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः ॥**5

जगति विद्यमानानि चराचरवस्तूनि शब्दः अर्थश्चेति द्वेधा विभज्यते । यावदर्थप्रपञ्चस्य विस्तीर्णता तावदेव शब्दप्रपञ्चस्यापि । अर्थप्रपञ्चस्तु बहुभिः दार्शनिकैः नैकेषु दर्शनेषु विभिन्नप्रकारैर्विमर्शितः । शब्दप्रपञ्चस्तावत् शब्दशास्त्रमात्रेण विव्रियते, विस्तीर्यते च । एकमर्थं बोधयितुमनेके शब्दाः प्रयुज्यन्त इति शब्दानामेवाधिकत्मत्वम् । अत एव हरिः स्वस्मिन्वाक्यपदीयग्रन्थे अद्भुतमिति नाम्ना शब्दशास्त्रं शंसति यथा – "वैखर्या मध्यमायाश्च पश्चन्त्यश्चैतदद्भुततम्"6 इति । यद्यपि वैयाकरणैः शब्देति जेगीयमानः स्फोटाख्य एव तथापि सः वक्तृबुद्धिमात्रगोचरः, सूक्ष्मप्राणवृत्त्यनुगतः, अरूपः, अखण्डः, प्रकृतिप्रत्ययविभागरहित इत्यतः प्रक्रियानिर्वाहाय स्फोटाख्यशब्दोपलब्धये च वैखरीवागुररीकृता । परश्रोत्रविषयः, साध्वसाधुविषयः, प्रकृतिप्रत्ययविभागसहितः यः वैखर्याख्यः शब्दः तमाश्रित्येयं विचारसरणिः प्रवर्तते ।

अर्थप्रत्यायनाय हि शब्दप्रयोग इति विदितमेव । गवादिशब्दानां यदि सास्नादिमद्व्यक्तिबोधने एव सामर्थ्यं तर्हि गामुच्चारयेति लोके, राज्ञो यत् इति शास्त्रे च, अर्थे कार्यस्य बाधात् निरुक्तवाक्यानामप्रामाण्यं स्यात् । अतः शब्दोऽपि शाब्दबोधे भासत इति पक्षः वैयाकरणैरङ्गीकृतः । शब्दः स्वस्य रूपमर्थात् आनुपूर्वी-स्वरूपं बोधयदर्थमुपस्थापयतीति स्थितिः । एते एव शब्दस्य विशिष्टे द्वे शक्ती ग्राह्यत्वं – ग्राहकत्वञ्चेति । ग्राह्यः नाम प्रकाश्यः, ग्राहकः नाम प्रकाशकः । हरिणा इमे शक्ती तेजो दृष्टान्तेनेत्थं न्यरूपि –

**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा । तथैव सर्वशब्दानां एते पृथगिव स्थिते ॥**7

---

1. प्राचीनोक्तिः ।
2. भगवद्गीता ८/१३ ।
3. तैत्तिरीयोपनिषद्, शिक्षावल्ली ।
4. मनुस्मृतिः १/२१ ।
5. महाभारतम्, शान्तिपर्व २३९/५६
6. वाक्यपदीयम्, ब्रह्मकाण्डम् १४२ ।
7. वाक्यपदीयम् ब्रह्मकाण्डम्, ५५ ।

यथा तेजसः स्वरूपप्रकाशकत्वेन स्वयं प्रकाश्यत्वं, घटादेः प्रकाशकत्वञ्चेति द्वे सामर्थ्ये तथैव सर्वेषां शब्दानां स्वेन स्वस्य ग्राह्यत्वं, अर्थग्राहकत्वं चेति द्वे शक्ती स्तः । ते उभेऽपि वस्तुतः अभिन्नेऽपि बुद्धिभेदेन भिन्ने इव भासेते । घटादयो हि विषयाः इन्द्रियजन्यज्ञानेन प्रकाश्याः एव भवन्ति, न तु स्वस्य परस्य वा प्रकाशकाः । चक्षुरादीनि ज्ञानकरणादीनीन्द्रियाणि परस्य घटादेः ज्ञानजननेन ग्राहकाण्येव, न तु स्वयं ग्राह्याणि भवन्ति । एवं ज्ञानविषये ग्राह्यत्वं, ज्ञानकरणे ग्राहकत्वं सिद्धम् । परं तेजसि प्रकाश्य – प्रकाशकत्वभावश्चेत्युभय-मप्युपलभ्यते यथा तथा शब्देऽपि । न च एकस्मिन्नुभयस्वीकारे कर्तृ – कर्मभावविरोधः शङ्क्यः, लोकप्रसिद्धत्वात् । किञ्च अन्येन दृष्टान्तेनाप्येतेदुपपादयितुं शक्यते । यथा – ज्ञाने ज्ञेयरूपम्, आत्मस्वरूपमुभयमपि प्रत्यक्षीक्रियते, तथा शब्देऽपि अर्थरूपं – सास्नादिमद्व्यक्तिः, स्वरूपं – स्वकीयं तत्तद्वर्णानुपूर्वीरूपमित्युभयमपि शाब्दबोधे विषयीक्रियते । तथा हि शब्दानां अर्थे शब्दे(स्वरूपे) च खण्डशः शक्तिः स्वीकार्या । तत्रोभयोः विशेष्य – विशेषणभावे कामचारः । यत्रार्थे कार्यस्य सम्भवः तत्र अर्थः विशेष्यः, शब्दः विशेषणम् । यथा गामनय इति । यत्र च बाधः तत्र शब्द एव विशेष्यः । यथा राज्ञो यत् । अत्रार्थे "**स्वं रूपम् शब्दस्याशब्दसंज्ञा**"8 इत्यनुशासनम्, "घट इति शब्दः, घट इत्यर्थः, घटमुच्चारय, घटमानय" इत्याद्यनुभवाश्च मानम् ।

शब्दः स्वरूपं बोधयन्नेवार्थं बोधयति । तत्र स्वरूपबोधस्य प्राथम्यमेवमुपपाद्यते – प्रयोगकर्तुः बुद्धिः शब्दोच्चारणात्पूर्वं शब्देष्वेव प्रवर्तते - अस्यार्थस्य वाचकः अयं शब्द इति । एवञ्च सः अर्थबोधनेच्छया प्रथमं शब्दं जानाति, पश्चादुच्चारयति । तद्वत् वक्तुरिव बोधृणां व्यवसायः(प्राथमिकबोधः) तेष्वेऽव शब्देषु जायते, न त्वर्थे, शब्दाधीनत्वादर्थबोधस्य । एवं वक्तुः श्रोतुश्च शब्द एव प्रथमं बुद्धिविषयो भवतीति शब्दस्य स्वरूपबोधपूर्वकार्थबोधकत्वं स्पष्टम् । तत्र लोके अर्थः विशेष्यः, शास्त्रे शब्दः विशेष्य इति विवेकः ।

ननु यदि शब्दस्य स्वरूपग्राहकत्वमप्यस्ति तर्हि लोके अर्थवत् शब्दतः प्रतीयमानस्य स्वरूपस्यापि क्रियान्वयः स्यात् । गामानयेत्यादावर्थस्य यथा क्रियान्वयः, तथा शब्दस्याप्यन्वयः किं न स्यादिति चेदाह – स्वरूपस्य विशेषणत्वात् इतरव्यावर्तकतया सफलत्वात् क्रियायामन्वयाभावः । यथा गोशब्दस्य जात्यादिविशिष्टसास्नादिमति पिण्डे शक्तिः । जात्यादयः शब्दवाच्याः सन्तोऽपि विशेष्यभूतेऽर्थे सास्नादिमति पिण्डविशेषे प्रकारीभूता इति आनयनादि क्रियान्वयं नैव प्राप्नुवन्ति, तद्वत् शब्दः वाच्यः सन्नपि विशेष्यभूतार्थबोधनेन तत्र गुणीभूत इति तस्य परार्थत्वात् क्रियायामनन्वयित्वं, मानाभावात्, फलाभावाच्च । एकस्मिन्नर्थे प्रकारतयोपस्थितस्यार्थस्य अन्यत्रान्वयस्याव्युत्पन्नत्वात् । विशेष्यस्तु क्रियान्वयमन्तरा अचरितार्थः सन् क्रियान्वयी । परं गवादिशब्दात् जात्यादेः प्रकारतयैवोपस्थितिः, न तु विशेष्यतया इति न ते कदापि दर्शनानयनादि क्रियान्वयं भजन्ते । शब्दस्य खण्डशः शक्तिस्वीकारात् विवक्षावशात् तस्य कदाचित् विशेष्यतयोपस्थितिरिति विवेकः ।

ननु अनुभवकरणं यथा इन्दियं तथा शब्दोऽपि । तथा च शब्दस्य यथा बोधविषयत्वं तद्वदिन्द्रियस्यापि बोधविषयो कुतो नेत्याशङ्कायामाह – शब्दानां गृहीतानामेव ज्ञानकरणत्वमिति हेतोः कदाचित् शब्दस्य स्पष्टोच्चरणाभावे दूरे कलरवे वा उच्चारिते तस्यानिर्ज्ञातस्वरूपे सति 'किमाह भवान्' इति प्रश्नः समुपलभ्यते । अज्ञातशब्दानामर्थज्ञानकरणत्वे प्रश्न एव नोत्पद्येत, शब्दज्ञानं विनैवार्थज्ञानसम्भवात् । यथा शब्दः स्वरूपेण गृहीत एवार्थस्य प्रकाशकः, तथार्थे ग्राह्ये सतीन्द्रियाणां स्वरूपं प्राङ्नैव गृह्यते । इन्द्रियाणि स्वरूपेण अगृहीतान्येव सत्तामात्रेणार्थग्राहकाणि, लोके तथा दर्शनात् । एवञ्च यत्र स्वतो ग्राह्यत्वाभावः तत्र वस्तून्यगृहीतान्येवार्थ-प्रकाशकानि । तथा च शब्दानां स्वरूपं ग्राह्यं सत् ग्राहकम्, इन्द्रियाणां स्वरूपमग्राह्यं सत् ग्राहकमिति स्थितिः । शब्दस्य ग्राह्यत्व – ग्राहकत्वशक्ती ये पूर्वमुपवर्णिते ते उभेऽपि क्वचित्शास्त्रीयकार्येषु बुद्धिपरिकल्पितभेदेन पृथक् क्रियेते । ग्राह्य – ग्राहकत्वरूपशब्दधर्मावपोधृतौ । वस्तुतः अभिन्नावपि बुद्धिपरिकल्पितपृथक्भावौ ।

-------------------------------

8. पा. सू., १/१/६८ ।

अत एव भिन्नतया ज्ञातौ तौ पदार्थौ संज्ञा – संज्ञिरूपभेदप्रयुक्तकार्येषु अविरोधेन कारणत्वं प्राप्नुतः । निगदितं हि हरिणा –

**भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ । भेदकार्येषु हेतुत्वमविरोधेन गच्छतः ॥** [9]

लोके शास्त्रे च भिन्नयोरेव संज्ञासंज्ञिभवः दृश्यते । लोके व्यक्तिविशेषे सङ्केतितः देवदत्तादिशब्दानुपूर्वी संज्ञा । तस्मादन्यः पिण्डविशेषः संज्ञी । शास्त्रेऽपि सङ्केतितः गुणवृद्ध्यादिशब्दः संज्ञा, तस्मादन्यः अदेङ् – आदैजाद्यर्थः संज्ञी । एवञ्च सर्वत्र संज्ञासंज्ञिभावस्य भिन्नेष्वेव प्रसिद्धेः एकस्मिन्विरोधात् "स्वं रूपं शब्दस्याशब्दसंज्ञा" इति सूत्रेण एकस्मिन्नेव शब्दे बोधकरूपत्वेन संज्ञात्वम्, बोध्यरूपत्वेन संज्ञित्वं यद्यपि नोपपद्यते, तथापि लक्ष्यलक्षणघटकत्वेनाभिन्नेऽपि शब्दे उपाधिकृतं भेदमादाय संज्ञासंज्ञिभावः उपपादनीयः । ततश्च "**अग्नेर्ढक्**"[10] इत्यत्र लक्षणघटकः अग्निशब्दः संज्ञा, लक्ष्यघटकः संज्ञी । एकस्मिन्नेव शब्दे रूपद्वयकल्पनं तु "राहोः शिरः" इतिवत् ।

अत्रार्थेऽयं दृष्टान्तः – यथा संज्ञासूत्रघटकाः वृद्धिगुणादयः शब्दाः संज्ञा – संज्ञिसम्बन्धग्रहात्पूर्वं स्वानुपूर्वीस्वरूपबोधकाः सन्तोऽपि, आदैच्पदबोधितैः स्वसंज्ञिभिः अकारदिभिः संज्ञा-संज्ञिभावरूपसम्बन्धं यान्ति, तथाऽयं विधिसूत्रघटकः अग्निशब्दः स्वरूपबोधकोऽपि सूत्रघटकाग्निशब्दवाच्यया प्रयोगघटकाग्निशब्देन साकं संज्ञासंज्ञिभावसम्बन्धमेति । उक्तं तावत् ब्रह्मकाण्डे हरिणा –

**वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः । आदैच् प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः ॥**
**अग्निशब्दस्तथैवायां अग्निशब्दनिबन्धनः । अग्निश्रुत्यैति सम्बन्धं अग्निशब्दाभिधेयया ॥**[11]

इत्थञ्चेऽह शास्त्रे संज्ञासूत्रेण, संज्ञाशब्दात् क्वचिद्भिन्नरूपाणि, क्वचिदभिन्नरूपाणि संज्ञिनः बोध्यन्ते । परमिदमत्रावधेयम् – "अग्नेर्ढक्" इत्यादिसूत्रे प्रयुज्यमानानामग्न्यादिशब्दानां ढगादिकार्यभाक्त्वाभावः । तेषां स्वरूपपरकत्वात्, प्रयोगस्थस्य प्रत्यायकत्वात्, लक्ष्यस्थशब्दान्तरबोधनेन परतन्त्रत्वाच्च । किन्तु ततः अन्ये लक्ष्यघटकाः अग्न्यादिशब्दाः एव कार्यान्वयभाजः । एषा एव रीतिः "गोपसोर्यत्"[12], "पक्षत्तिः"[13] इत्यादि शास्त्रेष्वप्यूह्या ।

ननु विधिसूत्रोपात्ताग्निशब्दस्य बोध्यार्थपरतन्त्रत्वात् ढगादिकार्याप्रसक्तिर्यथा तथा प्रयोगघटकाग्निशब्दस्यापि लोके अङ्गारकाद्यर्थबोधनायोच्चरितत्वात् तस्यापि पारतन्त्र्यात् कार्ययोगाभावः खलु इति चेन्न – अभिधेयभावेन समवस्थितशब्दस्योच्चारण परतन्त्रत्वे समानेऽपि तस्मिन् धर्मान्तरस्य पृथग्भानात् । उपमानोपमेयभावसिध्यर्थं नूनं कश्चन समानधर्मो आश्रीयते । तावता न तयोः सर्वथा भवत्यभेदः, येन सादृश्यात् तयोः सर्वव्यवहारः अभिन्न एव भवेत् । तथा प्रकृते विधिसूत्रस्थाग्निशब्दस्य प्रयोगस्थस्य च उच्चारितत्वरूपसामान्यधर्मस्य तुल्यत्वेऽपि, विधिसूत्रस्थस्य बोधकत्वेन प्रकारतायाः, प्रयोगघटकस्य तु बोध्यत्वेन विशेष्यतायाः सत्त्वेन धर्मभेदोऽप्यस्ति । ततश्च कस्यचित् कार्ययोगः, कस्यचिन्नेति व्यवस्थोपपद्यते । सर्वांशेऽभेदे दृष्टान्तदार्ष्टान्तिकभाव एवोच्छिद्येत, भेदे सत्येव तत्कल्पनात् । अतो प्रयोगस्थस्य कार्यान्वयाभावः नाशङ्कनीयः ।

"अग्नेर्ढक्" इत्यादौ शब्दाः यथा स्वरूपबोधकाः तथा शक्तिग्राहकवाक्येऽपि(संज्ञाशास्त्रे) संज्ञाशब्दाः स्वरूपार्थबोधकाः । तथाहि – संज्ञाशब्दस्य भवत्यभिधेयद्वयम् । प्रथमं श्रोत्रग्राह्यं स्वकीयं रूपम् । द्वितीयं तदतिरिक्तं चक्षुरादिग्राह्यं बाह्यम् । तत्र सङ्केतग्रहकाले संज्ञाशब्दः संज्ञाशास्त्रे स्वरूपार्थकः । तत्र प्रमाणं तस्माद्विभक्त्युत्पत्तिः । सङ्केतग्रहात्प्राक् संज्ञाशब्दः संज्ञिनं बोधयितुमक्षमः, सङ्केतग्रहाभावात् ।

9. ब्र. का., ५८ ।
10. पा. सू., ४/२/३३ ।
11. ब्र. का., ५९/६० ।
12. पा. सू., ४/३/१६० ।
13. पा. सू., ५/२/२५ ।

एवं स्थिते सः यदि स्वरूपमपि न बोधयेत् तर्ह्यर्थवत्त्वाभावेनाप्रातिपदिकत्वात् प्रथमा न स्यात् । द्वितीयार्थस्तु बाह्यः व्यक्त्यादिः संज्ञी, सङ्केतग्रहानन्तरं बोध्यते । यदा बाह्यार्थः बोध्यते तदा स्वरूपार्थः तस्मिन् प्रकारतया गम्यते । तत्र सङ्केतग्रहकाले संज्ञाशास्त्रेण संज्ञासंज्ञिनोः प्रत्यक्षभेदमपाकृत्य संज्ञिनि संज्ञास्वरूपाध्यवसाये सोऽयमित्यभेदारोपे स्वरूपेणार्थवत्वात् उभयत्र (संज्ञाशब्दे, संज्ञिशब्दे च) प्रथमा । ततश्च "**आदैच् पदाभिन्नं वृद्धिपदम्**" इति बोधः । यदा तु '**अस्यायं वाचकः**' इति शब्दार्थयोः भेदः व्यपदिश्यते तदा संज्ञासंज्ञिनोर्भेदात् संज्ञिशब्दात् षष्ठी, संज्ञाशब्दात् प्रथमा विधीयते । यथा "**ऊञः प्रगृह्यम्**"[14] ।

सर्वान्त्येऽयं प्रश्नः जागर्ति यत् – शब्दस्य नित्यत्वे सदा तस्य सत्ता भवत्येव । स्थिते चैवं शब्दस्यानुच्चारणे, अश्रुतायां वा कुतोऽर्थबोधः न जायत इति चेदत्रोच्यते – बोधविषयत्वमप्राप्तैः अज्ञातस्वरूपैः शब्दैरर्थः नैव प्रतीयते । यतो हि ते च शब्दाः अज्ञातस्वरूपाः अनुच्चारिताः देशान्तरे वा उच्चारिताः केवलं हृदये सत्तामात्रेणार्थानां बोधकाः न भवन्ति । अपि तु स्वयं सम्यक् ज्ञाता एव शब्दाः अर्थबोधकाः । एवञ्चानुभवबलात् गृहीतः(ग्राह्यः) स्न्नेव शब्दः ग्राहको भवतीति शब्दस्य सम्बलितं शक्तिद्वयमुपपन्नं भवतीति शम् ॥

**सन्दर्भग्रन्थाः –**


१. पाणिनीयः अष्टाध्यायी सूत्रपाठः, पूर्वपीठिका-सूत्रविवरणात्मक 'प्रह्लाद' टिप्पणीसहितः, चौखम्बा कृष्णदास अकाडमी ।

२. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुलसितम्, चौखम्बा संस्कृत प्रतिष्ठानम् ।

३. श्रीमत्कौण्डभट्टविरचितः वैयाकरणभूषणसारः, प्रभा-दर्पणव्याख्याद्वयोपेतः, चौखम्बा संस्कृत प्रतिष्ठानम् ।

४. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी व्याख्याभ्यां समन्विता) मोतीलाल् बनारसीदास ।

५. आचार्यभर्तृहरिप्रणीतम् वाक्यपदीयम्, व्याख्याद्वयोपेतम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ।

६. वाक्यपदीयम् (ब्रह्मकाण्डम्), 'प्रतिभया' व्याख्यया समन्वितम्, आचार्य पं. सत्यनारायण खण्डूडी, चौखम्बा कृष्णादासकादमी

७. ವಾಕ್ಯಪದೀಯ (ಅನುವಾದ ಸಹಿತ), ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ವಿದ್ವಾನ್, ಎನ್. ರಂಗನಾಥಶರ್ಮಾ, ಕರ್ನಾಟಕ ಸಂ. ವಿಶ್ವವಿದ್ಯಾಲಯ


**********

---

14. पा. सू., १/१/१७ ।

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# योगदर्शनमतरीत्या मनः

**Dr. Bhaskar Bhatt Joshi**
Assistant Professor
HOD, Dept. Of Nyaya & Vaisheshika
Karnataka Sanskrit University
PMK Road, Chamaraja Pete-560018
Bengaluru, Karnataka
Contact No. : 9742269403
E-mail : bhaskarbhat.joshi@ksu.ac.in

आस्तिकदर्शनानां षण्णां परस्परं सारूप्यमस्ति। कणादमुनेः वैशेषिकदर्शनमनुसृत्य गौतममहर्षेः न्यायदर्शनं प्रवर्तते। मनस्तु आन्तरमिन्द्रियं पृथक्पदार्थः, नित्यं च। मनः आत्मगतानां ज्ञानेच्छासुखदुःखानां प्रत्यक्षं जनयति । ज्ञानादिगुणैः सह आत्मस्वरूपमपि मनः गोचरयति । यथा-'अहं सुखी, अहं दुःखी, अहं इदं जानामि, इच्छामि' इत्यादि । ज्ञानादिकं विहाय केवलमहमिति ज्ञानं नोत्पद्यते । तदिदं ज्ञानं मानसप्रत्यक्षमित्युच्यते । चाक्षुषाद्यनुभवजन्यसंस्कारसहकारेण मनः स्मरणात्मकं ज्ञानमपि उत्पादयति । 'सः गजः तत्रासीत्' इत्यादिः स्मरणस्याकारः....। नैयायिकानां मते मनसः द्रव्यत्वमिन्द्रियत्वञ्चास्ति। मनस अणुपरिमाणवत्वात् पृथिव्यप्तेजो-द्रव्याणीव प्रत्यक्षविषयं न भवति । स्पर्शग्राह्योवायुरिवानुमानेनैव मनः ज्ञातुं शक्यते । मनोऽनुमानप्रकारस्तु "युगपत् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"[1] इत्यस्मिन् सूत्रे निर्दिष्टः । रूपादीनां ज्ञाने यथा चक्षुरादीनीन्द्रियाणि करणानि, तथा सुखदुःखादीनां ज्ञाने करणं मनस इन्द्रियत्वं सिद्ध्यति । अणुपरिमाणवत्त्वात् पृथिव्यादि परमाणुवत् मनः नित्यं भवतीति नैयायिकानामभिप्रायः ।

अन्येन्द्रियापेक्षया मनसः वैशिष्ट्यमस्ति । एतच्च द्रष्टुं स्प्रष्टुं चायोग्यं सत् स्वीयं कार्यं निर्वाहयितुं समर्थं भवति। मनः ज्ञानेन्द्रियगोचरं न भवतीत्यस्य इतरेन्द्रियापेक्षया वैशिष्ट्यम् । न्यायदर्शने आत्मादीनि द्वादशप्रमेयानि [2] निर्दिष्टानि । तेषु षष्टं मनः भवतीति मनसः प्रमेयत्वम् । मनसः प्रवृत्तिः पुण्यपापयोरुत्पादने कारणं भवति। पापात्मिकां मनोवृत्तिः द्रोहः, परद्रव्यापहरणाभिलाषः, नास्तिकता चेति त्रिविधा। पापत्मिकाम् प्रवृत्तिं त्यक्त्वा पुण्यात्मिकां प्रवृत्तिं कुर्वन् जन इष्टदेवताध्यानादिना अपवर्गरूपं मुख्यं प्रमेयं प्राप्तुं शक्नोति । अत एव मनसः प्रमेयेषु निर्देशः।

कर्मप्रधानं मीमांसादर्शनम् अनुसृत्य ब्रह्मप्रधानं वेदान्तदर्शनं प्रवर्तते पूर्वमीमांसाप्रतिपादितान्येव शब्दन्यायतत्त्वान्याश्रित्य उत्तरमीमांसायां ब्रह्मणो विचारः कृतः। एवमेव कपिलमहर्षिप्रणितं साङ्ख्यदर्शनमनुसृत्य पतञ्जलिना योगदर्शनं निर्मितम्। अत एव साङ्ख्ययोगदर्शनयोः सारूप्यं दृश्यते। उभयोरपि दर्शनयोः विषयसाम्येऽपि कुत्रचिदभिप्रायभेदाः वर्तन्ते। साङ्ख्याः ईश्वरं नाङ्गीकुर्वन्ति। तद्विरुद्धेन पातञ्जलाः ईश्वरस्यास्तित्वं समर्थयन्ति । अत एव योगदर्शनस्य सेश्वरसाङ्ख्यत्वेन व्यवहारः दृश्यते। प्रकृते तु मनसः मध्यमपरिमाणविषये साङ्ख्ययोगदर्शनयोः सिद्धान्तौ परस्परं भिद्येते। साङ्ख्याः मनसः मध्यमपरिमाणवत्वं, पातञ्जला: विभुपरिमाणवत्वञ्च वदन्ति। मतभेदापेक्षया सारूप्यस्यैवाधिक्यात् साङ्ख्ययोगदर्शनयोः पूर्वमनुसृत्य परस्य प्रवृत्तिरित्यङ्गीकरणीयम्। योगदर्शने बुद्धिः, अहङ्कारः, मन इति त्रिधा विभक्तस्यान्तःकरणस्य चित्तमिति व्यवहारः। एतेषां त्रयाणां क्रियैक्यं विषयैक्यं च वर्तते। अतः योगदर्शने चित्तशब्देन क्वचित् बुद्धिः क्वचिदहङ्कारः, क्वचिच्च मन उच्यते। बुद्ध्यहङ्कारापेक्षया मनस एवाधिकेषु स्थलेषु चित्तशब्देन व्यवहारो दृश्यते। मनः इति वक्तव्ये चित्तमिति, चित्तमिति वक्तव्ये मन इति च योगदर्शने बहुषु स्थलेषु निर्दिष्टत्वात् अत्र मनोनिरूपणप्रस्तावे चित्तविषये ये

---

1. न्यायदर्शनम्, १/१/६ ।

2. आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्, न्यायदर्शनम्, १/१/९ ।

विषयाः कथिताः त एव प्रदर्श्यन्ते ।योगदर्शने अन्यविषयापेक्षया चित्तस्यैव विपुला चर्चा दृश्यते। महर्षिः पतञ्जलिः योगसूत्रेषु प्रथमे पादे "अथ योगानुशासनम्"[3] इति सूत्रेणोपक्रम्य "योगः चित्तवृत्तिनिरोधः"[4] इति द्वितीयसूत्रेण क्लिष्टाक्लिष्टत्वेन भिन्नानां प्रमाण, विपर्यय, विकल्प, निद्रा, स्मृतीनां पञ्चानां चित्तवृत्तीनां निरोध एवं योग इति प्रपञ्चितवान। सत्वरजस्तमोगुणानां परिणामवशात् चित्तमपि सर्वदा परिणामशीलि, क्षणिकञ्च [5] भवति। तस्मादेव परिणामवशात् याः चित्तवृत्तयः उत्पद्यन्ते, ताः संसारस्य दुःखस्य च कारणानि भवन्ति। योगाभ्यासद्वारा चित्तवृत्तीनां निरोधे सम्पादिते सति निर्मलं मनः मोक्षाख्यं पुरुषार्थं सम्पादयित्तुं साधनं भवति। अतः योगदर्शने चित्तस्य प्राधान्यम्।

**मनस उत्पत्तिः**

सत्वरजस्तमोगुणा एव सर्वस्यापि प्रपञ्चस्य निर्माण कारणं भवन्ति। तस्मादेव गुणत्रयात् महान्, तस्मात्, रजोगुणप्रधानात् अहङ्कारः उत्पद्यते। तस्मात्सत्वप्रधानादहङ्कारात् श्रोत्र, जिह्वा, त्वक्, घ्राणानि पञ्च बुद्धीन्द्रियाणि उत्पद्यन्ते। रजोगुणप्रधानादहङ्कारात् वाक्, पाणि, पाद, पायु, उपस्थानि पञ्चकर्मेन्द्रियाणि जायन्ते। राजसाहङ्कारसहकृतात् सात्त्विकादहङ्कारात् मन उत्पद्यत [6] इति पातञ्जलानामभिप्रायः।

**चित्तस्य स्वरूपम्**

निर्मलस्य सत्त्वगुणस्य परिणामशून्यमेव चित्तम्। तच्च सत्त्वरजस्तमोगुणकं भवति। तदुक्तं व्यासेन- "चित्तं हि प्रख्या प्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्"[7] इति । चित्तस्य रजस्तमोवृत्त्योर्निरोध एव योगः। सम्प्रज्ञातसमाधौ सात्त्विकीवृत्तिः तिष्ठति, असम्प्रज्ञातसमाधौ तु सर्वासां वृत्तीनां निरोधो जायते। चित्तं स्वत एव सर्वेषामर्थानां ग्रहणे समर्थम्। यदा तु चित्तं तमोगुणेनाव्रियते तदा स्वीयानामर्थानां ग्रहणेऽसमर्थं भवति। तमसः प्रणाशे चित्तं स्वयमेव ध्येयं वस्तु जानाति। चित्तस्यास्यावस्थाविशेषाः पञ्चभूमयस्सन्ति। ताश्च [8] क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुद्धमिति। एताः पञ्चसत्त्वरजस्तमोगुणात्मकस्यैव चित्तस्य भवन्ति। तासु क्षिप्तं रजोगुणस्योद्रेकात् चञ्चलं सुखदुःखादिविषयेषु रजोगुणेन प्रेरितम्। तच्च दैत्यदानवादीनां भवति। मूढं तमोगुणस्योद्रेकात् कार्याकार्यविचक्षणं विना कोपासूयादिभिः दृष्ट्वेव कार्येषु नियमितम्। तच्च रक्षः पिशाचादीनां भवति। विक्षिप्तं सत्त्वगुणस्योद्रेकात दुःखसाधनानि त्यक्त्वा सुखसाधनेष्वेव प्रवृत्तम्। एकाग्रं निरुद्धञ्च सात्विक्यौ अवस्थे भवतः। अतः ते चित्तस्यात्मविषये [9] ।चित्तं पुरुषस्योपभोगे साधनं भवति । यथा अयस्कानमणिः स्वयमेवायः पिण्डं सन्निधीकृत्य शल्यनिष्कर्षणद्वारा पुरुषस्योपकारं कुर्वन् पुरुषस्यैवात्मीयो भवति, तथा चित्तमप्ययः पिण्डसदृशं विषयजाते स्वस्मिन सन्निधीकृत्य पुरुषस्य विषयोपभोगरूपमुपकारं कुर्वत् तस्य स्वं भवति [10] । अतः तत् पुरुषस्य भोगसाधनम्। चित्तवृत्तीनां शान्तसुखदुःकादीनां भोक्तरि पुरुषे भोगसाधनीभूतचित्तद्वारा प्रतिबिम्बात् पुरुषः 'अहं सुखी' 'दुःखी' 'शान्तः' इत्यादिकं ज्ञानं लभत इति योगदर्शने कथितम्।

**चित्तवृत्तयः**

लज्जा तृष्नादयश्चित्तस्यानेका वृत्तयस्सन्ति। तास्सङ्ख्यातुमशक्ताश्च। अतः सौलभ्यार्थमेतासां वृत्तौनां पञ्चभिः प्रकारैस्सङ्क्षेपः

---

3. पातञ्जलयोगसूत्रम्, १/१ ।
4. पातञ्जलयोगसूत्रम्, १/२ ।
5. 'क्षणमपि परिणासून्यं न चित्तं, गुणानां स्वभावतः प्रवृत्तिशीलत्वात्' । नागोजीभ वृत्तिः, ३/१३ ।
6. तन्न सत्त्वस्याङ्गित्वे गुणत्रयादेको महान्, तस्मादेकस्मात् रजः प्रधानादहङ्कारः, अहङ्कारात् बुद्धीन्द्रियाणि, राजसात् ।
7. व्यासभाष्यम्, १/१, पृ. सं. ४ ।
8. 'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः' । व्यासभाष्यम्, १/१. पृ.सं.-२ ।
9. व्यासभाष्यम्, १/१, पृ. सं.-३ ।
10. चित्तमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वयं भवति पुरुषस्य स्वामिनः । व्यासभाष्यम्, १/४, पृ. सं.-८ ।

कृतः। तासामेव वृत्तीनां निरोधो योगो भवतीति वृत्तीनां विवरणमत्र दीयते। चित्तवृत्तयः क्लिष्टाः, अक्लिष्टाश्च भवन्ति। रागद्वेषादीनां क्लेशानां हेतवः क्लिष्टाः एतासां वृत्तीनां बन्ध एवं फलम् । क्लेशानां नाशकाः अक्लिष्टाः वृत्तयः। एतासां तु मुक्तिः फलम् [11]। इत्थं क्लिष्टाक्लिष्टत्वेन भिन्नाश्चित्तवृत्तयः प्रमाणविपर्यय विकल्पनिद्रास्मृतयश्चेति [12] पञ्च भवन्ति। एताः चित्तस्यैव परिनामविशेषाः। एतासां वृत्तीनां पुनरवान्तरभेदास्सन्ति। वृत्तीनां स्वरूपमत्र सङ्ग्रहेण विचारयामः।

**मनः प्राणयोस्सम्बन्धः**

मनसः प्राणस्य च सम्बन्धोऽस्तीत्यत एव प्राणायामेन मनोनिरोधं कर्तुं शक्यते। कौष्ठ्यस्य प्राणवयोः प्रच्छर्दनविधारणाभ्यां मनसः प्रसादात् तस्य स्थिरता लभ्यते। प्रच्छर्दनं नाम शरीरान्तर्गतस्य वायोः द्वात्रिंशन्मात्राप्रमाणेन शनैः शनैः पिङ्गलनाडीद्वारा बहिर्वमनम् [13]। अयं रेचकप्राणायाम इति उच्यते। विधारणन्तु कोष्ठे पूरितस्य वायोः चतुष्षष्ठिमात्राप्रमाणेन बहिर्गमननिरोधः [14] । अयं कुम्भकप्राणायाम इत्युच्यते। एतयोः रेचक कुम्भकयोः प्राणायामयोर्मध्ये पूरकप्राणायामोप्यवश्यं भवति। रेचकप्राणायामेन बहिर्गतं वायुं इडानाडीमार्गेण षोडशमात्राप्रमाणे अन्तरापूरणं पूरकप्राणायाम इति उच्यते। रेचकानन्तरं पूरकं विना विधारणरूपस्य कुम्भकस्यासम्भवात्। एतेन त्रिविधेन प्राणायामेन प्राणस्पन्दो निरुध्यते। तथा सति चित्तगतानां दोषाणां नाशस्सम्पद्यते। मनः प्राणयोः सहभावित्वमस्ति। अत एव प्राणप्रवृत्तिमूलकः सर्वेन्द्रियाणां वृत्तयो भवन्ति। प्राणानां निरोधेन इन्द्रियवृत्तिनिरोधोऽपि जायते। प्राणनिग्रहे मनोऽपि निगृह्यते। वसिष्ठवचनमत्र प्रमाणम्- यथा "यः प्राणपवनस्पन्दः चित्तस्पन्दः स एव हि"[15] एवञ्च प्रच्छर्दनविदारणाभ्यां प्राणनिग्रहे सम्पादिते सति चित्तमलनां नाशात् चित्तं प्रसन्नं सत् एकाग्रतां लभते।

**चित्तपरिकर्मः**

विषयाणां गन्धरसरूपस्पर्शशब्दानां दिव्यानां साक्षात्कारोऽपि चित्तस्य स्थिरतां कल्पयति। अनेन चित्तस्य विषयैस्माकं सम्बन्धोऽनुमीयते। योगशास्त्रे निर्दिष्टेन प्रकारेण नासाग्रे मनसो धारणात् दिव्यगन्धसाक्षात्कारो जायते। तथैव मनसः जिह्वाग्रे धारणात् दिव्यरससाक्षात्कारः। ताल्वग्रे मनोधारणेन दिव्यरूपसाक्षात्कारः। जिह्वामध्ये चित्तस्य धारणेन दिव्यस्पर्शसाक्षात्कारः, जिह्वामूले चित्तस्य धारणेन दिव्यशब्दसाक्षात्कारश्च जायते। एते साक्षात्काराः शीघ्रमुत्पन्नाः 'योगस्य फलमस्तीति' योगिनो विश्वासमुत्पाद्य मनसः स्थितिं सम्पादयन्ति। एवमेवाष्टदलं हृदयपद्मम् ऊर्ध्वमुखं ध्यात्वा तस्य कर्णिकायां वर्तमानायां सुषुम्नानाड्यामूर्ध्वमुख्यां संयमकरणात् मनसः संविद्भवति। तच्च मनः सूर्येन्दुग्रहमणीना यादृश्यः प्रभाः तद्रूपेणानेकविधं भवति। तदेव सात्त्विकं ज्योतिः। तस्यापि ज्योतिः स्वरूपस्य संयमात् मनोऽहङ्काराख्या ज्योतिष्मती विगतशोका च प्रवृत्तिः उत्पन्ना सती मनसो स्त्यैर्यहेतुर्भवतीति मणिप्रभायां [16] कथितम् वीतरागिणां कृष्णद्वैपायनादीनां यादृशं चित्तं, तादृशस्य चित्तस्य ध्यानादपि योगिनश्चित्तं स्थिरतामाप्नोति।

स्वप्ने भगवतः आराधनं कुर्वन प्रबुद्धः योगी तमेव विषयं भावयेत्। तादृश्या भावनयाऽपि चित्तं स्थितिपदमाप्नोनीति वाचस्पतिः [17]। स्वाभिमतस्य पदार्थस्य ध्यानादपि चित्तस्य स्थैर्यमायाति [18]। एवं चित्तस्य स्थिरतासंपादने अनेके उपायाः योगदर्शने प्रदर्शिताः।

---

11. 'रागद्वेषक्लेशानां हेतवः क्लिष्टाः बन्धफलाः । अक्लिष्टाः क्लेशनाशिन्यो मुक्तिफला" – मणिप्रभा, १/५ ।
12. 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' पातञ्जलयोगसूत्रम्, १/६ ।
13. प्राणस्य शरीरान्तर्गतस्य वायोः प्रच्छर्दनं द्वात्रिंशन्मात्रा प्रमाणेन शनैः शनैः पिङ्गलया बहिर्विरचनम् । योगसुधाकरः, १/३४ ।
14. रेचितं पश्चात् इडया षोडशमात्रप्रमाणेनान्तरापूर्य पूरितस्य पुनश्चतुष्षष्ठिमात्रा प्रमाणेन विधारणमान्तरकुम्भकः । योगसुधाकरः, १/३४ ।
15. योगवासिष्ठम्, पृ. सं.- ८६ ।
16. मणिप्रभा, १/३६ ।
17. वाचस्पति टीका, १/३८, पृ. सं.- ४१ ।
18. 'यथाभिमतध्यानाद् वा' योगसूत्रम्, १/३९ ।

एतदेव चित्तपरिकर्मेत्युचते। परिकर्म प्रसादनं इत्युक्तत्वात् चित्तप्रसादनमेव परिकर्मशब्दस्यार्थोऽवगन्तव्यः।

**चित्तस्थैर्यस्य फलम्**

पूर्वोक्तैरुपायैः चित्तस्य स्थैर्य सम्पादितवतो योगिनः सूक्ष्मविषये चित्तस्य निवेशनद्वारा तस्य परमाण्वन्तो वशीकारः अप्रतिहतरूपेण जायते । एवञ्च परमाणुपर्यन्ते सूक्ष्मे विषये योगिनो मनः न प्रतिहन्यते । तथा स्थूलविषयं आकाशादि परममहत्पर्यन्तं भावयतः चित्तस्य कुत्राऽपि प्रतिघातो नोत्पद्यते [19]। एवं समस्तविषयाणां वशीकारेण योगनिश्चित्तं परिपूर्णं भवति । परिपूर्णस्य च मनसः पुनः पुनः स्थैर्यसम्पादनार्थं प्रयत्नो नापेक्षितः[20], तस्य चाञ्चल्याभावात् इति व्यासभाष्ये निर्दिष्टम्। स्वत एव चित्तस्य एवं स्थिरतासम्पादनेन वृत्तिरहितस्य चित्तस्य ग्रहीतग्रहणग्राह्येषु एकाग्रता तद्रूपपरिणामश्च भवति सर्वार्थग्रहणे समर्थस्य विषयान्तरव्यासङ्गरूपाणां दोषाणामपगमे ग्रहीत्रादीषु ध्येयेषु साक्षात्काररूपा समापत्तिः। स्वत एव भवतीति नागोजीभट्टेन [21] कथितम। निर्मलः स्फटिकमणिः यथा......

**मनसो वेगः**

'ततो मनोजवित्वं विकरणभावः प्रधानजयश्च' इत्यस्मिन् सूत्रे मनसो वेगः पतञ्जलिना निरूपित । अतिदूरे वर्तमानमपि प्रदेशं मनः अतिशीघ्रं गच्छति। तस्य वेगः ईदृश इति वक्तुं न शक्यते । मनसो वेग अस्माभिरप्यनुभूत एव । एकस्मिन् प्रदेशे वर्तमानो जनः विदेशे स्थितं जनं झटित्येव स्मरति । तत्र तु मनोवेग एव कारणम् ।

**मनसः परिमाणम्**

पातञ्जलानां मते मनः अणु परिमाणयुक्तं भवति । अस्मिन् विषये सांख्यानाम् पातञ्जलानां च मतभेदो दृश्यते । मनः मध्यमपरिमानविशिष्टमिति वदतां सांख्यानां मतमत्र निराकृत्य व्यासेन स्वीये पातञ्जलयोगसूत्रभाष्ये मनसः अणुत्वं प्रतिपादितम् ।

**मनसः इन्द्रियत्वम्**

पातञ्जलाः मनसः इन्द्रियत्वमङ्गीकुर्वन्ति। तेषां मते त्वक् चक्षुर्जिह्वा घ्राण श्रोत्राणि पञ्च ज्ञानेन्द्रियाणि। वाक् पाणि पाद पायु उपस्थानि पञ्च कर्मेन्द्रियाणि। एकादशेन्द्रियं मनः, एवमेकाशेन्द्रियाणि वर्तन्ते। मनः ज्ञानकर्मेन्द्रियेभ्यः प्रधानम्। मनः नायक इवान्यानि इन्द्रियाणि स्वस्वविषयेषु प्रेरयति। अतः मनः ज्ञानकर्मोभयात्मकं सर्वार्थञ्च [22] भवतीति व्यासभाष्ये कथितम्। योगी यदा स्वीयं चित्तं स्वशरीरान्निष्कास्य शरीरान्तरेषु निक्षिपति तदा दशज्ञानकर्मेन्द्रियाणि चित्तमनुसृत्य गच्छन्ति।

अस्मिन् विषये व्यासेन दृष्तान्तः प्रदर्शितः यथा मधुकरराजानं उत्पतन्तं मक्षिका अनुत्पतन्ति, निविशमान मनुनिविशन्ते तथा इन्द्रियाणि चित्तस्य परशरीरावेशेऽनुसृत्य गच्छन्ति [23] इति चित्तं विना इन्द्रियाणि स्वं स्वं व्यापारं कर्तुमसमर्थानि भवन्तीति सर्वेष्विन्द्रियेषु मनसः प्राधान्यं सिद्धम् ।

**मनोनाशः**

योगदर्शने तन्त्र तत्र मनोनाश चित्तलयः इत्यादीनि पदानि दृश्यन्ते। अत्र मनोनाशो नाम मनस्सम्पूर्णतया नाश इत्यर्थो न वक्तव्यः । सत्वादीनां गुणाना संसर्गेणोत्पद्यमानानां विविधानां चित्तवृत्तीनां योगाभ्यासेन निरोध सम्पादिते सति प्रसन्नं चित्तम स्वकारणे

---

19. भोजवृत्तिः, १/४० ।

20. तद्वशीकारात् परिपूर्णयोगिनश्चित्तं न पुनरभ्यासकृतं परिकर्मापेक्षते । व्यासभाष्यम्, १/४०, पृ. सं.- ४३ ।

21. नागोजिभट्ट वृत्तिः, १/४० ।

22. श्रोत्रत्वक् चक्षुर्जिह्वाघ्राणानि बुद्धीन्द्रियाणि, वाक् पाणिपादपायूपस्थानि कर्मेन्द्रियाणि, एकादशं मनः सर्वार्थम् । व्यासभाष्यम्, २/१९ ।

23. यथा मधुकरराजानं मक्षिकाउत्पतन्तमनूत्पतन्ति, निविशमानमनुविनिशन्ते तथेन्द्रियाणि परशरीरावेशे चित्तमनुविधीयन्ते । व्यासभाष्यम्, ३/१८, पृ. सं.-१४३ ।

लीयते। तदा मनः निर्वृत्तिकं सत कैवल्याय कल्पते। पातञ्जलाना मते मनसः नित्यत्वात् तस्य सम्पूर्णतया नाशो न सम्भवति। वासनानामपि नित्यत्वात् तासामाश्रयभूतस्य मनसो नित्यत्वमेवेति तस्य नाशो न युज्यत इत्यवधारणीयम् ।

**योगिनः अनेकचित्तत्वम्**

"निर्माणचित्तान्यस्मितामात्राम्"[24] इति सूत्रादेवं ज्ञायते- पुरुषः योगसिद्ध्या बहूनि शरीराणि स्त्रष्टुं प्रभवति। तदा असंख्येषु तेषु शरीरेषु असंख्याकानि चित्तान्यपि उत्पद्यन्ते। अस्मितारूपोऽहङ्कारश्चित्तस्योपादानकारणं भवति। तस्मादेवाहङ्कारादनेकानि चित्तानि निर्मीयन्त इति एतेषां निर्माणचित्तानिति व्यवहारः योगदर्शने दृश्यते। यावन्ति योगिनो शरीराणि तावन्ति चित्तानि उत्पद्यन्ते। अग्नेर्विस्फुलिङ्गा इव चित्तानि जायन्त [25] इति चन्द्रिकाकारो वदति । यथा विविधानां पुरुषाणां चित्तेषु भिन्नभिन्ना अभिप्रायाः भवन्ति, तथा नात्रानेकेषु चित्तेषु दृश्यन्ते। तत्र कारणन्तु पतञ्जलिनैवं कथितम्- "प्रवृत्तिभेदे प्रयोजक चित्तमेकमनेकेषाम"[26] इति। एतेषां भिन्नानां चित्तानां प्रयोजक प्रधान चित्तमेकं योगी निर्मिमीते। तस्यैव प्रधानचित्तस्यानुसार अपरेषां सर्वेषामपि चित्तानां प्रवृत्तिर्नियमिता [27] भवतीति व्यासभाष्ये कथितमस्ति। अस्मिन्नेव प्रस्तावे नागोजीभान महाराजः यथा अनेकानपि पुरुषान् स्वाधी वर्तमानान् स्वाभिप्रायानुसारं प्रवर्तयति तथा प्रधानं चित्तमेकमेवान्यानि चित्तानि प्रवर्तयतीति [28] दृष्टान्तः प्रदर्शितः। योगिनश्चित्तमेवैतेषां अनेकेषां चित्तानामधिष्ठातृत्वेन वर्तमानं सत् तानि प्रेरयतीति भोजवृत्तौ प्रतिपादितम्। यथा एकं चित्तं आत्मीयशरीरे स्थितानां चक्षुःपाण्यादीनां प्रेरकं भवति, तथा सर्वचित्ताधिष्ठातृत्वेन योगिचित्तमेव शरीरान्तरेष्वपि इतराणि चित्तानि प्रेरयतीति भोजाभिप्रायः [29] योगसिद्ध्यैव योगी अनेकानि चित्तानि निर्मातुं प्रभवतीति कथितम्। सिद्धयः जन्म, औषधि, मन्त्र, तपः समाधिजन्यभेदात् पञ्चविधाः भवन्ति। एताभ्या एव सिद्धिभ्यः निर्मितानि चितानि पञ्चविधानि भवन्ति। तेषु ध्यानरूपेण समाधिना संस्कृतं यच्चित्तं तदेव मोक्षयोग्यं भवति। समाधिना योगद्वारा अखिलानां वासनानां निर्मूलनं भवतीति समाधिसंस्कृतम् अपि चित्तं रागादिवासनारहितं भवति। रागादीनामभावे पुण्यपापयोस्सम्बन्धो न भवतीति, तदेकमेवचित्तं [30] मोक्षयोग्यमिति ज्ञातव्यम्।

**************

---

24. योगसूत्रम्, ४/४ ।
25. योगिनः स्वयं निर्मितेषु कार्येषु यानि चित्तानि तानि मूलकारणादस्मितमात्रात् प्रसरन्ति अग्नेः विस्फुलिङ्गा इव । चन्द्रिका, ४/४ ।
26. योगसूत्रम्, ४/५ ।
27. चित्तानां कथमेकचित्ताभिप्रापुरःसारा प्रवृत्तिरिति सर्वचित्तानां प्रयोजकं चित्तमेकं निर्मिमीते । ततः प्रवृत्तिभेदः ।
    व्यासभाष्यम्, ४/५, पृ. सं.-१६० ।
28. महाराज इव दशाधिकरणमेकं तादृशाधिकरणमपरम् । नागोजीभवृत्तिः, ४/५ ।
29. तेषामनेकेषां चेतसां प्रवृत्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तं प्रयोजकं प्रेरकमधिष्ठातृत्वेन । तेन न भिन्नमतत्वम् ।
    अयमर्थः- यथात्मीये शरीरे मनः चक्षुः पाण्यादीनि यथेच्छं प्रेरयति अधिष्ठातृत्वेन तथा कायान्तरेष्वपि । भोजवृत्तिः, ४/५ ।
30. तत्र ध्यानमनाशकम्, योगसूत्रम्, ४/६ ।

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# महाभारतकालीननारी

**Dr. Neema Joshi**
Contract Teacher
Department of Sanskrit
Govt. Degree College
Muwani-262572
Pithoragarh, Uttarakhand
Contact No. : 7533985307
E-mail : joshineemamuwani@gmail.com

विश्वसाहित्ये महाभारतं विशालतम ग्रन्थोऽस्ति। महाभारतं विशालतमं महाकाव्यमितिमन्यते। अस्मिन् ग्रन्थे (महाकाव्ये) लक्षैकधिकंश्लोकानि सन्ति। ग्रन्थोऽयंभारतस्य सांस्कृतिकविषयानां विराटकोशः आचारसंहिता चास्ति। अस्मिन् ग्रन्थे सुप्रसिद्धोक्तिः प्रचलितः- **" यन्न भारते तन्न भारते।"**

अर्थात् यः उक्तिः उपदेशः च महाभरते नास्ति तद् भारतवर्षेऽपि न प्राप्यते। अतः भारतस्य सम्पूर्ण पक्षः महाभारते एव आश्रितः। महर्षि वेदव्यासेन रचितः प्रणीतः वा प्रसिद्ध महाकाव्यं महाभारतं "शतसाहस्रीसंहिता"इतिअभिधीयते।

नारीणां स्थानं भारतीय संस्कृत्याम् अत्यन्त पवित्रैः उच्चैः चास्ति। सा 'देवी' इति संज्ञया अपि अभिधीयते। नारीणां नामपश्चात् देवी शब्दापि प्रयुज्यते। यथा- शकुन्तला देवी, सीता देवी, सावित्री देवी, कल्याणी देवी, रमा देवी, देवकी देवी, सरस्वती देवी इत्यादयः।

अतः सुस्पष्टः यत् हिन्दू धर्म सर्वदा नार्याः देवी रूपमेव पूज्यं पवित्रं च स्वीकार्यते। नारी न केवलं सन्तान सम्पादिका अपितु पालिका संचालिका चापि मन्यते। विश्वस्य समस्त प्राणी मातुः गर्भात् एव जायते। तस्याः एव अंके पलति विकसित च। तस्यैव प्रकृति संस्कारं च गृहीत्वा जीवनपथे विकसित। सभ्यतायाः प्रारम्भात् अद्यत्वे नारी ऐतिहासिक पृष्ठेषु तत् नक्षत्रमिव दीप्यते यस्य धूमिलता प्रखरता वा अप्रत्यक्षरूपेण सा एव सभ्यतायाः शिथिलतां गतिशीलता वा संकेतितं अकुर्वन्।

महाभारते नार्याः सम्बन्ध विषये द्वौ परस्परंविपरीतोक्तिं दृष्टिगोचरौ भवतः। प्रथम यत्र "नारीनरकस्य-द्वारम"इतिमान्यतायाःअनुसारेणनारींनरकद्वारमपिकथ्यते। अपरंच सा स्वर्गस्य सोपानमपिअसिद्धत्। महाभारतग्रन्थे प्रयुक्त नारीपात्राणां कन्या, भार्या माता प्रभृति स्वरूपाणां वर्णनं कुरूते-

**कन्या-**

महाभारतकालीनसमाजे पिता कन्यायाः जन्मं कष्टकारी न मन्यते स्म। पुत्र पुत्री विषये विभेदः नासीत्। एषा मान्यता -

**"यथैवात्मा तथा पुत्र पुत्रेण दुहिता समा।**[1]**"**

पुत्रस्य सदृशं कन्यायाः अपि नानाविध संस्काराः सम्पादितं भवन्ति स्म। राजा शान्तनुः वने प्राप्ते कृपः कृपा च बालकयोः सम्पूर्णसंस्काराः सम्पादितवान्।

**" क्रियाश्च तस्या मुदितश्चक्रे स नृपसत्तमः।**[2]**"**

तत्कालीन समाजे कन्याः अपि स्वमातृपितृभ्यः कार्येषु पूर्णरूपेण सहयोगं ददति स्म। स्वशीलेन सदाचारेण च कुलस्य नाम आलोकितं कर्तुं विपदि कुलस्य हिताय कल्याण रक्षणाय च महान उत्तरदायित्वं पुत्रवत् कन्या अपि स्वीकरोति स्म।[3]

---

1. महाभारत- अनुशासन पर्व - 45/11,
2. महाभारत- वन पर्व - 292/23,
3. महाभारत - अनुशासन पर्व - 55/20,

महाभारतकालीन समाजस्य अध्ययनेन ज्ञायते यत् तस्मिन् काले कन्याः स्वमातृपितृभ्यः न केवलं पुण्य साधनमेव अपितु शुभ आदरणीया च अमन्यत्। लक्ष्म्याः निवासस्थानं[4] महालक्ष्म्याः स्वरूपं च कन्या रत्नमिव सर्वफल प्रदायिनी मंगलकारिणी सुखसन्तोषप्रदायिनी च भवति स्म।[5] शोभासम्पन्न शुभ कर्माणां योग्यं मंगलकार्येषु च सादरणीया भवति स्म।[6]

**भार्या -**

महाभारतग्रन्थे नार्याः भार्यारूपस्य अत्यन्त मुक्तकण्ठेन प्रशंसा अकुरूत्। भार्या एव पुरूषस्य अर्द्धांगिनी भवति, भार्या श्रेष्ठ सखी भवति। धर्मार्थकामानां त्रिवर्गाणां मूलं भार्या एव भवति। ते जनाः धन्याः भवन्ति, एषां भार्या साध्वी पतिव्रता च भवति। धर्मअर्थकामः भार्यायाः अधीनं भवन्ति। समस्त कार्येषु भार्या पुरूषस्य परम सहायिका भवति । यस्य गृहे साध्वी प्रियंवदा च भार्यायाः अभावः तस्मैः गृहं वनं च सदृशं प्रतीयते। भार्यायाः साधुतया एव पुरूषस्य जीवनं मधुरं भवति। त्रिवर्ग अपत्य, पितृतृप्ति प्रभृतयः भार्यायाः अधीनमस्ति। भार्यां प्रति सदव्यवहारः जनानां परं कर्तव्यं वर्तते –

**अर्द्धभार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा। भार्या मूलं त्रिवर्गस्य भार्या मूलं तरिष्यतः।।**[7]

**भार्यावन्तः प्रमोदन्ते भर्यावन्ते श्रितान्विताः।**[8]

**धर्म कामार्थ कार्याणि शुश्रुता कुल सन्ततिः। दारेष्वधीनो धर्मश्च पितृणामात्मनस्तथा।**[9]

**श्रियः एताः स्त्रियो नाम सत्कार्याभूतिमिच्छता।।**[10]

तत्कालीन समाजे भार्यां पूजनीया अमन्यत्। अयमपि विश्वासम् आसीत् यत् यत्र नारीणां सम्मानं भवति तत्र देवाः निवसन्ति, यत्र तिरस्कृताः भवन्ति तत्र कोेपि आयोजनं सफलं न भवति।[11] द्रौपदीं प्रति युधिष्ठिरस्य वाक्यं धर्मपत्न्याः महत्वम् उद्घोषियति यद् द्रौपदी अस्माकं प्रियभार्या अस्ति, प्राणेभ्यः अपि प्रियः अस्ति। मातृवत् पालनीया ज्येष्ठा स्वसा सदृशं च पूज्या अस्ति-

**इयं हि नः प्रियभार्या प्राणेभ्योऽपि गरीयसी। मातेव परिपाल्या च पूज्या ज्येष्ठेव च स्वसा ।।**[12]

ऋषि जनानां कथनमस्ति यत् धीरता कोमलता व्याकुलता च नारीणां स्वाभाविकगुणाः सन्ति।

**मृदुत्वंच तनुत्वंच विक्लवतां तथैव च। स्त्रीगुणा ऋषिभिः प्रोक्ता धर्म तत्वार्थ निश्चये ।।**[13]

नार्यै पतिसेवा सर्वश्रेष्ठ धर्मः मन्यते। सावित्रीसत्यवानकथा भारतीय नारीणां पातिव्रत्य धर्मस्य उज्वल आदर्शं च दृष्टान्तम् अस्ति। पतिव्रता नारीणां नारीषु वा द्रौपदी अपि न्यूनतरः नास्ति। महाभारतानुसारेण सा नारी धन्या भवति या गृहकार्येषु तत्परं दक्षः च भवति, सैव भार्या धन्या या सन्तानवती अस्ति सैव भार्या च धन्या सुखी च भवति या पतिव्रता भवति-

**सा भार्या या गृहे दक्षा सा भार्या या प्रजावती। सा भार्या या पतिप्राणा सा भार्या या पतिव्रताः।।**[14]

---

4. महाभारत - अनुशासन पर्व - 32/17/55,
5. महाभारत - अनुशासन पर्व - 55/19/20,
6. महाभारत - अनुशासन पर्व - 55/18,
7. महाभारत - आदि पर्व - 74/41,
8. महाभारत - आदि पर्व - 68/41,
9. महाभारत - अश्वारोहण पूर्व - 90/47,
10. महाभारत - अनुशासन पर्व- 46/15,
11. महाभारत - अनुशासन पर्व- 45/5, 6,
12. महाभारत- विराट पर्व- 3/17,
13. महाभारत- अनुशासन पर्व- 12/14,
14. महाभारत- शांति पर्व- 347/10,

महाभारते एकस्मिन् स्थाने कथ्यते यत् या पतिसेवा सदृश धर्मपथ गामिनी भवति सैव अरून्धतीं यादृशी स्वर्गलोके अपि पूज्यते।[15] (पूजनीया भवति) या नारी स्वपतिं देव तुल्यं मन्यते [16] सैव धर्मचारिणी भवति। या सर्वदा पुत्रमुखदर्शनमिव पतिमुखदर्शननेन आनन्दितं भवन्ति सैव साध्वी। या भार्या पत्युः कठोरवचनैः विचलिता न भवति श्रुत्वा अपि प्रसन्नवदना भूत्वापि सद्व्यवहारमेव आचरित पतिव्रता भवति।[17]

तत्कालीन समाजे पतिव्रतानारीणां महात्म्यं विविधरूपेण चित्रितं वर्तते। देवाः अपि येन लोकेन वंचित आसन् पतिव्रता नारीं एषः पुण्यः सहजरूपेण अलभत्।

**संतिं नानाविधा लोकायं स्त्वं शक न पश्यसि। पश्यामि यानहं लोकानेक पत्न्यश्च या स्त्रियः।।**[18]

अतः नारीं उत्तमगृहिणी गृहकार्येषु दक्षः भवेयुः यषैव समाजस्य आदर्शः आसीत्। प्रत्येक स्थाने पतिव्रतायाः माहात्म्यस्य कीर्तनं कृतम्। एतत् प्रतीयते यत् तस्मिन् समये समाजे नारीणां गृहलक्ष्मी रूपमेव लब्धं परम् उपलब्धिं आसीत्। नारीणां आदर्शरूपे सीता, सावित्री, दमयन्ती, शकुन्तला, गान्धारी, द्रौपदी, सत्यभामा, सुभद्रा ग्रामस्य पतिव्रताः कुलवधवः च आसन्। पतिव्रता नारीणां

गौरवे अनुशासनपर्वे देवराजइन्द्रः उवाच्- **त्रिवर्गस्य मूलं पतिव्रताः प्रणमामि।**[19]''

महाभारत ग्रन्थे वेदव्यासः आदर्श सतीत्वस्य चित्रांकनम् अकरोत्। पतिभक्तिः विवाहितानारीणां परं धर्मः आसीत्। कुटुम्बस्य समस्तजनानां तुष्टिमेव भार्यायाः प्रधानकार्यं मन्यते स्म। अतः गान्धारी विवाहबन्धनोपरान्ते समस्त कुरूवंशस्य कल्याणं कुर्वन् दृश्यते।[20] सतीत्व रक्षार्थं नार्याः चरित्रं सर्वथा उज्ज्वलं महत्वपूर्णं च भवति। किं गृहं वनं वा प्रत्येकस्थाने नारी स्वपत्युः परं सहायिका सहधर्मिणी च आसीत्। अतः नारी एव गृहलक्ष्मी अस्ति। अतः सुस्पटः महाभारतकालीनसमाजः पतिव्रता धर्मं नारीजीवनस्य चरं लक्ष्यम् अमन्यत्।

**माता-**

महाभारतकालीनसमाजे नार्याः सर्वाधिक पूजनीय स्वरूप माता एव अस्ति। मार्कण्डेयेन जन्मदात्री रूपं मातुः माहात्म्यं कथितवान्-

दसमासपर्यन्ते स्वकुक्षैः गर्भं धारयित्वा आपत्तिं सहित्वा अतुलवेदनां च सहित्वा पुत्रस्य जननी स्नेहेन तस्य पालिता पोषिता माता संसारे सर्वश्रेष्ठः मन्यते।[21] अतः माता गर्भाशये अपत्यं धारणेन समर्थेन धात्री, जनयति येन जननी अंगसंवर्धनेन अम्बा शुश्रूषया शुश्रू इति कथ्यते।[22] मातुः श्रेष्ठतायाः समर्थने कथ्यते- '' माता समग्र दुःखानां निवृत्तिः।'' मातायाः भवन्नपि मनुष्यं कोऽपि चिन्ता न भवति। सर्वथा निश्चिन्तः भवति। यो स्वमातरं आवाहनं कुर्वन् गृहं आगच्छति स पुरूष (जनः) निर्धनः भवन्नपि धनवान् वृद्धः भवन्नपि बालः भवति। वस्तुतः मातृहीनः जनः सर्वथा वृद्धः मन्यते। पुत्रपौत्रेण युक्तेऽपि तस्मै समस्त संसारः शून्यं प्रतीयते। अतः निसन्देहः मातासमां अन्य छत्र छाया नास्ति। माता समो अन्याश्रयः नास्ति। मातासमोकोऽपि रक्षकः नास्ति। मातासमः कोऽपि प्रियः नास्ति-

---

15. महाभारत- अनुशासन पर्व- 123/20,
16. महाभारत- अश्वारोहण पर्व- 90/51, दैवतं परमं पतिः।
17. महाभारत- अनुशासन पर्व- 146/38, 42,
18. महाभारत- अनुशासन पर्व- 73/2,
19. महाभारत- अनुशासन पर्व- 153/54,
20. महाभारत- आदि पर्व- 110/18,
21. महाभारत- आरण्यक पर्व- 196/9, 10,
22. महाभारत- शान्ति पर्व- 258/30, 31,

**नास्ति मातृसमा छाया नास्ति मातृसमा गतिः । नास्ति मातृसमं त्राणं नास्ति मातृसमः प्रियः ॥**[23]

राजधर्मोपदेशे भीष्मः युधिष्ठिरं प्रति अकथयत्-

**दशैव तु सदाचार्यः श्रोत्रियानतिरिच्यते, दशाचार्यानुपध्याय उपाध्यायान्पिता दश।**

**पितृन्दश तु मातैका सर्वा वा पृथिवीमपि, गुरूत्वेनाभिभवति नास्ति मातृसमो गुरूः।।**[24]

अर्थात् आचार्यः सदैव दस श्रोत्रियेषु श्रेष्ठः। उपाध्यायः दसआचार्येषु श्रेष्ठः। पिता दश उपाध्यायेषु श्रेष्ठः, माता दश पितृषु श्रेष्ठः। स्वयमेव माता स्वगौरवेन समस्त पृथ्वीं तृणवत् कुरुते।

अतः मातृसमं कोऽपि गुरूः नास्ति। कुन्तीं प्रति युधिष्ठिरस्य एषा एव श्रद्धा आसीत्-

**गुरूणां चैव सर्वेषां जनयित्री परमो गुरूः।**[25]

पृथ्वीं मातृसदृशं मन्यन्[26] गुरूत्वेमाता पृथ्वयां श्रेष्ठः कथ्यते।[27] महाभारतकालीन समाजे मातृ सदृशं नारीणां आदरसम्मानं च भवति स्म।ज्येष्ठ भगिनी अपि मातृसमं पूज्या आदरणीया च भवति स्म। भ्रातृभार्या मतामही, धात्री कुलस्य वृद्धनार्याः अपि मातृसमं आदरणीया आसन्।[28]

येनप्रकारेण महाभारतकालीननारी पुरूषस्य विकासार्थं एकमात्रआधारोऽमन्यत्। यस्या कार्यकुशलतायामेव पुरूषस्य विकासम् आश्रितमासीत्। अतः तत्कालीन समाजे नारीणां स्थितिः सम्मानजनककुटुम्बस्थ्य गृहलक्ष्मी समाजे च कल्याणार्थमाधारशिलास्वरूपा आसीत्। महाभारतकालीनसमाजे सा पति पुत्रो जीवन् एव मृत्युं प्राप्येत्। साध्वी नारीणां एषा कामना भवति । अद्यत्वे सधवा पुत्रवती च स्वमृत्युं सौभाग्यफलम् इतिमन्यते।

***********

---

23. महाभारत- शान्ति पर्व- 258/25 ,29,
24. महाभारत- शान्ति पर्व- 109/15, 16,
25. महाभारत- आदि पर्व- 188/15,
26. महाभारत- अनुशासन पर्व- 235/61, शांति पर्व - 183/15, पृथ्वी सर्वभूतानां जनिंत्री तद्विधाः स्त्रियः।
27. महाभारत- अनुशासन पर्व- 162/15, 16,
28. महाभारत- विराट पर्व- 3/12, उद्योग पर्व- 23/14,

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# मीमांसकमते देवता

**Dr. Manjunatha Bhat**
Assoiate Professor
Karnataka Sanskrit University
PMK Road, Chamaraja Pete-560018
Bengaluru, Karnataka
Contact No. : 9483824050
E-mail : mgbhatherur@gmail.com

## उपक्रमः

चतुर्दशविद्यास्थानेषु अन्यतमेयं मीमांसा वेदार्थनिर्णयद्वारा गुहायां निहितं धर्मतत्वं प्रचिकाशिषयावततारेत्यत्र नास्ति संशीतिलेशः। अव्याजकरुणायुक्तो मुनिर्जैमिनिः धर्माधर्मविवेकाय असुसूत्रत् धर्मसूत्राणि 'अथातो धर्मजिज्ञासा[1]' इत्यारभ्य 'अन्वाहार्ये च दर्शनात्[2]' इत्यन्तानि। तर्हि कोऽयं धर्म इत्यनुयोगमिमं समादधिरे मीमांसकाः 'चोदनालक्षणोऽर्थो धर्मः[3], "यागादिरेव धर्मः[4]" इति। यज' देवपूजासङ्गतिकरणदानेषु इत्यस्माद्धातोर्निष्पन्नो यागः देवतोद्देश्यकद्रव्यत्यागरूपः। एवं च यागानुष्ठानार्थं द्रव्यदेवते प्रधानतया अपेक्षिते। तत्तद्यागानुष्ठानार्थं शास्त्रविहितं द्रव्यं तु लोके विद्यमानमेवेति न पुनर्वक्तव्यम्। अतः द्रव्यं प्रत्यक्षादिप्रमाणप्रमितमेव भवेत्। देवता तु नैतादृशरूपेण भवति। अतः महती जिज्ञासा बाधतेऽस्मान् सेयं देवता वर्तते वा ? वर्तते चेत् कथं ? तस्याः विग्रहादिकमभ्युपगन्तुं शक्यमुत नेति। एतादृशप्रश्नानां समाधानव्याजेनायमक्षरविन्यासः।

का नाम देवता ?

'दिवु' क्रीडायाम् इति धातोर्निष्पन्नस्य देवताशब्दस्य "दीव्यति मायापाशेन जीवान् बद्ध्वा क्रीडतीति", "दीव्यतीति देवः मन्त्रेण द्योत्यते इति", "देवनाद्धै देवोऽभूदिति तद्देवानां देवत्वम्" इत्येवंरूपेण व्युत्पत्तिः प्राज्ञैः प्रदर्शिता। अत एवोक्तं निरुक्तकारेण-

"व्याघ्रादिवज्जीवततेः मायापाशेन बन्धनम्। कृत्वा नित्यं क्रीडति यः स देवः परिकीर्तितः॥ इति।

अयं च सामान्यः व्यवहारः। तर्हि मीमांसाकानां मते देवतायाः को विशेषः इत्युक्ते शेष एव विशेष इति वक्तव्यम्। शेष अङ्गमित्यनर्थान्तरम्। कर्मेति मीमांसका इत्युक्तरीत्या यागादिरूपस्य कर्मण एव प्राधान्यमभ्युपगतं मीमांसकैः। सोऽयं यागः देवतोद्देशेन द्रव्यत्यागरूपः। एवं च देवताया उद्देश्यत्वम्, द्रव्यस्य च विधेयत्वमिति मीमांसकमर्यादा। अतः याग एव प्रधानः देवता तु गुणभूता इति।

देवता अङ्गीकृता वा न वा? वेदपौरुषेयत्वं प्रतिपादयद्भिर्नैयायिकैः कश्चन ईश्वरोऽङ्गीकृतः। किन्तु वेदस्य अपौरुषेयत्वमभ्युपगच्छद्भिर्मीमांसकैः तादृशः कोपीश्वरो नाङ्गीकृतः। अत एव कर्ममीमांसका निरीश्वरा इति प्रवादस्तु लोके श्रुतिपथमागतः। अत्रेदमवधेयं यत् मीमांसकैः देवता तु अङ्गीकृता एव।

देवतायाः विग्रहविषये मीमांसकसरणिः दर्शनप्रपञ्चे मीमांसकानामुपरि कश्चन आक्षेप एवं श्रूयते यन्मीमांसकाः देवताविषये अन्यथा प्रलपन्तीति। अयं विचारः वेङ्कटाध्वरिणा निजनिर्मिते विश्वगुणादर्शे प्रपञ्चितः। तत्र कृशानुः मीमांसकानेवं निनिन्द-

ते मीमांसाशास्त्रलोकप्रसिद्धाः सर्वर्षीणां सेहिरे नैव सत्ताम्। चैतन्यस्यापह्नवं देवतानां चक्रुर्विश्वं नश्वरं मन्यमानाः[5]॥ इति।

-----------------------------------------------

1. जै. सू., १.१.१
2. जै. सू., १२.४.४५
3. जै. सू. १.१.२
4. अर्थसङ्ग्रहः, पृ. ११
5. विश्वगुणादर्शः, श्लो. सं., ५६२

देवताविषये अन्येषामाक्षेपस्तु इत्थं भवितुमर्हति। यज' देवपूजायाम् इति धातोः निष्पन्नं यागपदं तु देवतोद्देश्यकद्रव्यत्यागरूपमर्थं ब्रूते। देवतायै हविः समर्प्यत इति कृत्वा देवतायास्तु सम्प्रदानरूपेण व्यवहारः। अस्य सम्प्रदानकारकस्यापि कर्मकारकापेक्षयापि अभिप्रेयमाणत्वेन यागोद्दिष्टदेवतायाः प्राधान्यमस्ति। देवतायाः आराधनरूपेण यागस्यानुष्ठानं लोके दृश्यते। किञ्चन फलमुद्दिश्य एव यायजूकः यज्ञकर्मणि प्रवर्तते प्रवृत्यवच्छिन्नं प्रति फलस्य कारणत्वनियमात्। यागे आराधिता एव देवताः तृप्ताः सत्यः फलं प्रयच्छन्तीतित्यभ्युपगन्तव्यम्। अतः देवतायाः विग्रहादिपञ्चकमनिवार्यम्। विग्रहादिपञ्चकमित्युक्ते - विग्रहो हविषां भोग ऐश्वर्यं च प्रसन्नता। फलदातृत्वमित्येतत् पञ्चकं विग्रहादिकम्॥इति। यजमानेन समर्पितं द्रव्यं स्वीकर्तव्यं चेत् विग्रहोऽनिवार्यः। विग्रहं विना अनुग्रहः कथं? विग्रहरूपेण वर्तमाना देवता प्रसन्ना भवेच्चेत् हविस्स्वीकारः स्यादेव। एवं स्वीकृते हविषि तृप्ता भवन्ति देवताः। एवं प्रसन्नाः देवताः यजमानस्य अभीष्टं प्रयच्छन्तीति वक्तव्यम्। किञ्च विग्रहादिपञ्चकं तु श्रुतिस्मृतिपुराणादिषु प्रतिपादयितुं शक्यम्। यथा - सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु। तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति। इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति। ततो ददाति दाशुषे वसूनि। इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः[6]।

आहुतिभिर्वै लोको देवान् प्रीणाति। ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः। इत्यादीनि वाक्यानि विग्रहपञ्चकप्रदर्शने सहकारीणि भवन्ति। अथ च याग एव फलजनक इत्यत्र विनिगमनाविरहः। यागस्यैव फलजनकत्वाभावे मीमांसकानां अपूर्वव्यवहारस्तु दूरापास्तः। "यजेत स्वर्गकाम" इत्युक्ते यागेन देवताराधनं कर्तव्यमिति[7]। किञ्च देवतानां विग्रहादिकं नास्ति चेत् द्वादशलक्षण्यां अधिकाराध्याये देवतानां कर्मणि अधिकारः वर्तते वा न वेति विचार एव स्मृतिपथं नागच्छति स्म। अतः देवतानां विग्रहादिकं स्यादेव। अपि च देवता एव फलदाने समर्था इति।

**किमिदमपूर्वम्?**

यागादिजन्यः स्वर्गादिजनकः कश्चन अवान्तरव्यापार एव अपूर्वशब्देन व्यवह्रियते। यागादिजन्यः स्वर्गादिजनकः कश्चन गुणविशेष इति न्यायकोशकारः। एस् राधाकृष्णन् महोदयोपि इत्थमुवाद- "Apoorva is the metaphysical link between work and its result" इति[8]। निरुक्तरीत्या यजेत स्वर्गकामः इति वाक्येन फलप्रेप्सया हि यजमानः यागादिकर्मणि निरतो भवति। कर्मानुष्ठानानन्तरमेव अभिष्टं फलं नैव प्राप्यते। फलमेव न प्राप्यते चेत् स्वार्गादिफलोद्देशेन यागं विदधतः वेदस्य वैयर्थ्यापत्तिः स्यात्। कथञ्चित् फलं लभ्यते चेदपि कालान्तरे जन्मान्तरे वा स्यात्। तथा सति विनष्टस्य यागस्य कालान्तरे लभ्यमानस्य फलस्य च कार्यकारणभावः नैव संघटते। अतस्तादृशीमनुपपत्तिं परिजिहीर्षया अपूर्वाभिधः कश्चन अपूर्वो व्यापारः मीमांसकैः अङ्गीकृतः। इदञ्चापूर्वं यजमानस्यात्मनि तिष्ठतीति। अपूर्वविषये कुमारिलास्त्वेवं मन्वते- यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति। सूक्ष्मशक्त्यात्मकं वा तत् फलमेवोपजायते॥ कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा। योग्यता शास्त्रगम्या या परा साऽपूर्वमुच्यते॥ इति।

यत्तु प्रत्यक्षादिगम्यत्वमस्य नास्तीति सत्यम्, श्रुतार्थापत्तिव्यतिरिक्तैर्न गम्यते स त्वदोषः[9]"। एवञ्च अर्थापत्तिः प्रमाणं अपूर्वकल्पन इति। मीमांसकानामुपरि आक्षेपरूपेण अत्र प्रस्तुतो विषयः द्वादशलक्षण्यां देवताधिकरणे पूर्वपक्षरूपेण उपस्थापितः। "देवता वा प्रयोजयेदतिथिवत् भोजनस्य तदर्थत्वात्[10]" इति पूर्वपक्षसूत्रम्। सिद्धान्तस्त्वेमभिधीयते- यजधातुनिष्पन्नं यागपदं तु देवतोद्देश्यकद्रव्यत्यागरूपमर्थं

---

6. श्रीमद्भगवद्गीता, ३.१२
7. अपि च देवपूजायां यजिर्वर्तत इति स्मरन्ति । तस्माद्यजेत स्वर्गकाम इति यागेन देवतामाराधयेत्ततः स्वर्गो भविष्यतीति-टुप् टीका-९.१.८
8. Radhakrishnan S., Indian Philosophy, Vo. II, page-421
9. तन्त्रवार्तिकम्,
10. जै. सू., ९.१.८

ब्रूते इत्यत्र तु नास्ति विप्रतिपत्तिः। देवतायै इति सम्प्रदानकारकस्यापि कर्मकारकापेक्षयापि अभिप्रेयमाणत्वेन यागोद्दिष्टदेवतायाः प्राधान्यं नैव वक्तुं शक्यम्। लोकेपि विप्राय गां ददाति इत्यत्र विप्रस्य फलदातृत्वासम्भवात् सम्प्रदानसामान्यस्य कर्मकारकापेक्षया अभिप्रेयमाणत्वं नैव सङ्गटते। मीमांसकैः भावनामुख्यविशेष्यकशाब्दबोधोऽङ्गीकृतः। भावना नाम "भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः[11]" इति लौगाक्षिभास्कराचार्यः।

इयं च भावना द्विधा विभक्ता शाब्दीभावना आर्थीभावना चेति। यजेत स्वर्गकामः इत्यादिस्थले आर्थीभावनान्वये साधनाकाङ्क्षायां याग एव करणत्वेनान्वेति न तु देवता। यदि देवताया अपि करणत्वेनान्वयस्तर्हि देवताया अपि उद्देश्यत्वेन अनेकोद्देश्यान्वयनि- निबन्धनरूपवाक्याभेदप्रसङ्ग अपरिहार्यः। अतः याग एव प्रधानः देवता तु गुणभूता इति इत्यकामेनाप्यूरीकर्तव्यम्। अत एव सूत्रकारोपि इत्थमभिप्रेयाय-अपि वा शब्दपूर्वत्वात् यज्ञकर्म प्रधानं स्यात् गुणत्वे देवताश्रुतिः[12] इति। यागाराधिता देवता एव तृप्ता सती फलं प्रयच्छतीति नैव युक्तम्। तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयतीत्याद्यर्थवादवाक्यानां स्वार्थे तात्पर्याभावात् विग्रहादिपञ्चकमपि नैव सङ्गच्छते। इन्द्रादिदेवता इव कुत्रचित् औषधिवनस्पतीनामपि देवतरूपेण व्यवहारः स्यात्। अत एव पार्थसारथिमिश्रा रमणीयतया एवमवादिषुः-" मन्दधियस्तु श्रद्धालवस्तात्पर्यमजानाना भ्राम्यन्तु नाम। किञ्च स्तोकमण्डूकादीनां तिरश्चामचेतनानां चौषधिवनस्पतीनामश्वानां गवां च हनुदन्तानामश्वरूपाणां च कृष्णश्वेतादीनामश्वचरितानां चेंकारशकृत्करणादीनां देवतात्वेन होमेषु श्रूयमाणानां को नाम फलदायित्वं श्रद्धधीत। किञ्च सैवाग्निहोत्रदेवता दध्ना पूज्यमानेन्द्रियं ददाति पयसा पशुमिति को हेतुरन्यदतो वस्तुस्वभावात्। यावकभोजनानशनादिभिश्च किमिति देवतास्तृप्यन्ति किमिति वा सुरापानादिभिः क्रुध्यन्ति येनाभ्युदयं प्रत्यवायं च कुर्वन्ति कर्तुः[13]" इति। अपि च देवताप्रसादस्य इच्छारूपत्वात् सर्वपुरुषसाधारणतया यागाकर्तुरपि यागजन्यफलसम्भवः। एवं सति जनकतावच्छेदकगौरवप्रसङ्गः। यः यागमनुतिष्ठति तेन प्राप्ते फले तस्य यागकर्तृत्वं तु वर्तत इति अन्ययजमानकृतयागफलस्यापि तस्मिन् समन्वयस्स्यात्। एतादृशीमनुपपत्तिं परिहर्तुं अनेककार्यकारणभावकल्पनाप्रसङ्गः। एवमेव कारणतावच्छेदकगौरवमपि प्रसज्येत। देवता वा प्रयोजयेदतिथिवत् भोजनस्य तदर्थत्वात् इति यदुक्तं तद् भोजनं न भवतीति भाष्यकाराः शबरस्वामिनः[14]। विग्रहाद्यभावेऽपि अधिकाराध्याये देवतानां अधिकारविचारः नैव सङ्गत इति यदुक्तं तत्सत्यम्। अत एव पार्थसारथिमिश्रा एवं जग्रन्थुः-"देवतानां त्वात्मोद्देशेन त्यागासम्भवात् विग्रहाभावाच्चाशक्तेरनधिकारः" इति[15]। देवताविग्रहनिराकरणौचित्यमेवमुक्तम्-विश्वगुणादर्शे-भगवदनभ्युपगमनं दैवतचैतन्यनिह्नवश्चैषाम्। कर्मश्रद्धावर्धकतत्प्राधान्यप्रदर्शनायैव[16]॥ इति।

देवतायाः शब्दद्वारैव यागोपकारकत्वम् इति संकर्षकाण्डे निरूपितमस्ति[17]। एवञ्च कर्म एव फलं ददाति देवता तु गुणभूता इति। अध्वरमीमांसाकुतूहलवृत्तिकारस्तु देवताविषये एवमुवाच- कर्ममीमांसकाः निरीश्वरवादिनः। तेषां विग्रहादिपञ्चकं नास्तीति प्रवादस्तु प्रच्छन्नबौद्धतदेकदेशिविषयः[18] इति। किञ्च अधिकाराध्याये देवातानामधिकारविवेचनसन्दर्भेऽपि कुतूहलवृत्तिकारः एवमवादीत्-येषां तु मते चतुर्थ्यन्तशब्द एव, येषाञ्च विग्रहचैतन्यादिरहितोऽर्थ एव देवता, तर्हि शब्दस्यार्थस्य वा अचेतनत्वादेवानधिकारे सिद्धे देवतान्तराभावादिति

---

11. अर्थसङ्ग्रहः, पृ. १८
12. जै. सू., ९.१.९
13. शास्त्रदीपिका, ९.१.४
14. न च इदं भोजनम् । न हि देवता भुङ्क्ते । तस्माद् भोजनस्य तदर्थत्वादिति तद् असद्वचनम् । शा. भा. ९.१.९
15. शा. दी., ६.१.३
16. विश्वगुणादर्शचम्पूः, श्लो. सं., ५६५
17. संकर्ष, २.४.२
18. मीमांसाध्वरकुतूहलवृत्तिः, ६.१.२

प्रयत्नवैयर्थ्यात्तेषामेतत्सूत्रभाष्यविरोधो दुष्परिहरः[19]। यदीन्द्रादिशब्दानां विग्रहाद्यभावप्रतिपादनेन आनर्थक्यमुच्यते तदानीं प्रातिपदिकार्थतद्गतकर्मकरणत्वादिकारकविभक्तिविधायिन्य अपि विभक्तयः व्यर्थाः स्युः। वेदप्रामाण्यं यैश्च अभ्युपगतं तैः कथं विग्रहादिपञ्चकं निराकर्तुं शक्यत इति वासुदेवदीक्षिताशयः। किन्तु मीमांसकमते तु देवतानां विग्रहादिकं नाङ्गीकृतम्। अतः शब्द एव देवता इति मीमांसकाः। देवतायाः विग्रहादिकं नास्तीति प्रतिपादयन् खण्डदेवाचार्या एवं लिखन्ति-"मम त्वेवं वदतोपि वाणी दुष्यतीति हरिस्मरणमेव शरणमिति[20]।"विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना[21]" इति सूत्रेऽपि भाष्यकाराः देवताविषये विस्तृतरूपेण प्रतिपादितवन्तः। विस्तरभिया नात्र प्रस्तूयते।

उपसंहारः

भावनामुख्यविशेष्यकशाब्दबोधमङ्गीकुर्वाणाः मीमांसकाः यागादीनामेव स्वर्गादिफलसाधनत्वं प्रतिपादयन्तः देवतां गुणरूपेण अङ्ग्यकार्षुः। देवतानां विग्रहादिकं स्पष्टरूपेण प्रतिपाद्य स्वात्मानं धन्यं मन्यमानेषु श्रुतिस्मृतिपुराणादिवाक्येषु सत्स्वपि मीमांसकाः देवतानां प्राधान्यं नैवाददुः। अतस्ते नास्तिकाः सञ्जाता इति नैव शङ्कनीयम्। भावनान्वये यागास्यैवान्वयात् शब्दरूपेणाङ्गीकृता देवता गुणभूता इति। इत्थञ्च मीमांसकैर्देवता अङ्गीकृता इत्यत्र नास्ति संशयलेशः। किन्तु शब्द एव देवतेति मीमांसकसिद्धान्त इत्यलं पल्लवितेन।

## आकरग्रन्थसूची


१) अध्वरमीमांसाकुतूहलवृत्तिः-श्रीवासुदेवदीक्षितविरचिता, पट्टाभिरामशास्त्रिणा सम्पादिता, नवदेहलीस्थ श्रीलालबहादुरशास्त्रि राष्ट्रिय संस्कृत विद्यापीठेन प्राकाश्यं नीता। १९७४

२) अर्थसङ्ग्रहः- लौगाक्षिभास्करप्रणीतः, पण्डितराजपट्टाभिरामशास्त्रिकृतार्थालोकव्याख्यासहितः डा वाचस्पति-उपाध्यायकृत 'अर्थालोकलोचन हिन्दीव्याख्यासहितः, वाराणसीस्थचौखम्बा ओरियन्टालियाद्वारा प्राकाश्यं नीतः। १९७७

३) टुप्टीका-मीमांसासूत्रीयशाबरभाष्यटीका भट्टश्रीकुमारिलस्वामिविरचिता। महामहोपाध्यायगङ्गाधरशास्त्रिणा संशोधिता। Published by Proprietors Braj B Das & Co. विद्याविलासमुद्रणालयद्वारा प्रकाशिता। वाराणसी १९१०

४) मीमांसादर्शनम्-श्रीशबरस्वामिविरचितभाष्यसहितम्। सप्तमप्रभृति नवमाध्यायपर्यन्तम्। पं रत्नगोपालभट्टेन संशोधितम्। हरिकृष्णदासगुप्तेन विद्याविलासमुद्रणालये प्राकाश्यं नीतम्। वाराणसी १९१०

५) भाट्टदीपिका-आचार्यखण्डदेवविरचिता-श्रीशम्भुभट्टविरचितप्रभावलीसंवलिता। सुब्रह्मण्यशास्त्रिवर्येण सम्पादिता। मद्रपुरीय विश्वविद्यालयेन प्राकाश्यं नीता। १९५२

६) भाट्टभाषाप्रकाशः-श्रीमन्नारायणविरचितः महामहोपाध्यायश्रीलक्ष्मीनारायणमूर्तिप्रणीतबालप्रियाव्याख्यासहितः। तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठद्वारा प्राकाश्यं नीतः-२००५

७) मीमांसाकोषः-केवलानन्दसरस्वतीपरिष्कृतः। सतारस्थप्रज्ञापाठशालामण्डलद्वारा प्रकाशितः।

८) वाक्यार्थरत्नम्-श्रीमदहोबिलसूरिविरचितम्। स्वोपज्ञसुवर्णमुद्रिकाव्याख्यया समलङ्कृतम्। विदुषा आर्. रामशास्त्रिणा संशोधितम्। मैसूरुप्राच्यविद्यासंशोधनालयद्वारा प्रकाशितम्। १९४३

९) विश्वगुणादर्शचम्पूः-वेङ्कटाध्वरिविरचिता। राष्ट्रपतिप्रशस्तिपुरस्कृतडा.एम्.इ.रङ्गाचारमहोदयकृतकर्णाटभाषानुवादसहिता। बेङ्गलूरु श्रीनित्यानन्दप्रकाशनद्वारा प्राकाश्यं नीता। २०१३

१०) श्रीमद्भगवद्गीता –आदिदेवानन्दस्वामिभिः कर्णाटभाषयानूदिता। रामकृष्णाश्रमद्वारा प्राकाश्यं नीता। मैसूरु. १९९४


************

---

19. मीमांसाध्वरकुतूहलवृत्तिः, ६.१.२

20. भाट्टदीपिका, ९.१.४

21. जै. सू., १०.४.२३

**Volume XIX : January to June – 2022, ISSN 2250-1711**

**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# वेदाध्ययनपद्धतिः

**L. Jayasimha**
Research Scholar & Guest Lecturer
Govt. Jayachaamarajendra Samskrita College
PMK Road, Chamaraja Pete-560018
Bengaluru, Karnataka
E-mail ID : jayasimha1676@gmail.com
Contact No. : 9448568642

परमपवित्रः वेदः भारतीयसंस्कृतेः जीवः।सर्वेषां धर्माणां वेदमूलत्वम्।अथ एव "वेदोऽखिलो धर्ममूलम्"इत्यार्योक्तिः।धर्मकर्मादिषु आचरणद्वारा सर्वेषां जनानां मार्गदर्शनं कुर्वन्ति मुनयः।

**किन्नाम वेदः**

वेदो नाम " विद् ज्ञाने" इति धातु जन्यद्वारा ज्ञानमिति अवगम्यते "वेदयति इति वेदः" यो ज्ञानं ददाति स वेदः। तस्य आद्यन्तम् नास्ति। वेदो नाम सदा अस्तित्वम्।वेदशब्दस्य विवरणम् इत्थं वदति सायणाचार्यः। इष्टप्रात्यनिष्टपरिहारपूर्व कयोऽलौकिकमुपायं " वेदयति स वेदः।अलौकिक मुपायं यो ग्रन्थो वेदयति स वेदः" इति उद्घोषयति। तस्य अर्थः अनिष्टनिवारणद्वारा इष्टप्राप्तिः योऽलौकिक उपायद्वारा बोधयति स ग्रन्थः वेदः।

बृहदारण्यकोपनिषदि याज्ञवल्क्यः "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासःपुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निश्वसितानि" परमेश्वरस्य निःश्वसितम् वेदादिः इति वदन्ति।

गुरुपरंपराद्वारा कर्णाकर्णिकया यो यःअधीयते स श्रुतिः इति ऋषयःआमनंति। ज्ञापनद्वारा शिष्याणां बोधयति स आम्नायः इति वदन्ति। पुनः पुनः पुनश्चरणद्वारा यो अधीयते सः मंत्रः इति कथयन्ति।

"वेदो नित्यमधीयतां तदुदितं कर्मस्वनुष्टीयताम्।तेनेशस्य विधीयतामपचतिः काम्ये मतिस्त्यज्यताम्" इति भगवत्पादशंकराचार्य कथयन्ति।विप्रत्वसंपादनद्वारा शारीरिक, बौद्धिक, मानसिकानां च संस्कारार्थं वेदाध्ययनं अवश्यं करणीयम् इति।

धर्मबद्ध कर्माचरणं कर्तुम् वेदज्ञानम् आवश्यकम् ।कर्मणां कृते अनिवार्य विषयाणं ज्ञापनार्थं पुरा महर्षयः वेदस्य षडंगानि आरचितवन्तः। अंगानाम् सहितमध्ययनम् अस्माभिः अवश्यम् करणीयम्। तस्य अध्ययनस्य साङ्गवेदाध्ययनमिति कथयन्ति ।

**वेदाङ्गानि**

"अङ्ग्यन्ते ज्ञायन्ते वेदार्थः अमीभिरिति अङ्गानि" वेदाङ्गानाम् उपकारः वेदप्रतिपादनार्थं वेदाध्य़यनस्य यो विषयाः उपयुक्ताःतेषाम् अङ्गमिति उद्घोशयन्ति।

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा। कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।

शिक्षा, व्याकरणं, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पश्च इति षट् वेदाङ्गानि वेदपरुषस्य।

"छन्दः पादौ तु वेदस्य हस्तो कल्पोऽथ पठ्य ते। ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीतैव ब्रह्मलोकेमहीयते"।।

छन्दः वेदस्य पादः, कल्पः वेदस्य हस्तस्थानम्, ज्योतिष्यः वेदस्य नयनम्,निरुक्तःवेदस्य श्रोत्रम्, शिक्षा वेदस्य घ्राणम्, व्याकरणः वाक् स्थानम् एतैः अङ्गैः सहितः यो वेदाध्ययनं करोति सः ब्रह्मलोके महीयते। एतेषां वेदाङ्गानां मध्ये पंचम स्थानं शिक्षा। शास्त्र वेदेषु वर्णानां महत्वं च वदति। वर्णोच्छारणसमये यदि दोषाः स्यात्, तस्य मन्त्रोचारणस्य फलं न भवति।

तस्मात् वेदाभ्यासस्य शिक्षा स्थानं घ्राणमिति कथयंति। अक्षराणां स्वराणां च उच्चारणमधिकृत्य अनेके विषयाः प्रातिशाख्यग्रन्थेषु लभ्यः। काण्वीय प्रातिशाख्यं अथवा वाजसनेयी प्रातिशाख्यं इति ग्रन्थस्य नाम।

वेदाद्ययनं कथं कुत्र करणीयम् ? तस्य कालःकः? किमर्थम् ? अस्य ग्रन्थस्य अध्ययम्, इत्यादि विषयमधिकृत्य वाजसनेयी प्रातिशाख्य मंगल श्लोके

"ॐ।जपादौ नाधिकारोस्ति संयक् पाठ मजानतः। प्रातिशाख्यमतो ज्ञेयम् सम्यक् पाठस्य सिद्धये"।।

जपानां यज्ञानां च सम्यक् अनुष्ठानकरणार्थं प्रातिशाख्य ग्रन्थस्य अध्ययनम् आवश्यकम्। तस्मिन् मङ्गल श्लोके यः प्रातिशाख्यम् न जानाति तस्य जपादौ अधिकारः नास्ति। किमर्थं इत्युक्ते संयक् पाठमजानतः। अथः सम्यक् पाठार्थं तथा च सम्यक्पाठस्य सिद्धये प्रातिशाख्यं ज्ञेयम् ।

**उपनयनम्**

उपनयन संस्कारद्वारा वेदाभ्यासं करणीयम्। वेदाध्ययने उपवनीत वटुः एव अधिकारी। तथा वेदाभ्यासस्य उपनयन संस्कारः अतीवप्रामुख्यः।

"गुरोर्व्रतानां वेदस्य यमस्य नियमस्य च। देवतानां समीपे वा योनासौ नीयते द्विजः।।"

वेद व्रताचरणार्थं वेदाद्ययनार्थं च गुरोः समीपे अभिगमनम्। अभिगमनमेव अस्य संस्कारस्य विशेषः।

अस्मिन् विषये भारद्वाजः "उप इत्युक्ते गुरोः समीपं नयनम् तदेव उपनयनम्"इति वदति। अत्र वेद विद्याग्रहणार्थं गुरोः समीपमानयनम् इत्येव विषयः। नान्ये विद्याग्रहणमेव सुसंस्कारः। उपनयनः वेदाभ्यासस्य प्रथमं सोपानम्

जनाः सप्तमे अथवा अष्टमे वयसि वेदाध्ययनार्थम् करिष्यमाणः संस्कार एव उपनयनम्। अस्मिन् संस्कारे पिता एवम् वदति। अस्य कुमारस्य द्विजत्वसिध्यर्थं ,वेदाध्ययनाधिकारसिद्यर्थं च उपनयनं करिष्ये। इति

**उत्सर्जनोपाकर्म**

अधीतवेदविषये दोषपरिहारार्थं (दोष इत्युक्ते स्वरवर्णादि उच्चारः) करिष्यमाण विदेः उपाकर्म इति कथयंति । उत्सर्जनो नाम त्यागः इति। उत्सर्जनोपाकर्म गुरुशिष्येभ्यः न सर्वेषु ।नद्याः तटे इदं कार्यं कुर्वन्ति आचार्याः। अधीत वेदविद्यानाम् उत्सर्जनम् ,शास्त्राध्ययन ग्रहणम् उपाकर्म। वर्षे कालद्वये उत्सर्जनोपाकर्मणि आचार्याः आचरन्ति।

प्रथमः श्रावण्यां पौर्णिमास्याम् उत्सर्जनोपाकर्म कुर्वन्ति। द्वितीये तु पौष्य शुद्ध पूर्णिमाम् आचरन्ति। श्रावण कृष्ण द्वितीयादारभ्य पौष्यशुद्ध पूर्णिमापर्यन्तम् आचरिष्यन्ति उपाकर्म। इति द्वयोः अध्ययनं कर्तव्यम् अस्माभिः।

**वेदव्रतम् (व्रतचतुष्टयम्)**

वेदाध्ययनमेव वेदव्रतम्। ब्रह्मचारी वटुः अध्ययनार्थम् गुरोःसमीपे गच्छति। सः गुरुः तं वटुं परीक्ष्य नियमित क्रमेण अध्यापयति। चतुर्वेदेषु प्रथमं स्वशाखा अद्ययनम्।

"अधीत्यशाखात्मीयमय शाखान्ततः पठेत्। स्वशाखां यः परित्यज्य अन्यशाखामुपासते"

"शाखारंडः स विज्ञेयः सर्वं कर्म बहिः कृतः"।

प्रथमतः स्वशाखा अध्ययनम् करणीयम्। तद् विहाय अन्यशाखायाः अद्ययनम् क्रियते सति, सः शाखारंडः इति विज्ञेयः इति भगवान् व्यासः उक्तवान्। ब्रह्मचारी वटुः स्वशाखा अध्ययनान्तरं व्रतचतुष्टयं कुर्यात् । तेषु प्रथमः स्वशाखायाः अध्ययनम्।

महानवमी व्रतम् ,महाव्रतम्, उपनिषद् व्रतम्,गोदानम्। व्रतम् ,इति व्रतचतुष्टयम्। तेषु व्रतचतुष्टयेषु आद्य त्रयं संवत्सर पर्यन्तम् भिक्षाचरणं कृत्वा आचरणीयम्। अन्ते गोदानव्रतम् कृत्वा व्रतचतुष्टयं समापनीयम्। वेदाध्ययन समये गुरुकुले ब्रह्मचारी कथं तिष्ठेत् इति प्रातिशाख्ये, प्रयतः,शुचौ। प्रयतः इत्युक्ते वेदारंभ प्रारंभकाले अन्त्ये च ॐ कारोच्चारणं कार्यम्। प्रयतो नाम अन्तर्बाह्य शुचिः। ॐ कारन्तु "ॐकारस्वाध्ययादौ" इति वाजसनेयी पातिशाख्ये इष्टो नाम अभिरुचित मासन मासीनः इति आसन लक्षणम् वेदाध्ययनम् कदा प्रारभ्यते इत्युक्ते "ऋतुप्राप्यरात्रौ"इति वा प्रातिशाख्य सूत्रात् ।हेमन्त ऋतुं प्राप्य चतुर्थ प्रहरे अधीयीत इति वेदाध्ययन समये स्वर प्रदर्शनं हस्तेन क्रियते।

"समुच्चारयोद्वर्णान् हस्तेन च मुखेन च। स्वरश्चैवतु हस्तश्च द्वावेतौयुगपत् स्थितौ।।

हस्तेन ते--इति याज्ञवल्क्य शिक्षायां हस्तेन उदात्तादि स्वराणां प्रदर्शनम् करणीयम्।

" हस्तहीनन्तु योऽधीते मन्त्रं वेदविदो विदुः। न सादये याजुषाणि भुक्तमव्यजनम् यथा" (याज्ञवल्क्य शिक्षायां स्वर प्रकरणे)।।

हस्तस्वर प्रदर्शनम् विना यः पठति याजुषाणि इतुक्ते वैदिकानुष्ठानानां फलं न लभते। व्यन्जनम् इत्युक्ते दधिजीरकादि संस्करणं यत् तत् अव्यन्जनम्। रसादि पाकरूपं फलं न सादयति। अथः स्वर प्रदर्शनम् अवश्यम् करणीयम्।हस्तहीनं तु इत्युक्तेः-

"ऋचो यजूंषि सामानि हस्त हीनानि यः पठेत्। अनृचो ब्रम्हणस्तावत् यावत् स्वारं न विन्दति"(या.शिक्षा.स्वर प्रकरणम्)।।

यः ऋजूंषि सामानि हस्तप्रदर्शनं विना पठेत् सः अनृचः अवैदिकोऽयम्। इति लोके कथ्यते हस्त चालनार्थं आवश्यकम् इति याज्ञवल्क्य शिक्षोक्तरीत्या। हस्त प्रदर्शनपूर्वकं वेदाध्ययनमावश्यकम्। अध्ययनकाले यथा स्वरोच्चारणम् मुखेनक्रियते तथा हस्त प्रदर्शनम्

"यथावाणि तथापाणी रिक्तन्तु परिवर्जयेत्। यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति।।"(या. शिक्षा.47.सू)

वेदाध्ययनसमये स्वरत्रयं उच्चारणस्य कर्तव्यम्। प्रचयस्वरमाहत्य स्वरा चतुर्थः इति बुधाः कथयन्ति।

**योजनान्नपरम्**

इति वाजसनेयी प्रातिशाख्ये अध्ययन कर्तारः वटवः आश्रमात् बहिः इत्युक्ते योजनात् अनतिदूरं न गच्छेत् इति।इत्युक्ते वन्यप्राणिभिः भीतिर्भवति इति ।

वेदाध्ययन काले संयक् अध्ययनम् करणीयम्। वाजसनेयी प्रातिशाख्ये प्रथमोऽध्याये प्रथम सूत्रे " स्वर संस्कारयोश्छन्दसिनियमः" इति सूत्रं विद्यते। अस्मिन् सूत्रे स्वरा संस्काराः छन्दसि निः यमः इति चतुष्पदानि सन्ति। स्वरो नाम उदात्त, अनुदात्त, स्वरित, प्रचित स्वराः। संस्कारो नाम लोपागम वर्ण विकार प्रकृतिभावः। छन्दसि इत्यक्ते वेदे नियमः स्यात् इति पूणार्थः। मंत्रोच्चारण समये स्वर वर्णादि हीनत्वं मा भूत्। तदुध्दरणार्थम् वाजसनेयी प्रातिशाख्ये-

"मंत्रो हीनस्वरतो वर्णतो वा मिथ्याप्रयुक्तो नतमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेद्रशतो स्वरतोऽपराधात्।।"

इति। तस्मात् वेदाध्ययनं गुरुमुखेन सम्यक् अय्यनं करणीयम्। मंत्राणां अविस्मरणार्थं पुनः पुनः "स्वाद्यायोऽध्येतव्यः"इति।

स्वाध्ययने कृते सति मंत्रस्वरवर्णानाम् संयक् सिद्धिः भवति। केवलं मंत्राणं सिद्धनं भवति, आत्मो द्धारणं भवति। अतः शिक्षायां "अहरहःस्वाध्यायमधीयीत" इति। तस्मत् अधीतवेदशास्त्राणाम् अध्ययनं अस्माभिः अवश्यं करणीयम्। कृते सति ऋणत्रयाणां मध्ये ऋषिऋणस्य अपाकरणं भवति।

*********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# श्री कृष्णप्रसाद शर्मा कृत 'श्री कृष्णचरितामृतम् महाकाव्य' में कृष्णजन्मोत्सव

**Dr. Priyankkumar Raval**
Assistant Professor
P.G. Department of Sanskrit
Sardar Patel University, Vallabh Vidyanagar
Anand, Gujarat-388120
Email Id : drpriyankraval1990@gmail.com
Mobile No. 7984896914

संस्कृत साहित्य भारत में ही नहीं किन्तु विश्व में उसकी ख्याति है और उसकी अखंड ज्योत सदैव प्रज्वलित रहेती है। प्राचीन समय से आधुनिक समय तक, सर्व युगो में या कोई भी कालमें संस्कृत साहित्य का उत्तरोत्तर विकास के हेतु विद्वत्तजन या कविजन जन्म लेते हैं। एसे श्रेष्ठ कविजन का हमे सदैव ऋण स्वीकारना चाहिए। आधुनिकयुग में महाकवि 'श्री कृष्णप्रसाद शर्मा' जिसने 'श्री कृष्णचरितामृतम्' महाकाव्य की रचना करके संस्कृत साहित्य में अमूल्य महाकाव्य के रुप में तोहफा दिया है। इसलिए हम सब संस्कृत प्रेमी सदैव कवि 'श्री कृष्णप्रसाद शर्मा' के ऋणी रहेगें।

उन्नसवी सदी के महान कवि 'श्री कृष्णप्रसाद शर्मा घिमिर का जन्म वि.सं. १९७६ में भाद्रपद मास में श्री कृष्णजन्माष्टमी के दिन जन्म लेकर नेपाल की राजधानी काठमण्डू में समलंकृत किया। श्री कृष्णप्रसाद शर्मांने महाकाव्य 'श्री कृष्णचरितामृतम् में श्रीमद् भागवद् के दशम स्कन्ध पूर्वार्द्ध में १४ अध्यायों की कथा को अपना उपजीय बनाया है। इस महाकाव्य में कविने पौराणिक कथा का आधार लेकर प्रतिभा के आधार से काव्य में मौलिकता और सजीवता प्रदर्शित की है। सम्पूर्ण महाकाव्य ५८ सर्गों में विभक्त है तथा इस ३६०० पद्य है। यह काव्य 'श्रीमद् भागवद्' का सार-सर्वस्व है। श्री घिमिरे की इस महाकाव्य की रचना भारत के लब्धप्रतिष्ठित एक सौ एक विद्वानों द्वारा मुक्तकण्ठ से प्रशस्त महाकाव्य के रुप में प्रशंसित है। पौराणिक कथा को महाकाव्योचित शिल्प में प्रस्तुत करने में कवि को संपूर्ण सफलता मिली है।

श्री कृष्णचरितामृतम् महाकाव्य का नायक दिव्यपात्र श्री कृष्ण धीरोदात्तनायक के गुणो से मण्डित है। पात्रचित्रण में कवि ने पात्रों के देव और दानव स्वभाव को सुरक्षित रखा है। साधुओं को परित्राण और दुष्कृतों के विनाश में सतत प्रयतमान श्री कृष्ण का परम लोकोपकारी रुप उद्भावित हुआ है। इस महाकाव्य का अंगीरस भक्ति है। अन्य सभी रस अंग के रुप में है। काव्य की भाषा सर्वत्र सांलकृत है। प्रसाद गुण युक्त वैदर्भीरीति का प्राचुर्य है। प्रस्तुत महाकाव्य में भारतीय दार्शनिक, पौराणिक, काव्यशास्त्रीय और ऐतिहासिक तथ्यों पर उद्घाटन किया गया है। कविने जगतगुरु प्रभु आशुतोष की करुण क्रन्दन युक्त स्तुति करते है शिव कोई सामान्य देव नहीं है अपितु वेद वेदांतादि से सम्पूर्ण सृष्टि का कर्ता घर्ता संहर्ता है। यही परम शिव समस्त सृष्टि में व्याप्त है। कविने इस महाकाव्य में अपनी प्रतिभा के द्वारा विविध वर्णनो को रसमय करते हुए जेसे की कृष्णलीला, गोपीयों की उत्कंठा, मथुरा में विवाहोत्सव, कंस का दुष्ट व्यवहार, कृष्णजन्मोत्सव आदि विविध वर्णनों से ये महाकाव्य प्रस्तुत है।

श्री कृष्णप्रसाद शर्मा 'घिमिरे' कृत 'श्री कृष्णचरितामृतम्' महाकाव्य के द्वादश सर्ग 'कृष्णजन्मोत्सव' का रसमय प्रसंङ्ग प्रस्तुत किया है। भारतीय संस्कृति के अनुसार कृष्ण जन्मोत्सव का विशेष महत्व है। यहाँ कविने कृष्ण के जन्म से नन्दजी और यशोदा के अलौकिक आनंद, नगर में उत्सव की तैयारी में उत्सुक नगरवासी, गोपीयों की कृष्ण के प्रति भक्ति और कृष्ण के गुणगान आदि अलौकिक वर्णन द्वादश सर्ग 'कृष्णजन्मोत्सव' प्रसंग मे प्रस्तुत किया है। वन में बालक के हाथकी चेष्टाने नन्दरानी यशोदा को जगा दिया। यशोदा पहेले भी 'में प्रसुता हुई थी' मगर इस बालक को याद करके हडबडाकर उठ गई और अपने सोये हुए पति नन्दबाबाको

जगाकर कहा की 'व्रजराज ! मैने एक बालक को जन्म दिया है... हम देखे वह पुत्र है कि पुत्री ? नन्दनीने उठकर उस शिशुको देखा, वह शिशु पैर से लेकर शिर तक रेशमी पीताम्बर से ढका हुआ है। उन दोनोनें धीरेसे वस्त्र हटाकर बालक के सुन्दर युगलचरण देखे और नन्दजी को चरण में ध्वज, अङ्कुश, आदि शुभचिन्हसे अङ्कित दिखाई दिये। यह देख कर उन्हें अक्षय सुख की प्राप्ति हुई।

**निःसार्य वस्त्रं चरणी शिशोः, शुभी निरीक्षमाणौ शनकैढभावपि । छाजाङ्कुशैर्वज्रसरोरुहादिभि, द्रष्टाङ्कितौ प्राप्तुख्ययं सुखम् ॥**

पहेले पुरुषतत्त्व सूचक वस्तुपर दष्टिपात करके उन्होंने बालक के वक्षःस्थल पर भृगुके चरण चिन्ह देखे, फिर मस्तक का अवलोकन करते हुए कहते है कि जिसपर शोभा युक्त मोरपंख का मुकुट था।

**'वद्धार्गवं चिह्नमवेक्ष्य सत्त्वरावपश्यतां श्री श्रितचन्द्रकं शिरः ॥**

उस शिशुको यथार्थतः साक्षात् परमेश्वर मानकर वे अत्यन्त मुग्ध हो गये और उस समय उसके एक एक परम उत्तम अङ्ग पर हाथ फेरने लगे। यहाँ पर कवि श्री घिमिरेने शिशु के जन्म के समय नन्दजी को परम् आनन्द की अनुभूति प्रदर्शित होती है। नन्दजी के मनमें यह पुत्रजन्म की बात खेलने लगी तब उनके भावको देखकर बालकभी मुस्कुराने लगा।

**गते सुदीर्घे वयसीह दैवतो, नावोऽध नौ पुत्र इदं वचो यदा । तयोरखेलध्ददये सुनिर्भरं, संलक्ष्य वद्धावमसौ स्मितस्तदा ॥**

कवि घिमिरेने यहा नन्दजी को परमान्द की प्राप्ति हो गई है एसी अनुभूति को प्रस्तुत किया है। आगे नन्दजी के इस आनन्द की अनुभूति का विस्तार से वर्णन करके कवि लिखते है कि 'जहाँ अप्रेय कान्तिका प्राचुर्य था, जिसका दर्शन बडा सुहावना था, जिसकी काया जलघर के समान श्याम था और मनको बरबस अपनी और खींच लेनेवाला था। शिशु के उस अलौकिक ढप को देखकर वे दोनों नन्दजी - यशोदाजी चित्रलिखित मूर्ति से प्रतीत होने लगे। यहा पर शिशु बालक के तेज का और सौन्दर्यका अद्भूत रसमय वर्णन देखने को मिलता है ।

नन्दराज दीर्घकाल के बाद अपने कर्तव्य का स्मरण होने से वो उठ गये। उन्होंने घरकी खिडकी खोलकर आकाश में व्याप्त हुई उस नीलज्योति को देखा और सोचने लगेकी नवोदित प्रियतम चन्द्रका आलिङ्गन करके उसकी फैली हुई प्रसृत किरणोसे आह्लादित हुई सभी दिशा में नन्द और यशोदाजी चिन्मयी उत्तम बुद्धिकी भाँति मग्न हो गई। यहा पर कवि श्री धिमिरेने प्रकृति के द्वारा मनुष्यकी संवेदनाओं प्रगट करके प्रतिभा के उत्कृष्ट दर्शन द्रश्यमान है। नन्दजी वहा खडे खडे मन ही मन सोचने लगे की –

**स चिन्तयामास गवाक्षमाश्रितः सचिन्मयोडयं पुढषः पुरातनः । किं वाऽवतीर्णऽत्र ? ममेष्टदेवता श्रेयो विदध्यान्नयताच्य सर्वथा ॥**

क्या ये सच्चिदानन्दमय पुरातन पुरुष मेरे इष्टदेव ही यहाँ इस ढप में अवतीर्ण हुए है ? यदि ऐसी बात है तो इनकी जय हो और ये मेरा कल्याण करे एसा नन्दजी कह कर अपनी मन की बात भगवद् प्रति कृतज्ञता व्यक्त कर रहे है । यहाँ शिशु के तेज को देख कर नन्दजी को सच्चिदान्दमय पुरुष ही मेरे पुत्र के ढप में प्रगट हुए है, एसा मनोमय जान चुके थे। तदनन्तर शिशु के जातकर्म के लिए ब्राह्मणों को बुलाने की आज्ञा दी और सारे राजदरबार में पहुंचकर घर-घर घूमकर दिनों तथा मुनिजनो को आमंत्रण भिजवाया। नगर में नगाडे को जोर-जोर से बजाकर नन्दजी का संदेश उच्च स्वरोसे सुनने लगे और कहने लगे की –

**'जातोऽद्य बालो व्रजराजसध्मनि सर्वे समागच्छत जातकर्मणि ॥**

गोपगण ! आज वजराज नन्दजी के घर बालक उत्पन्न हुआ है, उसका जातकर्म संस्कार होने जा रहा है । उस उत्सव में आप सब लोग पधारे । द्विजो राजग्रह में आने से नन्दाजीने उन द्विजोका पूजन और प्रणाम किया । आर्शीवाद लेकर पुत्र के जात कर्मके विषय में निवेदन किया । उस समय मङ्गलर्पि उन ब्राहाणो ऐसे मङ्गल कर्म में उपस्थित होने पर बडी प्रसन्नता प्रकट की और उत्तम पुत्रतीर्थ में वस्त्र सहित नन्दराज को विधिपूर्वक माङ्गलिक स्नान कराया । फिर उन्होंने सुमङ्गलमय स्वस्तिवाचन, देवपूजन, शान्तिकर्म, नान्दि आदि पुजन श्रद्धा से पूर्ण किया।

पुत्र के जन्म से नन्दजीने आनन्द से उदारतावश द्विजो को नाना प्रकार का बहुत अर्पित किया और इतना ही नहीं उन्होंने वस्त्राभूषणोंसे विभूषित तथा सुपूजित दो लाख गाएँ भी सुखपूर्वक दान किया । **‘गवां शुभे द्वे नियुते भलङ्ते ददे सवत्से ससुखं सुपूनिवे ॥** सभी ब्राह्मणोंको ‘नारायणाय समर्पयामि’ ऐसे बोलकर दान किया। श्री कृष्णप्रसाद शर्माजीने यहा पर गर्भ आदि संस्कारोसे शरीर शुद्ध होता है उसकी बात प्रस्तुत करके कहते है कि –

**विशुध्यते कालवशाद्धरादिकं शौचाच्छरीरं वसनं प्रमार्जनै : । हृषीकवृन्दं तपसेन्यया द्विजा गर्भादि संस्कारत एवं संस्कृतम् ॥**

पृथ्वी तथा पार्थिव आदि वस्तुएँ विशेषतः कालसे विशुद्ध होती है। शरीर स्नान से, वस्त्र धोने से, इन्द्रिय समूह तप से, द्विज यज्ञ-याग से तथा गर्भ आदि संस्कार से संस्कृत होकर शुद्ध होते है मनुस्मृति में द्वितीय अध्याय गर्भादि संस्कारों का विशेष महत्त्व बताते हुए मनु कहते हैं कि –

**वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् । कार्यः शरीरसंस्कारः पावनः प्रत्ये चेह च ॥**

“इहलोक और परलोक में पावनकारी बनने के लिए गर्भाधान आदि शरीरसंस्कार, द्विजवर्णों को पवित्र वैदिक कर्मों से करना चाहिए।” इस संस्कार का कवि श्री धिमिरने विशेष महत्त्व बताया है और महाकाव्य में मनुस्मृति का भी प्रभाव देखने को मिलता है ।

कृष्णजन्मोत्सव में सम्मिलित होने के लिए बालक, वृद्ध और तरुण गोपी बडी उतावल के साथ यूथबद्ध होकर नन्द के घर आये । व्रज में रहनेवाली गुण ढप एवं शीलमें बढी चढी माताएं, गोप बालाएं, वन युवतियाँ तथा बालिकाएँ भी स्वतः उत्सुक होकर अपने आपको सवारने और आभूषित करने लगी । चार प्रकारकी गोपीया - देवाङ्गनास्वढपा, मुनिढपा, गोपाङ्गनास्वढपा तथा श्रुतिसंहितादिढपा ये हरिवल्लभ अपने प्रियतम नन्दन शिशु बालक के दर्शन करने के निमित्त उनके जन्मोत्सव पर अपने को विभूषित करने लगी । आंखो में अंजन लगाकर उन्होने मुख को सुगन्ध चूर्ण से उज्जवल किया, उसमे कुमकुम लगाकर कुछ अरुण आभलादि और जुडे में परम सुन्दर पुष्पहार गूँथकर प्रियदर्शन की तरह गोपियों की उत्कंठा देखने को मिलती है ।

**सुखेन सर्वा व्यगमन् समुत्सुका नन्दालयं विश्वजनाश्रयालयम् । चन्द्रं चकोर्यः श्रुतयः परंयथा प्रभा रविं द्रष्टुमिवाऽऽययुस्तदा ॥**

जैसे चकोरियाँ चन्द्रमाको, श्रुतियाँ परब्रह्मको, प्रभा सूर्यको पाना चाहती है, उसी प्रकार वे सब गोपियाँ नन्द नन्दन को देखने के लिए उत्सुक होकर सुखपूर्वक उस नन्दभुवन में आ पहुंची, जो समस्त विश्व के आश्रयभूत भगवान का भी निवासगृह बना हुआ था। कवि श्री धिमिरेजी ने यहा गोपीयों की मनोदशा का रसमय वर्णन करते हैं।

कविने यहाँ प्रकृति के साथ कृष्ण के सौन्द्र्य का समन्वित किया है । प्रकृति का प्रिय सौन्दर्य होते हुए भी कृष्ण के सौन्दर्य से फीका (कम) हो जाता है और कहते है कि-

**पूर्णः कला स्वा परिगृह्य चद्रमाः प्राच्यां समुदभूत इवाऽभक्तदा । तन्ज्योतिषा व्याप्तमेयकान्तिमत् सौरं महोऽप्यत्र बभूव शीतवत् ॥**

उस महोत्सव पर ऐसा ज्ञात हुआ कि, मानो अपनी सम्पूर्ण कलाओ कों लेकर चन्द्रदेव पूर्व दिशा में प्रकट हो गये है। उस शिशुकी ज्योति से व्याप्त अभेद कान्तिमान सौरमण्डल का तेजभी शीतल सा हो गया था । कवि ने यहां प्रकृति के सौन्दर्य से भी अधिक यह बालक शिशु का सौन्दर्य था ।कवि ने आगे कृष्ण की लिला का वर्णन करते हुए कहते है कि - रोहिणीजी के कर कमल में विराजमान उस नीलमणि बालक के तेजका आधिक्य था और वह सुख आनन्दमय था । शिशुबालक के अधिष्ठान सगुणो से सबको आहलाद्कारी बना देता है । उस शिशु बालक को सच्चिदानन्दमय रुप में जी भरकर सबने देखा । वह बालक स्वभाव से ही सबकी इन्द्रियों को अपनी और खींच रहा था । आनन्दमय सच्चिदानन्द स्वरुप उस बालक अपने गुण के जाल की मालासे अलंकृत उस बालक ने अपनी दृष्टि-कान्ति से तथा अनुपम बुद्धि से उस समय सब के मन को सर्वथा हर लिया ।

**शक्त्या प्रभावेल गुणेन वीर्यतः सामर्थ्यवन्तोऽत्र विचक्षणा जनाः । सिद्धं स्वतो व्यक्तिमनोऽनुसारिणा ज्ञानेन कुर्वन्ति वशं जनाङ्गनाः ॥**

इस जगत में जो सामर्थ्यशाली और विचक्षणजन है, वे अपनी शक्ति, प्रभाव, गुण और पराक्रम के तथा व्यक्ति के मनका अनुसरण करनेवाले ज्ञान से लोगो को अपने वश कर लेते है । यह बात शिशु बालक को उदेश्य मे कहा गया है । कवि श्री घिमिरेजी ने यहा दृष्टांत के आधार पर 'तात्त्वीक विचार' भी प्रस्तुत करते है । कहते है कि - यह बालक तो अतुल शक्ति से सुशोभित है। विज्ञानवान तथा सत्यादि गुणों से युक्त है । अतः उसने हृदयतक का कम स्पर्श करनेवाली, सुख-सिन्धुगामिनी अपनी चञ्चल चित्त वाससे उन सब लोगो का मन मोह लिया । उसके जन्मसे ही कृष्ण लिला करने लगे थे एसा प्रतित होता है । कुछ लोगो को शिशु बालक को देखने से उन लोगो को विविध तेज और अवतारों का दर्शन हुआ । कविश्री यहाँ वर्णन करते लिखते है कि –

**अदार्शि कैचिच्छिशुनेत्रपद्मयोनीलं महो तेर्यदुपासितं रहः । कैश्चितु दौर्ग गुनरुपतो ज्वलत्सौरं पैरर्गाणपतं च शाम्भवम् ॥**

कुछ लोगों ने नन्दशिशु के नयनकमल में वह नील तेज देखा और एकान्त में उस तेज की उपासना की थी । किसीने उसमें दुर्गाजी का रुपमें देखा, किसीने गुण और रुप से जाज्वल्यमान सूर्यका प्रभापुञ्ज देखा और किसीने गणपति तथा भगवान शिव के तेज का दर्शन किया। अधिक अवस्थावाले नन्द आदि सम्मानीय गोपोंने स्नेह से मुग्ध करदेनेवाले उस बालक को देखकर अपने हृदय में यह निश्चित किया की यह हमें भगवान शिव के अनुग्रह से मूर्तिमान यह शिशु बालक का सौभाग्य प्राप्त हुआ है। यहाँ बालक शिशु के विविध स्वरुपो से सब को माया की जाल में फसाता है और वह शिशु बालक मनुष्य लोक में जन्म लेने का भी उद्देश्य है, यह उदेश्य हमे 'भगवद्गीता' में चतुर्थ अंक में प्राप्त होता है। 'भगवद्गीता' में कहा है कि –

**अनोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥**

भगवद्गीता में श्रीकृष्ण भगवान कहते है कि 'में अजन्मा, अविनाशी, आत्म स्वरूप से और सर्व प्राणियों का इश्वर हूँ । इस तरह अपनी प्रकृति से अधिष्ठान होकर अपनी माया से में जन्म लेता हूँ। कविने यहा कृष्ण के अवतार का और उनकी माया का विस्तृत वर्णन किया है । कवि ने यहाँ पर शिशु के जन्म से सिर्फ मानव ही नहि किन्तु यहाँ व्रजवासी में रहनेवाले सभी प्राणी और पक्षीभी उस शिशु बालक का तेज का दर्शन करने हेतु उत्सुक्ता से सब इकट्ठे हो गये। इधर अङ्गनाओं (मेना या अप्सरा) के साथ उसके गुण गौरव को गाने लगे । यद्यपि उनकी वाणी अव्यक्त थी। तथापि वे कौतुहलवश जो मधुर गीत गा रहे थे।

**तदेव गीतं प्रतिसृत्य सत्वरं तथाऽपि गीतं बहुधा शुभाकृति। मन्त्रैर्विमुग्धेव सुतं विगृह्य या रराज गायन एवं तद्गति ।।**

नन्दशिशु ही जिनका आश्रय था उन सुन्दर आकृतिवाली रोहिणी देवी ने भी मन्त्रमुग्ध होकर खगों द्वारा गाये गये उसी गीत का तत्काल अनुसरण करके उसे अनेक प्रकार से गाया। वे उस शिशु को गोद में लिए वही गीत गाती हुई बडी शोभा पा रही थी। यही गीत 'श्रीमद्भागवद्' में 'गोपी गीत' के नाम से जाना जाता है, कवि ने यहाँ मौलिकता से 'गोपी गीत' प्रस्तुत किया है। श्रीकृष्ण के गुण गान गाया हुआ है।

**जयति गोकुलं जन्मतोऽत्र वे यदभवद्दिगो श्री निकेतनम् । प्रमुदिवाः स्वतो विश्वदेहिनः कुरु कृपां पदे प्रापयस्व नः ।।**

तदनन्तर उस शिशुको रोहिणी देवीने यशोदा की गोदमें देकर वे उस जन्म महोत्सव में अत्यन्त सुभाषित हुई । कवि श्री कृष्णप्रसाद शर्मा 'धिमिरेजी' ने उत्तम महाकाव्य 'श्री कृष्णचरितामृतम्' में 'कृष्णजन्मोत्सव' प्रसङ्ग का रसमय से द्वादश सर्ग में प्रस्तुत किया है । कृष्णजन्मोत्सव के प्रसङ्ग में कृष्ण का जन्म, नन्दजी- यशोदा का उत्साह, नगर में महोत्सव की तैयारी, नगरजन का उत्साह, कृष्ण की लिला, गोपीयो की कृष्णप्रति उत्कंठा और कृष्ण के गुणगान गाती गोपीय आदि विशेष रसमय और प्रसङ्ग के अनुरुप वर्णन किया है।भारतीय संस्कृति के अनुसार हमारे देश में अनेक उत्सव होते है । जिसमें कृष्णजन्मोत्स का अति विशेष महत्व है।

'श्रीमद्भागवद्' में कृष्णजन्मोत्सव का विशेष रुपसे विस्तृत रसमय प्रसङ्ग निरुपित है । उन्नसवी सदी के महान कवि 'श्री कृष्णप्रसाद शर्मा' जीसने 'श्री कृष्णचरितामृतम्' महाकाव्य की रचना की, उन्होंने 'श्रीकृष्ण का जिवन चरित्र का अपने मौलिकता और प्रतिभा से प्रस्तुत किया है । इस महाकव्य की प्रशस्ति के कारण कवि श्री को 'कविरत्न' की उपमा प्रदान हुई। श्री कृष्णप्रसाद शर्माने इस महाकाव्य की रचना करने से पहले कवि ने सुंदर पंक्ति लिख कर कृतज्ञता व्यक्त करते हुए कहते है कि –

**मनुष्यता पुरुषताग्र्यवर्णता, मनीषिता सत्कवि शिवैकता । इयं गम क्षेमपरम्परा विभोः, स्तुति प्रसङ्गेन गता कृतार्थताम ।।**

सर्वात्मन ! पहेले तो मुजे मनुष्य योनि में जन्म मिला, उसमें भी पुरुष शरीर ही प्राप्त हुआ, उस पर भी ऊँचा वर्ण (ब्राह्मणत्व) उपलब्ध हुआ; उसमें भी उत्कृष्ट बुद्धि एवं उच्च विचार शक्ति सुलभ हुई, इसके उपर भी उत्तम कवित्व शक्ति मिली और फिर भगवान शिव के प्रति ऐसी अनन्यता प्राप्त हुई । यह मेरी कल्याण-परंपरा आज प्रभु के स्तुति से कृतार्थ हो गयी । यहाँ कवि महाकाव्य की रचना पूर्वे प्रभु के स्तुति प्रसङ्ग से कृतज्ञता व्यक्त करते है। आधुनिक संस्कृत साहित्य में 'श्री कृष्णप्रसाद शर्मा' इस महाकाव्य 'श्री कृष्णचरितामृतम्' का विशेष महत्त्व है और हम सब संस्कृत भाषा के सभी जनो को मीलकर कवि श्री कृष्णप्रसाद शर्मा का ऋण स्विकारना चाहिए।

**संदर्भ ग्रंथसूचि :**

1. श्री कृष्णचरितामृतम् संपादक : श्री कृष्णप्रसाद शर्मा (घिमिरे) प्रकाशक : श्री कृष्पग्रन्थमाला, काठमण्डू, नेपाल संस्करणम् : प्रथम, वि.सं. २०१८
2. मनुस्मृति (मेघातिथि भाष्य सहित) संपादक : झा गेगानाथ प्रकाशक : परिमल पब्लिकेशन, दिल्ली संस्करणम् : प्रथमोभाग
3. श्रीमद्भगवद्गीता संपादक : डो. शांतिकुमार एम. पंडया प्रकाशक : पार्श्व पब्लिकेशन, अहमदाबाद संस्करणम् : तृतीय, २००३
4. श्रीमद् भागवद् रसामृत संपादक : कृष्णप्रसाद पटेल प्रकाशक : सद् विचार परिवार, अहमदाबाद संस्करणम् : सातमी आवृत्ति (१५ जून १९९९)

**********

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# पुराणों में श्रीमद्भागवत का स्थान और महत्व

**Parmar Vinodkumar Maganbhai**
Research Scholar
Karnataka Sanskrit University
Pampa Mahakavi Road
Chamaraja Pete-560018,
Bengaluru, Karnataka
E-mail : parmarvinod8411@gmail.com
Contact No. : 9510109868

**प्रस्तावना**

भारतीय संस्कृति और साहित्य अपने तत्वचिंतन में अग्रगण्य है । इसी तत्वचिंतनने विश्व के अधिकांश तत्त्वशास्त्रज्ञों को उसे पढ़ने और समझने की ओर आकर्षित किया है । जिसमें भगवद्गीता, उपनिषद्, वेद, भागवत इत्यादि तत्वसाहित्यसर्वश्रेष्ठ है । तत्वशास्त्रज्ञों की दृष्टी में पुराणसाहित्यका विशिष्टस्थान है । यह लोकप्रसिद्ध है की पुराणों की रचना भगवान व्यासजी ने की है । भारतीय संस्कृति में जो अठारहमहापुराण है[1], उसी में से श्रीमद्भागवत एक है । श्रीमद्भागवत को पुराणों में सर्वश्रेष्ठ कहा गया है । जिसका मुख्य वर्ण्य विषय भक्ति है । पुराणों में भागवत को महापुराण कहा जाता है । जिस प्रकार वृक्ष पर लगा कोई भी फल पककर जनसमुदाय को तृप्ति दिलाता है, उसी प्रकार ही 'भागवत' पुराणों में से एक पका हुआ फल है, जो सभी जनसमुदाय को उसका रसपान करवाता है । भागवत नाम से पुराणों में दो पुराण प्राप्त है –

1. देवी का महत्व प्रकट करता "देवी भागवतम्" ।
2. भगवान विष्णु का महात्म्य दर्शाते हुए "भागवतम्" ।

श्रीमद्भागवत से हमें श्रीकृष्ण तथा भगवान विष्णु के समस्त अवतारों के विषय में विस्तृत ज्ञानप्राप्त होता है । श्रीमद् भागवत बारह स्कन्ध, 335 अध्याय और 18 हजार श्लोकों से युक्त महापुराण है । बारहस्कन्ध में निम्नलिखित विषय उल्लेखित है ।

**प्रथम स्कन्धः** मुख्य विषय भक्ति योग, भगवान के विविध अवतारों का वर्णन, श्रीकृष्ण का द्वारका गमन, राजा परीक्षित के जन्म, कर्म, मोक्ष इत्यादि का वर्णन ।

**द्वितीय स्कन्धः** ब्रह्मांड की उत्पत्ति, पुराणों के दश लक्षण, गीता का उपदेश, भगवान के विराट स्वरूप का वर्णन इत्यादि ।

**तृतीय स्कन्धः** उद्धव द्वारा भगवान के बालरूप का वर्णन, प्रह्लाद की भक्ति, कपिल मुनि के रूप में भगवान का अवतार, विदुर और मैत्रेय ऋषि की भेंट, वाराह अवतार की कथा इत्यादि ।

**चतुर्थ स्कन्धः** परंजन नाम के राजा और एक सुन्दर कन्या कि कथा, राजा पृथु तथा ध्रुव का वर्णन इत्यादि ।

**पंचम स्कन्धः** नदी, पाताल, नरक, समुद्र, पर्वत का वर्णन, शकुन्तला पुत्र भरत कथा, गंगा अवतरण की कथा, प्रियवृत, ऋषभ देव इत्यादि राजाओं का वर्णन ।

**षष्ठ स्कन्धः** पुंसवन व्रत का वर्णन, अजामिल कि कथा, नारायण कवच, दक्ष प्रजापति वंशज वर्णन, दधीचि के अस्थि से वज्र का उद्भव इत्यादि ।

**सप्तम स्कन्धः** हिरण्यकशियपु – प्रह्लाद की विस्तृत कथा, मानवधर्म, वर्ण धर्म और स्त्री धर्म का विस्तृत वर्णन इत्यादि ।

---

1. मद्वयं भद्वयं चैव ब्रत्रयं व चतुष्टयम् । अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥ (देवीभागवतम्, ३,२)

ಎಂಬ ಯಾಜ್ಞವಲ್ಕ್ಯರ ಮಾತು ಧರ್ಮಶಾಸ್ತ್ರದ ಮಹತ್ವವನ್ನು ಸಾರುತ್ತದೆ. ಸನ್ಮಾರ್ಗದಲ್ಲಿ ಜೀವನವನ್ನು ಸಾಗಿಸಿ, ಸುಖ–ಸಾರ್ಥಕತೆಯನ್ನು ಸಾಧಿಸುವ ಮಾರ್ಗಪ್ರಬೋಧಕ ಶಾಸ್ತ್ರವೇ ಧರ್ಮಶಾಸ್ತ್ರ, ಮನು–ಯಾಜ್ಞವಲ್ಕ್ಯಾದಿ ಮಹರ್ಷಿಗಳಿಂದ ಹೇಳಲ್ಪಟ್ಟಿದೆ. 'ಪರದ' ಸಾಧನೆಗೆ 'ಇಹವೇ' ಸಾಧನ ಇಹಪರಗಳೆರಡನ್ನೂ ಒಟ್ಟಾಗಿ ಬೆಸೆಯುವ ವೇದಗಳ ಆಧಾರದಲ್ಲಿ ಸಂಪೂರ್ಣ ಸಮಾಜ ವ್ಯವಸ್ಥೆಯನ್ನು ರೂಪಿಸುವ ಶಾಸ್ತ್ರ ಧರ್ಮಶಾಸ್ತ್ರವಾಗಿತ್ತು ಎಂಬುದು ಧರ್ಮಶಾಸ್ತ್ರದ ಸರಿಯಾದ ತಿಳುವಳಿಕೆಯಿಂದ ಮಾತ್ರ ಅರ್ಥವಾಗುವ ಸತ್ಯ. ಇಂತಹ ಧರ್ಮಶಾಸ್ತ್ರದಲ್ಲಿ ಸಮಾಜದ ಅವಿಭಾಜ್ಯ ಅಂಗವಾದ ಸ್ತ್ರೀ ಉಪೇಕ್ಷಿಸಲ್ಪಟ್ಟಿದ್ದಾಳೆ, ಅವಳ ಜೀವನದ ಸಾರ್ಥಕತೆಗೆ ಬೇಕಾದ ಸ್ವಾತಂತ್ರ್ಯವನ್ನು ಧರ್ಮಶಾಸ್ತ್ರ ಕಸಿದುಕೊಂಡಿದೆ ಎಂಬುದು ವರ್ತಮಾನದ ಪ್ರಬಲ ಅಕ್ಷೇಪ. ಇದಕ್ಕೆ ಕಾರಣ ಸ್ಥಾನದಲ್ಲಿರುವುದು **"ನ ಸ್ತ್ರೀ ಸ್ವಾತಂತ್ರ್ಯಮರ್ಹತಿ"** ಎಂಬ ಋಷಿವಾಕ್ಯ. ಋಷಿಪ್ರೋಕ್ತವಾದ ಶಾಸ್ತ್ರಸೂಚಿತ ಸನ್ಮಾರ್ಗದಲ್ಲಿ ಜೀವನವನ್ನು ಸಾಗಿಸುವ ಸನಾತನ ಸುಸಂಸ್ಕೃತಿ ನಮ್ಮದು. ವಿದ್ಯೆ, ತಪಸ್ಸು, ಜ್ಞಾನ, ವೈರಾಗ್ಯ, ವಿವೇಕಗಳೆಂಬ ಪಂಚಾಂಗದಲ್ಲಿ ರೂಪುಗೊಳ್ಳುವ ವ್ಯಕ್ತಿತ್ವಕ್ಕೆ "ಋಷಿ" ಎಂದು ವ್ಯಾಖ್ಯಾನಿಸಬಹುದು. ಮೋಹ–ಕಾಮ–ಕಾಪಟ್ಯ–ಕುತಂತ್ರ–ರಾಗ–ದ್ವೇಷ–ಅಸೂಯೆ–ಮದ–ಮಾತ್ಸರ್ಯಗಳೆಂಬ ದುರ್ಗುಣಗಳಿಂದ ದೂರವಾಗಿ, ಲೋಕ ಕಲ್ಯಾಣವನ್ನು ಹತ್ತಿರವಾಗಿಸಿಕೂಂಡ ಋಷಿಗೆ ಮಾತ್ರ ಜನ–ಜೀವನವನ್ನು ನಿಯಂತ್ರಿಸುವ ಮತ್ತು ರೂಪುಗೊಳಿಸುವ ಪರಮಾಧಿಕಾರ. ಸಮಾಜ ಸ್ವಾಸ್ಥ್ಯಕ್ಕಾಗಿ ವಿಧಿಯನ್ನು ವಿಧಿಸುವಲ್ಲಿ, ನಿಯಂತ್ರಿಸುವುದಕ್ಕೆ ನಿಷೇಧವನ್ನು ಹೇರುವಲ್ಲಿ ಋಷಿಗೆ ಸ್ವಾರ್ಥವಿಲ್ಲ. ಧರ್ಮಸಂಪಾದನೆಯನ್ನು ಹೊರತುಪಡಿಸಿ ಬೇರೆ ಸಂಪಾದನೆಯ ಉದ್ದೇಶವೂ ಇಲ್ಲ. ಇದ್ದರೆ ಅವನು ಋಷಿಯಗಲಾರ. ಧರ್ಮಶಾಸ್ತ್ರಕಾರನಾದ ಮನು ಒಬ್ಬ ಮಹರ್ಷಿ. ಇದು ಲೋಕ ಒಪ್ಪಿದ ಸತ್ಯ.

**"ಮನುರ್ವೈ ಯತ್ಕಿಂಚಿದವದತ್ ತದ್ಭೇಷಜಂ ಭೇಷಜತಾಯಾ:"**

"ಮನುವು ಯಾವುದನ್ನೆಲ್ಲಾ ಹೇಳಿದ್ದಾನೆಯೋ ಅದೇ ಪರಮೌಷಧ". ಎಂಬ ಛಾಂದೋಗ್ಯ ಬ್ರಾಹ್ಮಣದ ಮಾತು ಮನುಮಹರ್ಷಿಯ ಯೋಗ್ಯತೆಯನ್ನು ತಿಳಿಸುತ್ತದೆ. ಧರ್ಮಶಾಸ್ತ್ರಕಾರರೆಂದು ಗುರುತಿಸಲ್ಪಡುವ 32 ಋಷಿಗಳಲ್ಲಿ ಮನುಮಹರ್ಷಿ ಪ್ರಥಮನಾಗಿಯೂ ಪ್ರಧಾನನಾಗಿಯೂ ಕಾಣಿಸುತ್ತಾನೆ. ಇದು ಇತರ ಮಹರ್ಷಿಗಳ ಅಭಿಪ್ರಾಯ.

**"ವೇದಾರ್ಥೋಪನಿಬದ್ಧತ್ವಾತ್ ಪ್ರಾಧಾನ್ಯಂ ಹಿ ಮನೋಃ ಸ್ಮೃತಮ್"**

ಇದು ಬೃಹಸ್ಪತಿ ವಚನ. ಇಂತಹ ದಿವ್ಯವೂ ಭವ್ಯವೂ ಆದ ವ್ಯಕ್ತಿತ್ವದಿಂದ ಕೂಡಿದ ಮನುಮಹರ್ಷಿ ತನ್ನ ಸ್ಮೃತಿಯ 9 ನೇ ಅಧ್ಯಾಯದ 3 ನೇ ಶ್ಲೋಕದ ಕೊನೆಯ ಸಾಲಿನಲ್ಲಿ "ಹೆಣ್ಣು ಸ್ವಾತಂತ್ರ್ಯವನ್ನು ಪಡೆಯಲು ಅರ್ಹಳಲ್ಲ" ಎಂದು ಹೇಳಿದ್ದರಿಂದ ಅಜ್ಞಾನಿ–ಅವಿವೇಕಿ–ಸ್ತ್ರೀ ವಿರೋಧಿ ಎಂಬ ಪ್ರಪಾತಕ್ಕಿಳಿಸಿದ ಇಂದಿನ ಸಮಾಜದ ವಿದ್ಯೆ–ವಿವೇಕ–ವಿವೇಚನೆ ಸಾಧುವೆ? ಎಂಬ ಪ್ರಶ್ನೆಗೆ ಪ್ರಾಮಾಣಿಕ ಉತ್ತರವನ್ನು ಪೂರ್ವಾಗ್ರಹವಿಲ್ಲದೇ ಹುಡುಕುವ ಒಂದು ಸಣ್ಣ ಪ್ರಯತ್ನದ ಫಲವೇ ಈ ಲೇಖನ.

ಶಾಸ್ತ್ರವಾಕ್ಯಗಳ ಅಂತರಾರ್ಥವನ್ನು ತಿಳಿಯುವಾಗ ಆ ವಾಕ್ಯ ಯಾವ ಸಂದರ್ಭದಲ್ಲಿ ಹೇಳಲ್ಪಟ್ಟದ್ದು, ಅದರ ಉದ್ದೇಶವೇನು? ಯಾವ ನೆಲೆಯಲ್ಲಿ ಅರ್ಥೈಸಬೇಕಾದದ್ದು ಎಂಬ ಜ್ಞಾನ ಅಗತ್ಯ.

ಪ್ರಸ್ತುತ ಶ್ಲೋಕವಿರುವ ಸಂದರ್ಭ ಸನ್ನಿವೇಶಗಳನ್ನು ಗಮನಿಸಿದರೆ 9 ನೇ ಅಧ್ಯಾಯವನ್ನು "ಸ್ತ್ರೀ **ರಕ್ಷಣ ಪ್ರಕರಣ**" ಎಂದು ಹೇಳಿರುವುದು ಸ್ಪಷ್ಟ. ಇಲ್ಲಿರುವ "ನ ಸ್ತ್ರೀ ಸ್ವಾತಂತ್ರ್ಯಮರ್ಹತಿ" ಎಂಬ ಅರ್ಧವಾಕ್ಯಕ್ಕೆ ಮಾತ್ರ ಅರ್ಥ ಹೇಳುತ್ತಾ ಏನೇನೋ ಅರ್ಥೈಸುತ್ತಾ ಸಾಗಿದರೆ ಅನರ್ಥವೇ ಹೊರತು ಸಾರ್ಥಕತೆ ಸಾಕಾರಗೊಳ್ಳದು.

**ಪಿತಾ ರಕ್ಷತಿ ಕೌಮಾರೇ ಭರ್ತಾ ರಕ್ಷತಿ ಯೌವನೇ । ರಕ್ಷಂತಿ ಸ್ಥವಿರೇ ಪುತ್ರಾಃ ನ ಸ್ತ್ರೀ ಸ್ವಾತಂತ್ರ್ಯಮರ್ಹತಿ ॥**

ಎಂಬ ಶ್ಲೋಕದ ನಾಲ್ಕು ಸಾಲುಗಳಿಗೂ ಇರುವ ಸಂಬಂಧವನ್ನು ಅರ್ಥೈಸಿಕೊಂಡರೆ ಮಾತ್ರ ಋಷಿವಾಕ್ಯದ ಮಹತಿ ಅರ್ಥವಾಗುತ್ತದೆ. "ಬಾಲ್ಯದಲ್ಲಿ ತಂದೆಯು ರಕ್ಷಿಸುತ್ತಾನೆ. ಯೌವನದಲ್ಲಿ ಗಂಡನು ರಕ್ಷಿಸುತ್ತಾನೆ. ವೃದ್ಧಾಪ್ಯದಲ್ಲಿ ಮಕ್ಕಳು ರಕ್ಷಿಸುತ್ತಾರೆ. ಸ್ತ್ರೀ ರಕ್ಷಣೆಯ ವಿಷಯದಲ್ಲಿ ಸ್ವಾತಂತ್ರ್ಯವನ್ನು ಹೊಂದಲು ಅರ್ಹಳಲ್ಲ" ಎಂಬುದು ಅರ್ಥ. ಮೊದಲ ಮೂರು ವಾಕ್ಯಗಳು ರಕ್ಷಣೆ ಎಂಬ ಕ್ರಿಯೆಯ ಜೊತೆಗೆ ಮಾತ್ರ ಸಂಬಂಧ ಹೊಂದಿರುವಾಗ 4 ನೇ ವಾಕ್ಯ ಮಾತ್ರ ಹೇಗೆ ಬೇರೆಯ ಅರ್ಥವನ್ನು ಕೊಡುವುದಕ್ಕೆ ಸಾಧ್ಯ? ಈ ವಾಕ್ಯವೂ ಕೂಡ ರಕ್ಷಣೆಯ ವಿಷಯದಲ್ಲಿ ಮಾತ್ರ ಹೇಳಲ್ಪಟ್ಟಿದ್ದು. "ರಕ್ಷಿಸುತ್ತಾನೆ" ಮತ್ತು "ರಕ್ಷಿಸಬೇಕು" ಎಂಬಲ್ಲಿಯೂ ಅರ್ಥವ್ಯತ್ಯಾಸ ಸ್ಪಷ್ಟ. ಈ ಶ್ಲೋಕದಲ್ಲಿ ಎಲ್ಲಿಯೂ ರಕ್ಷಿಸಬೇಕು ಎಂಬ ವಿಧಿ ಕಾಣಿಸದು. "ರಕ್ಷಿಸುತ್ತಾನೆ" ಎಂಬ ಸಮಾಜದಲ್ಲಿನ ಸಹಜ ಪ್ರಕ್ರಿಯೆ ಮಾತ್ರ ಹೇಳಲ್ಪಟ್ಟಿದೆ. ಹಾಗಾದರೆ ಈ ರಕ್ಷಣೆಯೂ ಹೆಣ್ಣಿಗೆ ಬೇಡವೆ? ಎಂಬ ಪ್ರಶ್ನೆಗೆ ಉತ್ತರ ಸ್ಪಷ್ಟ ಬೇಕೇ ಬೇಕು. ರಕ್ಷಣೆಯ ವಿಷಯಕವಾದ ಈ ನಿರ್ಬಂಧ ಹೆಣ್ಣಿನ ಧಾರ್ಮಿಕ, ಸಾಮಾಜಿಕ, ಆರ್ಥಿಕ, ಶೈಕ್ಷಣಿಕ ಸ್ವಾತಂತ್ರ್ಯಕ್ಕೂ ಹೇರಿದ ನಿರ್ಬಂಧ ಎಂಬುದು ನಮ್ಮ ತಪ್ಪು ಗ್ರಹಿಕೆ ಮಾತ್ರ. ಮನುಸ್ಮೃತಿಯನ್ನು ಸರಿಯಾಗಿ ಅಧ್ಯಯನ ಮಾಡಿದಾಗ ಈ ಎಲ್ಲಾ ಸ್ವಾತಂತ್ರ್ಯಗಳೂ ಹೆಣ್ಣಿಗೆ ಕೊಡಲ್ಪಟ್ಟಿದೆ ಎಂದು ಸ್ಪಷ್ಟವಾಗುತ್ತದೆ. "ಸ್ಮೃತಿ" ಎಂಬುದು ಕೂಡ ಸ್ವತಂತ್ರ ರಚನೆಯಲ್ಲ. ವೇದಾಧಾರದಲ್ಲಿ ರಚಿಸಲ್ಪಟ್ಟದ್ದು. ವೇದಗಳನ್ನು, ಇನ್ನಿತರ ಸ್ಮೃತಿ-ಸೂತ್ರಗಳನ್ನು ನೋಡಿದರೂ ಸ್ತ್ರೀ ಸ್ವತಂತ್ರಳೇ. ಸಂದೇಹವಿಲ್ಲ. ಇಂದಿನ ಆಧುನಿಕ ಸಮಾಜದಲ್ಲಿ ಹೆಣ್ಣು ಸ್ವತಂತ್ರಳಾಗಿ ಎಲ್ಲಾ ಕ್ಷೇತ್ರಗಳಲ್ಲೂ ಅವಕಾಶವನ್ನು ಪಡೆದಿದ್ದಾಳೆ. ಸಾಧನೆಯನ್ನೂ ಗೈದಿದ್ದಾಳೆ. ಒಂದು ಕಾಲದಲ್ಲಿ ಹೆಣ್ಣು ತುಳಿತಕ್ಕೊಳಗಾಗಿ ಅವಕಾಶ ವಂಚಿತಳಾದಳು, ಪರಾಧೀನಳಾಗಿಯೇ ಬದುಕಬೇಕಾದ ದಯನೀಯ ಸ್ಥಿತಿಯನ್ನು ಹೊಂದಿದ್ದಳು ಎಂಬುದು ಕೂಡಾ ಕಟು ಸತ್ಯ. "ಶಾಸ್ತ್ರದ ಶ್ಲೋಕಗಳೇ ಇದಕ್ಕೆ ಕಾರಣ" ಎಂಬುದು ಮಾತ್ರ ತಪ್ಪು. ಅರ್ಥ ಜ್ಞಾನವಿಲ್ಲದ ಕಂಠಪಾಠಪಂಡಿತರ ಅಜ್ಞಾನ-ಸ್ವಾರ್ಥ-ಸರ್ವಾಧಿಕಾರ ಮನೋಭಾವಗಳೇ ಇಂತಹ ಸ್ಥಿತಿಗೆ ಕಾರಣವೇ ಹೊರತು ಮನುವಿನಂತಹ ಜ್ಞಾನಿಯ ಮಾತಲ್ಲ. ಶಾಸ್ತ್ರಗಳಲ್ಲ. ಧರ್ಮ-ಅರ್ಥ-ಕಾಮ-ಮೋಕ್ಷ ಈ ಪುರುಷಾರ್ಥಗಳು ಮಾನವನಾಗಿ ಹುಟ್ಟಿದ ಮೇಲೆ ಸಾಧಿಸಲೇ ಬೇಕಾದವುಗಳು ಎಂಬುದು ಶಾಸ್ತ್ರವಚನ. ಇಲ್ಲಿ ಪುರುಷಾರ್ಥ ಎಂದರೆ ಪುರುಷ ಮಾತ್ರ ಸಾಧಿಸಬೇಕಾದದ್ದು ಎಂಬರ್ಥವಲ್ಲ. " ಪುರಿ ಶೇತೆ " ಎಂಬ ವ್ಯುತ್ಪತ್ತಿಯಂತೆ ಶರೀರದಲ್ಲಿ ವಾಸ ಮಾಡುವ ಆತ್ಮ ಎಂಬರ್ಥ. ಇದು ಗಂಡು ಹೌದು, ಹೆಣ್ಣು ಹೌದು. ಆದ್ದರಿಂದ ಇಲ್ಲಿ ಸ್ತ್ರೀಯ ಅಧಿಕಾರ ಎಂಬುದು ಶಾಸ್ತ್ರ ಸಮ್ಮತವಾದದ್ದು. ಮನುಮಹರ್ಷಿಯೇ ತನ್ನ ಸ್ಮೃತಿಯಲ್ಲಿ ಹೇಳುವಂತೆ-

**ದ್ವಿಧಾ ಕೃತ್ವಾತ್ಮನೋ ದೇಹಂ ಅರ್ಧೇನ ಪುರುಷೋಽಭವತ್ । ಅರ್ಧೇನ ನಾರೀ ತಸ್ಯಾಂ ಸ ವಿರಾಜಮಸೃಜತ್ ಪ್ರಭುಃ ॥**

"ಪರಬ್ರಹ್ಮ ವಸ್ತುವು ತನ್ನನ್ನು ತಾನೇ ವಿಭಾಗಿಸಿಕೊಂಡು ಒಂದು ಭಾಗ ಹೆಣ್ಣಾಯಿತು ಇನ್ನೊಂದು ಭಾಗ ಗಂಡಾಯಿತು". ಎಂಬ ವಚನವೇ ಸ್ತ್ರೀ-ಪುರುಷರ ಸ್ವಾತಂತ್ರ್ಯ-ಸಮಾನತೆಯ ಸ್ಪಷ್ಟನೆಯನ್ನು ನೀಡುತ್ತದೆ. ಪುತ್ರ-ಪುತ್ರಿ ಎಂಬಲ್ಲಿ ಸಮಾನತೆ "**ಯಥೈವಾತ್ಮಾ ತಥಾ ಪುತ್ರಃ ಪುತ್ರೇಣ ದುಹಿತಾ ಸಮಾ**" ಸ್ವತಃ ತನಗೂ, ತನ್ನ ಪುತ್ರನಿಗೂ ಭೇದವಿಲ್ಲವೋ ಹಾಗೆ "ಪುತ್ರನಿಗೂ, ಪುತ್ರಿಗೂ ಭೇದವಿಲ್ಲ" ಎಂಬ ಈ ವಾಕ್ಯ ತಿಳಿಸುತ್ತದೆ. ಭರ್ತಾ-ಭಾರ್ಯಾ, ಪತಿ-ಪತ್ನಿ ಎಂಬೆಲ್ಲಾ ಶಬ್ದಗಳು ತರ-ತಮ ಭಾವವನ್ನು ಸೂಚಿಸುವ ಅರ್ಥವನ್ನು ಹೊಂದಿಲ್ಲ, ಬದಲಾಗಿ ಸಮಾನತೆ, ಸ್ವಾತಂತ್ರ್ಯವನ್ನೇ ಬೋಧಿಸುವ ಶಾಸ್ತ್ರಶಬ್ದಗಳಾಗಿವೆ. ಧಾರ್ಮಿಕವಾದ ಸ್ತ್ರೀಸ್ವಾತಂತ್ರ್ಯವನ್ನು ಮತ್ತು ಸಮಾನತೆಯನ್ನು ನೋಡಹೊರಟರೆ-"**ಪಾಣಿಗ್ರಹಣಾದಧಿಗೃಹಮೇಧಿನೋರ್ವ್ರತಂ**" -[ಅಪಸ್ತಂಭ ಧರ್ಮಸೂತ್ರ].-ವಿವಾಹದ ನಂತರ ಪತಿ-ಪತ್ನಿಯರಿಗಿಬ್ಬರಿಗೂ ಧಾರ್ಮಿಕ ವಿಧಿ-ವಿಧಾನಗಳು, ಆಚರಣೆಗಳು ಸಮಾನ. "**ದಂಪತ್ಯೋಃ ಸಹಾಧಿಕಾರಃ**" ದಂಪತಿಗಳಿಗೆ ಎಲ್ಲಾ ಕರ್ಮಾಚರಣೆಗಳಲ್ಲಿಯೂ ಸಮಾನ ಅಧಿಕಾರ. ಒಬ್ಬರನ್ನೊಬ್ಬರು ಬಿಟ್ಟು ಧಾರ್ಮಿಕ ಪ್ರಕ್ರಿಯೆಗೆ ಅಧಿಕಾರವಿಲ್ಲ. ಇವೆಲ್ಲವನ್ನೂ ನೋಡಿದರೆ ಧಾರ್ಮಿಕ ಸ್ವತಂತ್ರತೆ ಮತ್ತು ಸಮಾನತೆ ಹೆಣ್ಣಿಗೆ ಅಬಾಧಿತ ಎಂಬುದು ಸ್ಪಷ್ಟ. ಆರ್ಥಿಕ ಕ್ಷೇತ್ರದಲ್ಲಿಯಂತೂ ಹೆಣ್ಣು ಪೂರ್ಣಾಧಿಕಾರಿ. ಗೃಹಸ್ವಾಮಿ ಪತಿಯಾದರೆ ಗೃಹಸ್ವಾಮಿನಿ ಪತ್ನಿ ಎಂಬುದೇ ಶಾಸ್ತ್ರಸಿದ್ಧಾಂತ. ದುಡಿದು ಸಂಪಾದಿಸುವುದು ಗಂಡಿನ ಹೊಣೆಯಾದರೆ, ಅದನ್ನರಿತು ರಕ್ಷಿಸುವುದು, ವಿನಿಯೋಗಿಸುವುದು ಸ್ತ್ರೀಗೆ ನೀಡಲ್ಪಟ್ಟ ಅಧಿಕಾರ. ಪತ್ನಿಯ ಒಪ್ಪಿಗೆಯಿಲ್ಲದೆ ಸಂಪಾದಿಸಿದ್ದನ್ನು ವ್ಯಯ ಮಾಡುವ ಅಧಿಕಾರ ಗಂಡಿಗಿಲ್ಲ.

**ಅರ್ಥಸ್ಯ ಸಂಗ್ರಹೇ ಚೈನಾಂ ವ್ಯಯೇ ಚೈವ ನಿಯೋಜಯೇತ್ । ಶೌಚೇ ಧರ್ಮಾನ್ನಪಕ್ತ್ಯಾಂ ಚ ಪಾರಿಣಾಹ್ಯಸ್ಯ ವೇಕ್ಷಣೇ ॥**

ಸಂಪತ್ತಿನ ಸಂಗ್ರಹ, ವ್ಯಯ, ಮನೆಯ ಶೌಚಾಚಾರ, ಧರ್ಮಕಾರ್ಯ ಈ ಎಲ್ಲದರಲ್ಲಿಯೂ ಸ್ತ್ರೀ ಅಧಿಕಾರಿ ಎಂಬುದು ಇದರರ್ಥ. ದಾಯಭಾಗ ಪ್ರಕರಣದಲ್ಲಿಯೂ ಸ್ತ್ರೀ ಭಾಗವನ್ನು ಪಡೆಯಲೇ ಬೇಕಾದವಳು. ಔರ್ಧ್ವದೇಹಿಕ ಕರ್ಮಾನುಷ್ಠಾನದಲ್ಲಿಯೂ ಸಕ್ರಿಯಪಾತ್ರವಹಿಸುವ ಅವಕಾಶ ಶಾಸ್ತ್ರದಿಂದ ನೀಡಲ್ಪಟ್ಟಿದೆ. ತಾಯಿಯ ಸಂಪತ್ತೆಲ್ಲಾ ಸ್ತ್ರೀ ಸಂತಾನಕ್ಕೇ ಸೇರಬೇಕೆಂಬುದೇ ಮನುವಿನ ಅಭಿಮತ. ಹೀಗೆ ವ್ಯಾವಹಾರಿಕಕ್ಷೇತ್ರ ಸ್ತ್ರೀ ಪರವಾಗಿಯೇ ಇರುವುದನ್ನು ಕಾಣುತ್ತೇವೆ. ಕಾಮ ಎನ್ನುವದು ಒಂದು ಪುರುಷಾರ್ಥ. ಇಲ್ಲಿಯೂ ಸ್ತ್ರೀ ಸ್ವತಂತ್ರಳು. ಋತುಕಾಲದಲ್ಲಿ ಮಾತ್ರ ಸ್ತ್ರೀಗಮನವನ್ನು ವಿಧಿಸಿದ ಶಾಸ್ತ್ರ ಕೇವಲ ಶಾರೀರಿಕ ಸುಖವನ್ನು ಮಾತ್ರ ಲಕ್ಷಿಸುವುದಿಲ್ಲ. ಆದರೆ ಸ್ತ್ರೀ ಅಪೇಕ್ಷೆಯ ಹೊರತಾದ ಸಂಗಮವನ್ನು ಶಾಸ್ತ್ರ ಹೇಳಿಲ್ಲ ಬದಲಾಗಿ ಋತುಕಾಲವನ್ನು ಹೊರತು ಪಡಿಸಿ ಉಳಿದ ದಿನಗಳಲ್ಲಿ ಸ್ತ್ರೀ ಬಯಸಿದರೆ ಮಾತ್ರ ಸಮಾಗಮಕ್ಕೆ ಅಧಿಕಾರವನ್ನು ಶಾಸ್ತ್ರ ವಿಧಿಸಿದೆ. ವಿಶೇಷ ವಿವರಣೆಗೆ ಅಪಸ್ತಂಭ ಧರ್ಮಸೂತದ 2 ನೇ ಪ್ರಶ್ನವನ್ನು ನೋಡಬಹುದು.

ಧರ್ಮಪ್ರಜಾಸಿದ್ಧಿ ಎಂಬ ವಿವಾಹ ಸಂಸ್ಕಾರದ ಉದ್ದೇಶವನ್ನು ಸಫಲಗೊಳಿಸುವ ಸ್ತ್ರೀ ಸನ್ಮಾನಯೋಗ್ಯಳು ಎಂಬುದು ಶಾಸ್ತ್ರಾಭಿಪ್ರಾಯ. ಆತ್ಮಜ್ಞಾನ ಪರವಾದ ಮೋಕ್ಷಕ್ಕೂ ಸ್ತ್ರೀ ಅಧಿಕಾರಿ–ಸ್ತ್ರೀ ಸ್ವತಂತ್ರಳು. ಬೃಹದಾರಣ್ಯಕೋಪನಿಷತ್ತಿನ ಯಾಜ್ಞವಲ್ಕ್ಯ–ಮೈತ್ರೇಯಿ ಪ್ರಕರಣವೇ ಇದಕ್ಕೆ ಸಾಕ್ಷಿ. ಆತ್ಮಜ್ಞಾನ–ಮೋಕ್ಷ ವಿಷಯಕ ಪ್ರಶ್ನೆಯನ್ನು ಮಾಡಿದ ಮೈತ್ರೇಯಿ ಹೆಣ್ಣು. ಪತಿಯಾದ ಯಾಜ್ಞವಲ್ಕ್ಯರು ಅವಳನ್ನು ತಿರಸ್ಕರಿಸದೆ ಪುರಸ್ಕರಿಸಿದ್ದನ್ನು ಕಾಣುತ್ತೇವೆ.

ಶಂಕರಾಚಾರ್ಯ–ಮಂಡನಮಿಶ್ರರಂಥಹ ಜ್ಞಾನಪರ್ವತಪ್ರಾಯರ ಶಾಸ್ತ್ರಜಿಜ್ಞಾಸೆಯ ನಿರ್ಣಯ ಕೊಟ್ಟ ಉಭಯಭಾರತಿ ಒಬ್ಬ ಹೆಣ್ಣು. ಹೀಗೆ ಸಮಾಜದ ಎಲ್ಲಾ ಕ್ಷೇತ್ರಗಳಲ್ಲಿಯೂ ಪಾತ್ರ ನಿರ್ವಹಿಸಬೇಕಾದ ಹೆಣ್ಣು ವಿದ್ಯೆಯನ್ನು ಹೊಂದಿರಲೇಬೇಕೆನ್ನುವುದು ಸಾಮಾನ್ಯ ಜ್ಞಾನ. ಶಾಸ್ತ್ರಗಳು ಕೂಡ ಹೆಣ್ಣಿನ ವಿದ್ಯೆಗೆ ಎಲ್ಲಿಯೂ ಪ್ರತಿಬಂಧಕಗಳನ್ನು ಹೇರಿಲ್ಲ. ಬೃಹದಾರಣ್ಯಕೋಪನಿಷತ್ತಿನ ಈ ವಾಕ್ಯ ನೋಡಿ–

**"ಅಥ ಯ ಇಚ್ಛೇದ್ದುಹಿತಾ ಮೇ ಪಂಡಿಯಾ ಜಾಯೇತ, ಸರ್ವಮಾಯುರಿಯಾದಿತಿ ತಿಲೌದನಂ ಪಾಚಾಯಿತ್ವಾ ಸರ್ಪಿಷ್ಮಂತಮಶ್ನೀಯಾತಾಮ್"**

ತನಗೆ ಪಂಡಿತಳಾದ ಮಗಳು ಹುಟ್ಟಬೇಕು, ಅವಳು ಪೂರ್ಣಾಯುಷ್ಯವನ್ನು ಪಡೆಯಬೇಕೆಂದು ಬಯಸುವವನು ತಿಲಾನ್ನವನ್ನು ತುಪ್ಪದೊಂದಿಗೆ ಪತ್ನಿ ಸಹಿತನಾಗಿ ತಿನ್ನಬೇಕು" ಎಂಬ ಈ ವಾಕ್ಯ ವಿದ್ಯಾವಂತೆಯಾದ ಪಂಡಿತಳಾದ ಮಗಳನ್ನು ಪಡೆಯುವ ವಿಧಾನವನ್ನು ವಿಧಿಸುವ ಮರ್ಮವಾದರೂ ಏನು? ವಿದ್ಯೆಯೇ ಬೇಡವಾದವಳು ಹೆಣ್ಣು ಎಂದಾದರೆ ಈ ವಿಧಿ ಏಕೆ? ವಿದ್ಯಾಧಿದೇವತೆಯೇ ಹೆಣ್ಣು ಎಂದು ಬಣ್ಣಿಸುವ ಶಾಸ್ತ್ರ–ಪುರಾಣ–ವೇದಗಳು ಹೆಣ್ಣಿಗೆ ವಿದ್ಯೆಯನ್ನು ನಿಷೇಧಿಸಲು ಸಾಧ್ಯವೇ? ಇಲ್ಲ. ಸೀತೆ, ದ್ರೌಪದಿ, ಅಹಲ್ಯಾ, ಕುಂತೀ, ಮಂಡೋದರಿ ಇಂತಹ ಆದರ್ಶನಾರಿಯರೆಂದು ನಾವೆಲ್ಲ ಒಪ್ಪುವ ಇವರ ಬಾಯಿಯಿಂದ ಬಂದ ಒಂದೊಂದು ವಾಕ್ಯಗಳನ್ನು ಓದಿದರೆ ನಮಗದರ್ಥವಾಗುತ್ತದೆ. ಸ್ತ್ರೀ–ಸ್ವಾತಂತ್ರ್ಯದ ವ್ಯಾಪ್ತಿ ಎಷ್ಟು ವಿಶಾಲವಾದದ್ದು ಎಂದು. ಮನುಮಹರ್ಷಿಯೇ ಸ್ತ್ರೀಯ ಸ್ಥಾನ–ಮಾನಗಳನ್ನು ಔನ್ನತ್ಯವನ್ನು ಮನುಸ್ಮೃತಿಯಲ್ಲಿ ತೋರಿಸಿದ ಬಗೆಯನ್ನು ಕಣ್ತೆರೆದು ನೋಡಿದರೆ–

**ಪಿತೃಭಿಃ ಭ್ರಾತೃಭಿಶ್ಚೈತಾಃ ಪತಿಭಿರ್ದೇವರೈಸ್ತಥಾ । ಪೂಜ್ಯಾ ಭೂಷಯಿತವ್ಯಾ ಚ ಬಹುಕಲ್ಯಾಣಮೀಪ್ಸುಭಿಃ ॥**

ತಂದೆಯಿಂದ, ಅಣ್ಣ–ತಮ್ಮಂದಿರಿಂದ, ಗಂಡನಿಂದ,ಮೈದುನನಿಂದ, ಕುಟುಂಬದ ಕಲ್ಯಾಣವನ್ನು ಬಯಸುವ ಎಲ್ಲರಿಂದಲೂ ಹೆಣ್ಣು ಪೂಜಿಸಲ್ಪಡಬೇಕು.

**ಯತ್ರ ನಾರ್ಯಸ್ತು ಪೂಜ್ಯಂತೆ ರಮಂತೆ ತತ್ರ ದೇವತಾಃ । ಯತ್ರೈತಾಸ್ತು ನ ಪೂಜ್ಯಂತೆ ಸರ್ವಾಸ್ತತ್ರಾಫಲಾ ಕ್ರಿಯಾಃ ॥**

ಎಲ್ಲಿ ಸ್ತ್ರೀ ಪೂಜಿಸಲ್ಪಡುತ್ತಾಳೋ, ಗೌರವಿಸಲ್ಪಡುತ್ತಾಳೋ ಅಲ್ಲಿ ದೇವತೆಗಳೂ ಸಂತೋಷ ಪಡುತ್ತಾರೆ.ಎಲ್ಲಿ ಹೆಣ್ಣು ಗೌರವಿಸಲ್ಪಡುವುದಿಲ್ಲವೋ ಅಲ್ಲಿ ಎಲ್ಲಾ ಕರ್ಮಗಳೂ ನಿಷ್ಫಲವಾಗುತ್ತದೆ.

**ಪೂಜನಾರ್ಥಂ ಮಹಾಭಾಗಾಃ ಪೂಜಾರ್ಹಾ ಗೃಹದೀಪ್ತಯಃ । ಸ್ತ್ರೀಯಃ ಶ್ರೀಯಶ್ಚಗೆಹೇಷು ನ ವಿಶೇಷೋಸ್ತಿ ಕಶ್ಚನ ॥**

ಸಂತಾನವನ್ನು ನೀಡುವ, ಪೂಜ್ಯಳಾದ, ಮನೆಯನ್ನು ಬೆಳಗುವ ಹೆಣ್ಣು ಬೇರೆಯಲ್ಲ, ಗೃಹಲಕ್ಷ್ಮಿ[ಸಂಪತ್ತು] ಬೇರೆ ಅಲ್ಲ.

**ಅಪತ್ಯಂ ಧರ್ಮಕಾರ್ಯಾಣಿ ಶುಶ್ರೂಷಾ ರತಿರುತ್ತಮಾ । ದಾರಾಧೀನಃ ತಥಾಸ್ವರ್ಗಃ ಪಿತೃಣಾಮಾತ್ಮನಶ್ಚಹ ॥**

ಸಂತಾನ–ಧರ್ಮ–ಕರ್ಮ–ಸೇವೆ–ಸುಖ–ಸ್ವರ್ಗ ಈ ಎಲ್ಲವೂ ತನಗೂ ತನ್ನ ಪರಂಪರೆಗೂ ಸಿಗಬೇಕಾದಲ್ಲಿ ಅದು ಹೆಣ್ಣಿನ ಅಧೀನ.ಇದೆಲ್ಲವೂ ಮನುಮಹರ್ಷಿಯ ಮಾತುಗಳೇ ಆಗಿವೆ.ಹೆಣ್ಣನ್ನು ಹೆಣ್ಣಾಗಿ ಮಾತ್ರ ಕಾಣದೆ ದೇವರನ್ನಾಗಿಸಿದ ಋಷಿಗಳ ಮಾತು ಕೇವಲ ನಾವೆಲ್ಲ ಆಡುವ ಬರಡು ಪ್ರದರ್ಶನದ ಮಾತುಗಳಲ್ಲ. ಅವು ಭರಿತದರ್ಶನ ಮಂತ್ರಗಳು. ಪುರುಷನಾಗಲೀ–ಸ್ತ್ರೀಯೇ ಆಗಲಿ ಸಮಾನತೆಯನ್ನು–ಸ್ವಾತಂತ್ರ್ಯವನ್ನು ಬಯಸುವುದು ತಪ್ಪಲ್ಲ. ಆದರೆ ಅದು ಸ್ವೇಚ್ಛಾಚಾರವಾಗಕೂಡದು. "ಸ್ವಾತಂತ್ರ್ಯ" ಎಂಬ ಪದವೇ ಉದಾತ್ತ ಧ್ಯೇಯವುಳ್ಳದ್ದು." ತನುತೆ ತ್ರಾಯತೇ ಇತಿ ತಂತ್ರಂ " ವಿಸ್ತಾರಗೊಳ್ಳುವುದು,ರಕ್ಷಿಸುವುದು ಎಂಬರ್ಥದಲ್ಲಿ ತಂತ್ರ ಶಬ್ಧವಿದೆ."ಸ್ವೇನ ತನುತೆ"– ತನ್ನಿಂದಲೇ ತಾನು ವಿಸ್ತಾರಗೊಳ್ಳುವುದು, "ಸ್ವೇನ ತ್ರಾಯತೆ"– ತನ್ನಿಂದಲೇ ತಾನು ರಕ್ಷಿಸಿಕೊಳ್ಳುವುದು ಸ್ವತಂತ್ರ ಶಬ್ದಾರ್ಥವೆಂದು ವಿದ್ವಾಂಸರ ಅಭಿಪ್ರಾಯ. ಆದರೆ ಮಾನವ ಕೇವಲ ತನ್ನಿಂದಲೇ ತಾನು ಎಲ್ಲವನ್ನೂ ಸಾಧಿಸಲು ಸಾಧ್ಯವಿಲ್ಲದವನು.ಆದ್ದರಿಂದಲೇ ಪರಸ್ಪರ ಸಹಕಾರದ ಬದುಕು ಅಗತ್ಯ–ಅನಿವಾರ್ಯ. ಈ ಕಾರಣದಿಂದಲೇ ಶಾಸ್ತ್ರಗಳು ಪರಸ್ಪರ ಸಹಕಾರದಿಂದಲೇ ವಿಸ್ತಾರ–ವಿಕಾಸವನ್ನು, ರಕ್ಷಣೆಯ ವಿಧಾನಗಳನ್ನು ವಿಧಿಸಿರುವುದು ಪ್ರಾಕೃತಿಕವಾದ ಸ್ತ್ರೀಯ ದೇಹ–ಮನಸ್ಸು–ಮಾತು ಇವುಗಳ ರಕ್ಷಣೆಗೆ ವಜ್ರಕವಚದಂತಿರುವ ಋಷಿವಾಕ್ಯವನ್ನು, ಶಾಸ್ತ್ರಸೂಚನೆಯನ್ನು ನಾವೇ ಪ್ರಾಜ್ಞರೆಂಬ ದುರಹಂಕಾರದಲ್ಲಿ ಕತ್ತರಿಸಿಹೊರಟರೆ ಕಷ್ಟ ನಮಗೇ. ಆಧುನಿಕ ಸಮಾಜ–ಸಂವಿಧಾನ ಇಂದು ಬಹಳ ಬದಲಾಗಿದೆ.ಯಾರೂ ಯಾವುದಕ್ಕೂ, ಎಲ್ಲಿಯೂ ಹೆದರಬೇಕಾಗಿಲ್ಲ. ಅಧೀನರಾಗಬೇಕಾಗಿಲ್ಲ. ಆದರೆ ಪರಿಸ್ಥಿತಿ ಸುಧಾರಿಸಿದೆಯೇ? ನಮಗೆ ನಾವೇ ಕೇಳಿಕೊಂಡು ಉತ್ತರಹುಡುಕಬೇಕಾದ ಪ್ರಶ್ನೆ."ನ ಸ್ತ್ರೀ ಸ್ವಾತಂತ್ರ್ಯಮರ್ಹತಿ" ಎಂಬ ತುಂಡುವಾಕ್ಯವನ್ನು ಹಿಡಿದು ಬಡಿದಾಡುವ, ಬೆಂಕಿ ಇಕ್ಕುವ ಹುಡುಗಾಟವನ್ನು ಬಿಟ್ಟು

ನಿಜಾರ್ಥದ ಹುಡುಕಾಟದ ಮನಸ್ಥಿತಿ ಬೆಳೆಯಬೇಕಾದ ಅಗತ್ಯವಿದೆ. ವಾಸ್ತವದ ಅರಿವಿಲ್ಲದ ಸುಧಾರಣೆಯ ಸಂಗ್ರಾಮ ಸರ್ವನಾಶವನ್ನೇ ಉಂಟುಮಾಡುತ್ತದೆ. ಇಂದಿನ ಸಮಾಜಕ್ಕೆ ಮನುಸ್ಮೃತಿಯನ್ನೋ ಅಥವಾ ಇನ್ನಿತರ ಶಾಸ್ತ್ರಸೂಚನೆಗಳನ್ನೋ ಪಾಲಿಸಬೇಕಾದ ಅನಿವಾರ್ಯತೆಯಿಲ್ಲ. ಆದರೆ "ಅಗತ್ಯ" ಇದೆಯೇ ಎಂಬುದನ್ನು ಯೋಚಿಸಬೇಕಷ್ಟೆ. ಎಲ್ಲಾ ಬಿಡುವುದು ಮಾತ್ರ ಸ್ವತಂತ್ರತೆ ಎನ್ನುವ ಭ್ರಮೆಯಲ್ಲಿರುವ ನಮಗೆ, ಹಿಡಿದು ಕೊಳ್ಳುವುದು ಏನನ್ನು ? ಎಂಬುದರ ಬಗ್ಗೆ ಯೋಚಿಸುವ ವ್ಯವಧಾನವಿಲ್ಲ. ಋಷಿಗಳ ವಾಕ್ಯವನ್ನು ಪಾಲಿಸಿದ್ದರಿಂದ ಆ ಋಷಿಗೆ ಲಾಭವೂ ಇಲ್ಲ. ಬಿಟ್ಟಿದ್ದರಿಂದ, ವಿರೋಧಿಸಿ ಬೆಂಕಿ ಹಚ್ಚಿದ್ದರಿಂದ ಋಷಿಗೆ ನಷ್ಟವೂ ಇಲ್ಲ. ಲಾಭನಷ್ಟದ ಲೆಕ್ಕಾಚಾರ ನಮಗೆ ಮಾತ್ರ. ಮನುವಿನ ವಾಕ್ಯವನ್ನು ಬದಲಾಯಿಸುವ ಹಠಕ್ಕಿಂತ ನಮ್ಮ ಮನಸ್ಸನ್ನು ಬದಲಾಯಿಸುವ ಪಾಠದ ಅವಶ್ಯಕತೆಯೇ ಹೆಚ್ಚು ಕಾಣಿಸುತ್ತದೆ. ವಿದ್ಯೆ–ವಿವೇಕ–ಜ್ಞಾನದಿಂದ ಕೂಡಿದ ಇಂದಿನ ಸರ್ವತಂತ್ರ ಸ್ವತಂತ್ರ ಸಮಾಜ ಸರಿಯಾದದ್ದನ್ನು ಸ್ವೀಕರಿಸಿ ಸತ್ಯದ ಸವಿಯನ್ನು ಸವಿಯುವಂತಾಗಲಿ ಎಂಬುದು ಸದಾಶಯ.

## ಆಕರ ಗ್ರಂಥ ಸೂಚಿ


1. ಛಾಂದೋಗ್ಯ ಬ್ರಾಹ್ಮಣ
2. ಬೃಹಸ್ಪತಿಸ್ಮೃತಿ,
3. ಮನುಸ್ಮೃತಿ
4. ಅಪಸ್ತಂಬಧರ್ಮಸೂತ್ರ
5. ಜೈಮಿನೀಯಸೂತ್ರವೃತ್ತಿ
6. ಬೃಹದಾರಣ್ಯಕೋಪನಿಷತ್


***********

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# ಲಿಪಿಯ ಪ್ರಾಚೀನತೆ

**Dr. Ramakrishna Bhat K**
HOD, Department of Manuscriptology
Karnataka Samskrita University
PMK Road, Chamaraja Pete-560018
Bengaluru, Karnataka
Contact No.: 9844741855
E-mail : kootelubhat@gmail.com

ಮನುಷ್ಯನ ಬದುಕಿನಲ್ಲಿ ಭಾಷೆ ಮತ್ತು ಲಿಪಿ ಎಂಬೆರಡು ಅಂಶಗಳು ಅತ್ಯಂತ ಮಹತ್ವವನ್ನು ಪಡೆಯುತ್ತವೆ. ತನ್ನಲ್ಲಿರುವ ಭಾವನೆಯನ್ನು ಯಥಾವತ್ತಾಗಿ ಇನ್ನೊಬ್ಬನಿಗೆ ತಿಳಿಸಲು ಭಾಷೆ ಅತ್ಯಂತ ಅಗತ್ಯ. ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯದಲ್ಲಿ ಮಹಾಕವಿಯೆನಿಸಿದ ದಂಡಿಯು ಭಾಷೆಯ ಕುರಿತಾಗಿ ಈ ರೀತಿಯಾಗಿ ಅಭಿಪ್ರಾಯ ವ್ಯಕ್ತಪಡಿಸುತ್ತಾನೆ :

ಇದಮಂಧಂತಮಃ ಕೃತ್ಸ್ನಂ ಜಾಯೇತ ಭುವನತ್ರಯಮ್ । ಯದಿ ಶಬ್ದಾಹ್ವಯಂ ಜ್ಯೋತಿರಾಸಂಸಾರಂ ನ ದೀಪ್ಯತೇ ॥[1]

ಈ ಪ್ರಪಂಚದಲ್ಲಿ ಶಬ್ದವೆಂಬ ಜ್ಯೋತಿ ಇಲ್ಲದೇ ಹೋಗಿದ್ದಿದ್ದರೆ ಪ್ರಪಂಚವೇ ಕತ್ತಲಿನಿಂದ ಕೂಡಿರುತ್ತಿತ್ತು. ಹೇಗೆ ಪ್ರಾಣಿಗಳ ಬದುಕು ಸಾಗುತ್ತದೆಯೋ ಅದೇ ರೀತಿಯಾಗಿ ಮನುಷ್ಯನ ಬದುಕು ಕೂಡ ಇರುತ್ತಿತ್ತು. ಆದರೆ ತನ್ನ ಅಭಿಪ್ರಾಯವನ್ನು ಯಥಾವತ್ತಾಗಿ ಇನ್ನೊಬ್ಬನಿಗೆ ತಿಳಿಸಿ ಜ್ಞಾನಪ್ರಸಾರಕ್ಕೆ ಕಾರಣವಾದುದೇ ಮಾತಾಗಿದೆ. ಇಂಥಹ ವಾಕ್ಕಿನ ಮುಖ್ಯ ಉದ್ದೇಶ ಧರ್ಮಸಂಗ್ರಹ ಎಂಬುದು ಹಾಗೂ ಇಂಥಹ ಅಮೃತ ಸದೃಶ ವಸ್ತುವನ್ನು ಭಗವಂತನೇ ಸೃಷ್ಟಿಸಿದನು ಎಂಬುದು ಭಾರತೀಯ ಸಿದ್ಧಾಂತ.[2] ಈ ಲಿಪಿಯ ಹುಟ್ಟಿನ ಬಗ್ಗೆ ಅನೇಕ ಸಂಶೋಧನೆಗಳು ನಡೆದಿವೆ. ದೇಶ ವಿದೇಶಗಳಲ್ಲಿ ಈ ವಿಚಾರವಾಗಿ ನೂರಾರು ಗ್ರಂಥಗಳು ರಚಿತವಾಗಿವೆ. ಲಿಪಿಯ ವಿಚಾರದಲ್ಲಿ ಸನಾತನ ಸಿದ್ಧಾಂತವು ಈ ರೀತಿಯಾಗಿದೆ : ಮನುಷ್ಯನ ಪ್ರತಿಯೊಂದು ಚಟುವಟಿಕೆಯೂ ಧರ್ಮಸಂಗ್ರಹಕ್ಕೆ ಪೂರಕವಾಗಿರಬೇಕು ಎಂಬುದು ಶ್ರುತಿ – ಸ್ಮೃತಿಗಳಿಂದ ತಿಳಿಯುತ್ತೇವೆ. ಧರ್ಮಸಂಗ್ರಹ-ಕ್ಕಾಗಿ ಇರುವ ವಾಕ್ಕನ್ನುಮೂಲಕ ತಿಳಿದ ವಿಚಾರವನ್ನು ದೀರ್ಘಕಾಲದವರೆಗೆ ನೆನಪಿನಲ್ಲಿಟ್ಟುಕೊಳ್ಳಲು ಅಸಾಧ್ಯವಾದ ಕಾರಣ ಭಗವಂತನೇ ಲಿಪಿಯನ್ನು ಸೃಷ್ಟಿಸಿದನು. ಆದ್ದರಿಂದ ಲಿಪಿಯ ಉದ್ದೇಶವೂ ಧರ್ಮಸಂಗ್ರಹವಾಗಿದೆ.

ಷಾಣ್ಮಾಸಿಕೇತಿ ಸಮಯೇ ಭ್ರಾಂತಿಃ ಸಂಜಾಯತೇ ಯತಃ । ಭ್ರಾತ್ರಾಕ್ಷರಾಣಿ ಸೃಷ್ಟಾ ನಿಪತ್ರಾರೂಢಾನ್ಯತಃ ಪುರಾ ॥[3]

ಎಂಬುದಾಗಿ ಸ್ಮೃತಿಯಲ್ಲಿ ಉಲ್ಲೇಖವಿದೆ, ಅಂದರೆ ಮನುಷ್ಯನು ಕಿವಿಯಿಂದ ಕೇಳಿದ ಮಾತು ಆರು ತಿಂಗಳುಗಳಲ್ಲಿಯೇ ಮರೆತು ಹೋಗುತ್ತದೆ, ಆದ್ದರಿಂದ ತನ್ನ ಮನಸ್ಸಿನ ಭಾವನೆಗಳು, ವಿಚಾರಗಳು ದೀರ್ಘಕಾಲ ಇನ್ನೊಬ್ಬರಿಗೆ ಸಿಗಬೇಕೆಂಬ ಉದ್ದೇಶದಿಂದ ಬರವಣಿಗೆಯ ಸೃಷ್ಟಿಯಾಯಿತು. ಇದನ್ನೇ ಲಿಪಿ ಎಂದು ಕರೆಯಲಾಗುತ್ತದೆ. ಈ ಲಿಪಿಯ ಸೃಷ್ಟಿ ಕರ್ತಾ ಬ್ರಹ್ಮನೇ ಆಗಿದ್ದಾನೆ ಎಂಬುದು ಆಸ್ತಿಕರ ಸಿದ್ಧಾಂತ. ನಾರದಸ್ಮೃತಿಯಲ್ಲಿ

ನಾಕರಿಷ್ಯದ್ಯದಿ ಬ್ರಹ್ಮಾ ಲಿಖಿತಂ ಚಕ್ಷುರುತ್ತಮಮ್ ।
ತತ್ರಾಯಮಸ್ಯ ಲೋಕಸ್ಯ ನಾಭವಿಷ್ಯಚ್ಛುಭಾಗತಿಃ ॥[4]

ನೋಟಕ್ಕೆ ಹಿತವಾದ ಲಿಪಿಯನ್ನು ಬ್ರಹ್ಮನು ಸೃಷ್ಟಿಸದೇ ಇದ್ದಿದ್ದರೆ ಲೋಕಕ್ಕೆ ಶುಭಗತಿ ಇರುತ್ತಿರಲಿಲ್ಲ ಎಂಬುದಾಗಿ ಹೇಳಿದ್ದಾರೆ. ಸಂಸ್ಕೃತದ ಲಿಪ' ಎಂಬ ಧಾತುವಿನಿಂದ ನಿಷ್ಪನ್ನವಾದ ಶಬ್ದ ಲಿಪಿ ಎಂಬುದಾಗಿದೆ.

---

1. ಕಾವ್ಯಾದರ್ಶ ।
2. ದೇವೀಂ ವಾಚಮಜನಯಂತ ದೇವಾಃ । ಋ. ಸಂ. 6/7/5 ।
3. ಬಾರ್ಹಸ್ಪತ್ಯಸ್ಮೃತಿಃ, 1. 3 ।
4. ನಾರದಸ್ಮೃತಿಃ, 4–70 ।

ಲಿಪಿ ಎಂದರೆ ನಿರ್ದಿಷ್ಟವಾದ ವ್ಯವಸ್ಥಿತವಾದ ರೇಖಾ ವಿನ್ಯಾಸ ಎಂದರ್ಥ,

ಲೇಖನ ವಿಚಾರವು ಪ್ರಪಂಚದಲ್ಲೇ ಅತ್ಯಂತ ಪ್ರಾಚೀನ ಸಾಹಿತ್ಯವಾದ ವೇದದಲ್ಲಿ ಕಂಡುಬರುತ್ತದೆ. ಕೃಷ್ಣಯಜುರ್ವೇದ ತೈತ್ತಿರೀಯ ಶಾಖೆಯ ಐದನೆಯ ಕಾಂಡದ ಮೊದಲ ಪ್ರಶ್ನೆಯ ಮೂರನೆಯ ಅನುವಾಕದಲ್ಲಿ :ಗಾಯತ್ರಿ ಯಾ ಪರಿಲಿಖಿತಿ ತೇಜೋ ವೈ ಗಾಯತ್ರೀ ತೇಜಸ್ಯೈವೈನಂ ಪರಿಗೃಹ್ಣಾತಿ ತ್ರಿಷ್ಟುಭಾ ಪರಿಲಿಖತೀಂದ್ರಿಯಂ ವೈ ಎಂದು ಲಿಖ್ಧಾತುವಿನ ಪ್ರಯೋಗ ಕಂಡುಬರುತ್ತದೆ. ಪಾಣಿನಿಯ ಅಷ್ಟಾಧ್ಯಾಯಿಯಲ್ಲಿ “ಲಿಪಿಸಿಚಿಹ್ವಶ್ಚ[5] ಹಾಗೂ ದಿವಾ ವಿಭಾ ನಿಶಾ[6]. –ಎಂಬ ಸೂತ್ರದಲ್ಲಿಯೂ ಲಿಪಿ ಶಬ್ದ ಪ್ರಯೋಗವಿದೆ. ಪಾಣಿನಿಯ ಕಾಲ ಕ್ರಿ.ಪೂ. 7ನೆಯ ಶತಮಾನವೆಂದು ಸಂಶೋಧಕರು ನಿರ್ಣಯಿಸಿದ್ದಾರೆ. ಕಾಳಿದಾಸನ 'ಅಭಿಜ್ಞಾನ ಶಾಕುಂತಲದಲ್ಲಿ ಮೂರನೆಯ ಅಂಕದಲ್ಲಿ :ಏತಸ್ಮಿನ್ಶುಕೋದರಸುಕುಮಾರೇ ನಲಿನೀಪತ್ರೇ ಪತ್ರಚ್ಛೇದಭಕ್ತ್ಯಾ ನಖೈರ್ನಿಕ್ಷಿಪ್ತವರ್ಣಂ ಕುರು ॥[7] ಎಂದು ಪ್ರಿಯಂವದೆಯು ಹೇಳುವ ಮಾತಿದೆ. ಇಲ್ಲಿಯೂ ಬರವಣಿಗೆಯ ಬಗೆಗೆ ಉಲ್ಲೇಖವಿದೆ. ಕಾಳಿದಾಸನ ಕಾಲ ಕ್ರಿಪೂ 5ನೆಯ ಶತಮಾನವೆಂದು ಅಭಿಪ್ರಾಯಪಟ್ಟಿದ್ದಾರೆ. ಹಾಗೆಯೇ ಕ್ರಿ.ಪೂ ಮೂರನೆಯ ಶತಮಾನದಲ್ಲಿದ್ದ ಚಾಣಕ್ಯನ ಅರ್ಥಶಾಸ್ತ್ರದಲ್ಲಿ ಶಾಸನಾಧಿಕಾರವೆಂಬ ಒಂದು ಅಧ್ಯಾಯವೇ ಇದೆ. ಅದೇ ರೀತಿಯಾಗಿ ಶುಕ್ರನೀತಿಯಲ್ಲಿ ಲೇಖನದ ಬಗ್ಗೆ ಅನೇಕ ವಿಧಪತ್ರಗಳ ಬಗ್ಗೆ ಅತಿವಿಸ್ತಾರವಾಗಿ ಹೇಳಿದೆ. ಪ್ರಪಂಚದ ಆದಿಕಾವ್ಯವೆನಿಸಿದ ಶ್ರೀಮದ್ವಾಲ್ಮೀಕಿರಾಮಾಯಣದಲ್ಲಿ ಆಂಜನೇಯನು ಸೀತಾನ್ವೇಷಣೆಗಾಗಿ ಲಂಕೆಗೆ ಹೋಗಿದ್ದಾಗ ಈ ಮಾತನ್ನು ಹೇಳುತ್ತಾನೆ :

ವಾನರೋಹಂ ಮಹಾಭಾಗೇ ದೂತೋ ರಾಮಸ್ಯ ಧೀಮತಃ ।
ರಾಮನಾಮಾಂಕಿತಂ ಚೇದಂ ಪಶ್ಯ ದೇವ್ಯಂಗುಲೀಯಕಮ್ ॥ [8]

ಇಲ್ಲಿ ಆಂ9ಜನೇಯನು ಶ್ರೀರಾಮನ ಹೆಸರು ಮುದ್ರಿತವಾಗಿದ್ದ ಉಂಗುರವನ್ನು ತೋರಿಸುತ್ತಾನೆ, ಅಂದರೆ ರಾಮಾಯಣಕಾಲದಲ್ಲಿ ಬರವಣಿಗೆಯ ಪದ್ಧತಿ ಸ್ಪಷ್ಟವಾಗಿ ಬಳಕೆಯಲ್ಲಿತ್ತೆಂದು ತಿಳಿಯಬಹುದು. ಮಹಾಭಾರತದಲ್ಲಿಯೂ

ಲೇಖ್ಯಕೋ ಭಾರತಸ್ಯಾಸ್ಯ ಭವತ್ವಂ ಗಣನಾಯಕ । ಮಯ್ಯೈವ ಪ್ರೋಚ್ಯಮಾನಸ್ಯ ಮನಸಾ ಕಲ್ಪಿತಸ್ಯ ಚ ॥[9]

ಎಂಬುದಾಗಿ ವ್ಯಾಸರು ಗಣಪತಿಯನ್ನು ಲೇಖಕನಾಗಿರಬೇಕೆಂದು ಕೇಳಿಕೊಂಡ ಸನ್ನಿವೇಶವಿದೆ. ಈ ಆಧಾರ-ದಿಂದಲೂ ಮಹಾಭಾರತದಕಾಲದಲ್ಲಿಯೂ ಲಿಪಿ ಇತ್ತೆಂದು ಹೇಳಬಹುದು.

ಇನ್ನು ವಾರಾಹೀತಂತ್ರ, ಯೋಗಿನೀತಂತ್ರ ಮೊದಲಾದ ತಂತ್ರಗಂಥಗಳಲ್ಲೂ ಲಿಪಿಯ ಬಗ್ಗೆ ಹೇಳಿದ್ದಾರೆ. ಒಟ್ಟಿನಲ್ಲಿ ವೇದಕಾಲದಿಂದಲೇ ಭಾರತದಲ್ಲಿ ಲಿಪಿಯ ಬಳಕೆ ಇತ್ತು ಎಂಬುದನ್ನು ನಾವು ಕಾಣಬಹುದು.

ಬೌದ್ಧರ ಗ್ರಂಥವಾದ ಲಲಿತವಿಸ್ತರದಲ್ಲಿ 14 ಲಿಪಿಗಳ ಉಲ್ಲೇಖವಿದೆ. ಜೈನರ ಪ್ರಕಾರ ಲಿಪಿಯ ಸೃಷ್ಟಿಕರ್ತಾ ಆದಿತೀರ್ಥಂಕರರೆನಿಸಿದ ವೃಷಭದೇವ. ದೃಷಭದೇವನು ತನ್ನ ಮಗಳಾದ ಬ್ರಾಹ್ಮಿಗೆ ಮೊದಲು ಲಿಪಿಯನ್ನು ಬೋಧಿಸಿದ್ದರಿಂದ ಮೊದಲ ಲಿಪಿಗೆ ಬ್ರಾಹ್ಮೀ ಲಿಪಿ ಎಂಬ ಹೆಸರು ಬಂದಿದೆ ಎಂಬುದು ಜೈನರ ವಾದವಾಗಿದೆ. ಹೀಗೆ ಭಾರತದಲ್ಲಿನ ವಿವಿಧ ಮತಪ್ರವರ್ತಕರ ಪ್ರಕಾರವೂ ಲಿಪಿಯ ಸೃಷ್ಟಿಯ ಭಗವಂತನಿಂದಲೇ ಆಯಿತೇ ಹೊರತು ಮನುಷ್ಯ
ನಿರ್ಮಿತವಲ್ಲ. ಸೃಷ್ಟಿಯ ಆರಂಭದಿಂದಲೇ ಲಿಪಿಯೂ ಇತ್ತೆಂಬುದನ್ನು ನೋಡಿದಾಗ ತಿಳಿಯುವುದು ಆದರೆ ಲಿಪಿಯ ಸ್ವರೂಪ ಯಾವುದಾಗಿತ್ತೆಂಬುದು ಮಾತ್ರ ತಿಳಿಯದು. ಇದಕ್ಕೆ ಯಾವುದೇ ಆಧಾರಗಳು ಲಭ್ಯವಾಗುತ್ತಿಲ್ಲ.

---

5. ಅಷ್ಟಾಧ್ಯಾಯೀ, 3–1–55 ।
6. ಅಷ್ಟಾಧ್ಯಾಯೀ, 3–2–21 ।
7. ಅ. ಶಾ., 3 ।
8. ರಾಮಾಯಣಮ್, 5–36–02 ।
9. ಮಹಾಭಾರತಮ್, 1–1–95 ।

ನಮಗೀಗ ದೊರೆಯುವ ಲಿಪಿಗಳಲ್ಲಿ ಅತ್ಯಂತ ಪ್ರಾಚೀನ ಲಿಪಿಯೆಂದರೆ ಸಿಂಧೂಲಿಪಿ, ಈ ಲಿಪಿಯನ್ನು ಸಮರ್ಥವಾಗಿ ಇಂದಿಗೂ ಓದಲಾಗಲಿಲ್ಲ. ಬಹುತೇಕ ಚಿತ್ರಲಿಪಿಯ ರೂಪವನ್ನು ಹೊಂದಿದೆ ಎನ್ನಬಹುದು. ಅಲ್ಲದೆ ಸಂಕೇತಾಕ್ಷರಗಳ ರೂಪದಲ್ಲಿಯೂ ದೊರಕುತ್ತವೆ.

ನಮಗೆ ಸ್ಪಷ್ಟವಾಗಿ ಗೋಚರವಾಗುವ ಲಿಪಿಯೆಂದರೆ ಬ್ರಾಹ್ಮೀಲಿಪಿ. ಕ್ರಿ.ಪೂ 3ನೆಯ ಶತಮಾನದಲ್ಲಿ ಆಶೋಕನ ಶಾಸನಗಳಲ್ಲಿ ಈ ಲಿಪಿಯನ್ನು ಕಾಣಬಹುದು. 39 ವರ್ಣಗಳಿಗೆ ಲಿಪಿಯು ದೊರೆಯುತ್ತವೆ. ಅಶೋಕನ ಕಾಲಕ್ಕಿಂತಲೂ ಪೂರ್ವದ ನಾಣ್ಯಗಳಲ್ಲಿ ಲಿಪಿ ಸಿಕ್ಕಿದರೂ ವಾಕ್ಯಾತ್ಮಕವಾದ ವಿಸ್ತಾರವಾದ ಲಿಪಿಸ್ವರೂಪವು ಆಶೋಕನ ಶಾಸನಗಳಿಂದಲೇ ಲಭ್ಯವಾಗುತ್ತವೆ. 1836 ರಲ್ಲಿ ಲ್ಯಾಸೆನ್ ಎಂಬ ವಿದ್ವಾಂಸರು ಇಂಡೋ ಬ್ಯಾಕ್ಟಿಯನ್ ಅರಸನಾದ ಅಗಾಥೋಕ್ಲಿಸ್ನ ನಾಣ್ಯಗಳ ಮೇಲಿನ ಬ್ರಾಹ್ಮಿಲಿಪಿಯನ್ನು ಸಮರ್ಪಕವಾಗಿ ಮೊಟ್ಟ ಮೊದಲಿಗೆ ಓದಿದನು, ಆದರೆ ಪರಿಪೂರ್ಣವಾಗಿ ಬ್ರಾಹ್ಮೀ ವರ್ಣಮಾಲೆ-ಯನ್ನು ತೋರಿಸಿಕೊಟ್ಟವನು ಜೇಮ್ಸ್ಪ್ರಿನ್ಸೆಪ್. ಇವನು ಬ್ರಾಹ್ಮೀವರ್ಣಮಾಲೆನ್ನು ಪರಿಚಯಿಸಿದ ಲಾಗಾಯ್ತು ಭಾರತದಲ್ಲಿನ ಎಲ್ಲಾ ಶಾಸನಗಳ ಸಂಶೋಧನೆ ಆರಂಭವಾಯಿತು. ಈ ಬ್ರಾಹ್ಮೀ ಲಿಪಿಗೂ ವಿದೇಶೀಲಿಪಿಗಳೇ ಮೂಲವೆನ್ನುವ ವಾದವಿದ್ದರೂ ಸಾಧಾರವಾಗಿ ನಿರೂಪಿಸಲು ಯಾರಿಗೂ ಸಾಧ್ಯವಾಗಿಲ್ಲ.

ವೇದಗಳಲ್ಲಿ ಲಿಪಿಯ ಬಗ್ಗೆ ಉಲ್ಲೇಖವಿದೆಯಾದರೂ ಲಿಪಿಯ ಸ್ವರೂಪ ಲಭ್ಯವಾಗುತ್ತಿಲ್ಲ. ಆದರೆ ಅಶೋಕನ ಕಾಲದಲ್ಲಿ ದೊರೆತ ಬಾಹ್ಯಲಿಪಿಯ ಸ್ವರೂಪವೇ ಲಿಪಿಗಳ ಮೂಲ ಎಂದು ಹೇಳಬಹುದು. ಆಶೋಕನು ಅಷ್ಟೊಂದು ಸ್ಪಷ್ಟವಾಗಿ ಬರೆಸಿದ್ದರಿಂದ ಅದಕ್ಕಿಂತ ಪೂರ್ವದಲ್ಲಿಯೇ ಆ ಲಿಪಿ ಅತ್ಯಂತ ಪ್ರಚಾರದಲ್ಲಿದ್ದಿರಲೇಬೇಕು, ಜನರಿಗೆ ಅರ್ಥವಾಗದ ಲಿಪಿಯಲ್ಲಿ ಬರೆಸಿದರೆ ಆ ಶಾಸನಗಳಿಂದ ಪ್ರಯೋಜನವೇ ಇರುವುದಿಲ್ಲ. ಆದ್ದರಿಂದ ಲಿಪಿಯ ಮೂಲಸ್ವರೂಪ ಬ್ರಾಹ್ಮೀಲಿಪಿಯ ಸ್ವರೂಪವೆಂದು ಹೇಳಬಹುದು.

ಆದರೆ ಕಾಲಕಾಲಕ್ಕನುಗುಣವಾಗಿ ಲಿಪಿಯಲ್ಲಿ ಸಾಕಷ್ಟು ಬದಲಾವಣೆಯಾದುದನ್ನು ನಾವು ಕಾಣುತ್ತೇವೆ. ಅಶೋಕನ ಕಾಲದ ಬ್ರಾಹ್ಮೀಲಿಪಿಯು ಶಾತವಾಹನರ ಕಾಲಕ್ಕೆ (ಕ್ರಿ.ಶ.1-1) ಬಂದಾಗ ಸ್ವಲ್ಪದೀರ್ಘರೂಪವನ್ನು ಪಡೆಯಿತು. ಅನಂತರ ಕದಂಬರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 1-5), ಬಾದಾಮಿ ಚಾಲಿಕ್ಯರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 1) ರಾಷ್ಟ್ರಕೂಟರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 7-10) ಕಲ್ಯಾಣ ಚಾಲುಕ್ಯರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 10-11) ಹೊಯ್ಸಳರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿಶ 11-13) ವಿಜಯನಗರ ಅರಸರ ಕಾಲದಲ್ಲಿ (ಕ್ರಶ 14-16) ಮೈಸೂರು ಒಡೆಯರ ಕಾಲದಲ್ಲಿ (ಕ್ರಿ.ಶ 17 18) .ಹೀಗೆ ಬದಲಾವಣೆ ಹೊಂದಿ ಇಂದಿನ ಕನ್ನಡಲಿಪಿಯ ಸ್ವರೂಪ ಹೊಂದಿದೆ.

ಕಾಲಕಾಲಕ್ಕೆ ಲಿಪಿ ಬದಲಾವಣೆಯಾಗಲು ಅನೇಕ ಕಾರಣಗಳಿವೆ. ಲಿಪಿಕಾರನ ಬರವಣಿಗೆಯ ಶೈಲಿಯಿಂದಾಗಿ ಬದಲಾವಣೆಯಾಗಬಹುದು, ಶಾಶ್ವತವಾಗಿರಬೇಕೆಂಬ ಕಾರಣದಿಂದ ರಾಜರು ತಮ್ಮ ಕಾಲದ ಬರವಣಿಗೆಯ ಗುರುತು ಬದಲಾಯಿಸಿದ್ದಿರಬಹುದು. ಅನುಕೂಲಕ್ಕಾಗಿ ಬದಲಾವಣೆ ನಡೆದಿರಬಹುದು. ಹೀಗೆ ಅನೇಕ ಕಾರಣಗಳಿಂದ ಲಿಪಿಯ ಬದಲಾವಣೆ ಆಗಿದ್ದನ್ನು ಊಹಿಸಬಹುದು. ಎಷ್ಟೇ ಬದಲಾವಣೆಯಾದರೂ ಭಾರತೀಯ ಲಿಪಿಗಳಿಗೆ ಮೂಲ ಬ್ರಾಹ್ಮೀ ಲಿಪಿಯೇ ಆಗಿದೆ ಎಂಬುದು ಬಹುಜನರ ಸಂಶೋಧನೆಯ ನಿರ್ಣಯವಾಗಿದೆ.

**ಪರಿಶೀಲಿತಗ್ರಂಥಗಳು :**


೧) ಅಷ್ಟಾಧ್ಯಾಯೀ ೨) ಅಭಿಜ್ಞಾನಶಾಕುಂತಲಮ್ ೩) ಕೌಟಿಲೀಯ ಅರ್ಥಶಾಸ್ತ್ರ

೪) ಶುಕ್ರನೀತಿ ೫) ಶ್ರೀಮದ್ವಾಲ್ಮೀಕಿರಾಮಾಯಣ ೬) ಶ್ರೀಮನ್ಮಹಾಭಾರತಮ್

೭) ಸ್ಮೃತಿಸಂಗ್ರಹಃ ೮) ತೈತ್ತಿರೀಯ ಕೃಷ್ಣಯಜುರ್ವೇದ


*********

**Volume XIX : January to June – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# चान्द्रयोगानां निरूपणं तेषां वैशिष्ट्यञ्च

**Prof. Ishwar Bhat,**
Former Controller of Examinations, CSU
Head, Department of Jyotish,
Central Sanskrit University, Jaipur Campus,
Triveni Nagar, Jaipur - 302018.
Rajasthan.
Mobile Number - **7976639119**

श्रौतस्मार्तकर्मानुष्टानादीनां समारम्भस्य मुहूर्तानां प्रख्यापनेन समुचितकालनिर्णय-फलादेशादीनां यथार्थप्रतिपादनेन वेदाङ्गस्यास्य ज्यौतिश्शास्त्रस्य भृशं महत्त्वं वरीवर्ति। यतो हि पूर्वलोक-इहलोक-परलोकज्ञानहेतुभूतत्वात्-इदं शास्त्रं वेदाङ्गस्य नयनमित्युच्यते। तथा चोक्तम् -

**''छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते [1] ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते''।। इति।**

इदं च ज्योतिषं शास्त्रं सिद्धान्त (गणित) संहिताहोरात्मकेषु त्रिषु स्कन्धेषु संविभज्य समधिष्ठितमस्तीती कृत्वा अस्य ज्यौतिषस्य त्रैस्कन्ध्यं प्रसिद्धं समेषां विचक्षणानां विदुषाम्। **'गणितं मूर्धनि-स्थितं**, मित्यनुसारेण स्कन्धत्रयेषु गणितसिद्धान्तस्य प्राथम्यं वैशिष्ट्यं च नितरामभ्युपगम्यते। संहिता-मुहूर्त-फलितादिविषयक-सिद्धान्तानां नियमादिकानां च वैशुध्यं हि परिशुद्ध-सूक्ष्मगाणितिक-प्रमाणाधीनं तत्संसिद्धं च वर्तत इत्यतो अस्य सिद्धान्तगणितस्कन्धस्य तदितरस्कन्धोपजीव्यत्वं स्पष्टं प्रतिभाति। अत एव प्रश्नमार्गकारो ब्रूते -

**''प्रमाणफलभेदेन द्विविधं च भवेदिदम्।[2] प्रमाणं गणितस्कन्धः स्कन्धावन्यौ फलात्मकौ''।। इति।**

पूर्वोक्ते फलात्मके स्कन्धद्वये संहिता स्कन्धे तु सामान्यफलं वर्षलक्षणं जनक्षयपुष्ट्यादिसमस्तानां पदार्थानां लक्षणानि चोच्यन्ते। होरास्कन्धे तावत् जातक-निमित्तप्रश्नमुहूर्तानि निगद्यन्ते। अस्यैव होरास्कन्धस्य जातकस्कन्धमित्यपि नामान्तरम् अस्ति लोके।

जन्मकाले ग्रहाणां स्थित्यनुसारेण व्यक्तेर्जीवने सम्पत्स्यमानं शुभाशुभफलमत्र होरास्कन्धे आदिश्यते। अस्य स्कन्धस्य सकाशादेव भूतवर्तमानभविष्यन्निर्णयः क्रियते कार्तान्तिकप्रवरैः। कृतस्य कर्मणः, क्रियमाणस्य कर्मणः, करिष्यमाणस्य कर्मणश्च फलं कीदृग्भवेदिति लोके लोकाः संशेरते जिज्ञासन्ते च। अस्योपायस्तु त्रिस्कन्धज्योतिषे जातकस्कन्धमन्तरा न कश्चिदस्तीति निश्चप्रचम्। अतः प्रस्तुतप्रबन्धेऽस्मिन् जातकस्कन्धान्तर्गतस्य उपर्युक्तविषयकमीमांसा क्रियते। **'चान्द्रयोगः'** इत्यस्मिन् पदे संस्कृतस्य कटपयादि-अक्षरसंख्यायाः गणनानुसारं 'चा' इत्यक्षरसंख्यायाः षट् (6) 'द' इत्यक्षरस्य संख्याया अष्टौ (8) 'यो' अक्षरस्य रूपम् (1) 'ग' अक्षरस्य संख्या च त्रयं (3) भवति। इत्थं एतासां सर्वासां संख्यानां सङ्कलनेन 18 अष्टादश भवन्ति संख्या । अष्टादश संख्यायां पुनः एकं अष्टौ च एतयोः संख्ययोः संकलनेन नवैव भवति संख्या। तस्मात् राजयोगचिन्तनावसरे निःस्सन्दिग्धं नवमभावः विशेषतः परिशीलनीयः इत्यस्यापि अर्थान्तरे ध्वनिः। तत्रापि पूर्वपदं **'चान्द्रः'** इत्यत्र विशिष्टाक्षरसंख्यायाः गणनानुसारतः षट् अष्टौ च भवति। तयोः सङ्कलनेन चतुर्दश भवति। पुनश्च एकं चत्वारि च तयोः संकलनेन पञ्चैव। नवमात् नवमं पञ्चमस्थानमेव। तस्मात् -

**''केन्द्रत्रिकोणाधिपयोरेकत्वे योगकारिता।[3] अन्यत्रिकोणपतिना सम्बन्धो यदि किं परम्''।।**

इत्यस्य वचनस्य प्रामाण्येन त्रिकोणपत्योः सम्बन्धवशात् सर्वोत्कृष्टः योगो भवतीति **'चान्द्रयोग'** इति पदस्य अक्षरसंख्यया विशिष्टम् अर्थान्तरं सिध्यति। त्रिकोणपत्योः सम्बन्धवशात् यथा राजयोगो भवति तथैव प्रबलैः चान्द्रयोगैः सकाशाद् जातके विद्यमाना अपि दुर्योगाः चन्द्रमसः प्रकाशेन न्यक्कृताः तारागणा इव निष्फला अवतिष्टन्तेति मे मतिः।

अधुना सर्वप्राथम्येन चान्द्रयोगस्य वैशिष्ट्यं तावत् किमिति परिशीलयामश्चेत् चन्द्रसम्बन्धी योगाः चन्द्रयोगा इति व्युत्पत्या चान्द्रयोगेषु सर्वत्र चन्द्रस्य प्राधान्यं दरीदृश्यते। यतः शास्त्रेऽस्मिन् लग्नसूर्यचन्द्राणां त्रयाणामपि लग्नत्वं परिगणितश्चेदपि लग्नसूर्यचन्द्रेषु मुख्यतमं लग्नं चन्द्रलग्नमस्ति। अत एव दैवकेरलकारः स्वग्रन्थे चन्द्रलग्नं शरीरमिति मनुते। उक्तं च

**"चन्द्रलग्नं शरीरं स्यात् लग्नं स्यात् प्राणसंज्ञकम्।[4] ते उभे संपरीक्ष्यैव सर्वनाडीफलं स्मृतम्"।। इति।**

ऋषिभिः फलनिर्णयाय एकस्य तादृशग्रहविशेषस्य चयनं कृतमस्ति यद्यपि सः ग्रहश्चेदपि लग्नरूपेणापि परिगण्यते। कालपुरूषस्य आत्माद्यवयवेषु **'कालात्मा दिनकृत्'** इत्यत्र कालस्वरूपो हि रविः। स एव साक्षात् कालपुरूषस्यात्मा। परन्तु **'मनस्तुहिनगु'**रीति पुरूषस्य मनः प्राधान्येन सर्वप्रवृत्तिः दृश्यते। मनो भूतस्य चन्द्रस्य बलवत्वे सति मनः प्रभावो जायमानत्वात् चन्द्रबलक्षये अन्यग्रहप्राबल्यस्य न किञ्चित् प्रयोजनं विद्यते। चान्द्रं बलं तु सर्वग्रहाणां वीर्यस्य बीजभूतम्। तथा चोक्तम् -

**"निश्शेषदोषहरणे शुभवर्धने च वीर्यं गुरोरधिकमस्त्यखिलग्रहेभ्यः।[5]**

**तद्वीर्यपाददलशक्तिभृतौ ज्ञशुक्रौ चान्द्रं बलं हि निखिलग्रहवीर्यबीजम्"।। इति।**

अशेषदोषोन्मूलने शुभवर्धने च गुरोः सर्वग्रहेभ्योऽधिकं बलमस्ति। बुधशुक्रौ गुरूबलस्य पादार्धवीर्यवन्तौ, बुधस्तत्पादबलः शुक्रस्तदर्धबल इत्यर्थः। परन्तु चान्द्रबलं सर्वग्रहाणां वीर्यस्य बीजभूतमिति। कालाख्यवृक्षस्य चान्द्रं मूलं, सूर्यादयः प्रकाण्डशाखोपशाखाः भवन्ति। तत्रापि वृक्षस्य मूले अतिप्रबले सति शाखादयः पुष्यन्ति खलु, दुर्बले शुष्यन्ति। किञ्च सन्मूलं अतिप्रबलाधिष्ठानं तद्वृक्षमाश्रितो जनः पुष्पं फलं लभते। तस्मात् कालतरोः मूलभूतस्य चन्द्रस्य प्राबल्ये सति तच्छाखादिभूताः अन्ये ग्रहाः स्युः। तस्माचन्द्रबलमेव सर्वग्रहबलस्य निदानम्। उक्तं च –

**"मूलं कालतरोः स्मृतो हिमकरः शाखादयोऽन्येग्रहाः[6] मूलेऽतिप्रबले सति क्षितिरूहः पुष्यन्ति शाखादयः।**

**सन्मूलं तरूमाश्रितः खलु जनः पुष्पं फलं विन्दते तस्मात् चन्द्रबलक्षये हि विबलाः शुक्रज्ञजीवादयः"।। इति।**

यद्यपि चन्द्रस्य प्राबल्यदौर्बल्ये सूर्यापकर्षसन्निकर्षोपाधिकश्चेदपि शुभक्रियासु कर्तुः शुभाशुभफलप्रापणे सुर्यास्यापि चन्द्राधीनं प्राबल्यम्। इत्थं ग्रहेष्वेकश्चन्द्रः एककालावच्छेदेन लग्नरूपेण ग्रहरूपेणापि गणयमानो यथा महत्वपूर्णं स्थानम् आवहति तथैव सर्वेषु राजयोगेषु चान्द्रयोगाः प्रमुखं स्थानं भजन्तेति अधस्तनपद्यपरिशीलनेन सर्वैः खलु विज्ञायते - उक्तं च पराशरेण -

**"चान्द्रयोगो निरस्यान्ययोगजातं फलं स्वकम्।[7]प्रयच्छन्ति विशेषेण वेद्यमेतद् बुधैः सदा"।। इति।**

किञ्च -

**"नीचस्थितो जन्मनि यो ग्रहः स्यात् तद्राशिनाथोऽपि तदुच्चनाथः।[8]**

**स चन्द्रलग्नात् यदि केन्द्रवर्ती राजा भवेत् धामिकचक्रवर्ती"।। इति।**

वैद्यनाथेक्तिरपि चान्द्रयोगस्य प्राशस्त्यं बोधयति। अपि च -

**"किं कुर्वन्ति ग्रहास्सर्वे चन्द्रकेन्द्रे बृहस्पतौ।[9] गजयूथसहस्राणि निहन्त्येकोऽपि केसरी"।। इति।**

अन्यच

**"लग्नाद्वा चन्द्रलग्नाद्वा दशमे शुभसंस्थिते।[10] योगोऽयम् अमला नामकीर्तिराचन्द्रतारकी"।। इति।**

एवं सर्वत्र पूर्वोक्तेषु एतादृशश्लोकेषु चन्द्रकेन्द्रमित्याख्यातत्वात् चान्द्रयोगस्य महत्वं वैशिष्ट्यं च सुव्यक्तं भवति समेषाम्। चन्द्रयोगे इत्यस्मिन् पदे विहितस्य योगस्य परिभाषामपि व्याचक्षाणो प्रश्नमार्गकारो ब्रूते -

**"ग्रहाणां स्थितिभेदेन पुरूषं योजयन्ति हि।[11] फलैः कर्मसमुद्भूतैः इति योगाः प्रकीर्तिताः।। इति।**

इत्थं शास्त्रचिन्तासन्तानदन्तुरितान्तःकरणाः वयमग्रे पदं निधाय अस्य चन्द्रस्य स्वरूपदृष्ट्या विचारयामश्चेत् ज्योतिश्शास्त्रे अयं हि चन्द्रः पाटलो कुलरिराशौ स्वयं श्वेतवर्णो भूत्वा श्वेतवर्णस्याधिपतिस्सन् भासते। अयं हि जलदेवता अस्ति। वायव्यादिदिगाधिपत्यं चास्य वर्तते। श्वेतरक्तवर्णकर्काटकराश्यधिपतिरयं चन्द्रः ग्रहेषु शुभाशुभग्रहेत्वेन स्वीकृतः। क्षीणचन्द्रोऽशुभदः स एव पूर्णचन्द्रश्चेत् शुभप्रदो भवति। सौम्यग्रहवीक्षणेन सौम्यग्रहयोगेन च चन्द्रः शुभप्रदेति शास्त्रे वर्ण्यते। तथैव क्षीणचन्द्रः अशुभग्रहसम्बन्धयुक्त अशुभप्रदो भवति। जननकाले जातकस्याऽयं स्वबलाधिक्यनमुसृत्य स्वसंज्ञानुरूपं प्रकृतिं प्रदाति। उक्तं च -

**"लग्ननवांशपतुल्यतनुः स्याद्वीर्ययुतग्रहतुल्यतनुर्वा।[12] चन्द्रसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः"।। इति।**

वेदेषु पुराणेषु च अस्य द्विजातित्वं वर्णयामासुः। किन्तु ज्योतिः शास्त्रे अयं वैश्यवर्णाधित्यं वहति। रविगुरूभिस्साकमयं सात्विकग्रहः कथ्यते। यवनेश्वस्त्वेनं राजसिकं मनुते। किन्तु सत्याचार्यवराहमिहिरयोरभिप्रायेणायं सात्विकग्रह एवेति निश्चीयते। कल्याणवर्मस्त्वेनं चन्द्रं रसेषु लवणस्य वस्त्रेषु नूत्नवस्त्रस्य, कालेषु क्षणस्य, ऋतुषु प्रावृषः, विबुधमनुष्यादिषु मनुष्याधिपतित्वेन निजगाद्। पुनर्वसूनक्षत्रस्य चतुर्थपादं पुष्यम्याश्लेषानक्षत्रयोश्चाष्टपादान् समीकृत्य संजायमानराशिः कर्कटः कालपुरूषवत्कल्प्यमाने पुरूषशरीरे कुलीराकृत्यास्थितस्सन् वक्षदेशस्य स्थानमावहति। यथा पूर्वमुक्तम् अस्य राश्याधिपश्चन्द्रः। स्थानदिग्चेष्टाकालनैसर्गिकरूपपञ्चबलेषु चन्द्रस्य उच्चत्रिकोणे वृषभे स्थानबलं चतुर्थे, उत्तरदिशिदिग्बलं मकरादिषट्के उत्तरायणे चेष्टाबलं, निशिकालबलं शनिकुजबुध-गुरुशुक्रचन्द्ररवीनां मध्ये उत्तरोत्तरवृध्या नैसर्गिकबलं च भवति। चन्द्रः तनुवृत्ततनुः बहुवातकफः, पाज्ञः मृदुवाक् शोभनयनः भवतीति वराहः अस्य स्वरूपं प्रत्यपादि। इत्थं सामान्यतः चन्द्रस्य स्वरूपमधिकृत्य सिंहावलोकन क्रमेणत्मानो दृष्टिं प्रसार्य तदनन्तरं यथामति दिङ्मात्रं चान्द्रयोग-अधियोगानां विषये निरूप्यते। तत्रादौ चन्द्रस्य सकाशाद् जायमानाः अधियोगाः वर्ण्यन्ते। तद्यथा - उक्तं च वराहेण - **'सौम्यैः स्मरारिनिधनेष्वधियोग इन्दोः'**[13] रित्युक्तरीत्या चन्द्रस्य षष्ठाष्टमसप्तमस्थानेषु स्थितैः सौम्यैः बुधगुरूभार्गवैः अधियोगो भवति। एषु स्थानेषु एकस्मिन् वा स्थानद्वये वा स्थानत्रये वा सकलशुभग्रहयोगः अधियोगेति निगदितः। श्रुतकीर्तिरेनं योगं सप्तधा व्याचकार। स हि **"निधनं द्यूनं षष्ठं चन्द्रस्थानाद्यदा शुभैर्युक्तम्। अधियोगः स प्रोक्तो व्यासकृतौ सप्तधा पूर्वैः।।**[14] इति जगाद-

ते हि योगाः सन्त्येवम्। चन्द्रस्य षष्टस्थाने यदा सर्वे सौम्यग्रहाः स्युः तदा एकः, चन्द्रात् सप्तमे सर्वे सौम्यग्रहाः स्युस्तदा द्वितीयः, अष्टमेतृतीयः षड्सप्तमस्थानयोश्चतुर्थः षष्टाष्टमस्थानयोः पञ्चमः सप्ताष्टमस्थानयोः षष्टः, षड्सप्ताष्टमस्थानेषु शुभग्रहयोगे तु सप्तमः, इत्थं चन्द्रात् पूर्वोक्ततत्तत्स्थाने सौम्यग्रहाणां संस्थितेर्वशात् सप्तधा भवन्ति अधियोगाः। एवमेव पूर्वोक्त स्थानेषु पापग्रहाणां योगवशात् पापाधियोगाः जायन्ते। **'मिश्रैर्मिश्रस्तथैवोक्तः'**[15] इत्यस्य वचनस्य प्रामाण्येन शुभपापसंमिश्रैः मिश्रयोगो सम्पद्यते। उक्तं च श्रुतकीर्तिना -

**"षष्टसप्तमाष्टसौंस्थैश्चान्द्रात्सौम्यैः शुभोऽधियोगः स्यात्।[16] पापः पापैरेवं मिश्रैर्मिश्रस्तथैवोक्तः"।। इति।**

परन्तु अयं च राजयोग इति माण्डव्यकल्याणवर्माणौ प्रतिपादयामासतुः। तौ हि -

**"षष्ठं द्यूनमथाष्टमं शिशिरगोः प्राप्ता समस्ता शुभाः[17] क्रूराणां यदि गोचरे न पतिताः भान्वालयाद्दूरतः।**

**भूपालः प्रभवेत्स यस्य जलधेर्वेलावन्तोद्भवैः सेनामत्तकरीन्द्रदानसलिलं भृङ्गैर्मुहुः पीयते"।। इति।**

तथा च माण्डव्यः -

**" अमित्रं यामित्रं निधनमथवाशीतरूचितो[18] गताः सर्वे सोम्यास्तदिह जनयेयुर्नरपतिम्।**

**घृतेनेवासेकं गतवति विषादाश्रुपयसा प्रतापाग्निर्यस्य ज्वलति हृदये शत्रुषु भृषम्"।। इति।**

अस्मिंश्चाधियोगे समुत्पन्नानां फलमाह -

अधियोगे जातः जनः चमूपतिः, सचिवः, क्षितिपालो वा भवति। अस्मिन् योगे जाताः राजानस्तु अतिसौख्यैश्वर्यसम्पन्नाः, हतशात्रवः दीर्घायुषः रोगभयवर्जिताः, निर्भयाश्च भवन्ति। उक्तं च वराहेण -

**''सौम्यैः स्मरारिनिधनेष्वधियोग ईन्दोः[19] तस्मिश्चमूपसचिवक्षितिपालजन्म।**

**सम्पन्नसौख्यविभवाहतशत्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः''।। इति।**

अपि च- **न प्राप्नोति जरामाशु नो भजत्यरितो भयम्।[20] जातः स्यादधियोगेऽस्मिन्धृतिसौभाग्यसौख्यभाक्।। इति।**

प्रथिततमेषु चान्द्रयोगेष्वऽस्ति एको योगः सुनफायोगः। चान्द्रयोगेषु प्रधानोऽयं योगस्तावत् सूर्यं हित्वा शीतांशोः द्वितीयस्थाने कुजादिपञ्चताराग्रहेष्वकस्यापि व्यवस्थितेर्वशात् सुनफायोगो भवति। तथा चोक्तं वराहेण -

**रविवर्ज्यं द्वादशगैरनफा चन्द्राद्वितीयगैः सुनफा।[21] उभयस्थितैर्दुरुधुरा केमद्रुमसंज्ञकोऽतोऽन्यः।। इति।**

**''चन्द्राच्चतुर्थगैः सुनफा''** इति अस्य योगस्य लक्षणं जगाद श्रुतकीर्तिः।

**यद्राशिसंज्ञे शीतांशुर्नवमांशे जन्मनि स्थितः।[22] तद्द्वितीयस्थितैर्योगः सुनफाख्यः प्रकीर्तितः।।** इति

जीवशर्मा अस्य सुनफायोगस्य स्वरूपमभ्यधायि। परन्तु पूर्वोक्तयोः द्वयोः आचार्ययोः उक्तिर्लोके न प्रसिद्धा। यद्यपि तयोर्मतं वृद्धज्योतिषिकैर्नाङ्गीकृतम्। अयं च योगः कुजादिपञ्चताराग्रहाणामे कैकद्वयत्रयचतुष्टयपञ्चानां क्रमेण संस्थापनलक्षणेच्छाविकल्पैः सरूपत्रिंशद् भवति। आहत्य एकत्रिंशत्सुनफाख्याः योगाः भवन्ति। अस्मिन् योगे जातः पुमान् स्वयमधिगतवित्तः पार्थिवः तत्समो वा धीर्युक्तः धनवान् ख्यातिमांश्च भवति। उक्तं च वराहेण -

**स्वयमधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायां धीधनख्यातिमांश्च।। इति।**[23]

**'प्रत्यक्षपरीक्षणैर्व्यक्ति'**[24] रित्युक्तन्यायेन अधुनापि यस्य जातके सुनफायोगो विद्यते स भाग्यवान् एव। यतः सुनफायोगे जातस्य आजीविका प्राप्तये बहुक्लेशादिकं न सम्भवतीति अनुभूतमेतत्। चन्द्रस्य बलाबलानुसारेण अस्य योगस्य प्राधान्यं समत्वं लघुत्वं च चिन्तनीयम्। उक्तं च- **''केन्द्रादिस्थैर्ग्रहैर्योगाः कीर्तिताः येऽनफादयः।[25] ते प्रधाना समा ह्रस्वाश्चन्द्ररूपाश्च चिन्तयेत्''।। इति।**

अथ चान्द्रयोगेषु प्रसिद्धः द्वितीयः अनफायोगनामधेयो अस्ति। अत्र अर्कं वर्जयित्वा चन्द्रात् द्वादशगे कुजादिपञ्चताराग्रहाणां मध्ये कश्चिद् एको ग्रहो वा केचनग्रहाः वा तिष्ठन्ति तदा अयं योगो भवति। **'दशमस्थितैः कीर्तितोऽनफा विहगै'** इति श्रुतिकीर्तिः। **'द्वादशगैरनफा ज्ञेया'** इति जन्मनि चन्द्रनवांश राशेः द्वादशस्थानगतैः कुजादिभिः योगोऽयं कश्यते जीवशर्मणा। कुजादि ग्रहैकादिसंस्थापनलक्षणेच्छाविकल्पैः सरूपत्रिंशद्त्सुनफाख्याः भवन्ति योगाः। अर्थाद् एकत्रिंशद्योगाः भवन्त्येते। उक्तं च वराहेण -

**''त्रिंशत्सरूपा सुनफानफाख्याः षष्टित्रयं दौरूधरे प्रभेदाः।[26] इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः''।।** इति।

अनफायोगे जातः पुरूषः अगदशरीरः, शीलवान् ख्यातकीर्तिः, विषयसुखोपेतः सुवेषः मनोदुःखविवर्जितः स्यात्। तथा चोक्तम् -

**''प्रभुरगदशरीरः शीलवान्ख्यातकीर्तिः। विषयसुखसुवेशो निवृत्तश्चानफायाम्''।। इति।**[27]

अथ चान्द्रयोगे प्रथितः दुरूधुरायोगः तृतीयः। अत्रपि पूर्वोक्तं अर्कं वर्जयित्वा चन्द्रात् द्वितीयद्वादशे ग्रहौ भवतस्तदा दुरूधुरानाम योगो भवति। श्रुतिकीर्तिस्तु **'उभयस्थितैर्दुरूधुरा'** इति चतुर्थदशमस्थितैः कुजादिग्रहैः दुरूधुरायोगं ब्रूते। जीवशर्मा तु चन्द्रनवांशराशेः द्विद्वादशस्थितैः रविवर्जितैग्रहैरेनं योगं प्रोवाचैवम्। **'ग्रहैर्द्विद्वादशस्थितैः'** प्रोक्तो दुरूधुरायोग इति। ग्रहेच्छा विकल्पैः अस्य प्रभेदाः अशीत्युत्तरशतमिति वराहो निगदति। ननु किं पूर्वोक्तयोगत्रयेप्यादित्यो द्वितीये द्वादशे वा स्थाने भवति तदा योगभङ्गकृद्भवति उत नैवेति चेत् उच्यते। नैवम्। आदित्यो चन्द्रात् द्वितीये द्वादशे वा स्थाने भवतु मा भवतु। किन्तु तद्योगभङ्गकृन्नभवति। किन्तु योगकर्तृणां मध्ये आदित्यो न गण्यते। विशिष्य द्विद्वादशे विद्यमानाः भौमादयो पूर्वोक्तयोगकत्रृकेति बोध्यः।

अस्मिन् दुरूधुरायोगे जातो नरः सकलविद्याभोगैर्विराजमानः धनवाहनाढ्यः त्यागान्वितः सुभृत्यश्च भवति। तथा चोक्तं वराहेण -

**''उत्पन्नभोगसुखभाग् धनवाहनाढ्यस्त्यागान्वितो दुरूधुराप्रभवः सुभृत्यः''।। इति।**[28]

## केमद्रुमयोगः

चान्द्रयोगेषु दुर्योगत्वेन प्रथितः योगः केमद्रुमः। चन्द्रात् द्वितीये व्यये च सूर्यव्यतिरिक्तग्रहाभावे सति केमद्रुमाख्यो योगो भवति। उक्तं च पराशरेण - **"रविं विनेन्दुतः कश्चिद्ग्रहो नैवार्थरिष्फगः।[29] केमद्रुमाभिधो योगः केन्द्रे ग्रहयुते न सः"।। इति।** अन्यच्च -

**व्ययार्थकेन्द्रगश्चन्द्राद्विना भानुं न चेद्ग्रहः[30] कश्चित्स्याद्वा विना चान्द्रं लग्नात्केन्द्रगतोऽथवा।**

**योगः केमद्रुमो नाम तदा स्यात्तत्र गर्हितः भवन्ति निन्दिताचारा दारिद्रयापत्तिसंयुताः"।। इति।**

अत्रापि रविव्यतिरिक्तग्रहाभावे केमद्रुमयोगमङ्गीचकार तत्र भगवान् गार्गिः। कल्याणवर्मा तावत् -

**"एते न यदा योगाः केन्द्रग्रहवर्जितः शशाङ्कश्च।[31] केमद्रुमोऽतिकष्टः शशिनि समस्तग्रहादृष्टे"।। इति।**

चन्द्रात् द्वितीयद्वादशकेन्द्रेषु कुजादिग्रहाभावे तैर्वीक्षणाभावे केमद्रुमयोगं जगाद। श्रुतिकीर्तिस्तु चन्द्रस्य चतुर्थदशमस्थानयोः कुजादिग्रहाभावे केनद्रुमयोगं भवतीत्यवोचत्। **'केनद्रुमसंज्ञितोऽन्यथा योगः'**। इति।

दुर्योगेषु प्रथमगणनीयस्य केमद्रुमयोगे गुरूणा वीक्षितौ चन्द्रभार्गवौ केन्द्रभावगतौ स्यातां तदा अस्यापि भङ्गो भवति। अथ च शुभग्रहयुतश्चन्द्रः शुभमध्यगः जीवोक्षितश्चेत् केमद्रुमयोगो न भवति। यद्वा निजतुङ्गगृहे वा तन्नवांशे गतवति सति चन्द्रे जीवेक्षितेऽपि केमद्रुमयोगफलेन विहीनो भवति जातकः इति श्रीवैद्यनाथो ब्रवीति। उक्तं च

**"निशाकरे केन्द्रगते भृगौ वा जीवेक्षिते नैव दरिद्रियोगः।[32] शुभान्विते वाऽशुभमध्यगेन्दौ जीवेक्षिते नैव दरिद्रियोगः"।। इति।**

**"चन्द्रेऽतिमित्रनिजतुङ्गगृहांशकस्थे जीवेक्षिते यदि दरिद्रतया विहीनः।[33]**

**पूर्णे तनौ शुभयुते दिवि तुङ्गयाते जीवेक्षिते हिमकरे न भवेद्दरिद्रः"।। इति।**

चन्द्रनवांशस्थानस्य द्विद्वादशस्थानयोः रविवर्जितग्रहाभावे अन्यथा केमद्रुमः स्मृतेति जीवशर्मा केमद्रुमयोगं कथयति। अस्मिन् योगे नृपवंशजातोऽपि मलिनः दुःखितः नीचः निर्धनः प्रेष्यः खलश्च भवति। तथा चोक्तम् -

**केमद्रुमे मलिन दुःखितनीचनिः स्वाः। प्रेष्याः खलाश्च नृपतेरपिवंशजाता।। इति।**[34]

प्रसङ्गेऽस्मिन् दुर्योगस्यास्य विषये बिम्बप्रतिबिम्बोक्त्या विहितं नयनपथगामी भवति यत् हस्तिनः सिंहं दृष्ट्वा यथा पलायन्ते तथैव केमद्रुमं योगं दृष्ट्वा राजयोगाः निष्फला भवन्तीति। तथा चोक्तम् -

**योगे केमद्रुमे प्राप्ते यस्मिन् कस्मिंश्च जातके।[35] राजयोगाः विनश्यन्ति हरिं दृष्ट्वा यथा द्विपाः।। इति।**

केमद्रुमयोगे जातानां फलमाह वैद्यनाथः - यस्य कस्यापि जन्मकाले राजयोगाः सबलाः सन्ति चेदपि तस्मिन् कश्चन केमद्रुमोऽपि भवेत्तदा ते राजयोगाः केमद्रुमदोषात् नश्यन्त्येव। किञ्च

**" योगे केमद्रुमे जातो भिक्षाशनसमानधीः।[36] द्रव्यहीनो भवेत् दुःखी भाग्यहीनो भवेन्नरः"।। इति।**

अपि च पराशरेणापि - **"तत्र जातो भवेदेव विद्याहीनोऽतिनिन्दितः।[37] निःस्वो नानापत्तियुक्तो मानवो मतिवर्जितः"।। इति।**

इत्थं सत्स्वपि चान्द्रयोगेषु प्राधान्येन केषाञ्चन चान्द्रयोगानां सामान्यफलं प्रोक्तम्। योगकर्तृकग्रहवशाद्विशेषं फलं विहितम्। यद्यङ्गारको पूर्वोक्तसुनफायोगकारकस्स्यात्तर्हि उत्साहवान्, बली, नित्यमुद्योगशीलः शौर्यवान्, रणप्रियः, धनवान्, समीक्षितकार्यकारी च जातो भवति। सौम्यः पूर्वोक्तयोगकर्तृकः स्यात्तदा स नरः समर्थः वाक्चतुरः कलासु निपुणो भवति। यदि गुरूः चेत् धर्मार्थसुखभुक् नृपतिपूजितश्च भवति। शुक्रो यदि योगकर्तृकः कामी, बहुधनो-विषयोपभोक्ता भवति। कारको यदि रवितनयः तर्हि मनुज परविभवस्य परेषां गृहवस्त्रवाहन परिवाराणामुपभोक्ता भवति। बहुकार्यकृत् बहुगणस्वामी नरश्च भवति। यद्यपि पूर्वोक्त योगत्रये सुनफानफादुरूधुराख्ये एकैकस्य ग्रहस्य फलमुक्तम्। द्वयादिसम्भवे फलं द्व्यदिकं वाच्यम्। प्रसङ्गात् अत्र अह्नि जातस्य चन्द्रः दृश्यचक्रार्धे स्थितः अशुभं फलं करोति। अह्निजातस्य नरस्यैव चन्द्रः अदृश्यचक्रार्धगतश्चेत् सकलैश्वर्यदिशुभफलप्रदाता भवति।

उक्तप्रकारादन्यथास्थे चन्द्रमसि स्वबुध्या फलमन्यदूह्यम् इत्युच्यते। तथा चोक्तम् -

**"उत्साहशौर्यधनसाहसवान्महीजः सौम्यः पटुः सुवचनो निपुणः कलासु।**[38]

**जीवोऽर्थधर्मसुखभाङ्नृपपूजितश्च कामी भृगुर्बहुधनो विषयोपभोक्ता"।। इति।**

किञ्च **"परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्यकृद् गणेशः।**[39]

**अशुभकृदुडुपोऽह्नि दृश्यमूर्तिर्गलिततनुश्च शुभोऽन्यथान्यदूह्यम्"।। इति।**

एवमत्र लग्नात् चन्द्रलग्नाद्वा उपचयोपगतैः समस्तैः शुभग्रहैः बुधगुरुशुक्रैः क्रमेण पुरुषोऽतीव वसुमान् वसुमान् वा भवति। उभयत्र द्वाभ्यां ग्रहाभ्यां तु मध्यधनी भवति। एकेन ग्रहेण तु अल्पवसुमान् नाम किञ्चिद्धनान्वितो भवति। लग्नाचन्द्राद्वा उपचयस्थाने शुभग्रहाभावे स नरो याति दरिद्रताम्। यस्य लग्नचन्द्रयोर्द्वयोरपि उपचयस्थैः शुभग्रहैः स महान् धनाढ्यः भवति। अयं योगः अन्यकेमद्रुमादिअशुभयोगस्य दुष्फलमपि अपास्य बाहुल्येन शुभफलकारको भवतीति केमद्रुमयोगस्यापवादं दर्शयति।। उक्तं च

**"लग्नादतीववसुमान्वसुमाञ्छशाङ्कात्सौम्यग्रहैरूपचयोपगतैः समस्तैः।**[40]

**द्वाभ्यां समोऽल्पवसुमांश्च तदूनतायामन्येषु सत्स्वपि फलेष्विदमुत्कटेन"।। इति।**

## अर्धचन्द्रयोगः

समस्तदशास्वपि नियतफलदेषु नाभसयोगेषु अर्धचन्द्रयोगो नाम कश्चन योगोऽस्ति। यद्यपि तत्र चन्द्रग्रहस्य प्रत्येकतया सम्बन्धाभावेऽपि राशिचक्रे द्वादशभावमारभ्य षष्ठभावपर्यन्तं सर्वग्रहाणां स्थित्या अर्धचन्द्राकृतेः स्फुरणात् एषः योगः अर्धचन्द्रयोगः कथितः। अष्टप्रकारक अर्धचन्द्रयोगाः सन्ति ते। उक्तं च वराहेण -

**नौकूटच्छत्रचापानि तद्वत्सप्तर्क्षसंस्थितैः।**[41] **अर्धचन्द्रस्तु नावाधैः प्रोक्तःत्वन्यर्क्षसंस्थितैः।। इति।**

अस्मिन् योगे जातः जनः सर्वजनप्रियः मनोहरः सर्वजनमुख्यश्च भवति। तथा चोक्तम - **'अर्धेन्दुजस्सुभगः कान्तवपुः प्रधानः।। इति।**[42]

## चन्द्रसम्बन्धिराजयोगाः

वराहमिहिरोक्तेषु द्वात्रिंशद्राजयोगेषु सन्ति प्रधानाः षोडश चन्द्रसम्बन्धिनः योगाः। **द्वयेकाश्रितेषु च 'तदैकमते विलग्ने स्वक्षेत्रगे षोडश भूमिपा स्युः'** इत्यत्र द्वेकाश्रितेषु पदे द्वयाश्रितेषु एकाश्रितेषु इति आश्रित शब्दस्य प्रत्येकतया सम्बन्धः सम्पद्यते। तथा सति चन्द्रे स्वक्षेत्रे कर्काटके कुजशनिगुरुषु ग्रहद्वये उच्चगे तयोरन्यतरे लग्नगते द्वादशराजयोगाः भवन्ति। एवं चन्द्रे स्वक्षेत्रे सति रविगुरुकुजशनिष्वकतमो स्वोचगे लग्नगते सति राजयोगचतुष्टयं भवति। वर्गोत्तमगते चन्द्रे चन्दवर्जितैः चतुराधैर्ग्रहैर्दृष्टे द्वाविंशाति राजयोगाः सिध्यन्ति। उक्तं च- **"वर्गोत्तमगते लग्ने चन्द्रे वा चन्द्रवर्जितैः।**[43] **चतुराधैर्ग्रहैर्दृष्टे नृपाः द्वाविंशति स्मृताः"।। इति।**

अयमत्र विशदोऽर्थः - यथा वर्गोत्तमगतं चन्द्रं प्रति रविबुधकुजगुरूदृष्ध्या प्रथमः। रविकुजबुधशुक्रदृष्टया द्वितीयः। रविकुजबुधशनिदृष्ध्या तृतीयः। रविकुजगुरूशुक्रदृष्ध्या चतुर्थः। रविकुजगुरूशनिदृष्ध्या पञ्चमः। रविकुजशुक्रशनिदृष्ध्या षष्ठः। रविबुधगुरूशुक्रदृष्ध्या सप्तमः। रविबुधगुरूशनिदृष्ध्या अष्टमः। रविबुधशुक्रशनिदृष्ध्या नवमः। रविगुरूशुक्रशनिदृष्ध्या दशमः। कुजबुधगुरूशुक्रदृष्ध्या एकादशः। कुजबुधगुरूशनिदृष्ध्या द्वादशः। कुजबुधशुक्रशनिदृष्ध्या त्रयोदशः। कुजगुरूशुक्रशनिदृष्ध्या चतुर्दशः। बुधगुरूशुक्रशनिदृष्ध्या पञ्चदशः। एते चतुग्रहदृष्टया सिद्धाः योगाः सन्ति। एवं वर्गोत्तमगतं चन्द्रं प्रति पञ्चग्रहवीक्षणात् षड्योगाः सिध्यन्ति। तथाहि- रविकुजबुधशुक्रशनिदृष्ध्या प्रथमः। रविकुजगुरूशुक्रशनिदृष्ध्या द्वितीयः। रविकुजबुधशुक्रशनिदृष्ध्या तृतीयः। रविकुजगुरूशुक्रशनिदृष्ध्या चतुर्थः। रविबुधगुरू शुक्रशनिदृष्ध्या पञ्चमः। कुजबुधगुरूशुक्रशनिदृष्ध्या षष्ठः। एवं वर्गोत्तमगतं चन्द्रं प्रति षट्ग्रह दृष्ध्या एको योगः सिध्यति। ते हि ग्रहाः रविकुजबुधगुरूशुक्रशनयः सर्वेप्येते योगाः समीकृत्य द्वाविंशति भवन्ति।

द्वाविंशत्यत्येते योगाः द्वादशराशिषु प्रत्येकतया चन्द्रस्य वर्गोत्तमस्थितिमनुसृत्य 22x12=244 भवन्ति। माण्डव्यस्तु सप्रभेदमेनं योगं एकत्वेनैव स्वीकरोति । तद्यथा -

**विलग्नभवनं गते बलयुते च वर्गोत्तमे [44] चतुः प्रभृतिभिर्ग्रहैः शशिनि वा समलोकिते।**

**स सम्भवति पार्थिवः खलु कृपाणपाणी रणे कदाचिदपि वीक्षिते रिपुजनो न यस्याननम्''।। इति।**

चन्द्रकतृकराजयोगस्य पुनः वैशिष्ट्यं समर्थयति - यथा कुम्भे शनौ, मेषे रवौ वृषभे चन्द्रे मिथुने बुधे सिंहे बृहस्पतौ वृश्चिके कुजे विद्यमाने जन्मलग्नं यदि कुम्भराशिः तर्हि एकः, मेषश्चेदन्यः वृषभश्चेत्तृतीयः इति योगत्रयम्। तथा चोक्तम् -

**''यमे कुम्भेर्केऽजे गवि शशिनि तेरेव तनुगैः[45] नृयुक्सिंहालिस्थैः शशिजगुरूवक्रैः नृपतयः।**

**यमेन्दू तुङ्गेङ्गे सवितृशशिजौ षष्ठ-भवने तुलाजेन्दुक्षेत्रैः ससितकुजजीवैश्च नरपौ''।। इति।**

पुनश्च तत्रैव कुजे स्वोच्चे मकरे, सूर्यचन्द्रौ धनुषि शनैश्चरः जन्मलग्ने मकरे भवन्ति यदि स हि राजयोगः भवति। जन्मलग्ने मकरे कुजचन्द्रौ, धनुषि रविः, भवन्ति तर्हि जातो नरो नृपतिः भवेत्। जन्मलग्ने मेषे रवौ धनुषि गुरौ तुलायां शनिचन्द्रौ सत्सु जातः जनः जननाथः भवेत्। तथा चोक्तम् -

**''कुजे तुङ्गेऽर्केन्द्वोर्धनुषि यमलग्ने च कुपतिः [46] पतिर्भूमेश्चान्यः क्षितिसुतविलग्ने सशशिनि।**

**सचन्द्रे सौरेऽस्ते सुरपतिगुरौ चापधरगे स्वतुङ्गस्थे भानावुदयमुपयाते क्षितिपतिः''।। इति।**

इत्थं संक्षेपेण केचन राजयोगाः विशिष्य चन्द्रमाधार्य निरूपिताः। प्रसङ्गेऽस्मिन् गौतमोक्ताः केचन राजयोगाः उपस्थाप्यन्ते अत्र।

आरूढशास्त्ररीत्या गौतमः राजयोगादीन् विशदीचकर। अस्मिन् शास्त्रे अष्टौ पदानि प्रोक्तानि सन्ति। तानि च आरूढ-कोश-वाहन-मन्त्र-दार-भाग्य-नृप-उपपदानि। लग्नाधिपतिः लग्नात् पञ्चमस्थाने विद्यमानश्चेत् तदारभ्य पञ्चमस्थानं आरूढं भवति। बृहत्पाशरे तावत् पराशरः पूर्वोक्त-आरूढस्य कृते आरूढपदनाम्ना इदं प्रयुङ्क्ते। उक्तं च पराशरेण -

**'यावदुन्मितभे तिष्ठेल्लग्नतो लग्नपः क्रमात्।[47] तावदुन्मितभे तस्मात्पदं लग्नस्य कीर्त्यते''।। इति।**

एवमत्र पूर्वोक्तवत् कोशाधिपतिः धनात् षष्ठस्थाने भवति चेत् तदारभ्य षष्ठस्थानं कोशपदं भवति। एवं वाहानादिपदानि लग्नात् साधनीयानि सन्ति। दशमस्थानाधिपतिः दशम स्थानात् तृतीयस्थाने विद्यमाने सति तदारभ्यतृतीयं स्थानं नृपपदं भवति। तद्यथा -

**''लग्नाधिपो यद्भवनान्वितश्चेल्लग्नादितत्संख्यतथोत्तरेण [48] तत्संख्यमारूढमिति ब्रुवन्ति महानुभावाः यवनादयश्च''।**

**यो भवनाथो यदि यत्र कुत्र चिन्नाथान्तसंख्या परिणण्यते यदि उक्तेश्वराणाधिचोत्तरैश्च तत्पूर्वसंख्यानि पदानि नूनम्''।। इति।**

कामरतिराज्यभोगैश्वर्यमानविभवाभिज्ञप्रतिज्ञाज्ञानानि नृपपदस्य नामधेयानि। एतैः कारकत्वं च ज्ञायते। तदुक्तं यथा -

**''नृपादिकामोरतिराज्यभोगमैश्वर्यमानं विभवोऽप्यभिज्ञा ।[49] ज्ञानाभिधानानृपभावसंज्ञतत्कालविज्ञानपरैर्मुनीन्द्रैः।। इति।**

आरूढलाभे भृगुसोमपुत्रौ सजीवचन्द्रौ यदि संस्थितौ शुभौ नरः सुतार्थविद्यासुकृतं च लब्ध्वा जगदेकवीरः राजाधिराजः भवति। उक्तं च -

**''आरूढलाभे भृगुसोमपुत्रौ सजीवचन्द्रौ यदि संस्थितौ शुभौ।[50] सुतार्थविद्यासुकृतं च लब्ध्वा राजाधिराजाजगदेकवीरः''।। इति।**

बुधगुरुशुक्रचन्द्राः आरूढलग्नात् केन्द्रे यदि भवन्ति तर्हि राराजयोगः भवतीति असकृत् चान्द्रयोगस्य औचित्यं प्रदर्शयति ।

तथा चोक्तम् -

**''बुधश्च जीवो भृगुनन्दनेन्दू आरूढलग्नाद्यदिकेन्द्रवर्ती।[51] विद्याचिरायुस्सुतसंपदश्च राराजयोगं प्रवदन्ति सन्तः''।। इति।**

आरूढलग्नाधिपतिरेव गुरूस्सन् आरूढलग्ने स्थिते सति आरूढलाभे बुधचन्द्रौ भृगुणा निरीक्षितौ स्यातां तदा जनः स्सुधीरः बलवान् राजाधिराजश्च भवति। तद्यथा -

**''आरूढभावाधिपतौ सुरेज्ये आरूढलाभे च शशाङ्कसूनुः।[52] मृगाङ्कयुक्तो भृगुणा निरीक्षितो राजाधिराजो बलवान् सुधीरः''।। इति।**

आरूढलग्नाधिपतेः दशमे नृपाधिपतिर्भूत्वा कोशपदे कोशाधिपतिः बुधगुरूभ्यां युतः शुक्रचन्द्रौ आरूढात् भाग्ये भाग्यपदे वा भवेतां तर्हि जनः सार्वभौमो भवतीति व्यपदिश्यते । उक्तं च -

**''पदेशस्य माने नृपेशःस्थितस्स्याद्धनेशस्य कोशे सजीवेन्दुपुत्रः।[53] कलानाथकाव्यौ पदाद्भाग्ये भावान्वितौ सार्वभौमप्रभुत्वं करोति''।।**

शुक्रचन्द्रौ परस्परं केन्द्रे वा मिलित्वा वा विद्यमानयोः आरूढलग्नाधिपतिरारूढलग्ने, वाहनारूढपतिः वाहने भवेतां यदि च नरः नृपो भवतीति निरूपयति । उक्तं च -

**''निशाचराचार्यकलङ्कलाञ्छनौ परस्परं केन्द्रसमाश्रितौ चेत्।[54] पदे भवेशो बलभे वनाधिपः परस्परं केन्द्रसमागमौ नृपः''।। इति।**

शुक्रचन्द्रौ योगं कृत्वा आरूढे स्थिते आरूढात्केन्द्रकोणयोर्वा सतोः भाग्यारूढाधिपतिः नृपपदाधिपतिः, वाहनाधिपतिश्च मिलित्वारूढलग्ने लग्ने वा आरूढलग्नाधिपत्या वा तद्विलोकने वा भवन्ति यदि पुमान् बहुसेनानायकः भूपालः भवतीति चान्द्रयोगस्य महात्म्यं प्रादर्शि । तथा चोक्तम् -

**''दैत्यारिपूज्यो निशिपेनयुक्तः पदान्वितो वा भवकेन्द्रकोणयोः[55] भाग्येशराज्येशबलेशकोशनाथास्समेताः पदभे विलग्ने**
**आरूढपेनापि युतेक्षितो वा सदण्डनाथे विपुलाधिपो भवेत्''।।**

पुनरत्र विशेषराजयोगश्चन्द्रसम्बन्ध्यैवं भवतीति निरूपयति - जन्मलग्नाधिपतेः केन्द्रे कोणे गुरूर्भवेत् तस्य सप्तमे कोणे वा चन्द्रो यदि तिष्टति तर्हि नरः धार्मिक धनवान् चक्रवर्ती विज्ञेयः। उक्तं च -

**''जन्मलग्नाधिपो यत्र केन्द्रकोणेगुरूर्भवेत्।[56] तत्सप्तमत्रिकोणे वा चन्द्रो वसति निश्चियम्।**
**चक्रवर्ती स विज्ञेयः धार्मिको धनवान् भवेत्''।। इति।**

चन्द्रमुपजीव्यैव विशेषतः एते आरूढशास्त्रोक्ताः राजयोगाः प्रतिपादिताः सन्ति।

चान्द्रयोगस्य वैशिष्ट्यप्रतिपादनावसरे महोजसः नृपतेः प्रसूतेः क्वचिद्वर्णनप्रसङ्गे तस्य महत्वं इत्थमभिहितम्। मनुजस्य प्रसूतिकाले दिनाधिराजे मृगराजसंस्थे नक्रे सवक्रे कलशेऽर्कसूनौ पाटीनलग्ने शशिना समेते महौजसः महीपतेः जन्म स्यात्।
तथा चौक्तम् -

**दिनाधिराजे मृगराजसंस्थे नक्रे सवक्रे कलशेऽर्कसूनौ।[57] पाटीनलग्ने शशिना समेते महीपतेर्जन्म महोजसः स्यात्।।**

एवमेव स्वोच्चे मूर्तिगते अमृतांशुतनये नक्रे सवक्रे शनौ, चापे वागधिपेन्दुभार्गवयुते भूमिपतेः जन्म भवेदित प्रोवाच । तदुक्तं यथा -

**''स्वोच्चे मूर्तिगतेऽमृतांशुतनये नक्रे सवक्रे शनौ [58] चापे वागधिपेन्दुभार्गवयुते स्याज्जन्म भूमीपतेः।**
**स्वस्थाने ननु यस्य भूरितुरगोन्मत्तेभमालामिल त्सेनान्दोलित-भूमिगोलकलनं दिग्दन्तिनः कुर्वते''।। इति।**

इत्थं राजयोगानां वैशिष्ट्यं दिङ्मात्रं प्रदर्शितम्। तेषां आनन्त्यात् विस्तारभिया च सर्वेषां योगानां निरूपणपुरस्सरमुपवर्णयितुं न प्रयतामहे। येऽत्र गुणाः ते ग्राह्याः। ये च दोषाः सदयं ते मर्षणीया इति साञ्जलिबन्धं सहृदयान् प्रार्थयेति शम्।

## पादटिप्पण्यः

1. **हो.शा.अ.**1 **पृ.सं.** - 6
2. **प्र.मा.अ-**1 **श्लो. सं.** - 9
3. **ल.पा.यो.अ** 1- **श्लो. सं.** - 7
4. **दे.के.पृ.सं.**-300 **श्लो. सं.** - 3005
5. **वि.मा.अ.**-5 **श्लो. सं.** - 32
6. **वि.मा.अ.**-5 **श्लो. सं.** - 34
7. **बृ.पा.हो.शा.अ.**-38 **श्लो. सं.** - 13
8. **जा.पा.अ.**-7 **श्लो. सं.** - 34
9. **बृ.जा.द.अ.टी.पृ.सं. - 120**
10. **जा.प.अ.**-7 **श्लो. सं.** - 119
11. **प्र.म.अ.**-9 **श्लो. सं.** - 48
12. **बृ.जा.अ.**-5 **श्लो. सं.** - 23

13. बृ.जा.अ.-13 श्लो. सं. - 2
14. बृ.जा.भ.टी.पृ.सं. - 256
15. बृ.जा.भ.टी.पृ.सं. - 256
16. बृ.जा.भ.टी.पृ.सं. - 256
17. सा.व.अ.-35 श्लो. सं. - 21
18. बृ.जा.चा.अ.भ.टी.पृ.सं. - 257
19. बृ.जा.अ.-13 श्लो. सं. – 2
20. सा.व.अ.-35 श्लो. सं. - 22
21. ल.जा.अ.-12 श्लो. सं. - 1
22. बृ.जा.च.यो.अ.-13 भ.टी.पृ.सं.- 259
23. बृ.जा.अ.-13 श्लो. सं. – 5
24. बृ.सं.आ.चा.अ.-3 श्लो. सं. - 2
25. स.व.अ.-13 श्लो. सं. - 8
26. बृ.जा.चा.अ.-13 श्लो. सं. - 4
27. बृ.जा.चा.अ.-13 श्लो. सं. - 5
28. बृ.जा.चा.अ.-13 श्लो. सं. - 6
29. बृ.पा.हो.अ.-38 श्लो. सं. - 11
30. बृ.जा.च.यो.-13 भ.टी. पृ. सं. - 258
31. सा.व.अ.-13 श्लो. सं. - 2
32. जा.पा.अ.-7 श्लो. सं. - 80
33. जा.पा.अ.-7 श्लो. सं. - 81
34. बृ.जा.अ.-13 श्लो. सं. - 6
35. जा.पा.अ.-7 श्लो. सं. - 82
36. द्वा.भा.अ.-3 श्लो. सं. - 12
37. बृ.पा.अ.-38 श्लो. सं. - 12
38. बृ.जा.अ.-13 श्लो. सं. – 7
39. बृ.जा.अ.-12 श्लो. सं. - 17
40. बृ.जा.अ.-11 श्लो. सं. - 3
41. बृ.जा.अ.-11 श्लो. सं. - 3
42. बृ.जा.अ.-11 भ.टी. पृ. सं. – 220
43. बृ.जा.अ.-11 श्लो. सं. - 4
44. बृ.पा.हो.शा.अ.-30 श्लो. सं. - 2
45. गौ.सं.पृ. सं. - 30
46. गौ.सं.पृ. सं. - 35
47. गौ.सं.पृ. सं. - 49
48. गौ.सं. पृ. सं. - 35
49. गौ.सं. पृ. सं. - 46
50. गौ.सं. पृ. सं. - 48
51. गौ.सं. पृ. सं. - 42
52. गौ.सं. पृ. सं. - 42
53. गौ.सं. पृ. सं. - 48
54. गौ.सं. पृ. सं. - 47
55. गौ.सं. पृ. सं. - 50

**परिशीलितग्रन्थाः**


१. लघुपाराशरी
२. प्रश्नमार्गः
३. देवकेरलम्
४. विद्यामाधवीयम्
५. बृहत्पाराशरहोराशास्त्रम्
६. बृहज्जातकम्
७. जातकपरिजातम्
८. द्वादशभावचन्द्रिका
९. गौतमसंहिता
१०. सारावली
११. बृहत्संहिता
१२. लघुजातकम्


*********